Shr

नं॰ २(ख)

महाभाष्य प्रदीपः २ अध्याय)
१३८ पत्राणि सं॰ १८२६
व्याकरण

सं. २ — ५८
हि

महाभारत हरिवंश
१३१० पत्राणि

सं. २

लिपिकाल सं. १८२५ वि

भा०कै०टि० १

श्रीगणेशायनमः॥ ॥समर्थः पदविधिः॥ ॥विधिरिति कोयं शब्द इति। अर्थो निश्चयात्तं संदेहे सति प्रश्नः। किं भावसाधनः उत कर्मसाधनः। तत्र भावसाधने पदानां विधीयमान
त्वात्कर्मणि षष्ठी। इतरत्र शेषे षष्ठी। तत्र ये सामर्थ्यभेदाच्छब्दभेद इति दर्शनं सा दृष्टपनिबंधनाच प्रसमिज्ञा तद्दर्शने क इति प्रश्नो विशिष्टशब्दनिर्द्धारणाय येत्वर्थभेदे पि श
ब्दस्यैक्यमिच्छंति तत्पक्षे ऽर्थभेदाच्छब्दभेदमारोप्य क इति प्रश्नः। विपूर्वादिति। विधविधान इत्यस्मा गणादिके न्यसयांतस्य निरसर्थे विपूर्वाद्धाञ इत्युक्तं। स्वरे चानयोर्भेदः।
इन्प्रत्ययांतस्याद्युदात्तत्वात् किप्रत्ययांतस्यांतोदात्तत्वात्तस्यैव प्रयोगदर्शनमुत्तरे हेतुः। कर्मसाधन इति। एतद्भावसाधननिवृत्त्यर्थमुक्तं। विधीयत इति वाक्यदर्शने स्व
स्वप्रति पसर्थो किंपुनरिति। कार्यविशेषस्येहानिर्दिष्टत्वात्प्रश्नः। इतरो वक्ष्यमाणकार्यविशेषान्पर्यालोच्याह। समास इति। अनंतरस्यापि परांगवद्भावस्यास्य
विषयत्वादनादरात्तन्निमित्तग्रहणाच्चातिप्रसंगनिरासस्य सिद्धत्वान्मुख्यप्रयोजनत्वाभावात्स्पष्टान्निर्दिष्टः कृतः। तत्र समासशब्देन संज्ञा वोच्यते समुदायो वा सं

श्रीगणेशायनमः॥ ॥समर्थः पदविधिः॥ ॥विधिरिति कोयं शब्दः। विपूर्वाद्धाञः कर्मसाधन इकारो विधीयते विधिरिति। किं पुनर्विधीयते। समासो
विभक्तिविधानं परांगवद्भावश्च। किं पुनरयमधिकार आहोस्वित्परिभाषा॥ ॥श्री॥ ॥श्री॥ ॥

ज्ञी। विभक्तिविधानशब्देन सामान्यविहितानां विभक्तीनां कर्मणि द्वितीयेत्यादिना यो नियमः स उच्यते। एवं हि पदविधिर्भवति। अथाप्येकवाक्यताश्रयणेन विभक्ती
नां विधाने तथापि पदांतरसंबंधेन यासां विभक्तीनां विधानमंतरंगत्वेन युक्त इति निर्द्धि· भक्तीनां ने विश इति तदाश्रयेण पदविधित्वमस्त्येव। तथा चोक्तं। निरपि पदं विशि
रपिपदमिति। तत्र विभक्त्यनवच्छिन्नत्वाद्विशिष्टविधाने कर्मविधान क्रियाया भवति। यथोक्तं। सामान्यपुषे रवयवपुषिः कर्मेति। कार्यविशेषानिर्देशादस्य पाणिष्ठमवग
सपणेथे पुरुषद्वयं दृष्ट्वा पृच्छति। किंपुनरिति। नन्वधिकारे स्मिन्पदविधिरित्यस्य ग्रहणमनर्थकं उत्तरेषां पदविधित्वाव्यभिचारात्। न समासादिविधिग्रहणात्परिभाषात्वनि राम० १
श्चयात्तदुपपत्तिः। एवं तर्हि युक्तायुक्तत्वापेक्षया प्रश्नः। तत्र यद्यधिकारपक्षस्य युक्तत्वं तदा न कर्तव्यं पदविधिग्रहणं। परिभाषाया युक्तत्वे कर्तव्यं। अधिकारपक्षे पि वा वि
संशया॰
ऽस्पष्टार्थं भविष्यति॥ ॥

कः पुनरिति॥ अस्योत्तरभाष्यं विज्ञेयः। आद्ये न तु तद्दिष्टेनैनमवितव्यं। अन्यथा किं पुनरयमधिकार इति प्रश्नो नोपपद्यते। अधिकारः प्रतियोगमिति। स्वरूपे पृष्टे फलाख्यानं तद्वारेण स्वरूपावबोधार्थं। अधिक्रियमाणस्य प्रतियोगमुपस्थाने सति तत्र निर्देशः फलं संपद्यते। परिभाषा पुनरिति। लिङ्गोपादाने न परिभाषा क्रियमाणा यत्र यत्र तल्लिङ्गोपलंभः तद्व्याप्नोतीत्यर्थः। प्रदेशान्तरेषु पराद्यर्थेता सामान्यादधिकारपरिभाषयोरभेदे न व्यवहारो भाष्यकारस्य अधिकारो नाम त्रिःप्रकार इति। तथा द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोरिति। कः पुनरत्रेति। कस्मिन्पक्षे यत्नस्य लाघवं भवति कस्मिन्वा गौरवमिति प्रश्नः। स्वरयितव्यमिति। स्वरितगुणेन युक्तं समर्थग्रहणं पठितव्यमित्यर्थः। तत्र स्वरितो गुणः क्रियारूपेण स्वरयितव्यमिति निर्दि

कः पुनरधिकारपरिभाषयोर्विशेषः। अधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे उपतिष्ठते। परिभाषा पुनरेकदेशस्था सती कृत्स्नं शास्त्रमभिज्वलयति प्रदीपवत्। तद्यथा। प्रदीपः सुप्रज्वलितः एकदेशस्थः सर्वं वेश्माभिज्वलयति। कः पुनरत्र प्रयत्नविशेषः। अधिकारे सति स्वरयितव्यं। परिभाषायां तु सर्वमपेक्ष्यं। तथेदमपरं द्वैतं भवति। एकार्थीभावो वा सामर्थ्यं स्यादपेक्षा वेति। तत्रैकार्थीभावे सामर्थ्येऽधिकारे च सति समास एकः संगृहीतो भवति। विभक्तिविधानं परांगवद्भावश्चासंगृहीतः। अपेक्षायां पुनः सामर्थ्येऽधिकारे च सति विभक्तिविधानं परांगवद्भावश्च संगृहीतो भवति। समासस्त्वेकोऽसंगृहीतः। अन्यत्र खल्वपि समर्थग्रहणानि युक्तग्रहणानि च कर्तव्यानि भवन्ति। क्वान्यत्र। इदुदुपधस्य चाप्रत्ययस्य इत्येवमादिषु। "इसुसोः सामर्थ्ये" न च वा राहेर्व युक्त इति॥ " "

ष्टः यथा स्वेतो गुणः स्वे ततेइति। पदविधिग्रहणं चात्र पक्षे न कर्तव्यमित्यर्थो दुक्तं भवति। सर्वमपेक्ष्यमिति। यावन्ति पदकार्याणि तानि सर्वाण्यपेक्ष्य पदविधिशब्दोपादानेन परिभाषा कर्तव्येत्यर्थः। अन्यास्वपि परिभाषासु यल्लिङ्गमुपादीयते तल्लिङ्गयुक्तापेक्षा क्रियते द्वैतमिति। द्वयो भावो द्विता तत्र भवं द्वैतं संशयरूपेता नमुच्यते। अथवा द्वाभ्यामिते प्रकारद्वयेन विरुद्धलाद्भिन्नाधारवर्तिना युक्तं वस्तु द्वीतं तत्र भवं द्वैतं तदेव संशयज्ञाने। एकार्थीभाव इति। यत्र पदानि स्वप्रसर्जनीभूतस्वार्थानि निवृत्तस्वार्थानि वा प्रधानार्थोपादानाद्यर्थान्तराभिधायीनि वा एकार्थीभावः। परस्पराकांक्षारूपाव्यपेक्षा समास एक इति। तत्रैवैकार्थीभावसद्भावात्॥ ॥ श्री॥ ॥७॥ ॥

= यर्थीति- प्राधान्येन स्वार्थाभिधाने: समर्थानीत्यर्थः। १२

तत्रेति। एकार्थीभावः सामर्थ्यमधिकार इत्येकः पक्षः। व्यपेक्षा सामर्थ्यमधिकार इति द्वितीयः पक्षः। द्विविधं सामर्थ्यमधिकार इति तृतीयः। एवं परिभाषायामपि त्रयः पक्षा इति षट् पक्षी संभवे एकार्थीभावः परिभाषा चेति निर्णयः। अभिन्नतरकमिति। उभयविधे सामर्थ्ये ऽऽश्रीयमाणे ऽर्थस्य भेदात्सूत्रस्य भेदः स्यात्। भिन्नेन सामर्थ्येन भिन्नेषु वाक्येषु उपस्थानात्। व्यपेक्षायामपि सामर्थ्ये यद्यपि सूत्रमभिन्नं भवति तथाप्येकार्थीभावे सामर्थ्ये दोषाभावात्प्रकर्षयोगाद् भिन्नतरकमित्युच्यते। तत्र परांगवद्भावेन निमित्तग्रहणाद्दोषाभावः। विभक्तिविधाने पि कारकविभक्तिषु क्रियाकारकरूपोऽपेक्षाविनाभावित्वात् उपपदविभक्तिषु युक्तयोगग्रहणस्य भावात् क्वचिद्यायोगस्यापेक्षेपादेतदनुपस्थानेऽपि न दोषः। परिभाषायां च सुब्धातुप्रभृतयः सर्वोत्तरयः संगृहीता भवंति। एकार्थीभावे चेहाश्रिते ऽन्यत्र युक्तग्रहणं समर्थग्रहणं च कृतमेवेति तत्रा

व्यपेक्षायां पुनः सामर्थ्ये परिभाषायां च सत्संख्यावान्व्याकरणे पदगंधो नाम स सर्वैः संगृहीतो भवति। समासस्त्वेकोऽसंगृहीतः। तत्रैकार्थीभावः सामर्थ्यं परिभाषा चेत्येवं सूत्रमभिन्नतरकं भवति। एवमपि क्वचिद्वक्तव्यं क्रियते। क्वचिच्च वक्तव्यं न क्रियते। अकर्तव्यं तावत् क्रियते। समर्थानां प्रथमाद्वेति। कर्तव्यं न क्रियते। कर्मण्यण् समर्थादिति। ननु च गम्यते तत्र सामर्थ्यं कुंभकारो नगरकार इति। स तु गम्यते। उत्सन्ने तु प्रत्यये। स एव तावत्समर्था उत्पाद्यः॥ ॥

पि न दोषः। समर्थानामिति। घकालतनेषु कालनाम्न इत्यलुग्विधानाल्लिङ्गाद्विभक्त्यंतात्तद्धित उत्पद्यते इति पदविधित्वादेतत्परिभाषोपस्थितौ व्यसामर्थ्ये प्रत्ययाप्रसंगात्। कर्मण्यणीति। पंचकप्रातिपदिकार्थपक्षे प्रातिपदिके नैव कर्मण उपादानान्नास्ति पदविधित्वं। त्रिकादिपक्षे तु विभक्तिवाच्यत्वात्कर्मणः पदविधित्वादेतत्परिभाषोपस्थानान्नास्ति दोषः। ननु चेति। यदि कुंभकारशब्दः सामर्थ्याभिधायी चासामर्थ्याभिधायी च स्यात् ततोऽसमर्थाभिधायिप्रयोगनिवृत्त्यर्थो यत्नः कर्तव्यः स्यान्न त्वन्यथेत्यर्थः। स एव तावदिति। यथा समासादयोऽसमर्थानां माभूवन्निति एवमर्थं वचनं क्रियते तद्वदत्रापि समर्थग्रहणमसामर्थ्ये प्रत्ययनिवृत्त्यर्थं कर्तव्यमित्यर्थः। प्रतिविधानं तु सुज्ञानत्वाद्भाष्यकृता नोक्तं। यत उपपदमिति महत्याः संज्ञायाः करणं प्रत्ययस्य पदाश्रयत्वे सति समर्थपरिभाषाव्याप्त्यर्थमेव॥ ॥

अर्थेति। प्रधानपर्यनुयोगद्वारेण सूत्रस्यैवाक्षेपः। यद्यप्यनेन सामर्थ्यं न विधीयते न हि स्वतोऽसमर्थस्य सामर्थ्यं वचनेन कर्तुं पार्यते। तथापि पदविधौ सामर्थ्योपस्थानार्थत्वात् असम-
र्थे पदस्य प्राधान्यमुच्यते। समस्यत इति। यद्यपि समाससंज्ञामात्रं विधीयते। तथाप्यबुधबोधनाय भिन्नयोः शब्दयोः संश्लेषः प्रक्रियायां क्रियत इति समस्यत इत्युक्तं। प्रश्नेति। असति सूत्रे
द्वितीयान्तमात्रं श्रितादिभिः समस्येताविरोधात्। एकार्थीभावाभावेऽपि वचनात्समाससंज्ञा स्यात्। अनर्थकस्यापि च समासस्य वचनात्प्रातिपदिकसंज्ञा स्यात्। विध्यर्थत्वसंभवे च समासग्रहण

अथ समर्थग्रहणं किमर्थं। वक्ष्यति द्वितीया श्रितादिभिः समस्यते। कष्टश्रितो नरकश्रित इति। समर्थग्रहणं किमर्थं। पश्य देवदत्त कष्टं श्रितो विष्णुमित्रो गुरु-
कुलं। तृतीया तत्कृतार्थेन गुणवचनेन। शंकुलाखण्डः किरिकाणः। समर्थग्रहणं किमर्थं। किं करिष्यसि शंकुलया खण्डो धावत्युपलेन। चतुर्थी तदर्थार्थबलि-
हितसुखरक्षितैः। गोहितं वृषभहितं। समर्थग्रहणं किमर्थं। सुखं गोभ्यो हितं देवदत्ताय। पंचमी भयेन। वृकभयं। चोरभयं। समर्थग्रहणं किमर्थं। गच्छ त्वं मा
वृकेभ्यो भयं देवदत्ताद्यज्ञदत्तस्य। षष्ठी सुबन्तेन समस्यते। राजपुरुषः। ब्राह्मणकंबलः। समर्थग्रहणं किमर्थं। भार्या राज्ञः पुरुषो देवदत्तस्येति। सप्तमी
शौण्डैः। अक्षशौण्डः। समर्थग्रहणं किमर्थं। कुशलो देवदत्तो अक्षेषु शौण्डः पिबति पानागारे॥ ॥

स्य नियमार्थत्वानुपादानाद्वाक्यस्य प्रातिपदिकसंज्ञानिषेधः कर्तव्य एव स्यात्। एकार्थीभावाभावेऽपि चोत्तरपदार्थस्य बाह्यसंबन्धिनं प्रतियोग्यताहानाद्विभक्तयः स्युरेव। खण्डो धावती-
ति। तृतीयान्तार्थकृतत्वमत्रास्तीति समासः स्यात्॥ ॥श्री॥ ॥छ॥ ॥छ॥ ॥श्री॥ ॥

=भसन्नेतेति॰शेवरीणं सप्तमीनांतद्वसप्तमी॰बादहीनवाविभांतोनश्पदकसमाससंबंधिद्वितीयांतंपूर्वपदंभवत्यर्थान्तः॰१=

भा०कै०२ महल्लकष्टमिति। अस्सेवात्र श्रयणाक्रियया सामर्थ्येमितिप्रश्नः। यद्यत्रकष्टश्रितशब्दयोः समासः स्यात्तदा महल्लकष्टश्रितइति स्यात्। यथा पित्रयाणां प्रदानां समासः स्यात्तथा पुन

२ रपदे विधीयमानमात्वं मध्यमपदेन स्यात्। अथापि त्रयाणां समासे कृते सन्महदिति द्वयोः समासः एवं च महाकष्टश्रितो महाकष्टश्रितइति। अत्राहीने द्वितीये नियः स्वरो भव

3 ति स एव समासस्येत्स नेन। तथापि महारण्यातीतइति द्विपदे समासे कृते याथादिस्वरः। त्रिपदे तु समासे सन्महदिति द्वयोस्तत्पुरुषे कृते सति महारण्यशब्दः समासस्वरे

णांतोदात्तः स्यात्। यथा पूर्वशाला प्रियइत्यत्र शालाशब्द उदात्तः। अन्येत्वाहुः। त्रयाणां समासे कृते प्रधानार्थाभिधायित्वान्महत्कष्टशब्दयोः परस्परं संबंधा

भावात्सूज्यमानत्वं विशेषणविशेष्यत्वं च नास्तीति समासो न स्यात्। नतञ्चात्वं न स्यात्। अहीने द्वितीयेति महच्छब्दस्य प्रकृतिस्वरश्च प्रसज्येत। न वा भवतीति। यथा भार्या राज्ञः

अथ क्रियमाणेपि सामर्थ्ये ग्रहणेइहकस्मान्न भवति। महल्लकष्टंश्रितइति। नवा भवति महाकष्टश्रितइति। भवति यदैतद्वाक्यं महल्लकष्टं महा[redacted]क

ष्टं महाकष्टंश्रितो महाकष्टश्रितइति। यदा त्वेतद्वाक्यं भवति महल्लकष्टंश्रितइति तदा न भवितव्यं। तदा च प्राप्नोति। तदा कस्मान्न भवति। कस्य कस्मान्न भव

ति। किं द्वयोराहोस्विद्बहूनां। बहूनां कस्मान्न भवति। सुप्सुपेति वर्त्तते। ननु च भो अपाकृतो शास्त्राणि प्रवर्त्तन्ते। तद्यथा। प्रातिपदिकादिति वर्त्तमाने अन्य

स्माच्चान्यस्माच्च प्रातिपदिकाउत्सन्निर्भवति॥ ॥ ॥

पुरुषो देवदत्तस्येत्यत्रासंतमसमासो नैवमिहेतिभावः। भवति यदेति। श्रितशब्दमनपेक्षमाणयोः परस्परापेक्षायां महल्लकष्टयोः समासे कृते श्रितशब्देन समासः। कस्य कस्मा

दिति। सामान्यनिर्देशः पदद्वयात्मकस्य पदत्रयात्मकस्य च समुदायस्य प्रदर्शनार्थः। बहूनां कस्मान्न भवतीति। द्वयोरपि श्रितापेक्षया कर्मत्वे श्रितेन सामर्थ्ये द्वयोरप्यस्ति। कष्टस्यैव वा

कर्मत्वे तद्वारेण महतोपि श्रितेन सामर्थ्यमस्तीतिभावः। सुप्सुपेति वर्त्ततइति। संख्याया विवक्षितत्वादेकस्यैव सुबंतस्यैकेन सुबंतेन समासस्ततो बहूनां न भवतीत्यर्थः। यथा एम०

पशुना यजेतेत्यनेकस्य पशोरुपादानाभावस्तथेहापि। ननु च भोइति। यथा ब्राह्मणो न हन्तव्य इति सर्वस्य ब्राह्मणस्य हननप्रतिषेधस्तथेहापि बहूनां समासेन भाव्यमितिभावः॥ २

=अकृतो प्रवर्त्तमानस्य शास्त्रस्यापि तदा श्रय बहुव्यक्तिषु प्रवृत्तिर्न दृष्टेत्या[redacted]ह॰ यथापशुनेति॰१=

आकृतिस्त्विति। एकैकस्यां व्यक्तौ जातिनिमित्तप्रत्ययाभिधानसद्भावात्तत्र यथा प्रातिपदिकसमुदायस्य प्रातिपदिकत्वात्ततो विभक्तीनामनुत्पत्तिस्तथा सुबन्तसमुदायस्याश्रितेन समासा भावः। प्रत्ययस्य तु बन्तसमुदायस्य संचिकीर्षितस्य प्रधानत्वाद्गुणत्वाच्च प्रातिपदिक[redacted]स्यावयवयोश्च सुबन्तयोराधारगताया एकत्वसंख्याया विवक्षणात्। ब्राह्मणसमुदायस्य हननेनु ब्राह्मणार्थो निष्क्रान्त एव भवतीति ब्राह्मणो न हन्तव्य इत्यादौ निषेधे संख्या न विवक्ष्यते। सापेक्षमसमर्थं भवतीति। न्यायोयं। वृत्तौ तु उपसर्जनपदेन प्रधानार्थाभिधायिना

स्यसमेवमेतत्। आकृतिस्तु प्रत्येकं परिसमाप्यते न समुदाये। यावति परिसमाप्यते प्रातिपदिकादि तावति उत्पत्त्या भवितव्यं प्रत्येकं चैतत्परिसमाप्यते न समुदाये। एवमिहापि यावत्स्वेतत्परिसमाप्यते सुप्सु पेति तावतः समासेन भवितव्यं। द्वयोश्चैतत्परिसमाप्यते न[redacted]बहुषु। द्वयोस्तर्हि कस्मान्न भवति। असामर्थ्यात्। कथमसामर्थ्यं। सापेक्षमसमर्थं भवतीति। यदि सापेक्षमसमर्थं भवतीत्युच्यते। राजपुरुषोऽभिरूपः राजपुरुषो दर्शनीयः। अत्र वृत्तिर्नेप्राप्नोति। नैष दोषः। प्रधानमत्र सापेक्षं। भवति च प्रधानस्य सापेक्षस्यापि समासः। यत्र तर्ह्यप्रधानं सापेक्षं तत्र वृत्तिस्तेन प्राप्नोति। देवदत्तस्य गुरुकुलं देवदत्तस्य गुरुपुत्रः देवदत्तस्य दासभार्येति। अत्र वृत्तिर्नेप्राप्नोति। नैष दोषः। समुदायापेक्षात्र षष्ठी सर्वं गुरुकुलमपेक्षते। यत्र तर्हि न समुदायापेक्षा षष्ठी तत्र वृत्तिर्नेप्राप्नोति॥ ॥

भावं। स्वविशेषणापेक्षायां च तस्य प्राधान्यमिति कथमेकस्यैकदा प्राधान्यमेकार्थीभावश्चस्यात्। इतरस्तु वचनमेतदितिमत्वाचोदयति। यदि सापेक्षमिति। भवति चेति॥ प्राधान्यादेवानेकेनोपकारकेणोपकार्यत्वाविरोधात्। सामान्यप्रयोग इति लिङ्गदर्शनाच्च। समुदायापेक्षेति। गुरुकुलादिना समुदायेन समुपजनिते व्यतिरेके देवदत्तस्येति षष्ठी स्ववयवद्वारकश्च देवदत्तस्य समुदायेन संबन्ध इति सामर्थ्यादवयवमपि विशेषणं स्पृशति। तदुक्तं। समुदायेन संबन्धो येषां गुरुकुलादिना। संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह इति॥ ॥

=किमोदनइत्यादयस्तस्सामर्थ्येपिभाष्यकारवचनात्साधवः।२=

भा०कै० २ किमोदनइति। केषां शालीनां किं कलमा नामथ रक्तानामन्येषांवौदनइति प्रश्नः। सक्ताढकमिति। आपणीयानां सक्तूनामाढकमित्यर्थः। कुतोभवानिति। कस्मात्पाटलिपुत्रादुवानागतइत्यर्थः। अनेकत्वात्पाटलिपुत्रस्य तत्रत्यवानांवा प्रश्नः। अत्रोपपत्तिमाचामिति। इहचापीति। समुदायसंबंधे सतिसामीप्यादेरपिप्रतिपत्तिप्रसं
४ गइत्यर्थः। नैषेति। गुर्वपेक्षया न षष्ठी संबंधिशब्दत्वाच्चस्वार्थवदपेक्षाया वृत्त्यावयवहानादिवसेवहत्तिः। उक्तंच। संबंधिशब्दः सापेक्षो नित्यंसर्वः प्रयुज्यते। वाक्यव
५ त्तद्विदवृत्तिर्नप्राप्नोति२

किमोदनः शालीनां। सक्ताढकमापणीयानां। कुतोभवान्पाटलिपुत्रकइति। इहचापिदेवदत्तस्यगुरुकुलंदेवदत्तस्यगुरुपुत्रोदेवदत्तस्यदासभार्येति। यद्येषासमुदायापेक्षाषष्ठीस्यान्नैतन्नियोगतोगम्येत। देवदत्तस्ययोगुरुस्तस्ययःपुत्रइति। किंतर्ह्यन्यस्यापिगुरुःपुत्रोदेवदत्तस्यकिंचिदितिसेषोर्थोगम्येत। यत स्तुखल्वनियोगतोदेवदत्तस्ययोगुरुस्तस्ययःपुत्रइसेषोर्थोगम्यतेअतोमन्यामहेनैषासमुदायापेक्षाषष्ठीति। अन्यत्रखल्वपिसमर्थग्रहणोसापेक्षस्या पिकार्यंभवति। क्वान्यत्र। इसुसोः सामर्थ्ये। ब्राह्मणस्यसर्पिष्करोतीति। तस्मान्नैतच्छक्यंवक्तुंसापेक्षमसमर्थंभवतीति। वृत्तिस्तर्हिकस्मान्नभवतिम हत्कष्टंश्रितइति। सविशेषणानांवृत्तिर्नवृत्तस्यवाविशेषणंनप्रयुज्यतइतिवक्तव्यं। यदिसविशेषणानांवृत्तिर्नवृत्तस्यवाविशेषणंनप्रयुज्यतइत्यु च्यतेदेवदत्तस्यगुरुकुलंदेवदत्तस्यगुरुपुत्रोदेवदत्तस्यदासभार्येत्यत्रवृत्तिर्नप्राप्नोति। अगुरुपुत्रादीनामितिवक्तव्यं॥ ॥ ॥

सापेक्षाद्धिवृत्तावपिनहीयतेइति। अन्यत्रेति। ततोवक्तव्यंसापेक्षमसमर्थंभवतीति। वाचनिकेह्यसामर्थ्ये यथासर्पिःकालकमितिषत्वंनभवतिसमानाधिक एम० रणमसमर्थवदितिवचनात्। एवंब्राह्मणस्यसर्पिष्करोतीत्यत्रापिनस्यात्। सएवाह। वृत्तिस्तर्हिकस्मादिति। सविशेषणानामिति। वृत्तिर्नेतिवचनात्खलादिभवतेवा। पूर्वोक्तानुसा ४
रेणायमपिन्यायएवोक्तः॥ ॥ ॥

६

नवक्तव्यमिति। न्यायसिद्धत्वात्। इह समानार्थेनेति। वाक्येनाभिधाने प्राप्ते समासश्चारभ्यमाणस्तत्समानार्थ एव न्याय्यः। महत्कष्टश्रित इति। यः कष्टश्रितः स महत्कर्म करोतीत्यादि प्रतीयते क्रियाविशेषणं वा महत्त्वं प्रतीयते न तु कष्टविशेषणं। न ब्रूम इति। लोके प्रयुज्यमानस्य साधुत्वमसाधुत्वं च विचार्यते गोगाव्यादिशब्दवत्। महत्कष्टश्रित इत्ययं तु महत्कष्टश्रित इत्येतद्वाक्यार्थेनैव प्रयुज्यते प्रयुक्तानां चेदमन्वाख्यानं। अतो नात्र समासो भविष्यतीत्यर्थः। नञ्समासो गमक इति। गाव्यादिवदसाधुर

तर्हि वक्तव्यं सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यते अगुरुपुत्रादीनामिति। न वक्तव्यं। वृत्तिस्तर्हि कस्मान्न भवति। अगमकत्वात्। इह समानार्थेन वाक्येन भवितव्यं समासेन च यश्चेहार्थो वाक्येन गम्यते महत्कष्टश्रित इति नासौ जातुचित्समासेन गम्यते महत्कष्टश्रित इति। एतस्माद्धेतोर्ब्रूमोऽगमकत्वादिति न ब्रूमोऽपशब्दः स्यादिति। यत्र च गमको भवति भवति तत्र वृत्तिः। तद्यथा। देवदत्तस्य गुरुकुलं देवदत्तस्य गुरुपुत्रो देवदत्तस्य दासभार्येति। तत्र यद्यगमकत्वं हेतुर्नार्थः समर्थग्रहणेन। इहापि भार्याराज्ञः पुरुषो देवदत्तस्येति योऽर्थो वाक्येन गम्यते नासौ जातुचित्समासेन गम्यते भार्याराजपुरुषो देवदत्तस्येति। तस्मान्नार्थः समर्थग्रहणेन। इदं तर्हि प्रयोजनं। असमर्थसमासो नञ्समासो गमकः तस्य साधुत्वं मा भूत्। अकिंचित्कुर्वाणं। अमाषं हरमाणं। अगाधादुत्सृष्टमिति। एतदपि नास्ति प्रयोजनं। एवं रूपकस्य चिन्नञ्समासस्यासमर्थस्य गमकस्य साधुत्वं वक्तव्यं। असूर्यंपश्या

''निमुखानि। अपुनर्गेयाः श्लोकाः अश्राद्धभोजी ब्राह्मण इति॥ ॥

पि गमकत्वाभिमतो लोके प्रयुज्यते तस्मात्सति समर्थग्रहणे साधुत्वं मा प्राप्तं तत्रस्त्वनिरसमर्थमेतदित्यर्थः। किंचिदकुर्वाणं माषमहरमाणं गाधादनुत्सृष्टमित्येतेष्वर्थेष्वेतेन नञ्समासाः। असूर्यंपश्यानीति। सूर्यकर्मिका या दृशिक्रिया तया नञः संबन्धो न तु सूर्यस्य यास नये लसामर्थ्यं। अपुनर्गेया इति। गानेन नञः संबन्धो न तु पुनःशब्दार्थेन। अश्राद्धभोजीति। भुजिना नञः संबन्धो न तु श्राद्धेन। श्राद्धभोजननिषेधावगमात्॥ ॥ ॥ ॥ ॥

=असुर्थेत्यसामर्थ्यमिति· अयं भावः। एकक्रियायामुभयोः सन्निपातात् सामर्थ्ये समाश्रीयमाणे कृतः सर्वोऽपि निकपेयाद्येसमासापत्तिः। नञ्समासस्य च एवं नयास्वीकरणं तु लक्ष्यदर्शिभिः प्रायो ज्ञातुं ·एकार्थेनेन लक्षणदर्शिभिः ततः कर्तव्यं समर्थग्रहणमिति· ३=

भा०कै०२
५

अनपुंसकस्येति। प्रसज्यप्रतिषेधपक्षेऽयमसमर्थसमासः। असमर्थेन नञ्समासानां केषांचित्साधुत्वज्ञापनायानपुंसकस्येति प्रसज्यप्रतिषेध आश्रीयते। पर्युदासे पि ह्य त्र नक्षतिः। तदेवं समर्थग्रहणे क्रियमाणे विध्यर्थमेतेषां ग्रहणं कर्तव्यं तदेवा क्रियमाणे नियमार्थं भविष्यतीत्यर्थः। एतस्येवेति। अमेदृमाश्रिसेकवचनेकृते। एतेषां बेरुलादृरुवचनप्रसंगः। असमर्थसमासेपि क्रियायामुभयोः सन्निपातादेकार्थीभावस्तद्वारकोऽस्त्येव। अथक्रियमाणेपीति। अबुधबोधनार्थं करणेऽभ्युपगमसामानेइत्यर्थः। किं समर्थं नामेति। यद्यपि पूर्वमेकार्थीभावो वा सामर्थ्यं व्यपेक्षा वेत्याद्युक्तं तथाप्येतद्विचारस्याखंतनस्य। एतस्मिन्द्वे न तु पूर्वं व्यवहारः कृतः। पृथगर्थानामिति। एकार्थीभावं तावत्सामर्थ्यं दर्शयति। परस्ताद्व्यपेक्षालक्षणं दर्शयिष्यति। पृथगर्था येषां पदानां तानि पृथगर्थानि पदानि। वाक्ये हि राज्ञः पुरुष इत्यत्र राजश

स्यइनपुंसकस्येत्येतन्नियमार्थं भविष्यति। एतस्य वासमर्थसमासस्य नञ्समासस्यागमकस्यसाधुत्वं भवति नान्यस्येति। तस्मान्नार्थः समर्थग्रहणेना। अथक्रियमाणेपि समर्थग्रहणे समर्थमित्युच्यते। किं समर्थं नाम। पृथगर्थानामेकार्थीभावः समर्थवचनं। पृथगर्थानां पदानामेकार्थीभावः समर्थमित्युच्यते। क्व पुनः पृथगर्थानि क्वैकार्थानि। वाक्ये पृथगर्थानि राज्ञः पुरुष इति। समासे पुनरेकार्थानि राजपुरुष इति॥ ॥ ॥

ब्दो राजार्थमेवाचष्टे पुरुषशब्दोपि पुरुषार्थमेव। वृत्तौ तु राजपुरुष इत्यत्र राजशब्दोपि पुरुषार्थमेवाचष्ट इति द्वयोरेकार्थीभावो भवति। अथवान्यएवावयवार्थानन्वितः समुदायार्थः प्रादुर्भवतीति तदपेक्षयैकार्थीभाव उच्यते पांसूदकवदेकभावापन्नत्वात्। यद्यपि शब्दांतरमेव वृत्तिरवयवा वर्णावदनर्थकास्तथापि सादृश्यपात्तत्वाध्यवसायं पदानामाश्रित्य पृथगर्थानामेकार्थीभाव इत्युक्तं। समर्थवचनमिति। समर्थशब्दस्य वाच्य इत्यर्थः। कर्मणि ल्युट्। क्व पुनरिति। पृथगर्थत्वमेकार्थत्वं च विरुद्धत्वादेकस्मिन्विषये न संभवतीति प्रश्नः। राज्ञः पुरुष इति। राज्ञ इत्यनेन परेण राजार्थो नियतसंबंध्यपेक्षयोद्भूतसंबंधो विशेषणभावमापन्नोऽभिधीयते। पुरुष इत्यनेन तु पुरुषार्थः स्वनिष्ठो विधीयमानत्वात्प्राधान्यमापन्नोऽभिधीयते। वृत्तौ भेदस्य निवृत्तेनान्तरधिष्ठानत्वात्पि संबंधस्यांतर्भावात्षष्ठी निवर्तते। सेयं वचस्वाभाविकी निवृत्तिः सुपो धातुप्रातिपदिकयोरि

=संबंधितेन संबंधिनो नियतत्वं न तु पुरुषत्वादिविशेषरूपेणेति बोध्यं· २=

=पुरुषार्थमेवेति· पुरुषार्थान्वितमेव स्वार्थं स्वापपनीत्यर्थः॥५= अजहत्स्वार्थामुक्त्वा जहत्स्वार्थामाह· अथवेति·५= शब्दांतरमेवेति· यथापदानामसत्वात्तन्नायवहारो गौणत्वात्ते चामे कार्यव्यवहारोपि नदेकार्थीभाव इति विप्रसपेनोक्तं· साहचर्यादिति· पृथक्त्वेन सत्वेवा कामयसंतं तथापि दे

(right margin, vertical:) ...भावयत्यात्मानमिति...॥ — पृथगर्थत्वमेकार्थत्वं ... तुल्यत्वात् ...

राम०
५

किमुच्यत इति। एवं हि वाक्ये पदानां पृथगर्थत्वं स्याद् द्वयोरेकैकविशिष्टार्थो न प्रतीयेत वृत्तौ च पुरुषमात्रप्रतीतौ स्यादेकार्थीभावः। यत्र तु वृत्तिवाक्ययोरेक एवार्थः प्रतीयते तत्र तासां मध्ये भे
दोऽपि नास्ति। नापि ब्रूम इति। वाक्ये पृथगर्थत्वेऽपि पदानामाकांक्षायोग्यतावशाद् विशेषणविशेष्यभावाद् विशिष्टार्थप्रतीतिः। वृत्तावपि विशिष्ट एवार्थो राजपुरुषशब्दाभ्यामभिधीयत
इति कुतोऽन्यस्यानयनं। न चैतावता वृत्तिवाक्ययोरेकार्थता। यथा ब्राह्मणानां शतं भोज्यतां शतं ब्राह्मणा भोज्यन्तामिति सत्यपि कार्यस्याभेदे शब्दार्थो भिद्यते तथेहापीस
र्थः। सुब्लोप इति। एकार्थीभावाभावकृतोऽपि विशेष एकार्थीभावकृत एवोच्यते। सन्निधानासन्निधानाभ्यां क्रियाभिनिर्वृत्तौ पदार्थानां कारणत्वात्। यथा वर्षकृतं तु
भिक्षं वर्षकृतं दुर्भिक्षमिति चोच्यते। तत्र राज्ञः पुरुष इति वाक्ये भेदाधिष्ठानस्य संबंधस्य प्रत्यायिपयिषितत्वाद् विभक्त्या तस्य मसायपितुमशक्यत्वान्नास्ति सुब्लोपः।

किमुच्यते पृथगर्थानीति। यावता राज्ञः पुरुष आनीयतामित्युक्ते राजपुरुष आनीयते। राजपुरुष इति च स एव। नापि ब्रूमोऽन्यस्यानयनं भवतीति। कस्तर्ह्ये
कार्थीभावकृतो विशेषः। सुब्लोपो व्यवधानं यथेष्टमन्यतरेणाभिसंबंधः स्वर इति। सुब्लोपो भवति वाक्ये। राज्ञः पुरुष इति। समासे तु न भवति राजपुरुष इ
ति। व्यवधानं भवति वाक्ये। राज्ञः ऋद्धस्य पुरुष इति। समासे तु न भवति राजपुरुष इति। यथेष्टमन्यतरेणाभिसंबंधो भवति वाक्ये। राज्ञः पुरुषः पुरु
षो राज्ञ इति। समासे न भवति। राजपुरुष इति। द्वौ स्वरौ भवतो वाक्ये राज्ञः पुरुष इति। समासे पुनरेक एव राजपुरुष इति।। एत एकार्थीभावकृता विशेषाः।।

समासे कृते भेदनिवृत्तौ तदाश्रयस्य संबंधस्योपरमात् स्वाभाविकी सुब्लोपनिवृत्तिः सैव शास्त्रेणानुज्ञायते। तदेवं सुब्लोपभावाभावाभ्यामर्थस्य भावाभावानुमानं वाक्यसमासयोः।
व्यवधानमपि सत्यर्थभेदे दृष्टं। यथा भार्या राज्ञः पुरुषो देवदत्तस्येति। असति न दृष्टं। देवदत्त इत्यत्र पदमध्ये पदान्तरस्य क्षेप्तुमशक्यत्वात्। यथेष्टमिति। वाक्येऽनियतपौर्वा
पर्येण पदानां प्रयोगः। समासे तु नियतपौर्वापर्यः स चार्थभेदनिबंधनः। यथा कर्क इति प्रयोक्तव्ये ककर इति न प्रयुज्यते। द्वौ स्वराविति। अर्थभेदे स्वरभेदो दृश्यते। य
था देवदत्त गामभ्याजेति। तदभेदे न दृश्यते यथा घट इति। अत्र राज्ञः पुरुष इति द्वेऽपि पदे नित्स्वरेणाद्युदात्ते। राजपुरुष इति समासान्तोदात्तः।। ॥ ॥

=सिद्धेशब्दार्थसंबंध इत्युक्तेः कथं वाचनिकत्वमत आह। वचनेनेति। १= अंतश्चतवै इति। आद्यसमासेत्वरविधायकमंत्रं समासे। ४= संख्याभेदावसायोदृष्टव्य इति। तथाच विभक्त्युपस्थितसंख्याविशेषाप्रसायकत्वेनैतुनाअभिन्नार्थकत्वं साध्यं न तु संख्याविशेषाप्रसायकत्वमात्रेणेति। द्विपुत्रो मासजात इ

भा०कै० २ ६ 6

वाचनिकानीति। वचने नैवं श्रुतानामन्वाख्यानाद्व्यभिचारान्नानुमानं सुब्लोपादिकमर्थाभेदसेसर्थः। यथा पयः प्रयोजयतीत्यत्र विनापि विभक्त्या कर्तृकर्म प्रतीति
र्भवति पंचकप्रातिपदिकार्थदर्शनेन तथा राजपुरुष इत्यत्र समासे वार्थभेदे राजपदमेव संबंधमभिदध्यात्। अर्थाभेदे च सुब्लोपो दृष्टः। यथा वर्षासु जः गोषुचर इति।
तथा हत्त्वा वपि प्रयोगानियमो दृश्यते। अंतादी अपाद्यं तेजा तपुत्रः पुत्रजात इति। वाक्ये च प्रयोगनियमो धवश्च खदिरश्चेति। न हि भवति च खदिरश्च धव इति।
ऐकस्वर्यं च दृश्यते वाक्ये। तीक्ष्णेन परशुना रश्च व्रिति। अर्थाभेदे च स्वरभेदः। कन्ते वै अन्वेतवे इति। अंतश्चतवे युगपत्तवै चांतश्च युगपदित्यत्र स्वरः। सं
ख्याविशेष इति। वाक्ये उपसर्जनपदानि विभक्त्यर्थाभिधायित्वात् संख्याविशेषयुक्तस्वार्थं प्रतिपादयंति। समासे तं तद्भूतस्वार्थं प्रधानार्थमभिदधतीत्य

किं तर्हि वाचनिकान्येतानि। आह हि भगवान् सुपो धातुप्रातिपदिकयोः उपसर्जनं पूर्वं समासस्यांत उदात्तो भवतीति। इमे त्वर्थकार्थीभावकृता विशेषाः।
संख्याविशेषो व्यक्ताभिधानं उपसर्जनविशेषणं च योग इति। संख्याविशेषो भवति वाक्ये। राज्ञः पुरुषः राज्ञोः पुरुषः राज्ञां पुरुष इति। समासे न भवति राजपु
रुष इति। अपस्तिकारणाये नैतदेवं भवति। किं कारणं। योसौ विशेषवाची शब्दस्तदसान्निध्यात्। अंग हि भवांस्तमुच्चारयतु गंस्यते स विशेषः॥ ० ॥

=संख्याविशेषाप्रतीतिरूप=
=कार्यैणैअभिन्नार्थप्रसाधके=
=त्वानुमानं अप्रयोजकं कार्यं=
=स्यादेतं तरेण सिद्धत्वादभिका=
=र्थप्रसाधकत्वस्य न दोष इत्याशा=
=वादिसाह। अस्तीत्यादि। २=

भेदैकत्वसंख्यां गमयंति। संख्याविशेषाणां अविभागेनावस्थानमभेदैकत्वसंख्या। यथोक्तं। यथौषधिरसाः सर्वे मधुन्याहितशक्तयः। अविभागे न वर्त्तंते तां संख्यां ता
दृशीं विदुरिति। अथवा परित्यक्तविशेषं संख्यासामान्यमभेदैकत्वसंख्या। तदुक्तं। भेदानां वा परित्यागात् संख्यात्मा स तथाविधः। व्यापारं ज्जातिभागस्य भेदापोहेन वर्त्तते। अ
गृहीतविशेषेण यथा रूपेण रूपवान्। प्रख्यायते न शुक्लादिभेदरूपस्तु गम्यत इति। क्वचित्तु संख्याविशेषाभिव्यक्तिर्भवति। यथा द्वि पुत्रः पंच पुत्र इत्यादौ प्रातिप
दिकार्थ एव संख्याविशेषः। नावकीनो मामकीन इत्यत्रादेशाभिव्यंग्यमेकत्वं। शौर्पिकमिति प्रातिपदिके न विशिष्टस्यैव परिमाणस्योपादानादेकत्वावगमः। तथा
मासजात इति विशिष्टकालावगमात् प्रयोगादेकत्वावगतिरेवमन्यत्रापि प्रकारांतरेण संख्याभेदावसायो द्रष्टव्यः। तदसान्निध्यादिति। लुप्ता विभक्ते निवृत्तिं त्वादि सर्थः॥ ०

एम० ६

=संख्याविशेषानिर्दिष्टं संख्यासामान्यं नास्ति। किंतु एकत्वद्वित्वादयो विशेषधर्माः संख्यात्वं सामान्यधर्मः सकलविशेषनिष्ठावाच्योयेन। १= अस्मिन्पक्षे एकत्वादिरूपसंख्याविशेषातिरिक्तं संख्यारूपं सामान्यमाश्रीयते। १=
=अभेदैकत्वेति। विभक्त्यभावेन संख्याविशेषाणां तत्तद्रूपेणाप्रतीतावपि संख्यात्वेन सर्वसंख्यानां भानं मधुनि सर्वरसानां रसत्वेन भानवदिति भावः। न शाह। यथौषधीति। १= अथवेति। अत्र पक्षे संख्यात्वेन सामान्यं भासतेन विशेषाकृतिपूर्वस्मादिदः। २= शुक्लादिभेदरूपस्त्विति। शुक्लादि

ननु चेति। न हि विद्यमाने लुकमाचार्यो व्याचष्टे अपि त्वर्थस्याभावात्तत एव यावच्छब्दस्य निवृत्तिः सैवानुगम्यत इत्यर्थः। अर्थे कृते नेति। प्रस्ताविविषितार्थप्रतिपादनाय शब्दप्रयो
गात्। अर्थरूपमिति। अर्थस्वभावः एतदुक्तं भवति। संख्याविशेषादियुक्तवस्तुप्रतिपादने छायां वाक्यं प्रयुज्यते अन्यदा तु वृत्तिः। गोषु चर इति। गोषु चरः कुक्कुट उच्यते। एकसंगवि
द्वयोर्बहुषु वा यस्मादिति समस्ते सा च विशेषेणोच्यते। जातौ चेदं बहुवचनमिति व्यक्तिगतसंख्याभेदानवगमः। यदि तु व्यक्तिगतं बहुत्वं प्रतीयेत ततस्तदाश्रयमेव बहुवचनं क्रिये
त। यदा तु सत्यपि बहुवचने व्यक्तिबहुत्वं न प्रतीयते तदा जात्याश्रयं बहुवचनं अभ्युपगम्यते। वर्षासु जइति। इन्द्रगोपः। अत्राप्येकस्मिन् दृष्टो अवयवबहुत्वापेक्षो बहु

ननु चनैतेनैवं भवितव्यं। न हि शब्दकृतेन नाम्नार्थेन भवितव्यं। अर्थेकृतेन नाम शब्देन भवितव्यं। तदेतदेवं दृश्यतां अर्थरूपमेवं जातीयं येनात्र विशे
षो न गम्यत इति। अवश्यं चैतदेवं विज्ञेयं। यो हि मन्यते यो सौ विशेषवाची शब्दस्तदसान्निध्यादत्र विशेषो न गम्यत इति। इह तस्य विशेषो गम्येत। अप्सु चरो
समवि॰२ गोषु चरो वर्षासु जइति। व्यक्ताभिधानं वाक्ये। ब्राह्मणस्य कंबलस्तिष्ठतीति। समासे पुनरव्यक्ताभिधानं ब्राह्मणकंबलस्तिष्ठतीति। संदेहो भवति। संबुद्धिर्वा
षष्ठीसमासो वेति। एषोप्यविशेषः। भवति हि किंचिद्वाक्ये व्यक्तं तच्च समासे व्यक्तं। वाक्ये तावद्व्यक्तं। आर्द्ध पशो देवदत्तस्येति संदेहो भवति पशुगुणस्य
देवदत्तस्यार्द्ध। अथवा यो सो संज्ञीभूतः पशुर्नाम तस्य पदार्द्धमिति। तच्च समासे व्यक्तं भवति। आर्द्धपशुर्देवदत्तस्येति॥ ॥ ॥ ॥

वचनं। तो वर्षा शब्दो वर्त्तते न त्वत्र ऋतु बहुत्वं प्रतीयत इत्यत्राप्यभेदैकत्वमुपजायते। तस्य रूपे कृति बहुत्वमिसत्वाल्लुक्। लिंगविशेषस्यापि क्वचिद्गतावुपादानं कुमारीपुत्र
इति। क्वचित्सागः। कुक्कुटाण्डं मृगमांसमिति। वाक्येपि जातंतरनिवृत्तिपरे लिंगविशेषाविवक्षा दृश्यते छागस्य मांसमिति। ब्राह्मणकम्बल इति। यद्यप्यत्र स्वरान्निर्णयस्तथापि शब्द
रूपमात्रान्निश्चयाभाव इत्येवं परमेतत्। यत्रापि नास्ति स्वरभेदः संबुद्धिषष्ठीसमासयोस्तिष्ठति ब्राह्मणकंबल इसा दौ तत्रापि प्रकरणादिवशादवश्यं निश्चये न भाव्यं। कंबल
शब्दो घटादिलान्निपातनाद्धातो दान्तः एकार्थीभावे सति भेदनिबंधनसंबंधाधिविभक्तिनिवर्त्तनेनान्तकृतो विशेषो व्यक्ताभिधानमुच्यते। एषोपीति। व्यभिचाराद्विशब्दः सुब
धामि॰२ ल्लोपाद्यपेक्षया समुच्चयार्थः॥ ॥

भा० कै० प्र०
७
7

ऋद्धस्येति। राजा स्वार्थादप्रच्युतः पदार्थान्तरमप्रतिपन्नो वाक्ये योग्यत्वाद्विशेषणसंबन्धमनुभवति। वृत्तौ तूपसर्जनीभूतस्वार्थमर्थान्तरं प्रत्याययतीति। अयोग्यत्वाद्विशे
षणेन न संबध्यते। एषोऽपीति। अव्यापित्वात्। चयोग इति। वाक्ये पदार्थानां भिन्नत्वाद्द्वन्द्वनिबन्धनसमुच्चयद्योतनाय चशब्दः प्रयुज्यते। वृत्तौ तु समूहलक्षणे कार्ये प्रादुर्भा
वाद्द्वन्द्वस्य निवर्त्तनाद्द्योत्यस्यार्थाभावाद्द्योतकस्यापि चशब्दस्य निवृत्तिः। अथैतस्मिन्निति। अयं भावः। यदि वाचनिकमर्थाभिधानं तदा समस्यैकार्थीभावे चार्थे द्वन्द्व
विधानाद्द्वन्द्वे नैव चार्थस्योक्तत्वाच्चस्याप्रयोगः। न्याय्यासिद्धत्वान्नानुमानमेकार्थीभावस्य। स्वाभाविके तु चार्थे इत्यादिनिर्देशोऽनर्थकः। अर्थानादेशनादिति। अ

उपसर्जनविशेषणं भवति। ऋद्धस्य राज्ञः पुरुष इति। समासे न भवति। राजपुरुष इति। एषोऽप्यविशेषः। समासेऽप्युपसर्जनविशेषणं भवति। तद्य
था। देवदत्तस्य गुरुकुलं देवदत्तस्य गुरुपुत्रो देवदत्तस्य दासभार्येति। चयोगो भवति वाक्ये। स्वचयोगः स्वामिचयोग इति। क्व स्वचयोगः। राज्ञो गौश्चाश्वश्च पु
रुषश्चेति। समासे न भवति। राजगवाश्वपुरुषा इति। स्वामिचयोगः। देवदत्तस्य यज्ञदत्तस्य विष्णुमित्रस्य च गौरिति। समासे न भवति। देवदत्तयज्ञदत्त
विष्णुमित्राणां गौरिति। अथैतस्मिन्नेकार्थीभावकृते विशेषे किं स्वाभाविकं शब्दैरभिधानमाहोस्विद्वाचनिकं। स्वाभाविकमित्याह। कुत एतत्। अर्था रथाः
नादेशनात्। न ह्यर्था अपादिश्यन्ते। कथं पुनरर्थानादिशन्नेवं ब्रूयान्नार्था अपादिश्यन्त इति यदाह भगवान्। अनेकमन्यपदार्थे। चार्थे द्वन्द्वः। उ
पसेरकृत्ते निर्देश इति। नैतान्यर्थादेशनानि। स्वभावत एतेषां शब्दानामेतेष्वर्थेष्वभिनिविष्टानां निमित्तत्वेनान्वाख्यानं क्रियते॥ ॥ ॥

चतुरविचतुरेत्यादिनिपातनेति भावः। अपादिश्यन्त इति। प्रकृत्यादिरामलक्षणं वर्तमानत्वं यास्त्वप्रबन्धानुपरमा दर्शयति। वाक्यभेदेन चार्थादेशनं मन्यते। सुबन्तमन्यपदार्थे वर्त्त
ते तच्च बहुव्रीहिसंज्ञमित्येवं यत्रापि वाक्यभेदो दर्शनीयः। यदा तु लोकप्रसिद्धार्थानुवादेन बहुव्रीहिसंज्ञा विधीयते यदन्यपदार्थे वर्त्तते तद्बहुव्रीहिसंज्ञमिति तदा नार्थादेशनं
नापि वाक्यभेदः। अर्थेष्वभिनिविष्टानामिति। अभिनिविष्टानां स्वपरिक्रयण इत्यतोऽन्यतरस्यांग्रहणानुवर्त्तनाद्विकल्पेन कर्मसंज्ञाविधानात्सप्तमी कृता। एतदेव च भाष्यकारव राम० ७
चनं लिंगं तद्विकल्पस्य॥०॥

= तत्र कदाचिदेशनस्य कृतत्वाद्वर्तमानप्रयोगोऽसंगतोत आह। भवन्तेति। प्रबंधोधारा। २= अर्थादेशनपरत्वे संज्ञापरत्वं नस्यादत आह। वाक्येति। ३= सिद्धांताभिप्रायमाह। यदात्विति। ४= विकल्पस्येति। व्यवस्थितस्येत्यर्थः। ५= नानिभसंगेनचोदनीयत्वाकृः॥१२=

=लक्षणत्वेनेति· भाष्ये निमित्तशब्दो बोधकपरइति भावः।१= किंपुनः कारणमित्यनुपपन्नं यावता नेदरूपकारणस्यमसत्वादतआह· प्रकृतीति· यथाऽऽकृते रीयङ्क्तिसादे·१=

कूपइति। कूपो लक्षणत्वेनोपादीयते हस्तदक्षिणमार्गे ग्रहणस्य। अभ्रइसत्राप्यभ्रं चन्द्रमसो [redacted] लक्षणत्वेन निर्दिश्यते। किंपुनरिति। प्रकृतिप्रत्ययोपदेशवद्गुलुवा क्यभेदेनार्थादेशनमिति भावः। लघ्वर्थमिति। लघुशब्दो लाघववेवर्त्तते। लाघवार्थमर्थानादिश्यते। अन्यथा गौरवमनवस्था च प्राप्नोति। तथाहि। यदि चार्थे वर्त्तते अने केनचद्वंद्वसंतमिति वाक्यभेदेनार्थादेशनं क्रियेत तदैवं प्रष्टव्यं स्यात् कः पुनरस्यार्थः। तत्राचार्येण वक्तव्यं स्यात्समाहार इतरेतरयोगश्च। ततः कः समाहारः कइतरे तरयोग इति प्रश्नप्रतिवचनयोरनवस्था गौरवं चानुषज्यते। असंभव इति। असामर्थ्यात्। दोषबाहुल्यप्रतिपादनाय चार्थादेशनस्य गौरवानवस्थासंभवाः

तद्यथा। कूपे हस्तदक्षिणः पंथाः। अभ्रे चंद्रमसं पश्येति। स्वभावतस्तत्रस्थस्य पथश्चंद्रमसश्च निमित्तत्वेनान्वाख्यानं क्रियते। एवमिहापि चार्थे यः सद्वंद्वः। अन्यपदार्थे यः स बहुव्रीहिरिति। किंपुनः कारणमर्था नादिश्यन्ते। तच्च लघ्वर्थं। लघ्वर्थं ह्यर्था नादिश्यन्ते। अवश्यं ह्यनेनार्थानादिशता केनचिच्छब्देनार्थनिर्देशः कर्त्तव्यः स्यात्। तस्य च तावत्केन कृतः येनासौ क्रियते। अथ तस्यकेनचित्कृतस्तस्य केन कृत इत्यनवस्था। असंभवः खल्वर्थादेशनस्य। कोहि नाम समर्थो धातुप्रातिपदिकप्रत्ययनिपातानामर्थानादेष्टुं। नचैतन्मंतव्यं प्रत्ययार्थे निर्दिष्टे प्रकृत्यर्थो निर्दिष्ट इति। भवतिहि गुणाभिधाने गुणिनः संप्रत्

=प्रकृतीनामर्थनिर्देशेनावश्यकइत्याक्षिपति· भाष्येनचैदिति·१= ययः। तद्यथा। शुक्लः लक्ष्मः इति॥ श्री॥ ॥ =भाष्ये सर्वपक्षीस्योक्तंसाधयति·भवतिहीति·१=

परस्परांतमोवेपिएषगुपन्यस्ताः। कोहीति। अनेकार्थत्वादिति भावः। तत्र धातूनामनेकार्थत्वं कुर्दखुर्दगुर्दक्रीडायामेवेति नियमार्थो देवकाराद्दिरान्वपते। प्रातिपदिकानामपि यथेच्छं विनियोगदर्शनादिना। शक्तिनियमे तु पुरुषस्याव्यापारः। प्रत्ययानां तु कृत्सत्सु टोबहुलं शेषइति लक्षणारंभात्। निपातानामनेकार्थत्वं नानाविधस्यार्थस्य प्रयोगे द्योतनात्। नचैतन्मं तव्यमिति। कृस्यचिदेवार्थो निर्दिश्यते अन्यस्य तु संबंधात्प्रतीतिर्भवतीति भावः। भवतीति। एकत्वादिषु गुणेषु सुत्वादयो विधीयंते गुणोश्च गुणिनमाक्षेपो भवति निराधारस्य गुणस्या संभवात्। तद्यथा शुक्ल इति। गुणमात्राभिधाने गुणिन आक्षेप इत्यर्थः। तथा प्रत्ययमे प्रत्यये विधीयमाने सामर्थ्यादपत्य वतः प्रकृत्यर्थस्याक्षेपान्निर्देशः सिध्यति॥ ॥

=भाष्ये जर्भरीति। यद्यपि जर्भरीत्यस्य भर्तारीतुफरीत्यस्य हंतार इत्यर्थो निरुक्तकारैर्दर्शितस्तथापि सर्वजनप्रसिद्ध्यभावाल्लक्षणे प्रत्ययविभागेनान्वाख्यानासंभवाच्च न विज्ञायते इत्युक्तमित्याहुः नैव विधेति। ४=

भा०के०प्र० विषम इति। यथा प्लक्षः कृष्ण इति गुणेन गुणिमात्रस्याक्षेपो न गुणिविशेषस्य एवं प्लक्षः प्लक्ष इत्यत्राप्येकत्वाधारो द्रव्यमात्रं प्रतीयेत न्यग्रोधादिलोकाद्यर्थावधारणं नाश्रीयेत
८ नापि शास्त्रेण प्रतिप्रकृति निर्दिष्टस्यैतार्थः तदा वृक्षादयो द्रव्यमात्राभिधायिनः स्युरिति प्रकरणाद्यभावे विशेषसंप्रत्ययो न स्यान्न भवति च। तस्मादुक्तव्यवहारादेव शास्त्रार्थ
४ संबंधस्तु सत्तिरनिष्ठितापि युक्तिवशादेष्टव्ये सर्थः। येषामर्थो न ज्ञापंत इति। स्वर्गापूर्वदेवतादिशब्दानामर्थाः प्रत्यक्षापरि[redacted]छेद्यत्वादिदं न यानज्ञायंते नेतत्रते षां
कथमर्थो निर्दिष्टस्येरन्निसर्थः। नैवविद्यव्यवहाराज्ञेषामर्थो विज्ञायत एव। अक्षिणिकोचैरिति। यथैते नैर्व्यवहारवशादर्थोऽवगम्यंते तथा शास्त्रेऽपीति भावः। न खल्वपीति।

विषमउपन्यासः। सामान्यशब्दा एत एवं स्युः। सामान्यशब्दाश्च नांतरेण प्रकरणं विशेषं वा विशेषे ष्ववतिष्ठंते। यतस्तु खल्लु नियोगतो वृक्षइत्युक्ते स्वभावतः
कस्मिंश्चिदेव विशेषे वृक्षशब्दो वर्तते अतो मन्यामहे नेमे सामान्यशब्दा इति। न चेत्सामान्यशब्दाः प्रकृतिः प्रकृत्यर्थे वर्तते प्रत्ययः प्रत्ययार्थे वर्तते। अप्र
वृत्तिः खल्वर्थादेशनस्य बहवो हि शब्दा येषामर्थो न ज्ञायते। जर्भरीतुर्फरीतू। अंतरेण खल्वपि शब्दप्रयोगं बहवोऽर्था गम्यंते। अक्षिनिकोचैः पाणि
विहारैश्च। न खल्वपि निर्ज्ञातस्यार्थस्यान्वाख्याने किंचिदपि प्रयोजनमस्ति। यो हि ब्रूयात्पुरस्तादादित्य उदेति पश्चादस्तं गच्छति मधुरो गुडः कटुकं शृं
गवेरमिति किं तेन कृतं स्यात्। वावचनानर्थकं स्वभावसिद्धत्वात्। वावचनमनर्थकं। किं कारणं। स्वभावसिद्धत्वात्। इह द्वौ पक्षौ वृत्तिपक्षश्चावृत्तिपक्ष
श्चेति। स्वभावतश्चैतद्भवति। वाक्यं च समासश्च। तत्र स्वाभाविके द्वैविध्ये नित्ये समासे प्राप्ते वावचनेन किमन्यच्छक्यं अभिसंबद्धुमन्यदतः संज्ञायाः न च
संज्ञायामभावाभावाविष्येते। तस्मात्सार्थो वावच
साध्यसाधुसंकरनिरासाय पाणिन्यारंभान्नास्ति लोकव्यवहारावगतार्थान्वाख्याने प्रयोजनमित्यर्थः। वावचनानर्थक्यं चेति। इह व्यपेक्षायां समासो न भवति एकार्थी
भावे वाक्यं नेति विविक्तविषयत्वादनयोर्बाध्यबाधकभावो न भविष्यतीति नार्थो विकल्पेन। एकार्थानां विकल्पनात्। न च संज्ञायामिति। एकार्थीभावे चित्रगुरित्येवेष्यते न तु चि
त्रागावइत्येवं। तथा राजपुरुषइतीष्यते न राज्ञः पुरुषइति। ऐकपद्यमैकस्वर्यमेकविभक्तित्वं च सर्वेदैकार्थीभावइष्यतइत्यर्थः॥ ॥श्री॥ ॥ भा०प्र०
८

=वाक्ये वेति· अयं भावः। एकार्थीभावस्तत्र विधेयाः समर्थसूत्र विधेयाः सुबन्तं सुबन्तेन सह सामर्थ्यवद्भवति समर्थं च समाससंज्ञकमित्यर्थो ऽत एव विभाषाधिकारादि सर्वं चरितार्थं·१=भाष्येनेवामिति व्याप्तिवर्णनवादिनामित्यर्थस्तत्रावतरणमाह· मित्येति·२=

अथेति। कार्यप्रवृत्तिकाले वाक्यादेव विकल्पेन वृत्तिं निष्पाद्यामन्यमानाः किं वृत्तेर्लक्षणं कुर्वन्तीति प्रश्नः। नैसर्गिकी तु वृत्तिर्वाक्ये नियतविषये मन्यन्ते। परार्थाभिधा-
नमिति। परस्परशब्दस्य योऽर्थस्तस्याभिधानं शब्दान्तरेण यत्र सा वृत्तिरित्यर्थः। यथा राजपुरुष इत्यत्र राजशब्देन वाक्यावस्थायामनुक्तः पुरुषार्थोऽभिधीयते। अथ तेषामिति। निस-
र्गादृष्टवादिपक्षे तु राजपुरुषादीनि वाक्यविषयपदरूपावयवानि वर्णवदनर्थकोपलम्भमानावयवानि तत्त्वतो निरवयवान्येव केवलमसत्यप्रक्रियाश्रयेणान्वाख्यायन्ते। ज-
हतीति पदानि स्वार्थं यस्यां सा जहत्स्वार्था। पुरुषमात्रस्येति। राजपदोपादानमनर्थकमिति चेत्। पर्यायत्वं पुरुषराजपुरुषशब्दयोर्यो वयाऽवृत्स्यादिति दोषः। द्विवचनं प्राप्नो-

अथ ये वृत्तिं वर्त्तयन्ति किं त आहुः। परार्थाभिधानं वृत्तिरित्याहुः। अथ तेषामेवं ब्रुवतां किं जहत्स्वार्था वृत्तिर्भवत्याहोस्विदजहत्स्वार्था भवति। किं चातः। यदि
जहत्स्वार्था वृत्तिः राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति। औपगवमानयेत्युक्ते अपत्यमात्रस्येति। अथाजहत्स्वार्था वृत्तिः उभयोर्विद्यमा-
नस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति। का पुनर्वृत्तिर्न्याय्या। जहत्स्वार्था। युक्तं पुनर्यज्जहत्स्वार्था नाम वृत्तिः स्यात्। बाढं युक्तं। एवं हि दृश्यते
लोके। पुरुषोऽयं परकर्मणि प्रवर्त्तमानः स्वं कर्म जहाति। तद्यथा। तक्षा राजकर्मणि प्रवर्त्तमानः स्वं तक्षकर्म जहाति। एवं युक्तं यद्राजा पुरुषार्थे वर्त्तमा-
नः स्वमर्थं जह्यात्। उपगुरप्यपत्यार्थे वर्त्तमानः स्वमर्थं जह्यात्। ननु चोक्तं राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति औपगवमानयेत्युक्ते अपत्यमात्रस्ये-
ति। नैष दोषः। जहदप्यसौ स्वार्थं नात्यन्ताय जहाति यः परार्थविरोधी स्वार्थस्तं जहाति॥ ×नयेत्युक्ते पुरुषमा×२ ॥ ॥

नीति। प्लक्षन्यग्रोधाविति यथा। जहत्स्वार्थेति। न हि स्वार्थमजहतं स्वेनार्थेन वशीकृतमन्यार्थान्तरोपादानं घटते। युक्तं पुनरिति। उपात्तस्वार्थस्य त्यागाभावात्।
अग्निनेवोष्णस्य। बाढं युक्तमिति। परार्थवृत्तित्वादेव। अत एव दृष्टान्तमाह। तक्षा राजकर्मणीति। यद्वा राज्ञा तक्षादूरस्थो नियुज्यते तदा स्वकं कर्म जहाति। नात्यन्तायेति।
त्यागमात्रमभिसंधाय जहत्स्वार्थेत्युच्यते न तु सर्वात्मना त्यागः। परोपकाराय तस्योपादानात्। सर्वथा च स्वार्थत्यागे परोपकारसंपादनमेव प्रयोजनाभावान्न स्यादित्यर्थः॥

नादनुपादा

=पक्षभावेन संबंधाप्रतीतावातिपदिकार्थमात्रवृत्तितादिरर्थः। ३= स्वेनेति· स्वार्थमात्रोपस्थाने व्यासक्तस्येत्यर्थः। अर्थान्तरेति· अर्थान्तरं प्रति विशेषणत्वं·२=

=भाष्येनचायमर्थइति॰ राजपदेनपरार्थस्यपुरुषस्यास्कंदनेतद्विशेषणत्वेनराजरूपार्थोपस्थितौराजरूपोर्थःस्वतोनविशेषीकिंतुस्वगतंविशेष्यत्वमेवविरोधात्त्यजन्नहास्यतिकिंतुस्वगतंविशेष्यत्वंविशेषिरूतंत्यजतीत्यर्थः। एवंचात्रपक्षेसर्वपाठस्वार्थनविसर्गाद्यौनद्यौजरत्स्वार्थताकिंतुपरार्थविशे

भा०कौ०प्र० ९ १ हिक्रिंतेति। तेषांप्राणिधर्मत्वात्तत्यागेतस्यराजकर्मवैविध्यविघातेतेत्यर्थः। नचायमर्थइति। वाक्येपिराजार्थस्यविशेषणत्वात्। कस्तस्यवत्तौविशेषइतिचेत्। वाक्येस्वविशेषणाप्रतिपत्तौसामर्थ्यविघातः। वृत्तावुपसर्जनीभूतेनस्वार्थेनप्रधानार्थस्योपकारात्स्वविशेषणाप्रतिपत्तौसामर्थ्यहानिः। अन्यथापादिति। राजपदार्थः स्वार्थनिमित्तंपुरुषार्थविशेषमाधायस्वार्थंजहाति। नचतन्निमित्तविशेषदर्शनेनिवर्ततेपुरुषे। यथाग्निसंबंधजनितपाकजरूपादिनिवृत्तिर्घटेग्निसंयोगेनिवृत्तेपिनभवतीत्यर्थः। विशेषणमितीति। विशेषःपुरुषगतोभविष्यती त्यर्थः। मल्लिकापुटइति। आमोदादिविशेषावगतिरितिभावः। वृत्तौक्रियतइति। यदिचवृत्तौभेदसंसर्गौनस्यातांतदासाम

तद्यथा। तक्षाराजकर्मणिप्रवर्तमानःस्वंतक्षकर्मजहातिनहिकिंतहसितंकंडूयितानि। नचायमर्थःपरार्थविरोधीविशेषणंनाम। तस्मात्तन्नहास्यति। अथवाऽन्वयाद्विशेषणंभवति। तद्यथा घृतघटस्तैलघटइति। निषिक्तेघृतेतैलेचान्वयाद्विशेषणंभवति। अयंघृतघटोऽयंतैलघटइति। विषमउपन्यासः। भवतिहितत्रयाचयावतीचार्थमात्रा। अंगहिभवानयोनिष्टप्यघृतघटंतृणकूर्चेनप्रक्षाल्ययत्नेनगंसुतेसविशेषः। यथातर्हिमल्लिकापुटश्चंपकपुटइति। निःकीर्णेष्वपिसुमनःसुअन्वयाद्विशेषणंभवति। अयंमल्लिकापुटःअयंचंपकपुटइति। अथवासमर्थाधिकारोयंवृत्तौक्रियते। सामर्थ्यंनाम भेदःसंसर्गोवा। अपरआह। भेदसंसर्गौवासामर्थ्यमिति। कःपुनर्भेदःसंसर्गोवा। इहराज्ञइत्युक्तेसर्वंस्वंप्रसक्तंपुरुषइत्युक्तेसर्वःस्वामीप्रसक्तः। इमावयेयुक्तेराजापुरुषंनिवर्तयत्यन्येभ्यःस्वामिभ्यःपुरुषोराजानमन्येभ्यःस्वेभ्यः। एवमेतस्मिन्नुभयतोव्यवच्छिन्नेयदिजहातिकामंजहातुनजातुचि
त्पुरुषमात्रस्यानयनंभविष्यति॥ राजपुरुष

र्थ्यमेवनस्यात्तद्दार्ढ्यकत्वात्सामर्थ्यस्येत्यर्थः। तत्रभेदःसंसर्गाविनाभावित्वादनुमीयमानसंसर्गःसामर्थ्यंसंसर्गोवाभेदादिनामा अनुमेयभेदः। उभौवायोगपद्येनाश्रीयमाणौसामर्थ्यमित्यर्थः। सर्वंस्वमिति। राज्ञइतिषष्ठ्यासंबंधिमात्रस्याक्षेपात्। सर्वःस्वामीति। यदापुरुषस्यपारतंत्र्यंप्रमाणांतरेणप्रतिपन्नंतदपेक्षयेतदुच्यते। अन्यथापुरुषइत्युक्तेऽस्तीतिप्रतीतिःस्यान्नतुस्वामात्राक्षेपः। तत्रभेदपक्षेराजापुरुषंस्वाम्यंतरेभ्योनिवर्तयस्स्वार्थंजहाति। पुरुषस्तुजहदपिस्वार्थंस्वांतरेभ्योराजानंनिवर्तयतीति। ततश्चकृतकार्यस्यभवतुराजार्थस्यनिवृत्तिःअकृतकार्यस्यनिवृत्तिरेवनस्यात्। एवंसंसर्गेपियोज्यं उभयतइति। उभयस्मिन्परेणावच्छिन्नेइत्यर्थः॥ ॥ प्रम० ९

मित्र॰ तो मार॰
=इत्यर्थइति॰अत्रापिभेदेनामाभोक्तादिनोसमुदायप्रवृत्तिनिमित्तत्वात्‌तदारन्निःसंबंधोपिसाक्षात्‌[illegible]तोषिरा[illegible]अनिसादावसजद्यतिनीजगुणसमवायःसाक्षात्संबंधः। राजपुरुषवृत्तादौचराजसमवायः=
=स्वाश्रयसंबंधितेनपरंपरयापुरुषेऽस्तिः[illegible]संबंधः। एवंचनीलोत्सजमित्यादावनीलोत्सलयाद्यतिनीलोत्सलसंबंधोवाप्रवृत्तिनिमित्तराजपुरुषवृत्तत्वेराजपुरुषयावृत्तिःराजपुरुषसंबंधोवाप्रवृत्तिनिमित्तमितिबोध्यं॰२=

[illegible]

=शब्दार्थसम्बन्धितत्वात्संबंधोनुपपन्नस्तत्राह एवमिति ॥१७

युक्तं पुनरिति। स्वमर्थमजहत्तस्तेन वशीकृतस्यार्थान्तरोपादानं युक्तमिति भावः। संचयायेति। एवं शब्दोपि कश्चिद्विषये एकार्थः क्वचिदनेकार्थ इत्यर्थः। कस्मादिति। एकयाविभक्त्या गुणप्रधानभूतस्यार्थद्वयस्य प्रतिपादयितुमशक्यत्वादिति प्रश्नः। प्रथमायाइति। प्रधानं विधायित्वा गुणानां प्रधानविभक्तिः प्रथमा गुणेपि प्रतिपन्नत्वे इति भावः। न प्रथमासमर्थइति। प्रथमाद्विवचनं उत्पद्यमाने संबंधासंप्रत्ययाद्गुणप्रधानभाव एव न प्रतीयेत। षष्ठ्यास्तर्हीति। संबंधस्य प्रत्याय्यत्वात्तस्य चोत्तरयाधिष्ठानत्वात्। न षष्ठीति। यदि षष्ठी द्विवचनं स्यात्तदा द्वयोरपि समकक्ष्यत्वेन संबंधेतरापेक्षायां संबंधः प्रतीयेत। अभिहितइति। कश्चिदर्थोभिहितोपि नान्तर्भूतः। यथा राज्ञ इति षष्ठ्याभिहितो न कुत्रचिदंतर्भावं प्राप्तः। कश्चि

अथवा पुनरस्त्वजहत्स्वार्था वृत्तिः। युक्तं पुनरिदं यदजहत्स्वार्था नाम वृत्तिः स्यात्। बाढं युक्तं। एवं हि दृश्यते लोके। भिक्षुकोयं द्वितीयां भिक्षां समासाद्य पूर्वां न जहाति। संचयायैव प्रवर्तते। ननु चोक्तमुभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति। कस्मात् पुनर्द्विवचनं प्राप्नोति। प्रथमायाः। न प्रथमासमर्थो राजा। षष्ठ्यास्तर्हि प्राप्नोति। न षष्ठीसमर्थः पुरुषः। प्रथमाया एव तर्हि प्राप्नोति। ननु चोक्तं न प्रथमासमर्थो राजेति। अभिहितः सोर्थोन्तर्भूतः प्रातिपदिकार्थः संपन्नस्तत्र प्रातिपदिकार्थे प्रथमेति प्रथमाया एव द्विवचनं प्राप्नोति। संघातस्यैकार्थ्यान्नावयवसंख्यातः सुबुत्पत्तिर्भवति। परस्परव्यपेक्षां सामर्थ्यमेके। परस्परव्यपेक्षां सामर्थ्यमेक इच्छन्ति। का पुनः शब्दयोर्व्यपेक्षा। न ब्रूमः शब्दयोरिति किं तर्ह्यर्थयोः ॥ x बुत्पत्तिः। संघातस्यैकार्थत्वात्स्व

दंतर्भूतोपि नाभिहितः। यथा राजपुरुषइति न सुपुरुषे राजा सरवासेसर्थोन्तर्भवति न त्वभिधीयते। तथा कश्चिदर्थोभिहितोंतर्भूतः। यथा पचतीति कर्त्ताभिधीयमानो गुणभावादंतर्भूतः न त्वसौ प्रातिपदिकार्थ इति त्रयमुपात्तं। तत्र संबंधोभिहितोंतर्भूतः प्रातिपदिकार्थः संपन्न इति व्यतिरेकाभावात्प्रथमाद्विवचनं प्राप्नोति। संघातस्येति। इह राजपुरुषात्संघातात् द्विभक्त्योत्पन्नत्वं। तेन संघातेनावयवार्थोपहृत एकत्वसंख्यायुक्तो विशिष्टोर्थः प्रतिपाद्यतइति तदाश्रयमेकवचनं प्रवर्तते न तु गुणभूतावयवसंख्याश्रयं द्विवचनमित्यर्थः। परस्परेति। व्यपेक्षैवात्र सामर्थ्यं न त्वेकार्थीभाव इत्याहुः। का पुनरिति। स्वस्वमर्थं प्रति गुणाभावाच्छब्दयोः परस्परव्यपेक्षा न संभवतीति प्रश्नः। अर्थयोरिति। प्रमातृगतां व्यपेक्षामर्थे समारोप्य शब्दाः संस्क्रियन्ते ॥ ॥

=कथमेकार्थबोधसंभवे तत्त्यागे। निरिक्तशक्तिकल्पने च मानाभाव इति भावः। एतावतैवेयमजहत्स्वार्थेत्याहुः ॥१८= व्यपेक्षेति। अत्र पक्षे वाक्यवद्वृत्तौ राजसंबंधवानिति बोधो भेदेनैकार्थीभावे तु राजसंबंध्यभिन्न इत्यभेदेनेति विशेषः ॥१९= अपेक्षावादेविशेषणयोग...

भा० कै० प्र०
१०
10

ममायमिति। राज्ञा नादिक्रियानिमित्तं राज्ञः स्वाम्यमुपजायते। अहमस्येति। पुरुषस्य प्रतिग्रहादिनिमित्तं स्वत्वोत्पादः। क्रियाकारकयोरिति। कारकशब्देनात्र शक्त्याधारो द्रव्यमुच्यते।
क्रियाद्रव्ययोरभिसंबन्धनिमित्तत्वाच्छक्तिरेवाभिसंबन्धः। तेन कर्मशक्तेर्वाचिका द्वितीयेत्यर्थः। अथवा कारकशब्देन शक्तिरेवोच्यते। शक्तेश्च वाचिका द्वितीया सामर्थ्यात्क्रि-
याकारकसंबन्धस्याप्यवगमात्तस्य वाचिकेत्युक्तम्। अथवा यद्येवेति। यद्यस्मात्सूत्राद्द्विविधस्यापि सामर्थ्यस्य संप्रत्ययः तदा युक्तायुक्तविचारणा युक्ता नान्यथेति भावः। संचोपसर्ग इ-

इह राज्ञः पुरुष इत्युक्ते राजा पुरुषमपेक्षते ममायमिति पुरुषो राजानमपेक्षते अहमस्येति। तयोरभिसंबन्धस्य षष्ठी वाचिका भवति। तथा कष्टं श्रित इति क्रियाकारक-
योरभिसंबन्धस्य द्वितीया वाचिका भवति। अथ यद्येवैकार्थीभावः सामर्थ्यं यथापि व्यपेक्षा सामर्थ्यं किंगतमेतदियता सूत्रेण। हे त्विदन्यतरस्मिन्पक्षे भूयः सू-
त्रं कर्तव्यं। गतमित्याह। कथं। समोऽयमर्थशब्देन समासः सम् चोपसर्गः। उपसर्गाः पुनरेवमात्मकाः यत्र कश्चित्क्रियावाची शब्दः प्रयुज्यते तत्र क्रियाविशेषमाहुः। न
चेह कश्चित्क्रियावाची शब्दः प्रयुज्यते। येन समः सामर्थ्यं स्यात्। तत्र प्रयोगादेतदुक्तं भवति नूनमत्र प्रयोगार्हः शब्दः न प्रयुज्यते येन समः सामर्थ्यमिति। तद्यथा धूमं दृ-
ष्ट्वाग्निरत्रेति गम्यते त्रिविष्टब्धकं दृष्ट्वा परिव्राजक इति। कः पुनरसौ प्रयोगार्हः शब्दः उच्यते। संगतार्थः समर्थः संसृष्टार्थः समर्थः संप्रेक्षितार्थः समर्थः संब-
समर्थः४ द्धार्थः समर्थ इति। तद्यदा एकार्थीभावः सामर्थ्यं तदैवं विग्रहः करिष्यते। संगतार्थः समर्थः संसृष्टार्थः समर्थ इति। तद्यथा संगतं घृतं तैलेनेत्युच्यते। एकीभूतमिति गम्य-
ते। संसृष्टार्थः समर्थ इति। तद्यथा। संसृष्टोऽग्निरित्युच्यते। एकीभूत इति गम्यते। तद्यदा व्यपेक्षा सामर्थ्यं तदैवं विग्रहः करिष्यते। संप्रेक्षितार्थः समर्थः संबद्धार्थः स-
व्यतिषंगः२ मर्थ इति। कः पुनरिह संबद्धार्थः संबद्ध इत्युच्यते योरज्ज्वायसा कीलेन वा व्यतिषक्तो भवति। नावश्यं बध्नातिर्व्यतिषंग एव वर्तते। किं तर्हि हानावपि वर्तते।
तद्यथा। संबद्धा विमो रम्या विसृज्यन्ते यावन्योन्यं न जहीतः। अथवा भवति चैवं जातीयकेषु बध्नातिर्वर्तते। तद्यथा। अस्ति नो गर्गैः संबन्धः अस्ति नो वत्सैः संबं-

ति। तेन तस्य द्रव्यवाचिना सामर्थ्यं नोपपद्यत इति संशब्दोपादानाद्योग्यता क्रियाक्षिप्यत इत्यर्थः। संगतार्थं संसृष्टार्थमिति तुल्यार्थधातुनिर्देशः। संप्रेक्षितार्थं संबद्धार्थमिति
पर्यायनिर्देशः। व्यतिषंग इति। रज्ज्वादिनिमित्तः संश्लेषो व्यतिषंगः। एवंजातीयकेष्विति। व्यपेक्षायुक्तेष्वित्यर्थः। अस्ति न इति। स सामपिहानोर्विद्यादिकृतापेक्षायां संबन्धश- ॥
ब्दस्य दर्शनादित्यर्थः॥ ॥

राम०
१०

=तस्य मिति॰ विभाषाधिकारात्कार्यशब्दत्वं क्रांतादित्नोपानादेशश्चानित्यशब्दतमाचार्यस्याभिमतं लक्ष्यते॰ २=

अथैतस्मिन्नित्ति। यदिदृन्त्रावेकार्थीभावो नाभ्युपगम्यते तदा वाक्यवत्संख्याविशेषोपजनन विशेषणादीनां प्रसंगात्तदभावो वचनेन प्रतिपाद्यो वा वचनं च कर्त्तव्यं समानार्थस्य वाक्यस्य नित्यसंबंधत्वे देवं शब्दस्य स्वाभाविकं रूपं कदाचिन्नित्य दर्शनाश्रयणो नानुगम्यते कदाचिद बुधबोधनार्थं कार्यदर्शनाश्रयेण कार्यपक्षे तु बहवो वाक्यधर्म्मा वचनेन प्रतिपाद्याः इतिगौरवप्रसंगः तथाहि निष्कौशांबिर्गोरथो घृतघटो गुडधानाः केशचूडः सुवर्णालंकारो द्विदशाः सप्तपर्णो गौरखरः सादिषु क्रांतयुक्तपूर्णमिश्रसंहारविकारस्तु प्रसयत्नोपो वीप्साजातिविशेषाभिधायित्वं वचनप्रतिपाद्यं नित्यदर्शने कार्थीभावकृत एवायं विशेष इतिनकिंचित्प्रतिपादनीयं एवं व्यपेक्षासाम

अथैतस्मिन्व्यपेक्षायां सामर्थ्ये योसावेकार्थीभावकृतो विशेषः स वक्तव्यः। तत्र नानाकारकान्निघातयुष्मदस्मदादेशप्रतिषेधः। तत्रैतन्व्यपेक्षायां सामर्थ्ये नानाकारकान्निघातयुष्मदस्मदादेशाः प्राप्नुवंति तेषां प्रतिषेधो वक्तव्यः। निघातस्तावत् अयं दंडो हरानेन अस्ति दंडस्य हरतेश्च व्यपेक्षेति कृत्वा निघातः प्राप्नोति। युष्मदस्मदादेशाः ओदनं पच तव भविष्यति ओदनं पच मम भविष्यति॥ ॥ ॥

व्येदोषमभिधायेदानीये सर्वेषां दोषाणां तानुदाहरति। तत्र नानाकारकादिति नानाशब्दः पृथग्भाववचनस्तेन भिन्नायाः क्रियायाः यत्कारकं तन्नानाकारकं यथा अयं दंडो हरानेनेति दंडो स्तिक्रियायाः कर्त्तानतु हरतिक्रियायास्तथा नानाभिन्नमन्यत्कारकं यस्य तदपि नानाकारकं यथोदनं पच तव भविष्यतीत्यत्र पचेस्त्वं सेन तत्कारकत्वेन नोपात्तं ततः पचेस्तेन सा उत्तरस्य युष्मदादेशो न भवति किंचित्तु पचौदनं तव भविष्यतीति पाठः अोदनस्य पचतिक्रियां प्रति कारकत्वं न तु भवतिक्रियां नीतिनानाकारकत्वं भिन्नक्रियापेक्षत्वात्कारकत्वस्य अस्ति दंडस्येति अनेनेतिपदेन दंडस्य हरणे करणत्वेन निर्द्देशात्॥ ॥श्री॥ ॥७॥

दस्मर

=सर्वर्थेति॰ अयं दंडो हरानेनेत्यादौ दोष एकार्थीभावसामर्थ्यवादे स्यादेव प्रकृतेन तदभावेन समर्थपदभाषाया अनुपस्थानात्॰ व्यपेक्षावादे दोषस्तु भवत्येवेत्यतः सर्वथेत्युक्तं॰ ४=पृथग्भाववचन इति॰ पृथक्क्रियावचन इत्यर्थः। तदाह॰ नेन भिन्नायाः क्रियाया इति॰ ५=

अप्स्योदनस्येति। स्वस्वामिभावस्य भाविनः प्रतिपादनादित्यर्थः तेनैवासज्येति। ततश्चदंडस्य हरणं प्रति कारकत्वान्नास्ति नानाकारकत्वमिति प्रश्नः। अयं दंडो
स्तीतियत्रान्य क्रियापदं न श्रूयते तत्रांतरंगत्वादस्ति क्रियैव प्रतीयते ततोस्ति क्रियायां दंडस्य कर्तृत्वाद्धरतेर्वना नाकारकत्वमित्यर्थः। क देवदत्त इति पदा
बहवः पुरुषाद्वारस्था भवंति तदैते प्रश्नोत्तरेयस्ति षष्ठीति पदान्येनिपातिताहृक्षाएकं स्तदा विशिष्टवृक्षाधिकरणत्वेन देवदत्तः प्रतिपाद्यते। प्रचय इति अनेके
स्तर्ध॰ बि॰

अस्योदनस्य पुष्पदस्मदोभ्रूय पेक्षेति कृत्वा वान्नावादयः प्राप्नुवंति तेषां प्रतिषेधो वक्तव्यः किमुच्यते नानाकारकादिति पदा तेनैवासज्यप्रयुज्यते
नापि ब्रूमोन्येनासज्यप्रयुज्यत इति किं तर्हि शाब्दप्रमाणकाश्वयं यच्छब्द आह तदस्माकं प्रमाणं शब्दश्चेह सन्नामाह अयं दंडः अस्तीतिगम्यते स दंडः
कर्ता भूत्वान्येन शब्देनाभिसंबध्यमानः करणं संपद्यते तद्यथा कश्चित्कंचित्पृच्छति क देवदत्त इति स तस्मा आचष्टे असौ वृक्षे इति कतरस्मिन्न
स्ति षष्ठीति स वृक्षोधिकरणं भूत्वान्येन शब्देनाभिसंबध्यमानः कर्ता संपद्यते प्रचये समासप्रतिषेधः प्रचये समासप्रतिषेधो वक्तव्यः राज्ञो गोश्चा
=राज्ञा गवाश्च पुरुषाश्चेति गोः पुंस्त्वेन पं क्रियां विराज्ञा गवाश्च पुरुषाश्चेति षष्ठ्या समासः पयपिरजवहेः= ॥ श्वपुरुषस्य च राजगवाश्वपुरुषा इति समर्थतरणं वा॥ ॥ ॥
=तेनैनास्ति विशेषणसंभाष्यवर्द्धभावप्रभेद्यकाति भावेन पक्षे वा विशेषः स्यादनेतिभावः। २=
स्मिन्न संबंधिनि विवक्षित इत्यर्थः तत्र गोराज्ञापि सामर्थ्यमश्वपुरुषाभ्यामपि तत्र युगपत् द्वौ द्वंद्वतत्पुरुषौ प्राप्नुतः पूर्वं वा तत्पुरुषः पश्चात् द्वंद्वः विप्रतिषेधाभा
वाच्चैन परत्वेन व्यवस्थाभिन्नसमुदायविषयत्वात् संज्ञाद्वयस्यत त्र षष्ठीतत्पुरुषे सति गोरतद्धितलुकीति टच् प्राप्नोति अपर्यश्वमिष्यते राजगवाश्वपुरुषा इत्युच्यमा राम० ११
॥ ने। श्वपुरुषयो राज्ञा संबंधो न प्रतीयते॥ ॥ ॥

समर्थतराणां वेति ॥ शक्ततराणामित्यर्थः एषां ह्याश्रुतत्वेति प्रथमाप्राप्तिपरिक्रमात्रे विधीयमानानन्तिकं चिद्धात्यं वस्तु अपेक्षते षष्ठी तु बाह्यसंबंधापेक्षत्वाद् बहिरंगा
तत्रांतरंग प्रथमानिमित्तः पूर्वं द्वंद्वो भवति अस्ति द्वंद्वबहिरंग इति द्वंद्वे कृते अत्र षष्ठीसमासस्यासिद्धत्वात् आश्रुतत्वं ग्रंथ इति आश्रुतप्रतिपन्नत्वयोग्यं ग्रंथः आश्रुतत उच्यते
एतानीति तुल्यजातीयत्वं अपेक्षायामेकार्थीभावे ऽसामर्थ्यत्वं कारणमित्यर्थः समुदायसामर्थ्यादिति समुदायद्वंद्वार्थं प्रति राजा विशेषणत्वेनोपात्त इति तेनै

समर्थतराणां वा पदानां समासो भविष्यति का नि पुनः समर्थतराणि यानि द्वंद्वभावीनि कुत एतत् एषां ह्याश्रुतत्वात् वृत्तिः प्राप्नोति ॥ तद्यथा समर्थतरोपं माणा वक्तो
ध्ययनापेक्षुच्यते आश्रुतत्वं ग्रंथ इति ॥ अमते अपर आह समर्थतराणां वा पदानां समासो भविष्यति कानि पुनः समर्थतराणि यानि द्वंद्वभावीनि कुत एतत्
समानविभक्तीन्येतानि अन्यविभक्तीराजा भवति विशेषः स्वस्मिन् भ्रातरि पितृव्यपुत्रे च समुदायसामर्थ्याद्वा सिद्धं समुदायसामर्थ्याद्वा पुनः सिद्धमेतत्
समुदायेन राज्ञः सामर्थ्यं भवति नावयवेन अपर आह समर्थतराणां वा समुदायसामर्थ्यात् समर्थतराणां वा पदानां समासो भविष्यति कुत एतत् समु
दायसामर्थ्यादेव अस्मिन्पक्षे वेत्येतदसमर्थितं भवति एतच्च समर्थितं कथं नैव वा पुनरत्र राज्ञो ऽश्वपुरुषावपेक्ष्यमाणस्य गवास इह समासो भवति कथं
तर्हि गोः राजानमपेक्षमाणस्याश्वपुरुषाभ्यां स इह समासो भवति प्रधानमत्र तदा गौर्भवति भवति च प्रधानस्य सापेक्षस्यापि समासः ॥ ॥

वा राज्ञः सामर्थ्यं नावयवेनेत्यर्थः अपर आहेति अत्र पक्षे समुदायसामर्थ्यं समर्थतरत्वे हेतुः समुदायसंबंधे चावयवस्याप्यनुमीयमानः संबंधो ऽस्तीति तदपेक्षः प्रकर्षप्र
त्ययः अस्मिन्पक्ष इति एकस्मिन्साध्ये हेतुद्वयोपादाने विकल्पो भवति इह तु अन्यत्रान्यो हेतुः एतच्चेति सापेक्षत्वेनासामर्थ्यात् राज्ञो गवा समासो न भवतीत्यस्यार्थस्य वाशब्दः
प्रतिपादकः ॥ ॥

=कचिदिति॰ शालीनां ते ओदन मित्यादावसामर्थ्यात्प्राप्तेः पथा कथं दिस्सामर्थ्यार्थमपणे त्वयं दंडोहाने नेत्याकव दिस्यात्॰ १८ = विशेषणं चेति॰ उत्तरत्र पठितप्रकारेण स्थान पतितत्वात्सर्वं श्रेष॰ ।४८ =

भा०कै०२ आख्यातमिति॥ नानाकारकान्निघातादिनिवृत्तये कं चित्प्रवृत्तये च समानेवाक्ये निघातयुष्मदस्मदादेशा वक्ष्यंते तेन त्रलौकिकवाक्यग्रहणानिषेधार्थं वाक्यं परिभाष्यते अ
१२ व्ययकारकविशेषणानि प्रसेकं समुदितानि वा श्रीयंते यथा वृषलैर्नप्रवेष्टव्यं अट् कुघा उ॰ नुमव्यवायेति आख्यातमिति चैकत्वं विवक्ष्यते लक्षणाविधानसामर्थ्यात् त
12 था चतिङ्॰ तिङ् इत्यत्र वक्ष्यते तिङ्ङतिङ इति षेधानर्थक्यं च समानवाक्याधिकारादिति भवतिपचतीत्यादौ सत्यपि साध्यसाधनभावे आख्यातयोर्द्वित्वात्समानवाक्यत्वा
भावान्निघाताप्रसंगो उच्चैरिति यद्यप्यव्ययं कारकं विशेषणं च तथापि प्रपंचार्थं उपलोपादनं तथा च वक्ष्यते आख्यातं सविशेषणमित्येके इति सक्रियाविशेषणं चेति

आख्यातं साव्ययकारकविशेषणं वाक्यं॥ आख्यातं साव्ययं सकारकं सकारकविशेषणं वाक्यसंज्ञं भवतीति च वक्तव्यं साव्ययं उच्चैः पठति नी
चैः पठतीति सकारकं ओदनं पचति सकारकविशेषणं ओदनं मृदु विशदं पचति सक्रियाविशेषणं चेति वक्तव्यं सुष्ठु पचति दुष्ठु पचतीति अपर आह
आख्यातं सविशेषणमित्येके सर्वाणि ह्येतानि क्रियाविशेषणानि एकतिङ् एकतिङ्॰ वाक्यसंज्ञं भवतीति वक्तव्यं ब्रूहि ब्रूहि देवदत्त समानवाक्ये नि
घातयुष्मदस्मदादेशाः समानवाक्ये इति प्रकृत्य निघातयुष्मदस्मदादेशा वक्तव्याः किं प्रयोजनं नानावाक्येषु मा भूवन्निघातादय इति अयं दंडो हरा
नेन ओदनं पचत व भविष्यति ओदनं पच मम भविष्यति योगे प्रतिषेधश्चादिभिः चादिभिर्योगे प्रतिषेधो वक्तव्यः ग्रामस्तव च स्वं मम च स्वं किमर्थमिदमु
च्यते यथान्यासं एव चादिभिर्योगे प्रतिषेध उच्यते इदमद्यापूर्वं क्रियते वाक्यसंज्ञा समानवाक्याधिकारश्च तेहॄष्यं विजानीयात् सर्वमेतद्विकल्प्यत इति त
दाचार्यः सुहृद्भूत्वा चष्टे चादिभिर्योगे यथान्यासमेव भवतीति सांप्रतावश्यं वाक्यसंज्ञा वक्तव्या समानवाक्याधिकारश्च वक्तव्यः॥ ॥

मत्वा सत्साकारकस्यैव यद्विशेषणं तत्र गृह्यते नतु क्रियाया इति भावः आख्याते न च क्रियाप्रधानत्वं लक्ष्यत इत्यतिङ्॰ तेष्वपि देवदत्तेन पाचितव्यमित्यादि षु वाक्यत्वं सिध्यति राम०
एकतिङिति एकशब्दः समानवचनो न तु संख्यावाची बहुव्रीहिश्चायं ब्रूहि ब्रूहीति ब्रूहि ब्रूहि देवदत्तेत्यत्र वाक्यत्वादामंत्रितनिघातः सिध्यति॥ ॥० ॥ १२

=तद्वेत्यमिति॰ समानवाक्य इत्येतदसमर्थः आपावपूर्वविधायकमिव वादियोगे पितदपवादत्वमापूर्वं तिभावः। न च याहे सांप्रतमसामर्थ्यात्तैव मिथ्यत्वाख्यानतात्पर्यं॰ ४= साचेति॰ अयं दंडो हराने नेत्यादर्शं॰ ३=

=समानाधिकाधिकारप्रावेशेषप्रतिविधानायोपसंख्यानं कर्त्तव्यमिति गोरवं स्यादित्याशङ्क्याब्धे· समर्थनिघाते हीति· तद्धितलोपेति· असतीति· १=

समर्थेनिघातेहीति निघातउपलक्षणं तेनयुष्मदस्मदादेशाश्च सन्ते पर्य्येनेइति अत्रसमानाधिकरणं उपसमर्थेवड्वतीति वाचनिकमसामर्थ्यमिति उपसति समानवाक्याधिकारेयुष्मदस्मदादेशोनस्यात् युक्तयुक्तेपिसाक्षात्सामर्थ्याभावात्कार्यंनस्यात्। नद्याइत्यादिकारक विशेषणं विज्ञेयं राजगवीक्षीरइति राज्ञोयागौस्तस्याः क्षीरमित्येतस्मिन्नर्थे राजगोक्षीरमित्यपि प्राप्नोति किमुच्यतइति द्वयोः षष्ठ्यंतयोः समासप्रसंगइत्यर्थे मत्वा पर्यनुयुंक्ते सुप्सुपेति संख्यायाविवक्षितत्वात्

समर्थेनिघातेहि समानाधिकरणायुक्तयुक्तेषूपसंख्यानमसमर्थत्वात् समर्थेनिघातेहि समानाधिकरणयुक्तयुक्तेषूपसंख्यानं कर्त्तव्यं स्यात्समानाधिकरणेपरत्वेनेदास्यामिमृदवेतेदास्यामि समानाधिकरणयुक्तयुक्ते नद्यास्तिष्ठतिकूलेवृक्षस्यलंबनेप्राखायांशालीनांतेओदनंददामिकिं पुनःकारणं नसिध्यति उपसमर्थत्वात् राजगवीक्षीरेद्विसमासप्रसंगोद्विषष्ठीभावात् राजगवीक्षीरेद्विसमासप्रसंगः किंकारणं द्विषष्ठीभावात् द्वेह्यत्रषष्ठ्यौराज्ञः गोः क्षीरमिति किमुच्यतेद्विसमासप्रसंगइति। यदासुप्सुपेति वर्त्तेते तदाद्विसमासप्रसंगइति नैवंविज्ञायते द्वयोः सुबंतयोः समासप्रसंगे द्विसमासप्रसंगइति कथंतर्हि द्विप्रकारस्यसमासस्यप्रसंगेद्विसमासप्रसंगइति राजगोक्षीरमित्यपिप्राप्नोतिनचैवंभवितव्यं भवितव्यंचयदाएतद्वाक्यंभवति गोः क्षीरंगोक्षीरंराज्ञो गोक्षीरंराजगोक्षीरमिति यदात्वेतद्वाक्यंभवतिराज्ञोगोः क्षीरमिति तदानभवितव्यं तदाचप्राप्नोति तदाकस्मान्नभवतिसिद्धंतु॥०॥

समुदायस्याप्यसुबंतत्वात्नास्तिसमासप्रसंगइत्यर्थः। इतरोभिप्रायंप्रकाशयति नैवमितिद्वयोः समासयोः समाहारोद्विसमासंपात्रादिभ्यःप्रतिषेधइति स्त्रीत्वाभावः उभमुमेवार्थंशब्दांतरेणव्यक्तीकरोति द्विप्रकारस्येति एकस्मिन्नेवार्थेकदाचिद्राजगवीक्षीरंकदाचिद्राजगोक्षीरमित्यपिप्राप्नोतीत्यर्थः भवितव्यंचेति अर्थांतरइत्यर्थः। तत्याचगवावच्छिन्नंक्षीरंराजस्वामिकमिति प्रतीपतेगोस्तुराजविशिष्टानप्रतीयते॥ ॥ ॥ ॥

-एकस्मिन्नेवार्थइति· अयंभावः। यदागोशब्दाक्षीरेणचसमस्येवान्वयविवक्षातदायुगपदेवसमासद्वयमप्युक्तोपरस्परविरोधेनन्यूनपर्वनिपातयोःप्रसंगे परत्वाद्द्विराजगवीक्षीरमिति भवति· यदातु गोःक्षीरेणपूर्वमन्वयःप

भा०कै० २ राजविशिष्टाया इति तत्र गोः पूर्वेण राज्ञा संबंधः पश्चात् क्षीरेणेत्यर्थः नैव वेति समस्यमानयोरुभाभ्यां संबंधे सापेक्षं समर्थं भवतीति असामर्थ्याद्गोः क्षीरेण समासो न भवति राज्ञा
१२ तु भवति राजापेक्षया गोः प्राधान्यादेतदुक्तं भवति महत्कष्टं श्रित इत्यत्रैवासार्थस्य विचारितत्वान्न पुनरत्रोद्भावनीयं राजगवीक्षीरे द्विसमासप्रसंग इति समर्थाधिकार इति
13 परार्थ्यसामान्यात्परिभाषाधिकारशब्देनोक्तो विनियोगो ह्यधिकारः स च परिभाषायामप्यस्ति तथा चकुम्भोः कं पौचे सत्र वक्ष्यन्ते अधिकारो नाम त्रिप्रकार इति॥

राजविशिष्टाया गोः क्षीरेण सामर्थ्यात् सिद्धमेतत् कथं राजविशिष्टाया गोः क्षीरेण सह समासो भवति न केवलायाः किं वक्तव्यमेतत् नहि कथमनुच्य
मानं गंस्यते यथैवायं गवि पतते तेन च क्षीरमात्रेण संतोषं करोति एवं राजन्यपि यतते राज्ञो या गौस्तस्या यत् क्षीरमिति नैव वा पुनरत्र गोः राजानम
पेक्षमाणायाः क्षीरेण समासः प्राप्नोति किं कारणम् सामर्थ्यात् कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति कथं तर्हि गोः क्षीरमपेक्षमाणायाः
राज्ञा सह समासो भवति प्रधानमत्र तदा गौर्भवति भवति च प्रधानस्य सापेक्षस्यापि समासः अथ किमर्थं पदविधौ समर्थाधिकारः क्रियते प
दविधौ समर्थवचनं वर्णाश्रये शास्त्रे आनंतर्ये विज्ञानात् पदविधौ समर्थाधिकारः क्रियते वर्णाश्रये शास्त्रे आनंतर्यमात्रे कार्यं यथा वि
ज्ञायेत तिष्ठतु दध्यशान त्वं शाकेन तिष्ठतु कुमारी छत्रं हर देवदत्तेति॥ ॥ ॥ ॥

अत्र पदग्रहणस्याक्षेपः समर्थो विधिरिसेव वक्तव्यं आनंतर्यमात्र इति। विनापि सामर्थ्येनेत्यर्थः तिष्ठतु कुमारी छत्रमिति दीर्घादिति नित्यस्तुग्भवति यस्तु पदांताद्वेति
विकल्पितः स पदविधित्वादसामर्थ्येन भवतीत्याह उः अस्मे तु पदांताद्वेत्येवं दीर्घात्पदे विशेष्यमाणे तलक्षणे दंतत्वं तत्र हणात् सदाकुको विप्रकर्षो विज्ञायते पदांतस्य दीर्घस्य तुग्भव रा०म०
ति न तु दीर्घांतस्य पदस्येति पदविधित्वाभावादसमस्यपि सामर्थ्ये तुग् वा भवतीत्याह उः॥ ॥ ॥ ॥ १२

=नहिसमासनिष्ठसामर्थ्यबोधकेनस निवर्तयितुंशक्यते॰२= ननुतस्यसाधुत्वनिवृत्तिरेवनलभ्यतआह॒ लक्षेति॰ वचनतल्लक्षणैःप्राप्तसाधुत्वस्यसमासादेर्लोकसिद्धसामर्थ्याभाववतोऽसाधुत्वेनेनबोध्यतेइतिभावः॰ अन्यथैवसार्थकासंभवेनातस्यासाधुत्वसंपाद

समर्थाधिकारस्येति विधिशब्द इहकर्मसाधन एव उपात्तः तस्यपदसंबंधीसमासादिरर्थो वाच्यः तत्समानाधिकरणं च समर्थ इत्युपात्तं तत्र असमर्थानां पदानां समासस्यानि
वृत्तित्वात्समर्थवचनेन न किंचित्फलमित्यर्थः तथाहिसमर्थानांयःसमासः ससमर्थ एवयोप्यसमर्थानांभार्याराज्ञः पुरुषो देवदत्तस्येत्यादौ सोपिनियमाभावान्नि
वृत्तएव तस्यासमर्थस्यापिप्रसक्तेनसमर्थवचनेननकिंचित्क्रियते लक्षणं तेरेणसाधुत्वव्यवस्थापनाच्च अकिंचित्कुर्वाणमित्यादयोप्यसमर्थानज्समासाः परिगणने
निषन्नसाव

समर्थाधिकारस्यविधेयसमानाधिकरणयान्निर्देशानर्थक्यं समर्थाधिकारोयं विधेयेनसमानाधिकरणः किंचविधेयं समासः यावद्ब्रूयात्समर्थः समा
स इतितावत्समर्थः पदविधिरितिनचराजपुरुष इत्येतस्यामवस्थायांसमर्थाधिकारेणकिंचिदपि शक्यं प्रवर्तयितुंनिवर्तयितुंवा समर्थाधिकारस्यवि
धेयसामानाधिकरण्यान्निर्देशोनर्थकः सिद्धंतुसमर्थानामितिवचनात् सिद्धमेतत्कथंसमर्थानांपदानांविधिर्भवतीतिवक्तव्यं एवमपिद्व्येक
योर्नप्राप्नोति एकशेषनिर्देशाद्वा अथवा एकशेषनिर्देशो यं समर्थस्यचसमर्थयोश्च समर्थानां च समर्थानामिति एवमपिषट्प्रभृतीनामेव
प्राप्नोति षट्प्रभृतिषुद्व्येकशेषः नैषदोषः प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति द्व्येकयोरपिभविष्यति एवमपिविभक्तीनां नप्राप्नोति ॥१० ॥
परिसमाप्यते

ननिरस्ताइतितदर्थमेतन्नभवति सिद्धंत्विति वचनाद्व्याख्यानादित्यर्थः समर्थपदसंबंधित्वात्पदविधिरूपं चार्णत्समर्थशब्देनोच्यते इतरस्तुपाठोपमितिम
त्वाह एवमपीतियथापञ्चनापजेनेतिगुणेषु संख्याविवक्ष्यते तथेहापिबहुत्वस्यविवक्षितत्वात् प्रत्येकमिति आश्रितसंख्याविशेषाणां कृतैकशेषाणांपुनरे
कशेषकरणसामर्थ्यात् एवमपीति सर्वमेतद्धोचनिकमितिमत्वापुनःपर्यनुयुंक्ते॥ ॥श्री॥ ॥१॥ ॥

=एकपदसंबंधीविधिस= =द्विताद्विशेषणवीशेहहः॥३=

=सह्यारंभेइदं॰३= आश्रितसंख्याविशेषाणांकृतैकशेषाणामिति॰ अन्यथाबहुवचनांतेनैवसमर्थानामितिनिर्दिष्टेदितिकेचित् तन्न॰ षट्प्रभृतीनामेवबहूनांग्रहणं यथास्यान्माद्विचतुःपंचानामित्येतदर्थमाश्रितसंख्याविशेषाणामेकशेषस्यसं

भा०कै०२ समर्थादिति। तिङुः तिङ इसत्तात्रौ समर्थे इति यथाकुत्सनेचस्तुपयोगोत्रीविति पूर्वः समासउत्तरपदलोपीति गतार्थत्वाद्विधिशब्दस्याप्रयोग इसर्थः समर्थपदाश्रय

१४ त्वाद्विधिरेवसमर्थशब्देनोच्यत इसर्थः संबंधसामान्यवचनषष्ठ्यन्तस्यपदशब्दस्यविधिशब्देनसमासे विभक्त्यंतरार्थोपितमेवतीति सर्वे सूत्रेणोवत्ति ध्यति पाद्यच्छिकी चविभक्तिरि

१५ तिभेदाभेदविवक्षासंभवेसतिपदच्छयाच्छभेदविवक्षामाश्रित्य प्रथमपानिर्देशः कृतइसर्थः समानाधिकरणेऽपिति केचिदाचार्या द्रव्यं पदार्थं प्रतिपन्नाः केचिदाकृतिं

समर्थोत्समर्थे पदासद इति एवंतर्हि समर्थेपदयोरपि विधिशब्देन सर्वविभक्त्यंतः समासः समर्थस्यविधिः समर्थविधिः समर्थयोर्विधिःसमर्थ

विधिः समर्थानां विधिः समर्थविधिः समर्थाद्विधिः समर्थविधिं समर्थेविधिः पदस्यविधिः पदविधिः पदयोर्विधिः पदविधिः पदानां विधिः =समस्येसमासेफलंनविंद्= =नार्थेति। २=

पदविधिः२ पदविधिः पदाद्विधिः पदेविधिः पदविधिं समर्थविधिश्च समर्थविधिश्च समर्थविधिश्च समर्थविधिश्च समर्थविधिश्च समर्थविधयः पदवि

धिश्च पदविधिश्च पदविधिश्च पदविधिश्च पद [redacted] विधिश्च पदविधयः समर्थविधयश्च पदविधयश्च [redacted]

[redacted] समर्थेः पदविधिः पूर्वे समासउत्तरपदलोपी पाद्यच्छिकी चविभक्तिः समानाधिकरणेऽपूपसंख्यानमसमर्थत्वात् समानाधिकरणेऽपूप

संख्यानं कर्तव्यं वीरः पुरुषो वीरपुरुषः किंपुनः कारणं नसिध्यति असमर्थत्वात् कथमसामर्थ्यं द्रव्यं पदार्थ इति चेत् यदि द्रव्यं पदार्थः नभवतिन

=जातावेकवचनं २= ((दासामर्थ्यभेदाभावात्॥ ॥ ॥

णशब्देनाणाकृतिरुच्यते यथायस्यगुणस्यभावादिति संसर्गिभेदकं पद्यास्याः पारं प्रतीयते गुणत्वं परतंत्रत्वात्तस्यशास्त्रउदाहृतमिति गुणत्वलक्षणायोगात्तत्र द्रव्येपदार्थे राम०

वीरः पुरुष इसेताभ्यां द्रव्यमेकमभिधीयते ननुवीरत्वंपुरुषत्वं च तत्र भेदाभावे भेदाधिष्ठानस्यसंसर्गस्येहासंभवात्। अस्ति सामर्थ्ये समासो नप्राप्नोतीति वचनं॥ ॥ १४

=संसर्ग इति॰ एकाधिकरणत्वरूप इत्यर्थः ।१८= अवाच्यत्वादिति॰ द्रव्यमेव पदार्थः जातिरूपलक्षणत्वेनावच्छेदकं तस्य विशेषणीभूतस्य गुणस्य वाचकशब्दाभावाद्विशेषणत्वमपि॰ अस्तु गुणतश्चेपि किंतु धर्मतावच्छेदकस्यापि शक्यसंबंधस्तु अकार्यस्यापि कार्यतावच्छेदकत्वं इति भावः ।१८=

अथ हि गुण इति। वीरत्वं पुरुषत्वं चैकत्र लिंगत्वमेताभ्यामभिधीयत इति भेदे इत्येकः संसर्गोऽस्तीति भावः। नान्यत्वमिति उपकारविवक्षायां सामर्थ्येनान्यत्वमात्रेणेत्यर्थः। एकं तयोरिति तत्तस्त द्वारेणास्ति विशेषणविशेष्यभावः। द्रव्यपदार्थिकस्यापीति एकमपि द्रव्यं भिन्नगुणसंसर्गाद्भेदकार्यं लभते। अथ कथं इति भेदहेतोर्विद्यमानस्यापि गुणस्य शब्देनावाच्यत्वादित्यर्थः

अथ हि गुणं प्रत्यर्थो भवति तदा सामर्थ्यं अन्यो हि वीरत्वं गुणः अन्यो हि पुरुषत्वं नान्यत्वमस्तीति इयता सामर्थ्यं भवति अन्यो हि देवदत्तो गोभ्यश्चाश्वेभ्यश्च न तस्यैतावता सामर्थ्यं भवति को वा विशेषः यद्गुणपदार्थे सामर्थ्यं स्यात् द्रव्ये च न स्यादेष विशेषः एकं तयोरधिकरणं अन्यश्च वीरत्वं गुणोऽन्यः पुरुषत्वं द्रव्यपदार्थिकस्यापि तर्हि गुणभेदात्सामर्थ्यं भविष्यति अशक्यो द्रव्यपदार्थिकेन द्रव्यस्य गुणकृत उपकारः प्रतिज्ञातुं न नु चाभ्यंतरोऽसौ भवति यद्यप्यभ्यंतरः न तु गम्यते न हि गुड इत्युक्ते मधुरत्वं गम्यते शृंगवेरमिति वा कटुकत्वं गुणपदार्थिकेनापि तर्हि अशक्यो गुणस्य द्रव्यकृत उपकारः प्रतिज्ञातुं अथ गुणपदार्थिकः प्रतिजानीते द्रव्यपदार्थिकोऽपि कस्मान्न प्रतिजानीते एवमनयोः सामर्थ्यं स्याद्वा न वा कृतेऽतावदिदं स्यात् समानाधिकर ॥ ॥ ॥

ण्ये नेति॥

=विशेषणं विशेष्येण समा= =नाधिकरणेनेत्यर्थः ।१८=

ननु चेति द्रव्यस्य गुणे न नित्यसंबंधादित्यर्थः। यद्यपीति॰ न अभिधीयमानोऽपि संनिधिनैव परिच्छेदहेतुत्वादभ्यंतरः न तु गम्यत इति शब्देन नोच्यत इत्यर्थः। गुणपदार्थिकेनापीति यद्यवाच्यस्योपकारकत्वं नाश्रीयत इत्यर्थः अथावाच्यस्याप्युपकारकत्वमाश्रीयते तदा पक्षद्वयेपि साम्यं कृतेऽतावदिति यद्यवाच्यस्योपकारकत्वं ना ॥ ॥

श्रीयत इत्यर्थः ॥

=इत्यर्थः इति सोपमर्थोपदर्चनसामर्थ्याद्विशेषणं विशेष्येण समानाधिकरणेन समासोयथा लेपादिना पिशाभर्थ्यं नास्तिनत्रैवस्यात् ।१३=भाष्यप्रसयेनेति बोधेनेत्यर्थः ।४=

भा०कै०२ १५ 15 यत्रसर्वमिति ॥ समानमेकमधिकरणमभिधेयं यस्य तेन पर्यायेण स्यर्थे इतिमन्यते ततश्च पत्रप्रवृत्तिनिमित्तमप्येकं वाच्यं चतत्रैवस्यादित्यर्थः कथं पुनरत्र विशेषणविशेष्यभा वउच्यते कंचित्त्रतिकयाचित्संज्ञयासोर्थः प्रसिद्धोऽन्ययातप्रसिद्ध इतिप्रसिद्धस्य विशेषणत्वमितरस्यतुविशेष्यत्वं नैवंजातीयकानामिति युगपत्प्रयोगाभावात्सामर्थ्या भावाच्चेत्यर्थः भसभरणीयइति अस्तिचापंशिष्टप्रयोग इतिभावः नैताविति उपाधिभेदाद्भिन्नार्थाविसर्थः दर्शनीयायामातेति यदिसतिभेदे किंचित्समानमाश्रि

यत्रसर्वसमानं इंद्रः शक्रः पुरुहूतः पुरंदरः कंदुः कोष्ठः कुसूल इतिनैवं जातीयकानांसमासेनभवितव्यं प्रसयेनवोसत्त्वंकिं कारणं अप्रयोग त्यर्थः शब्दप्रयोगः अर्थसंप्रसापयिष्यामीतिशब्दः प्रयुज्यते तत्रैकेनोक्तत्वात्तस्यार्थस्यद्वितीयस्यप्रयोगेणभवितव्यं किंकारणं उक्तार्थानामप्रयो ग इतिनतर्हीदानीमिदंभवति भसमरणीय इतिनेतौ समर्थौ एकोत्रशब्दार्थेन्नसः अपरोहि शक्येभर्तुं भसः अर्हतिभर्तुं भरणीय इति यदित हीयत्रकिंचित्समानंकश्चिच्च विशेषः तत्रभवितव्यं इहापिनर्हिप्राप्नोति दर्शनीयायाः माता दर्शनीयामातेति अत्रापिकिंचित्समानं कश्चिच्च विशेषः किं पुनस्तत् सद्भावान्यभावौनकचित्सद्भावान्यभावौनस्तः उच्यते चेदंसमानाधिकरणेनेति तत्रप्रकर्षगतिर्विज्ञास्यते यत्रसाधीयः सामानाधिकरण्यं क्व च साधीयः सामानाधिकरण्यं यत्र सर्वसमानं सद्भावान्यभावौ द्रव्यंच अथवासमानाधिकरणेनेतितत्समानमाश्रीयते यस्समानं भवतिनभवतिच ॥

तत्समासः क्रियते तदापथा वीरपुरुष इत्यत्रानभिधीयमानमपिद्रव्यं समानमाश्रित्य समासः क्रियते तथात्रापि सत्त्वासमानेति समासः प्राप्नोति ननुपरत्वाद्धात्र षष्ठीसमासोभविष्यति नैतद्दस्ति समानाधिकरणेननेतिप्रतिषेधः प्राप्नोति विधेः कोवकाश इति चेत् इष्टालिह व्यवस्थानस्यात् समानाधिकरणेन त्तर राम० १५ पदलक्षणस्य पुंवद्भावः प्रसज्येत सद्भावान्यभावाविति सत्त्वान्यत्वे इत्यर्थः ॥ ॥श्री॥ ॥ रवादपवाद ॥

=मीमांसकमतेसर्वेषांशब्दानांजातिः प्रवृत्तिनिमित्तंस एवचशब्दार्थो नास्तिकमतेनभेदोऽपोहापरनामाशब्दार्थः इतीदृनतः ।१= मीमांसकनास्तिकयोर्मताद्विशेषोनगवतोत्राभिप्रेतः ।२=

=सावत्रात्समानाधिकरणमपंत्वपक्षबादिकल्पितस्याः अनभमानातिरेकात् एवमपोहः प्रतियोग्यनु... योगिभेदेप्येकएवेतिसर्वत्रत

सौ

नचैतदितिासन्नायाः सर्वत्र मा वात् व्यभिचारमा वान्नां समानत्वेनाश्रीयते पूर्वः परिहारः समानत्वमभ्युपगम्य पुनः अतुला प्रकर्षो श्रयेणोक्तः उत्तरस्तु सर्वे साधारणात्सन्ना
याः समानव्यपदेशं प्रतिनिमित्तत्वानाश्रयेणाभिहितः ' अथवेति ' अधिकरणशब्दोभिधेयवाचीति पर्यनुयोगो द्रव्यवाचीतिसमाधानं दर्शनीयायामाते सत्रतु द्रव्यभेदः अ
भिधेयस्तु सन्नायाः समानत्वात्समानत्वं स्यात् ' अनुदितमिति ' विवादः कृत इत्यर्थः सर्पिः कालकमिति इसुसोः सामर्थ्ये इति षत्वनिवारणार्थं वा च निक्रमसामर्थ्यमिति वी

नचैतत्समानं क्वचिदपि न भवति अथवा यावद्द्रव्यात्समानद्रव्येणेति तावत्समानाधिकरणेनेति द्रव्यं हि लोकेधिकरणमित्युपचर्यते तद्यथा एकस्मिन्द्र
व्ये अनुदितं एकस्मिन्नधिकरणे अनुदितं तथाव्याकरणे विप्रतिषिद्धं चानधिकरणवाचि अद्रव्यवाचीति गम्यते एवमपीदमवश्यं कर्तव्यं समानाधिकरणमस
मर्थवद्भवतीति किं प्रयोजनं सर्पिः कालकं यजुः पीतकमिति एवमर्थं यत्समानाधिकरणमर्थवद्भवतीति उच्यते सर्पिष्पीपते यजुष्क्रियत इत्यत्र ष
त्वं न प्राप्नोति अधात्वभिहितमित्येवं तत् एवं च कृत्वा समानाधिकरणे उपसंख्यानं कर्तव्यं वीरः पुरुषो वीरपुरुष इति किं कारणं असमर्थत्वात् नवा
वचनप्रामाण्यात् नवा कर्तव्यं किं कारणं वचनप्रामाण्यात् वचनप्रामाण्यादत्र समासो भविष्यति किं वचनप्रामाण्यं समानमध्यममध्यमवीराश्चेति
१ लुप्ताख्या तेषु च लुप्ताख्याने अचोपसंख्यानं कर्तव्यं ॥ ॥ ॥

रपुरुष इति समानाधिकरणसमासोपि न स्यादित्यर्थः । अधात्वभिहितमिति धातुसहचरितः प्रत्ययो धातुशब्देनोक्तः तेनाभिहितं कर्मादि यदि भवति तदा सामर्थ्यमेवेत्य
र्थः । नवेति वचनसामर्थ्याद्वाचनिकमसामर्थ्यं बाध्यत इत्यर्थः वीरः पचन्नित्यादौ धात्वभिहिते अनभिधानाद् उल्लङ्घनाद्वा समासाभावे मन्यते ' लुप्ताख्यातेषु चेति वचनप्रा
माण्यादित्यसो प जीवनार्थमिदं वार्त्तिकं भाष्यकारस्तु प्रपंचार्थमुपसंख्यानं प्रतिविधानं च वाक्यभेदेनाचष्टे आख्यातशब्दे नक्रियापदं कांता घ्यपिक ध्यते॥ ॥

=असमर्थवदितिसामर्थ्यनिषेधोवचनप्रामाण्यादपेक्षालक्षणस्यैवनत्वेकार्थीभावलक्षणस्यापीतिवचनमार्थः।२= वीरःपचन्नित्यादौचवक्तितार्थत्वाद्वचनसामर्थ्यादित्यनुपपन्नमतआहःवीरःपचन्नित्यादाविति।२=
=यद्यपि समानाधिकरणेनेसेतद्वचनमेवासामर्थ्येपिसमा नाधिकरणानां समासंज्ञापयितुमलंतथापिवीरः पुरुषइत्यादौ विशेषेण पिवचनं ज्ञापयितुमितिसूत्रवितुं ज्ञापकान्तरोपन्यासः।२= तिङंकर्मादिघोतकत्वमितिमतेनेयथाश्रुतंभाष्यंसमकृ
वीरःपच लिमादौ कृते षष्ठ्यामरुज्ञात्त्वेतीतिकेन्यताः

भा॰कै॰ २
१६
16

निष्कौशाम्बिरिति पूर्वपदोत्तरपदयोरसामर्थ्यमन्यते क्रियाविषयत्वादुपसर्गाणां द्रव्येण संबन्धाभावात् किं तर्हीति वार्त्तिककारस्य वचनस्यापि स्मृतिशास्त्रत्वात्प्रामाण्यमाश्रितमित्य
र्थः तस्यार्थ इति कोऽनशब्दस्य योऽर्थः प्रतीयते निःशब्देन क्रियाविषयेण तस्यार्थस्य सामर्थ्याद्गाक्षिप्तत्वात्तद्द्वारेण पूर्वपदोत्तरपदयोः सामर्थ्यादित्यर्थः सोऽर्थ इति निस एवायं द्व
न्द्विषये कोऽनलक्षणोऽर्थ इति दर्शयति अथ यत्र इति यत्र द्विशिष्टे पूर्वपदोत्तर पदे उपात्ते यथा द्वितीयाश्रितेति तत्र नास्ति बहूनां प्रसंगः यत्र तु विशेषो नोपात्तः अनेन

निष्कौशाम्बिः निर्वाणेण सिं लुप्ताख्यातेषु च किं वचनप्रामाण्यादिसेवं किं वचनप्रामाण्यं कुगतिप्रादय इति अप्रसन्नपदे तस्य वचने प्रयोजनं किं सुरा
जा अप्रतिराजेति न ब्रूमो हन्त सूत्रवचनप्रामाण्यादिति किं तर्हि वार्त्तिकवचनप्रामाण्यादिति सिद्धं तु क्ताङ्स्वति दुर्गतिवचनात् प्रादयः क्तार्थे इति
तदर्थे गतेर्वा तदर्थे गते वा पुनः सिद्धमेतत् किमिदं तदर्थगतेरिति तस्यार्थस्तदर्थः तदर्थस्य गतिस्तदर्थगतिस्तदर्थगतेरिति यस्यार्थस्य कौशाम्ब्या साम
र्थ्यं स निसोच्यते अथवा सोऽर्थस्तदर्थः तदर्थस्य गतिस्तदर्थगतिस्तदर्थगतेरिति योऽर्थः कौशाम्ब्या समर्थः स निसोच्यते अथ यत्र बहूनां समासप्र
संगः किं तत्र द्वयोः समासो भवति आहोस्विदविशेषेण कस्मात्र विशेषः समासो द्वयोर्द्वयोश्चेत् द्वंद्वे नेकग्रहणं समासो द्वयोर्द्वयोश्चेन्न द्वंद्वे नेकग्रहणं कर्त्तव्यं
चार्थे द्वंद्वो नेक [redacted] मिति वक्तव्यं इहापि यथा स्यात् प्लक्षन्यग्रोधखदिर पलाशा इति नैष दोषः अत्रापि द्वयोर्द्वयोः समासे भविष्यति द्वयोर्द्वयोः समासः इ

क्रमन्यपदा [redacted] र्थे चार्थे द्वंद्व इति तत्र संदेहः परिस्पष्टपेति वर्त्तते न तो विवक्षितत्वात्संख्यायाः द्वयोर्द्वयोः समासेन भवितव्यं अथ निवृत्तं यावता मन्यपदार्थे चार्थे च व
र्त्तिस्तावतो भवितव्यं ननु अनेकग्रहणाद्बहूनामपि भाव्यं अन्यथा तदनर्थकं स्यात् नैतदस्ति अनेकग्रहणमुपसर्जनसंज्ञार्थं स्यात् चित्रगुरिसादौ द्व्यर्थपदाख्येकविभक्तिके नो ॥
पसर्जनसंज्ञा सिध्यतीत्युच्यते तदानेकग्रहणं स्पृष्टपेसस्य निवृत्तत्वं विज्ञायते तेन बहूनां समासः सिध्यति ॥ ॥ राम॰ १६

वितर

=एकैकस्येति-अनेकस्य चार्थवत्त्वे समासविधानादेकैकस्य चतुरवयवः समूहोऽर्थस्तत्र द्वयोः सत्त्वे पितयो रितरद्वयसापेक्षतया सामर्थ्याभावात्तयोः समासाभाव इति भावः। २=

बहुत्वबुद्धित्वाभावादिति॥ ननु बहुत्वबुद्धौ विधेने तद्यथा एषां ब्राह्मणानां द्वावानयेति तत्र बहुत्वरूपक्रान्ते प्लक्षन्यग्रोधयोरेका द्वंद्वसंज्ञा खदिरपलाशयोर्द्वितीया द्वंद्वसमुदायस्य तृतीया भविष्यति नैष दोषः यद्यपि बहुत्वं द्वौस्त्वथापि चतुर्षु सत्सु विवक्षितेषु एकैकस्य शब्दस्य चत्वारोऽर्था इति द्वयोर्द्वयोरर्थे वत्त्वसंभवात् समासभावः केनास्तीति एतद्वचनेन प्रतिपाद्यते एवं विग्रह इति द्वयोर्द्वयोः सह विवक्षा भविष्यति न तु युगपच्चतुर्णामित्यर्थः होतृपोतृनेष्टोद्गातार इति पदाद्बहूनां समासस्तदा सर्वान्त उत्त

बहुत्वबुद्धित्वाभावात्तद्द्वयोर्द्वयोः समास इति चेत्तन्न किं कारणं बहुत्वबुद्धित्वाभावात् न बहुत्वबुद्धित्वमस्ति नावश्यमेवं विग्रहः क्रियते प्लक्षश्च न्यग्रोधश्च खदिरश्च पलाशश्चेति किं तर्हि एवं विग्रहः क्रियते प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ खदिरश्च पलाशश्च खदिरपलाशौ प्लक्षन्यग्रोधौ च खदिरपलाशौ च प्लक्षन्यग्रोधखदिरपलाशा इति होतृपोतृनेष्टोद्गातारस्तर्हि न सिध्यन्ति होतापोतानेष्टोद्गातार इति प्राप्नोति न चैतदेवं भवितव्यं भवितव्यं च परेऽप्येवं विग्रहः क्रियते होता च पोता च होतापोतारौ नेष्टा चोद्गाता च नेष्टोद्गातारौ होतापोतारौ च नेष्टोद्गातारौ च होतापोतानेष्टोद्गातार इति होतृपोतृनेष्टोद्गातार इत्येतन्न सिध्यन्ति समासान्तप्रतिषेधश्च समासान्तस्य च प्रतिषेधो वक्तव्यः वा [redacted]मिति वाकूलं च स्त्रग्दृषदमिति प्राप्नोति नैष दोषः उपचारेण समाहृ मासो भविष्यति स्त्रक् च दृषच्च स्त्रग्दृषदं तत्र क्स्त्रग्दृषदं च वाकूलं स्त्रग्दृषदं वा स्त्रग्दृषदं च वाकू [redacted] लकुस्त्रग्दृषदमिति।

" होतृपोतृनेष्टोद्गातार एवं तर्हि न सिध्यन्ति इह च॥ ॥ ॥

इतरेतरस्य एकस्मिन् वानङ् भविष्यति द्वयोर्द्वयोस्तु समासे क्रियमाणे एकं वर्जयित्वा सर्वेषामानङुत्पाद्यः अत्र च भाष्यकारवचनप्रामाण्यादुद्गातृशब्दस्य दीर्घः आन्यथान प्राप्नोति॥ तस्य नियमार्थत्वात् समासान्तप्रतिषेधश्चेति द्वयोर्द्वयोर्द्वंद्वसंज्ञायां प्रतिद्वंद्वं समासान्तः प्राप्नोतीत्यर्थः यद्यपि प्रक्रियान्तरे प्रतिद्वंद्वमानङादेशवत्समासान्तेन भाव्यं तथापि बहूनां समासाभावादेकस्मात् समासान्तता न कदाचित्प्राप्नोतीति चोद्यते॥ ॥ ॥

लक्ष्मी २

=कृतेतु तत्पुरुषे चांतरपदानां यथा पथंपश्चाद्बहुव्रीहिश्चिक्ष्यत एवेति वक्ष्यते·२=

भा०वै०२ सुसूक्ष्मजटकेशेनेति। सुष्ठु सूक्ष्मजटाः केशा अस्येति विग्रहः। यद्यनेकग्रहणं न क्रियते क्रियमाणं वोपसर्जनसंज्ञार्थं विज्ञायते सुप्सुपेति चानुवर्त्तेत तदात्र बहू
१७ नां बहुव्रीहिर्न्नेप्राप्नोति। पूर्वशालाप्रिय इति। पदाबहूनां बहुव्रीहिसंज्ञा तदा पूर्वपदप्रकृतिस्वरेण पूर्वशब्दः स्वांगशिटाम रंतानामि साद्युदात्तः स्यात् पदात्तु द्वयोरेव
17 बहुव्रीहिसंज्ञा भवतीति तदा पूर्वा शाला पूर्वशालेति पूर्वापरप्रथमेति समासे कृते समासांतोदात्तत्वे पूर्वशाला प्रियास्येति द्विपदे बहुव्रीहौ कृते पूर्वपदप्रकृतिस्वरेण
शालाशब्दाकार उदात्तः सिध्यति। ननु त्रिपदे बहुव्रीहौ कृते तद्धितार्थोत्तरपदेति तत्पुरुषेणऽत्रभाव्यमिति कथं दोषोपन्यासः। एवं तर्हि परस्तात्परिहारो वक्ष्यत
इति न तावदत्राश्रितः। पंचगवप्रिय इति। त्रिपदे बहुव्रीहौ समासांतो न प्राप्नोति यदा द्वयोर्बहुव्रीहिरिति पक्षस्तदा पंचानां गवां समाहारः पंचगवं तत्प्रियमस्ये

सुसूक्ष्मजटकेशेन सुनता जिनवाससमासमंतशिति रंध्रेणद्वयोर्दत्तौ न सिध्यति अस्कृतद्र्यविशेषेण अविशेषेण बहुव्रीहावनेकपदप्रसंगः यद्यवि
शेषेण बहुव्रीहावनेकपदप्रसंगः तत्रकोदोषः तत्रस्वरसमासांतपुंवद्भावेषु दोषः तत्रस्वरसमासांतपुंवद्भावेषु दोषो भवति स्वरः पूर्वशालाप्रियः अप
रशालाप्रियः स्वरसमासांत पंचगवप्रियः समासांत पुंवद्भावा खादिरेतरशाम्यं नवावयवत्तत्पुरुषत्वात् नवाएषदोषः किंकारणं अवयवतत्पुरुषत्वा
त् अवयवोत्र तत्पुरुषसंज्ञः तदाश्रयो समासांतपुंवद्भा वौ भविष्यतः स्वरः कथं तस्यांतोदात्तत्वं॥ ॥ ॥ ॥

तिसिध्यति। खादिरेतरशाम्यमिति। खादिरी इतरा शम्यास्येति त्रिपदे बहुव्रीहौ क्रियमाणे उत्तरपदे पुंवद्भावो विधीयमानः खादिरीशब्दस्य न प्राप्नोति यदा तु द्वयोर्बहुव्रीहिरिति
पक्षस्तदेतरा शाम्याइतरशाम्येति समासे कृते खादिरी शाम्यास्येति बहुव्रीहौ सिध्यति पुंवद्भावः। नवेति। कृत्विंत्र्याणां पदानां बहुव्रीहौ कृते द्वयोः पदयोस्तद्धितार्थोत्तरपदेति
तत्पुरुषोभिन्नविषयत्वाच्च बहुव्रीहितत्पुरुषसंज्ञयोरेकसंज्ञाधिकारेपि नास्ति विरोधः खादिरेतरशाम्यमित्यत्र पुंवद्भावसिद्धये कृतेन तत्पुरुषेण खादिरी इतरशाम्यास्येति द्विपदो बहु राम०
व्रीहिः क्रियते ननु त्रिपदः विकारे च प्रत्ययविधानात् वृद्धिनिमित्तस्येति प्रतिषेधो नास्ति स्वरः कथमिति। पूर्वशालाप्रिय इत्यादावपवादत्वाद्बहुव्रीहिस्वरः प्राप्नोति॥ ॥ १७

=समासस्यैतस्य नेनसामान्यतः आसस्तत्पुरुषांतोदात्तस्य विशेषविहितत्वाद्बहुव्रीहौ प्रकृत्येन बाधकमिसर्थः।१=

विप्रतिषेधादिति। विरोधमात्रं विप्रतिषेधशब्देनोच्यते हेतुस्त्वन्तरंगत्वं निमित्तस्वरबलीयस्त्वं च इतरस्य विप्रतिषेधमूलं परमनेन हेतुत्वेनोक्तमिति मत्वाह नैष्पयु
क्त इति अन्तरंगेति अनुदात्तं पदमेकवर्जमिति वचनात् द्वयोः स्वरयोरसंभवात् कृष्णोत्तरप्राप्तत्वाच्च बाध्यबाधकभावाद्वयवाश्रयत्वादन्तरंगत्वं व्यवस्थाहेतुसाम्यीयन
इत्यर्थः अन्तरंगोपि सन्ति शिष्टेन बहिरंगेणापि स्वरेण बाध्यत इत्यनैकान्तिकमन्तरंगत्वमत्वाह त्वन्तरमाह निमित्तस्वरबलीयस्त्वादिति सति बहुव्रीहौ तद्वयवोत्तरपदाग्र

विप्रतिषेधात् अन्तोदात्तत्वं क्रियतां पूर्वपदप्रकृतिस्वर इति अन्तोदात्तत्वं भवति विप्रतिषेधे नैतद्युक्तो विप्रतिषेधः विप्रतिषेधे परमित्युच्यते पूर्वं चान्तोदात्तत्वं परं पू
र्वपदप्रकृतिस्वरत्वं न परविप्रतिषेधं ब्रूमः किं तर्हि अन्तरंगविप्रतिषेधं निमित्तस्वरबलीयस्त्वात् अथ वा निमित्तस्वरान्निमित्तिस्वरो बलीयानिति वक्तव्यं किं पुन
र्निमित्तं को वा निमित्ती बहुव्रीहिर्निमित्तं न सुरूपो निमित्ती तत्तर्हि वक्तव्यं निमित्तस्वरान्निमित्तिस्वरो बलीयानिति न वक्तव्यं एकशितिपात्स्वरवचनं तु ज्ञापकं
निमित्तिस्वरबलीयस्त्वस्य यदयं युक्तारोह्यादिष्वेकशितिपाच्छब्दं पठति तज्ज्ञापयत्याचार्यो निमित्तस्वरान्निमित्तिस्वरो बलीयानिति कः पुनरर्हति युक्ता
रोह्यादिष्वेकशितिपाच्छब्दं पठितुं एवं किल नाम यद्यते एकः शितिः एकशितिः एकशितिः पादो यस्येति तच्च न एवं विग्रहः करिष्यते एकः शितिरेषु तद्इमे एक
शितयः एकशितयः पादा यस्येति एकशितिपादिति अथाप्येवं विग्रहः क्रियते एकः शितिरेकशितिः एकशितिः पादो यस्येति एवमपि नार्थः पाठेन गते द्विगाविशेष
स्वरोत्र बाधको भविष्यति अस्य तर्हि बहुव्रीह्यवयवस्य न सुरूपसंज्ञा प्राप्नोति सुसूक्ष्मजटकेशेन सुनताजिनवाससा समन्तशितिरंध्रेणेति तत्र को दोषः
तस्यान्तोदात्तत्वं विप्रतिषेधादिसंतोदात्तत्वस्यात विप्रतिषेधेन नैष दोषः॥

=सनिमित्तस्वरबलीयस्त्वं निमित्तवचनेन नोक्तन्यायसिद्धस्यान्तरंग ॥ ... निमित्तिस्वरबलीयस्त्वं सिद्धं ...=

योद्वयोस्तत्सुरूपरति बहुव्रीहेर्निमित्तत्वं एकशितिपादित्युक्तारोह्यादिषु पूर्वपदाद्युदात्तार्थः पाठः एकशब्दश्च कृन्नन्तत्वात्स्वांगशितमिति वाद्युदात्तः तत्र त्रिपदे बहु
व्रीहौ कृते द्वयोस्तत्सुरूपे बहुव्रीहौ प्रकृत्येति सिद्धमाद्युदात्तत्वे ज्ञापनार्थः पाठः संपद्यते कः पुनरिति सर्वेषां स्वरस्य सिद्धत्वादकृतेव्य एव पाठो न तु ज्ञापक इत्यर्थः
॥ निमित्तस्वरस्य तु बलीयस्त्वं वाचनिकं न तु ज्ञापकसिद्धं॥ ॥

=यदीति॰ अयंभावः। किमिह पूर्वयोरुत्तरयोर्वा तत्पुरुषं कृत्वा बहुव्रीहावंतरंगं समासांतो दात्तत्वं प्राप्नोत्युत बहुव्रीहावुत्तरपदे परतस्तत्पुरुषे निमित्तस्य शब्दस्य बहुव्रीहिस्त्वा घा॰ नाघः। संति शिष्टे न बहिरंगेणाप्यं तरंगस्य बाधना दित्युक्तं॰ न द्वितीयोपीत्याह॰ यदीपादीति॰ १=
=नप्रवर्त्तत इति॰ एतेनैकद्वित्रिपादक्रमे एकद्वित्रिशब्दयोः पूर्वकाले के नित्यसमासे कृते बहुव्रीहौ एकद्वित्रि पादस्य द्विगुत्वाभावादि गतिस्तस्याः॥ =सुसूक्ष्मजटकेशशब्देन बहुव्रीहौ सुसूक्ष्मजटशब्दस्य केशशब्देन वा बहुव्रीहा वंतरंगबहिरंगबहिरंगयोस्तत्पुरुषे बहुव्रीहिस्त्वयोः
बहुव्रीहिप्रयुक्तपूर्वपदप्रकृतिस्वरेणैकद्वित्रिपादस्यांतोदात्तत्वमात्रेयुक्ताये ह्यादिपाद्युदात्तार्थं पाठस्यावश्यकत्वेनाप्यांतकं तत्स्यात्

नेदमिति॥ यँद्यपूर्ववचनं क्रियेत बहुव्रीह्यवयवस्तत्पुरुषो भवतीति ततोत्र स्याद्दोषः दिक्संख्ययोस्तूत्तरपदे तत्पुरुषो विधीयत इति दोषाभावः बहुलँवचनादिति समुदायस्य वृत्त्यावयवस्याप्यासंज्ञाविशेषलक्षणेन विना बहुल वचनान्न प्रवर्त्तते अधिकषष्टिवर्षइति त्रिपदे बहुव्रीहौ कृते अधिकग्रहणं चालुकीस्यधिकशब्दस्य संख्यासंज्ञात्वात्तद्धितार्थोत्तरपदेति पदद्वयस्य तत्पुरुषे कृते समासांतो दात्तत्वं प्राप्नोतीत्यर्थः। अधिकशब्दः क्तांतत्वादाद्युदात्तः बहुव्रीहिसंज्ञा तर्हीति अधिकषष्टिवर्षेपि

नेदं बहुव्रीह्यवयवस्य तत्पुरुषस्य लक्षणमारभ्यते किं तर्हि यस्य बहुव्रीह्यवयवस्य तत्पुरुषस्य तल्लक्षणमस्ति तस्यांतोदात्तत्वं भविष्यति विप्रति षेधेन ननु चास्याप्यस्ति किं विशेषणं विशेष्येण बहुलमितिँ बहुलवचनान्न भविष्यति। अस्य तर्हि बहुव्रीह्यवयवस्य तत्पुरुषसंज्ञा प्राप्नोति अधिकषष्टिवर्षइति तत्र को दोषः तस्यांतोदात्तत्वं विप्रतिषेधादित्यंतोदात्तत्वं स्याद्विप्रतिषेधेनं नैष दोषः इगंते द्विगाविति एषः स्वरो बाधको भविष्यति यस्तर्हि नेगंतः अधिकशतवर्षइति इहाप्यधिकषष्टिवर्षइति समासांतः प्राप्नोति इचः प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं निस्त्रिंशाद्यर्थ मिति नैष दोषः अप्रपादेरित्येवं तत् किं पुनः कारणमप्रपादेरित्येवं तत् इह माभूत् गोत्रिंशच्चत्वारिंशदिति बहुव्रीहिसंज्ञा तर्हि प्राप्नोति संख्य
१याव्ययासन्नादूराधिकसंख्याः संख्येय इति॥ ॥ ॥

दोषइति भावः त्रिपदे बहुव्रीहौ कृते पदद्वयस्य तद्धितार्थोत्तरपदेति तत्पुरुषं परत्वाद्बाधित्वासंख्ययाव्ययेति बहुव्रीहिः प्राप्नोति न तस्य बहुव्रीहौ संख्येय इति
१ उपसंग॥ ॥श्री॥ ॥ ॥

न संख्यामिति॥ अधिकषष्टिवर्ष इत्येवं यथासादिसेवमर्थे अव्यविकन्याय आश्रीयते तेनाधिकाषष्टिर्वर्षाण्येतस्येति वाक्यमेव भवति सर्वेणेति अधिका षष्टिर्येषां वर्षाणामिति वर्षे
षु संख्येयेषु अनेकमन्यपदार्थे इति बहुव्रीहिः प्राप्नोति संख्येयवृत्तित्वाच्च बहुव्रीहेस्तन्निबन्धनोऽजपीति दोषः बहुव्रीहिगर्भश्च पुनर्वयस्यभिधेये बहुव्रीहिः प्राप्नोति प्रसंख्या
त इति अव्यविकन्यायेन चाधिका षष्टिर्वर्षाणामस्येति वाक्यमेव भविष्यति अव्यविकन्यायममत्वाह सर्वथेति अव्यविकन्यायाश्रयेण हि यत्तु तदुक्तमिति हत्तिविषये दशादीनाम

न संख्यासंख्येये वर्त्तयिष्यामः कथमेवं विग्रहः करिष्यते अधिकाषष्टिर्वर्षाणामस्येति यथा तर्हि संयोगः प्रत्याख्यायते तथा सर्वेण प्राप्नोति कथं च संयो
गः प्रत्याख्यायते अशिष्यः संख्योत्तरपदः संख्येयार्थाभिधायित्वादिति प्रत्याख्याते तस्मिन्योगे संख्यां संख्येये वर्त्तयिष्यामः तत्रैवं विग्रहः करिष्यते अधिका
षष्टिर्वर्षाण्यस्येति सर्वथा वयमधिकषष्टवर्षान्न मुच्यामहे कथं यावता संयोगः प्रत्याख्यायते अयं च विग्रहोऽस्ति अधिका षष्टिर्वर्षाणामस्येति यत्तु तदु
क्तमधिकषष्टिवर्षो न सिध्यतीति स सिद्धो भवति कथं यावता संयोगः प्रत्याख्यायते अयं च विग्रहोऽस्ति अधिका षष्टिर्वर्षाण्यस्येति अधिकशतवर्षस्तु
न सिध्यति कर्तव्योऽत्र यत्नः॥ ॥ इति श्रीमहाभाष्ये द्वितीयाध्यायस्य प्रथमे पादे प्रथममाह्निकम्॥ ॥ ॥ ॥

।अधिकशतवर्षस्त्विति।

पिद्येकयोरिति निर्देशात्संख्यानवृत्तित्वात्संख्येयस्यान्यपदार्थत्वात्संयोगः प्रत्याख्यायते अधिकं शतं वर्षा एतस्येति त्रिपदे बहुव्रीहौ कृते तद्धितार्थोत्तरपदे तत्पुरुषे समासान्तो
दात्तत्वं प्राप्नोति आद्युदात्तत्वं चेष्यते कर्तव्योऽत्र यत्न इति युक्तारोह्यादिष्वधिकशतवर्षशब्दः आद्युदात्तार्थो द्रष्टव्यः॥ ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्य
प्रदीपे द्वितीयस्याध्यायस्य प्रथमे पादे प्रथममाह्निकं॥ ॥ ॥

भा०कै०२ सुबामंत्रितेपरांगवत्स्वरे॥ सुबितिकिमर्थमिति॥ आमंत्रितस्यपरत्वात्तस्मिन्परतोविधीयमानस्यपरांगवद्भावस्यपदविधित्वात्समर्थपरिभाषोपस्थानात्त्रिदं॰तस्यनभविष्य

१९ ति॥ तथाहिप्रधिकरणस्यतिदं॰तस्यवास्तवमसामर्थ्यं समानाधिकरणस्यवाचनिकमतिव्याप्तिनिवारणार्थमवश्यं कर्त्तव्यंषष्ठ्यामंत्रितकारकवचनमितितेनैवतिदं॰त

१७ स्यसिद्धोनिरासःक्रियमाणेचसुब्ग्रहणेतीक्ष्णायासूच्यासीव्यन्नित्यादौसुबंतसमुदायस्याप्राप्तिरित्यव्याप्तिःप्राप्नोतीतिभावः॰कारोष्यटन्निति॰अधात्वभिहितमितिसाप

वादत्वान्नास्तिवाचनिकमसामर्थ्यं॰पीड्येपीड्यमानेति॰हेपीड्यमानतदीययापीडयाहंपीड्यइत्यस्तिसामर्थ्यं॰अथवासंबोधनपदंक्रियायाएवविशेषकमित्यस्तिसाम

=देवदत्तःपचतिचैत्रमुंडस्वेत्यादेः॰४=

सुबामंत्रितेपरांगवत्स्वरे॰सुबितिकिमर्थंकारोष्यटन्नैतदस्ति॰असामर्थ्यादत्रनभविष्यति॰कथमसामर्थ्यं॰समानाधिकरणमसमर्थवद्भवतीति॰इदंतर्

हिपीड्येपीड्यमानेति॥इदंचाप्युदाहरणंकारोष्यटन्॰ननुचोक्तमसामर्थ्यादत्रनभविष्यतीति॰कथमसामर्थ्यं॰समानाधिकरणमसमर्थवद्भ

तीतिनैषदोषः॰अधात्वभिहितमित्येवंतत्॰आमंत्रितस्यपरांगवद्भावेषष्ठ्यामंत्रितकारकवचनं॰आमंत्रितस्यपरांगवद्भावेषष्ठ्यंतं॥ ॥

र्थ्यंतथाचव्रजानिदेवदत्तेतिनिघातोभवतीति॰पीड्यइतिनास्यनुदात्तेदितिलसार्वधातुकस्यानुदात्तत्वेयकउदात्तत्वादेकादेशउदात्तेनोदात्तइत्येकारउदात्तःपीड्य

मानेस्यपदाद्युत्तरस्यनिघातः॰अधात्वभिहितमिति॰सर्वनामधातुजमितिदर्शनेनसर्पिःकालकमितिव्यधिपिधात्वभिहितंतथापियत्क्रियाप्रवृत्तिनिमित्तं॰सुब्

एम० रावधातुप्रत्ययेनकर्त्रादिप्रतिपत्तिस्तद्धात्वभिहितंगृह्यतेयदप्युक्तंवचनान्तरेणातिव्याप्तिर्वार्यतइतितदपिनयुक्तंनहिसूत्रकारोवार्त्तिककारस्यवचनेनातिव्याप्ति

निवारणंमन्यते॰आमंत्रितस्येति॰आमंत्रितेयोविधीयतेसआमंत्रितसंबंधीभवतीतिषष्ठीनिर्देशः॥ ॥ ॥ १९

आमंत्रितकारकमिति॥ आमंत्रितेनाधातुवाच्यक्रियातस्याः कारकमित्यर्थः। नास्त्येति। कुंडशब्देन विषयस्यानिसंतस्येत्याद्युदात्तः। आमंत्रितस्य पदात्परस्य निघातः। सत्य
पिपरांगवद्भावे सुबंतसमुदायस्याद्युदात्तत्वं शेषनिघातश्चेति नेदाभावः। परश्चुनेति। परश्चुशब्द आङ्परयोः खनिशृभ्यां डिच्चेति कुप्रत्ययांतोंतोदात्तः। नन्वि
मित्तग्रहणं वेति। वाशब्दो विकल्पे। नस्यामंत्रितस्य यन्निमित्तं तस्य परांगवद्भवतीत्यर्थः। मद्राणां राजन्निति। मद्रनिमित्तं हि राजत्वमित्यस्ति तन्निमित्तत्वं। न सदेशनिमित्ता हि
राजता।

आमंत्रितकारकं च परांगवद्भवतीति वक्तव्यं प्रकृतंतनावत् मद्राणां राजन् मगधानां राजन् आमंत्रितकारकं कुंडेनाटन् नास्त्यत्र विशेषः सति च प
रांगवद्भावेऽसति वा इदं तर्हि परश्चुना वृश्चन् तन्निमित्तग्रहणं वा अथवा तन्निमित्तग्रहणं कर्तव्यं आमंत्रितनिमित्तं परस्यांगवद्भवतीति वक्त
व्यं मद्राणां राजन् तद्भावरूपमन्यतरद्वक्तव्यं अवचने हि सुबंतमात्रप्रसंगः अनुच्यमाने त्वेतस्मिन् सुबंतमात्रस्य परांगवद्भावः प्रसज्येत अस्यापि
प्रसज्येत क्षत्रेणाग्ने स्वायुः संरभस्व मित्रेणाग्ने मित्रधेये यतस्व किं पुनरत्र ज्यायः तन्निमित्तग्रहणमेव ज्यायः इदमपि सिद्धं भवति गोषु
स्वामिन् एतद्धि नैव प्रकृतं नाप्यामंत्रितकारकं २ ॥

क्षत्रेणाग्न इति। क्षत्रमित्रयोराख्यातवाच्यक्रियापेक्षया कारणत्वादामंत्रितं प्रतिनिमित्तताभावः। क्रियाद्वारकं तु व्यपेक्षालक्षणं सामर्थ्यमस्तीति स्यात्परांगवद्भावः
इत्यवचनेनातिप्रसंगे निरस्ते पूर्वे सूत्रे एकार्थीभावरूपसामर्थ्यमाश्रितं अन्यथा तु द्विविधमपि सामर्थ्यमाश्रीयेत किं पुनरत्रेति गुरुलाघवमनादृत्य प्रयोजनापे
क्षः प्रश्नः। गोषुस्वामिन्निति। स्वामीश्वरेति शेषषष्ठीविषये सप्तमीविधानान्नास्तिकारकत्वं निमित्तत्वं तु पूर्वोक्तन्यायेनास्ति॥ ॥ ॥

=परस्परान्वयित्वरूपस्यैव तु सामर्थ्यस्याश्रयणे वार्त्तिकेन कर्तव्य इति स्वरूपमिति। ३=

भा॰कौ॰२
२०
२०

सुबंतस्येति। क्रियमाणेऽपि सुब्ग्रहणे सुबंतसमुदायस्य सुबंतत्वात्पूर्वस्य च परेणाव्यवधानात्प्राप्नोतीति किं पुनरिति व्यवहितस्यापि परत्वसंभवात्परस्य वा पारांगवद्भावाद्य
मंत्रितानुप्रवेशाद्व्यवधानाद्भविष्यतीति प्रश्नः। अनंतरत्वादिति तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानान्निर्दिष्टग्रहणस्यानंतर्यार्थत्वादप्राप्तिरित्यर्थः स्वरे व धार
णाच्चेति प्रसिद्धे हि लौकिक आनंतर्ये स्वरे विधीयमाने पारांगवद्भावो विधीयते ननु पारांगवद्भाव एव कर्तव्ये पारांगवद्भावेनैवानंतर्यं संपाद्यते स्वात्मनि क्रियाविरोधादिति
देशांतराभावाच्च यथोक्तं ग्रहणाग्रहणे ग्रहणाभाव इत्यादि अस्ति तु स्वरग्रहणे विषयभेदाल्लक्षणं भिद्यत इति परस्यानंतर्यव्यपदेशे कर्तव्ये पारांगवद्भावे कृ

सुबंतस्य पारांगवद्भावे समानाधिकरणस्योपसंख्यानमनंतरत्वात् सुबंतस्य पारांगवद्भावे समानाधिकरणस्योपसंख्यानं कर्तव्यं तीक्ष्णायास्त्र्यासीक्षन्
तीक्ष्णेन परशुना वृश्चन् किं पुनः कारणं न सिध्यति अनंतरत्वात् ननु च परस्य पारांगवद्भावे कृते पूर्वस्यापि भविष्यति स्वरे वधारणाच्च स्वरेऽवधारण
च्च न सिध्यति स्वरे वधारणं क्रियते नानंतर्ये परमपि च्छंदसि परमपि च्छंदसि पूर्वस्यांगवद्भवतीति वक्तव्यं आ ते पितर्मरुतां सुम्नमेतु प्रति त्वा
दुहितर्दिवः हरी स्थ दुहितर्दिवः अव्ययप्रतिषेधश्च अव्ययानां च प्रतिषेधो वक्तव्यः उच्चैरधीयान नीचैरधीयान॥ ॥

ते पूर्वस्यापि पारांगवद्भावो लभ्यते न च स्वरार्थमानंतर्यं स्वरशब्देनेहोच्यते सुप आर्थे संभवे गौणार्थग्रहणायोगात् न च तस्मिन्निति निर्दिष्टे पूर्वस्य तस्मादित्यु
त्तरस्येति परिभाषाद्वयमादेशविधावेवोपतिष्ठते गोतो णित् हृदादिभ्यः सार्वधातुक इत्यादावप्युपस्थानदर्शनात् अपि तमर्भ्रतामिति पितरित्यामंत्रितनि राम॰
घातेनानुदात्तत्वं तस्मात्परं मरुतामित्येतदप्यनुदात्तमेव भवति उच्चैरिति उच्चैर्नीचैः स्वरादिषु निपातौ पठितौ अधिकरणशक्तिप्राधान्याच्च तन्निमित्तसंज्ञकौ॥ २०

धप्रतिषे॰

ऽन व्ययीभावस्येति। प्रतिषेधाद्विधिर्भवति। एतच्चुत्लुक्सुखस्वरोपचारः प्रयोजनमित्येतदनपेक्ष्योक्तं भाष्यकारेण ऽन्यथा कार्यान्तरे व्यत्नाभावादवक्तव्यमेतस्मा
त्. परमुनावृश्चन्निति वृश्चन्निति प्रातिपदिकं नचाप्रत्यय इति प्रत्ययलक्षणेन प्रातिपदिकसंज्ञानिषेधो नदि. संबुद्ध्योरिति नलोपप्रतिषेधात् ज्ञापकात् तत्रासति स्वर
ग्रहणे परांगवद्भावेन प्रातिपदिकान्तप्रवेशात्सुपो धातुप्रातिपदिकयोरिति सुपो लुक्प्रसज्येत स्वरग्रहणे सति सुब्लुकि कर्तव्ये परांगवद्भावाभावः सु
बं तैकांत इति परांगवद्भाव विषयत्वात्स्वरांगवद्भाव उच्यते परांगवदित्यत्र ऽऽमंत्रितेसन्निधानात्परशब्देन गृह्यते तत्र सुबंतमेवेति सुबंतकार्य एव परां

भावस्य अव्ययी॰ कै॰

ऽनव्ययीभावस्येति वक्तव्यं इह माभूत् उपाग्न्यधीयान प्रत्यग्न्यधीयान ऽथ किमर्थं स्वरेवधारणं क्रियते स्वरेवधारणं सुबलोपार्थं स्वरेवधारणं क्रियते
सुपो लोपो माभूदिति परमुनावृश्चन् न वा सुबंतैकांतत्वात् नवाकर्तव्यं किंकारणं सुबंतैकांतत्वात् सुबंतैकांतः परांगवद्भावो भवति प्रातिपदिकै
कांतस्य सुलोपे प्रातिपदिकांतस्य भवति सुब्लोपे च कृते प्रत्ययलक्षणेन सुबंतैकांतता स्यात् तस्मात्स्वरेवधारणं न कर्तव्यं सुबलोपार्थं प्रातिपदि
कस्थायाः सुपो लुगुच्यते तस्मात्स्वरग्रहणेन नार्थः इदं तर्हि प्रयोजनं षत्वणत्वे माभूतामिति कूपेसिंचन्॥ ॥ ॥

गवद्भावोंतरंगत्वान्नतु प्रातिपदिककार्य इत्यर्थः। प्रातिपदिकैकांत इति ऽस्याभिप्रायः ऽऽमंत्रिते परतोपसुबंतस्यांगवद्भवति परं चात्र सुब्लोपे कृते प्रातिपदिकमेवेति
तदंगत्वात्सुब्लोपः प्राप्नोत्येव प्रत्ययलक्षणेनेति प्रत्ययो निमित्तं लक्षणं यस्यामंत्रितस्य परेशाप्यते न सुबंतैकांतत्वमित्यर्थः विशेषणत्वेनाप्युपात्तमामंत्रितं प्रत्यास
त्त्या परशब्देन संबध्यत इति सुबंतांगवद्भावो विधीयते नतु प्रातिपदिकांगवद्भाव इत्यर्थः प्रातिपदिकस्थाया इति भाष्यकारवचनप्रामाण्यात् सुप्शब्दस्य स्त्री
लिंगत्वं कूपेसिंचन्निति परांगवद्भावे सत्यैकपद्यात्सकारस्य पदादित्वाभावात्षत्वप्रसंगः॥ ॥ ॥ ॥

=आमंत्रिते परे पूर्वं प्रत्यासत्त्या आमंत्रितरूपपरांगवत्कार्यं भागित्युक्ते आमंत्रितत्वैकत्वप्रयुक्तायाम्नकार्यातिदेश एव लभ्यते नषत्वणत्वयोरभावश्लाह॰शब्देन चेति॰आमंत्रितशब्देन चेत्यर्थः॥१८=

मा॰कौ॰२ चर्म्मेनमन्निति सतिपरांगवद्भावे समानपदत्वात् णत्वं स्यात् स्वाश्रयमिति विरोधाभावादतिदेशेन स्वाश्रयं पदादित्वं न बाध्यते यच्चेहामंत्रितस्य कार्य्यं शब्देन बोध्यते

२१ तत्सूर्वस्य परांगवद्भावात्तत्सहितस्य भवतु सकारस्य यत्स्वाश्रयं पदादित्वं तत्केन व्याहन्यते नचात्रातिदेशिकं कार्यमस्तीति स्वाश्रयं भवत्येव यथा नमते दण्डः सयमेवेसत्रश

२१ पूर्वपदात्संज्ञायामिति परांगवद्भावात् सत्यपि निमित्तनिमित्तिनोः समानपदस्थत्वे पूर्वपदात्संज्ञायामिति नियमादत्रासंज्ञायां णत्वं न भविष्यतीत्यर्थः॥ ननु चेति

चर्मेनमन्निति एतदपि नास्ति प्रयोजनं इह तावत्कूपेसिंचन्निति स्वाश्रयं पदादित्वं भविष्यति चर्मेनमन्निति पूर्वपदात्

संज्ञायामगइत्येतस्मान्नियमान्न भविष्यति ननु च समास एवैतद्भवति पूर्वपदमुत्तरपदमिति नेत्याह अविशेषे

णैवैतद्भवति पूर्वं पदं पूर्वपदं उत्तरं पदमुत्तरपदं॥ ॥ प्राक्कडारात्समासः प्राग्वचनं किमर्थं प्राग्वचनं समा

१स॥ ॥स्री॥ ॥डा॥

पद

पूर्वशब्दस्य समासावयवरूढत्वादिति भावः अविशेषेणेति व्याप्तिन्यायाश्रयादत्र यौगिकः पूर्वपदशब्दोऽग्र्त्यत इत्यर्थः॥ एवं सरग्रहणे प्रत्याख्याते समानाधिकरण

स्योपसंख्यानं न कर्त्तव्यं परस्य परांगवद्भावे कृतेऽपि विषयभेदाद्लक्षणस्या वर्तनात्सर्वस्य परांगवद्भावस्य सिद्धत्वात्॥ ॥ प्राक्कडारात्॥ ॥ प्राग्वचनमिति अत्रा

वधित्वद्योतका क्षेपद्वारेणावधेराक्षेपः समासइत्येवस्त्वरितत्वादधिकारोऽस्त्वयथा प्रत्ययइति अनवकाशत्वाच्च समाससंज्ञायाः संज्ञान्तरैः समावेशो भविष्यती रा॰म॰ २१

=भाष्यशब्दः।१८= भवधेरिति॰कडारादित्यस्य॰१८= ॥ १तिप्रश्नः॥ ॥

संज्ञानिवृत्त्यर्थमिति समाससंज्ञान्तरविषयेऽपि निवृत्तिर्यथा स्यादित्यर्थः अन्यथा एकसंज्ञाधिकारात्समयोयः स्यात् सत्यां समाससंज्ञायामिति स्वरितत्वादेवाधिकारे लब्धे प्राक्
डारात्सुपा ग्रहणसामर्थ्यात्प्राग्ग्रहणमावर्त्तते न प्राक् समाससंज्ञका भवंतीति समासाः संतोऽव्ययीभावादिसंज्ञका इति समावेशः सिध्यति। अव्ययसंज्ञा इति। समासस्य गृहापेक्षया
कस्यचित्समासस्य काचित्संज्ञेत्येवमुक्ते समाससंज्ञापीति तत्र प्राप्नोति तरेणापि पत्वे समावेशः सिध्यति विस्पष्टपटुरिति विस्पष्टं पटुरिति विग्रहः विस्पष्टादयः प्रवृत्तिनि

संज्ञाऽनिवृत्त्यर्थमेकवचनं क्रियते समाससंज्ञायाः अनिवृत्तिर्यथा स्यात् अक्रियमाणे एकवचने अनवकाशा अव्ययीभावादयः संज्ञाः समाससंज्ञां बाधेर
न्नतामबाधिष्यतेति एकवचनं क्रियते अथ क्रियमाणेऽपि एकवचने यावता अनवकाशा अव्ययीभावादिसंज्ञाः कस्मादेव न बाधन्ते क्रियमाणे हि एक
वचने समस्तां समाससंज्ञायां तास्ववयवसंज्ञा आरभ्यन्ते तेन वचनात्समावेशो भविष्यति समाससंज्ञाप्यनवकाशा सावचनाद्भविष्यति सावकाशा समास
संज्ञा कोऽवकाशः विस्पष्टादीन्यवकाशः विस्पष्टं पटुः विस्पष्टपटुः व्यक्तं पटुः व्यक्तपटुः नैषोऽवकाशः एषोऽप्याचार्यस्येष्टो लीलक्ष्यते येनैवावयव
कार्यं भवति तेनैव समुदायकार्यमपि भवतीति। येनैव चात्रावयवकार्यं स्वरः क्रियते तेनैव समुदायकार्यं समासोऽपि भविष्यति विस्पष्टादीनि गु
१ एकवचने स्थिति इदं तर्हि ॥ ॥ ॥

मित्रस्य पाटवादेर्विशेषणानि ननु द्रव्यस्येति विस्पष्टमिति नपुंसकत्वं अत एव मुख्यसामानाधिकरण्यं नास्तीति तत्सुरूपाभावः यथा शेषद्वंसे तत्त्वलक्षणमधिकारश्च
तथा सहसुपेत्यपीति समाससंज्ञा प्रवर्त्तते अवकाशं निराकर्त्तुमाह एषा हीति शीलेऽस्वभावे भवाद्ध्विः शैली। अवयवकार्यमिह पूर्वपदप्रकृतिस्वरः समुदायका
र्यं समाससंज्ञा हृद्रकुमारीवरन्यायेनांतरेणापि सह सुपेत्यनेन लक्षणेन सिध्यति॥ ॥ ॥ ॥

भा०कै०२ २२ २२

काकतालीयमिति॥ समासाच्च तद्विषयात् इति सूत्रसमासानुवादेन छविधानात् विशेषलक्षणाभावाच्च वार्थे स्यात्पदार्थत्वेऽपि मत्वर्थे बहुव्रीहिविधानादुपमान
शब्दस्योपमेयवृत्तित्वादन्यपदार्थाभावाद् बहुव्रीहेरभावात्सह सुपेत्यनेनैवात्र समासः कार्यः तत्र काकतालशब्दौ द्रव्यसहचरितायां क्रियायां वर्तेते काकस्यागमनमि
व चैत्रस्यागमनं तालस्य पतनमिव दस्योरूप निपात इत्येक इवार्थः। तत्र समासः ततस्तेन तालेन पतता यथा काकस्य वधस्तथा दस्युना चैत्रस्येति द्वितीय इवार्थः।
तत्र च छप्रत्ययः। अत्रापीति पूर्ववत् लोपेनेन समाससिद्धिः 'पुनाराज इति अजितियोगविभागेन तत्पुरुषसंज्ञां विना रूपसिद्धिं मन्यते' तत्पुरुषाश्रय इति॥

काकतालीयमजाकृपाणीयं एतदपि नास्ति प्रयोजनं अत्रापि येनैवावयववाक्यार्थेन प्रत्ययोत्पत्तिः क्रियते तेनैव समुदायकार्यं समाससंज्ञाभ =कर्मधारयोयं·१९=
विष्यति समासाच्च तद्विषयादिति इदं तर्हि पुनाराजः पुनर्गवः अत्राप्यवश्यं तत्पुरुषसंज्ञा वक्तव्या तत्पुरुषाश्रयः समासान्तो यथा स्यात् इदं त
र्हि पुनराधेयं अत्राप्यवश्यं गतिसंज्ञा वक्तव्या गतिकारकोपपदादिति सेषः स्वरो यथा स्यात्॥ इदं तर्हि पुनरुत्स्यूतं वासो देयं॥ ॥ ॥

पुनर्गवी तिद्वीबर्थः टजेवैष व्यः तत्राव्ययं प्रवृद्धादिभिरिति वामपूर्वस्य सकारित्वाद्वा तत्पुरुषः 'पुनराधेयमिति विशेषकार्यादर्शनात्समाससंज्ञामेवमन्यते अत्रापीति तत
श्च कुगतिप्रादय इति तत्पुरुषः तत्र यतोऽनाव इति धेयशब्दस्याद्युदात्तत्वात् पुनराधेयशब्दैका रउदात्तः गतिसंज्ञायास्त्वभावे समासान्तोदात्तत्वं स्यात् पुनरुत्स्यूतमिति पुनः एम०
शब्दस्य गतिसंज्ञायां सत्यां थाथेसंतोदात्तत्वेन भाव्यं असत्यां समासान्तोदात्तत्वेनेति विशेषाभावादुतिसंज्ञायाअभावात्समाससंज्ञाया एवं भावं मन्यते॥ ॥ ॥ २२

अत्रापीति ॥ अससां समासांतोदात्तत्वं स्यात् सस्वांतु गतिरनंतरइ सत्रानंतर ग्रहणसामर्थ्यात् थाथादिस्वरं बाधित्वोछहृस्य प्रकृतिस्वर उदात्तो भवति पुनः शाहृस्यतुशे
षनिघातं परत्वाद्वाधित्वा गतिर्गताविति निघातो भवति यदि तत्रास्तीति छंदसि स्वर असयविधा त्वावश्यंकर्त्तव्य मिति भावः भाषायांतु पुनराद्येपादौ स्वर सिद्ध
ये पुनः शाहृस्य गतिसंज्ञा वक्तव्या काठकेतु पुनरुत्स्यूत शाहोंतोदात्तः पठ्यते तत्र स्वर असयो बोद्धव्यः प्रवृद्धादेराकृतिगणत्वाद्वा ननु सहसुपेसत्रभाष्यकारो व
क्ष्यति यस्य समासस्यान्यत्र लक्षणं नास्ति इदं तस्य लक्षणं भविष्यतीत्यत्र किमिति समाससंज्ञाया अवकाशो निराक्रियते एवं मन्यते अप्रसंयुक्त विधानात्स
र्वार्थत्वं समाससंज्ञाया ननु कृतिपयविषयत्वं प्रायमुत्पादनायत्व वकाश निराक्रिया सह सह वचनमिति सुपेतिततीयासहार्थमाक्षिपतिवृद्धो यूनेति [redacted]

अत्राप्यवश्यं गतिसंज्ञा वक्तव्या गतिर्गताविति निघातो यथा स्यात् यदि तत्रास्ति पुनश्छन्दसो छंदसि इति सतितस्मिन्नेनैव सिद्धं एवमप्येकासंज्ञेतिव
चननान्नास्ति योगपद्येन संभवः पर्यायः प्रसज्येत तं स्मात्स्याग वचनं कर्त्तव्यं ॥ ॥ सह सुपा ॥ ॥ सहवचनं किमर्थं सहवचनं पृथग्समासार्थं सहग्रह
णं क्रियते सहभूतयोरेव समाससंज्ञा यथा स्यात् एकैकस्य समाससंज्ञा माभूदिति किं च स्यात् यद्येकैकस्य समाससंज्ञा स्यात् ॥ ॥ ॥

[redacted] यथेति प्रश्नः एकैकस्येति यथा पुत्रेण सहागत इति द्वयोरपि पितापुत्रयोरागमनेन संबंधः एवं समाससंज्ञापि प्रसेकं स्यात् आसहग्र
हणे लेका समाससंज्ञा सहभूतयोर्भवति किं च स्यादिति भवतु प्रत्येकं समाससंज्ञाकार्ये दोषाभावात् कृत्तद्धितसमासैश्च सत्र सूत्रे समासश्च समासश्चेसेकशेषश्चाप्रपि
ष्यते वाक्यस्य प्रातिपदिकसंज्ञा निवृत्यर्थं अन्यथा प्रसंयां तत्वादेकैकस्य समासस्य विध्यर्थं समासग्रहणं स्यात् एकशेषेतु समाससमूहस्य संज्ञा विधिर्नियमार्थो भविष्य
तीति न कश्चिद्दोषो भवति समासाश्चतद्धिषयादि सत्र प्रातिपदिकाधिकारात् समाससमूहस्य प्रातिपदिकत्वात्समासाद्विसेकवचनं न द्विवक्ष्यते अनभिधानाद्वा एकैस्मा
ऽच्छप्रसयो न भविष्यतीति भावः ॥ ॥ ॥

= सहसुपेसनेनसमा =
= सइत्स्यासंयुक्तकरणात् २ =

अक्षादइतिअचपादइति स्यात्राजाश्वइति यद्यप्यत्रसमासांतःप्राप्नोतितथापिरूपभेदाभावात्स्वरद्वयप्रसंगोदोषउक्तः अक्षादेपिस्वरद्वयप्रसंगेबोद्धव्यःकथंचक्रत्वे
तिएकार्थीभावेसमासविधानात्समुदायस्यचविशिष्टार्थाभिधायित्वात्तस्यैवसंस्कार्यत्वात्प्राधान्यात्तस्तरतंत्रत्वादवयवानामप्राधान्यात्समुदायस्यैवहिद्विर्वचनवत्
समासंज्ञाभविष्यति अन्वर्थसंज्ञाविज्ञानादेतिभावः इतरेतरग्रहीताभिप्रायआह प्रत्येकमिति एतच्चवृद्धिर्वान्निकेव्याख्यानेतएवानुगंतव्यंसमसेतस्मिन्निति पक्ष

अक्षादइतिसमासांतःप्रसज्येतइहराजाश्वइति द्वौस्वरौस्यातांकथंचक्रत्वैकैकस्यसमाससंज्ञाप्राप्नोतिप्रत्येकंवाक्यपरिसमाप्तिर्दृष्टेति तद्यथा वृद्धि
गुणसंज्ञेप्रत्येकंभवतः ननुचायमप्यस्तिदृष्टांतःसमुदायेवाक्यपरिसमाप्तिरिति तद्यथागर्गाःशतंदंड्यंतामितिअर्थिनश्चराजानोहिरण्येन
भवंतिनप्रत्येकंदंडयंति सत्येतस्मिन्दृष्टांतेयदितत्रप्रत्येकमित्युच्यतेइहापिसहग्रहणंकर्तव्यंअथतत्रांतरेणप्रत्येकमितिवचनंप्रत्येकंगुण
वृद्धिसंज्ञेभवतःइहापिनार्थःसहग्रहणेनएवंतर्हिसिद्धेसतियत्सहग्रहणंकरोतितस्यैतत्प्रयोजनंयोगांगंयथाविज्ञायेतसतियोगांगेयो
गविभागःकरिष्यतेसहसुपसमस्यतेकेनसहसमर्थेन॥ ॥(॥

द्वयेस्थितेसामर्थ्यात्कश्चित्क्वचित्सक्षआश्रीयतेतत्रसंयोगसंज्ञावत्समाससंज्ञापूर्वोक्तेनैवन्यायेनसमुदायस्यसंभविष्यति अथन्यायद्योतनायेहसहग्रहणंक्रिय
तेवृद्धिगुणसंज्ञयोरपिप्रत्येकमितिवक्तव्यंअथतत्रलक्ष्यदर्शनादिवशात्प्रत्येकंगुणवृद्धिसंज्ञेभवतःतदेहापिपूर्वोक्तात्सामर्थ्यात्समुदायस्यसमाससंज्ञाभविष्यती
तिनार्थःसहग्रहणेनयोगांगमितियोगावयवइत्यर्थःकेनेतिसुपाचेत्यर्थोयोगविभागेनेतिप्रश्नःसमर्थेनेतियोगविभागात्तिङःतेनसहसुसमासोभवति योगवि
भागस्येष्टप्रसिध्यर्थइतिसर्वत्रसमासोनभवति॥ ॥ ॥ एम०
२३

अनुव्यचलदिति सुबिति संख्यायाविवक्षितत्वात्पूर्वं वेः समासः पश्चादटोः तत्र समाससंज्ञायां सत्यां शाकल्यप्रतिषेधाद्यणादेशो भवति समासांतोदात्तत्वं न भवतीति
दुःतिङ इतिनिघातेन बाधितत्वादिति केचिदाहुः तन्नानोर्गतित्वेन गतिरिति निघातः शिष्टाद्युदात्तः उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येति स्वरितः एवं च लनुमावि
शादिति प्रयोजनाभावात् भाष्यकारेणोदाहरणमिदं कृतं स्यात् तस्मात्सतिशिष्टत्वात्समासांतोदात्तत्वेनात्र भाव्यमिति परे तिङः कृत्वस्योक्तत्वात् भातिपदिकत्वेपि सुबनु
त्पत्तिः अन्ये त्वाहुः वचनग्रहणादुक्तेषु थेकत्वादिषु प्रथमा स्यात् केवलात्प्रकृतेः प्रयोगाभावाद्विवक्षितमत्र प्रथमैकवचनेन तत्समनुहत्यादिलोपः क्रियते अ
तएवैकपद्यादामनुप्राविशद्देवदत्ते सामर्थ्येन कांतरमामंत्रितमिति निघातप्रतिषेधः संज्ञायाः प्रयोजनमस्त्येवेति तिङ निघातवादिनश्चाहुः अधिकारश्चेति

=एकेन पदेनांतवित्तमिति तदर्थः ... सुप्तिङंतमिति ... अनुव्यचलदिति समाससंज्ञायाः ... तेति स्व

अनुव्यचलत् अनुप्राविशत् ततः सुपा सुपा च सह सुप् समस्यते अधिकारश्च लक्षणं च यस्य समासस्यान्यल्लक्षणं नास्ति इदं तस्य लक्षणं भविष्यति पु
नर्लक्षणं वासोदेयं पुनर्निष्ठतोरथः इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्त
व्यं ॥ वाससी इव कन्ये इव ॥ =एवं विति स्वरस्य समासं ... अनुव्यचलदित्यत्र ... =तिभाष्यतात्पर्यं ... संभवेप्यनुभाविना ... संभवादनुदात्त ... स्व=

=इत्यादाविति ... एकत्वानुवृत्ता तात्पर्यं अत एवोपपदं सुबंतं समर्थेन सह समस्यते इति तत्र समास इति सूत्रार्थः ॥ १=

देवदत्तः पचतीति विशेषणसमासनिवृत्त्यर्थो इति दिः सा दावुत्तरपदादनुपादानादुत्तरपदोपस्थापनार्थश्चेति भावः । लक्षणं चेति । ननु सहेति योगविभागेनैवस
मासस्य सिद्धत्वात्सुपेत्यस्य लक्षणत्वे नास्ति प्रयोजनं नैष दोषः योगविभागः कतिपयविषय एवेति तस्मादेव भाष्यादिज्ञायते पुनरुक्तमिति पुनः शब्दस्या
समासमपि गतिसंज्ञायां पुराविष्टं दृसिब कुल्तमिति उद आद्युदात्तत्वं समासांतोदात्तत्वापवादो भविष्यतीति मन्यते अथ वाकाठकेतोदात्तः पद्यते तदभिप्रायेणपु
नः शब्दस्य गतित्वाभावादिदमुदाहरणं इवेति सुपेत्यस्य लक्षणत्वात् समासे सिद्धेकार्यांतरविधानार्थं वचनं वाससी इवेति वासः शब्दोवस्त्रे ऽर्थे दिस सुन्
प्रत्ययांतत्वादाद्युदात्तत्वात्समासादुत्पन्नस्य सोरव्ययादिति लुक् कन्ये इति कन्याराजन्यमनुष्याणामिति ष्फिट्सूत्रपाठात्कन्याशब्दोंतस्वरितः ॥ १० ॥

=नतदिति। शब्दनोल्लाभादिति भावः।१२=

भा॰कै॰ २ २४ २५ अव्ययी किमर्थमिति॥ लाघवार्थत्वात् संज्ञाकरणस्याल्पाक्षरा संज्ञा कर्त्तव्येति प्रश्नः। अन्वर्थसंज्ञेति। इह तु संज्ञाकरणे न किंचित् अव्ययकार्यं प्राप्यते अनव्ययमव्ययमि
त्यव्ययकार्यत्वाभावादित्यर्थः। नवक्तव्यमिति। तदकरणे लुङ्मुखस्वरोपचाराः प्रयोजनमिति कथं परिगणनं क्रियत इति चेत्। इह तु क्रियमाणामन्वर्थत्वेन वाविशिष्टकार्य
विषयत्वमनुमास्यत इत्यदोषः। पूर्वपदार्थप्राधान्यं त्वव्ययीभावस्य प्रापिकं नेतदन्वर्थसंज्ञया लभ्यते। स्वयं प्रतीत्यादावुत्तरपदार्थस्य प्राधान्यं उन्मत्तगंगमित्यादा
वन्यपदार्थप्रधानता॥ ॥ अव्ययम्। इह कस्मादिति। समुदायस्य संस्कार्यत्वात् प्राधान्यं तस्यैव विभक्त्यादयो विशेषणानि। अस्ति चात्र समुदायात् सम्पद्धि साकल्यप्र
तिपत्तिरिति प्रश्नः॥ सपुत्र इत्यत्र साकल्यं प्रतीयते सपुत्रो भोक्तुमागत इति प्रयोगे पुत्रा अपि तेनानीताः। न कश्चित् परिशेषित इति संप्रत्ययात्। इह कश्चिदिति बाहु

अव्ययीभावः। किमर्थमहती संज्ञा क्रियते अन्वर्थसंज्ञा यथा विज्ञायेत अनव्ययमव्ययं भवतीत्यव्ययीभावः अव्ययीभावो व्ययसंज्ञो भवतीत्येतन्नवक्तव्यं
भवति। अव्ययं विभक्तिसमीप इह कस्मान्न भवति सुमद्राः सुमगधाः सपुत्रः सच्छात्र इति समृद्धौ साकल्य इति च प्राप्नोति नैष दोषः। इह कश्चित् समासः पूर्वपदार्थ
प्रधानः कश्चिदुत्तरपदार्थप्रधानः कश्चिदन्यपदार्थप्रधानः कश्चिदुभयपदार्थप्रधानः पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरु
षः अन्यपदार्थप्रधानो बहुव्रीहिः उभयपदार्थप्रधानो द्वंद्वः न चात्र पूर्वपदार्थप्राधान्यं गम्यते अथवा नेमे समासार्था निर्दिश्यन्ते किं तर्हि अव्ययार्था इमे
निर्दिश्यन्ते एतेष्वर्थेषु यदव्ययं वर्त्तते तत् सुबन्तेन सह समस्यत इति॥ ॥ ॥

त्याभिप्रायेणैतदुच्यते कश्चिदन्यथापि दर्शनादर्द्धपिप्पलीत्यादौ अन्यतमप्राधान्यसंभवे अन्वर्थसंज्ञाविज्ञानात् पूर्वपदार्थप्राधान्य एवाव्ययीभावसंज्ञा भवति वचनसामर्थ्या
त्तु पूर्वपदार्थप्राधान्यासंभवेऽपि स्वरूप प्रति उन्मत्तगंगमित्यादौ प्रवर्त्तत एव। अथवेति। अव्ययस्य श्रुततादन्तरङ्गत्वात्तस्यैव विभक्त्यादयो विशेषणानि। तत्र पदान्तरप
दार्थावच्छिन्नानां समृद्ध्यादयः प्रतिपिपादयिषितास्तदाव्ययं समृद्ध्यादीनां वाचकमिति तेषां तदर्थता भवति। सुमद्रा इत्यत्र तु मद्रशब्द एव समृद्धिविशिष्टमर्थमाह सु
शब्दस्तु समृद्धेर्न तु वाचकः [द्योतको]। सपुत्र इत्यत्रापि सह शब्दस्तत्त्वयोगस्य वाचकः न तु साकल्यस्य तत्तु प्रकरणादिसहितात् समुदायात् प्रतीयते॥ ॥ ॥ राम॰ २४

=प्रतिपिपादयिषितेति। विशेष्यानयेति शेषः। तदुक्तमुत्तरपदार्थावच्छिन्ना इति। द्योतकत्वपक्षेऽनुद्योत्यार्थसमभिव्याहृतविशेषणत्वमेवेति भावः। तथा हि। समृद्ध्यादीनां वाचकमिति। वाचकमस्ति। पुत्रसहित इति सहार्थविशेष्यकबोधादिति भावः। निपातानां वाचकत्वमस्ति द्योतकत्वमेवासमासे प्रापकः प्रदीपवत् अमिति भावः॥१८=

=पूर्वसूत्रे यथाग्रहणं नदर्थकात्वादिभिः समासार्थं॰१= इति रिति॰ शक्तिरित्यर्थः॥ एवंचोदाहरणप्रसिद्धिरितिभावः॥१= पूर्वेति॰ अनन्तरत्वात्॰ एवंच पूर्वेण समासस्यदुर्वारताद्यावद्भावेन प्रसिद्धिरितिभावः॥२= समुदायस्येति॰ यत्प्रकारवान्देवदत्त इत्यर्थकस्य यथादेवदत्त इत्यस्यैवार्थः॥१=

यथा॰ असादृश्य इति किमर्थमिति सापेक्षत्वादसामर्थ्याद्वृत्तिः सादृश्य एव च पूर्वेणाप्यनिषेधश्चेत्स्मिन् कारणत्रयं यथा देवदत्त इति समुदायस्याचात्र सापेक्षत्वात्त स्य च प्राधान्यादुपमानस्य चोपमेयं प्रति नित्यसापेक्षत्वात्समासः प्राप्नोतीति स च सादृश्य इति प्रकारश्चादृस्य सादृश्यार्थत्वात् प्रकारे थ्वु सादित्य स्य यथाशब्दस्य सादृश्ये वृत्तिरित्यर्थः असोदेति अर्थवत्सूत्रारंभादव्युत्पन्नानामपि संभवो वगम्यते वीप्सावाचीति वीप्साग्रहणमुपलक्षणं तेन योग्यता पदार्थानतिवृत्तीअपि यथा थै

यथा सादृश्ये असादृश्य इति किमर्थं यथा देवदत्तः तथा यज्ञदत्तः अ सादृश्य इत्युच्यते तत्रेदं न सिध्यति यथाशक्ति यथाबलमिति किंकारणं य थेत्ययं प्रकारवचने थाल् स च सादृश्ये वर्तते नैष दोषः अयं यथाशब्दो स्त्येवाव्युत्पन्नः प्रातिपदिकं वीप्सावाचि अस्ति प्रकारवचने थाल् तत्र पदव्युत्पन्नं प्रातिपदिकं वी प्सावाचितस्येदं ग्रहणं अथ यः प्रकारवचने थाल् तस्य ग्रहणं कस्मान्न भवति पूर्वेण प्राप्नोति सादृश्य संपन्नीति प्रतिषेधवचनसा मर्थ्यान्न भविष्यति सुप्प्रतिना मात्रार्थे सुविति वर्तमाने पुनः सुप्ग्रहणं किमर्थं अव्ययमित्येवं तदभूत् सुप्मात्रे यथा स्यात् माषप्रतिसूपप्र

॥ इति औदनप्रति॥ ॥श्री॥ ॥

तस्येदमिति सूत्रेस्मिन्नित्यर्थः॥ प्रतिषेधवैर्न सामर्थ्यादिति यथार्थे पदव्ययमिति पूर्वेणैव सिद्धे समासे सादृश्यप्रतिषेधार्थत्वादस्यारंभस्य सुप्प्रतिना सुविति वर्तमा न इति सुवामंत्रितइत्यतः अव्ययमित्येवमिति अव्ययग्रहणसंबंधमामूदित्यर्थः यावदवधारण इत्यत्र यावच्छब्दो व्ययमेव संगृहीतः तथा च पार्वसमत्राणीत्यपये नवाक्यं प्रदर्श्यते अन्यथा नित्यसमासत्वाद्वाक्यं न स्यात् सुरादीनां च द्रोपामन्यमहर्दिवामन्याराजिरिति वृत्तिविषये सत्वप्रधानतादर्शनान्मात्राव तिष्ठन्निविरुद्धेति

॥ अपपस्येवायं समासः स्यात्॥ ॥ ॥

=इत्यर्थ इति॰ अयं भावः॥ पूर्वसूत्रेण सादृश्य इति वा यथार्थ इति वा प्राप्ते नियमार्थमिदं असादृश्य एव यथाशब्दः समस्यते इति॰ नियमशास्त्राणां विधिमुखेन प्रवृत्तिः फलं तु सादृश्यार्थकयथाशब्देन समासाभावः॥ पूर्वसूत्रेतु योग्यताद्यर्थकात्वादिभिः समासार्थं यथार्थे साधुकृत्मतुरूपमिलाद्दौ॰२=

भा०कै०२ २५ 25

वर्त्तने२

अक्षांततीयांता इति॥ विभक्त्यंतरनिरासार्थमेतदुक्तं न्यायाच्चैतत्सिध्यति। अक्षादीनां वर्त्तनक्रियायां कर्तृत्वादित्याहुः पूर्वोक्तस्येति पूर्ववृत्तस्य संबंधे। अनेकार्थत्वा
द्धातूनां नियतविषयत्वाच्च वर्चिरिह वर्त्तते तेदेवं यथा तत् इति तच्छब्देन परामृष्यते अभिधानार्थेतु वचो तच्छब्देन परामर्शो संबद्धः स्यात् अन्यथा द्योतनइति॥
जपकाले अक्षादीनामेकरूपं यद्वर्त्तनं तद्विपरीतं पराजये यद्वर्त्तनं तद्यद्यपरिणा द्योत्यते ततः समासः एकवचनांतयोरिति समासे द्वित्वाद्यनवगमा
=र्त्यादिभिः वर्त्तनक्रियाचरणौ क्रमसंयंतवाच्यां नर्भवतिः [illegible] क्रियावदिति भावः। [illegible] पदमंजरी। [illegible] वर्त्तनं [illegible] कितव[illegible]।२=

अक्षशलाका। अक्षादयस्तृतीयांताः परिणा पूर्वोक्तस्य यथा न तत् अन्यथा द्योतने अक्षादयस्तृतीयांताः परिणा सह समस्यंत इति वक्त
व्यं पूर्वोक्तस्य यथा न तत् अन्यथा जातं पंचकेद्योसे अक्षेणेदं न तथा वृत्तं यथा पूर्वमिति अक्षपरि शलाकापरि अक्षशलाकयोश्चैकव
चनांतयोः अक्षशलाकयोश्चैकवचनांतयोरिति वक्तव्यं इह मा भूत् अक्षाभ्यां वृत्तं पक्षैर्वृत्तं कितवव्यवहारे च कितवव्यवहार इति
वक्तव्यं इह मा भूत् अक्षेणेदं न तथा वृत्तं शकटेन यथा पूर्वमिति॥ ॥ ॥ ॥

देकत्वसंख्यानिरपेक्षत्वादंतरंगत्वादवगतिसंभवान्न्यायप्राप्तमेतदित्याहुः पदुक्तमभेदैकत्वसंख्या वृत्तौ गम्यत इति तद्धातुल्याभिप्रायेण। कितवव्यवहार इति पंचि राम०
कानाम द्यूतं पंचभिरक्षैः शलाकाभिर्वा भवति तत्र यदा सर्वे एकरूपाः पतंति तदा पातयिता जयति अन्यथा तु पराजीयते॥ ॥ ॥ २५

विभायोगविभागइति ॥ अन्यथेहैवास्योपयोग आशंक्येतयोगविभागेत्वधिकारोगम्यते अपपरिशब्दौपरस्परसाहचर्याद्वर्जनार्थौग्रहीष्येते तौ च कर्म्मप्रवच

नीयौतद्योगेपंचम्येवविहिता बहिर्योगेपि बहिर्योगेचोपसंख्यानमितिविहिता अंचूत्तरपदलक्षणाचविहिताप्राग्ग्राम इत्यादौतुसमासोनभविष्यति पू

र्वपदार्थप्राधान्यएवसतिसंभवेऽव्ययीभावस्यविधानादित्यभिप्रायेणाह पंचमीग्रहणमिति एतेष्वेति वक्ष्यमाणापेक्षयाबहुवचननिर्देशः अथे

=नुमागर्थेग्रामाबहिर्विवक्षायांसमासप्राप्ताविकोपपदविभक्तिः पंचमी तत्रसमासस्यमतेग्रामार्थेनिरूपितमागर्थविरोव्यत्यासात्वेपदार्थप्रधानत्वादव्ययीभावसमासस्य यथानुभागर्थस्यैवग्रामेऽन्वयः अस्माभागर्थग्रामइतितत्रभागर्थस्यविरोधाए

विभाषा अपपरिबहिरंचवः पंचम्यायोगविभागः कर्त्तव्यः विभाषेत्ययमधिकारः ततः अपपरिबहिरंचवः पंचम्येति अपपरिबहिरंचवः

पंचम्या पंचमीग्रहणंशक्यमकर्त्तुं कथं सुबंतेनेतिवर्त्तते एतैश्च कर्मप्रवचनीयैर्योगेपंचमीविधीयते तत्रांतरेणापिपंचमीग्रह

णंपंचम्यंतेनसमासोभविष्यति इदंतर्हि प्रयोजनं बहिः शब्देनयोगेपंचमीनविधीयतेतत्रापियथास्यात्बहिर्ग्रामं बहिर्ग्रामात्

अथ क्रियमाणेपंचमीग्रहणेयावताबहिः शब्देनयोगेपंचमीनविधीयतेकथमिवैतत्सिध्यति पंचमीग्रहणसामर्थ्यात् ॥ ॥ आ

उद्धपोदामर्यादाभिविधिग्रहणंशक्यमकर्त्तुं कथं पंचम्येतिवर्त्तते आङ्चकर्मप्रवचनीयेनयुक्तेपंचमीविधीयतेतयोश्चैवार्थयोराङ्.

=अपपरीतिसूत्रएवाध्यवसनीयइतिभावः।१=

॥ कर्मप्रवचनीयसंज्ञोभवतिनान्यत्र॥ ॥

तिं बहिर्गतोग्रामादित्सपादानेपंचमीसद्भावात्कथंतद्विधानंज्ञाप्यतइतिप्रश्नः ॥ पंचमीग्रहणसामर्थ्यादितिं बहिर्गतोग्रामादित्यत्रासामर्थ्यात्समासेनभवि

तव्यं तस्मात्सापेक्षेपंचमी बहिर्योगेनुमीयतेनतस्ततदुपसंख्यानंनकर्त्तव्यं॥ ॥ ॥ ॥

छावि १

भा०कै०२
२६
२८

यस्य किमुदाहरणमिति॥ लक्ष्यलक्षणयोर्द्वयोरप्यायामवत्त्वात्संदिहानः पृच्छति गंगा चैव लक्षणमिति अनेकदेशत्वात्गंगाया आयामस्तेनानेकजनापेक्षयाप्रसिद्धत्वात् तस्या एव लक्षणत्वं ततो यद्यपि कस्यचित्पुरुषस्य हास्तिनपुरमायामत्वेन प्रसिद्धं न गंगा तथापि नतरपेक्ष्याप्रयोगस्य बस्थाकिं तर्हि प्रचुरलोकापेक्षया अयवेति लक्षणेनेत्यस्यानुवृत्त्या विनापीष्टसिद्धिं दर्शयति उपमानोपमेयभावे चायं समासः दृष्यते न्यून गुणं चोपमेयं परिपूर्णगुणमुपमानं तत्र संपूर्णगुणसन्निधौ न्यूनगुणमसदृशमिव प्रतिभातीति सामर्थ्यात्प्रकर्षगतिर्विज्ञायते प्रकृष्टाप्रकृष्टसंनिधौ चाप्रकृष्टस्य कार्ये

×बलक्षणेनवाराणसी॰अव्ययस्य×२

यस्य चायामः किमुदाहरणं अनुगंगं हास्तिनपुरं अनुगंगं वाराणसी अनुशोणं पाटलिपुत्रं यस्य चायाम इत्युच्यते गंगा चाप्यायतावाराणस्यप्यायता तत्र कुत एतत् गंगया सह समासो भविष्यति न पुनर्वाराणस्येति एवं तर्हि लक्षणेनेति वर्त्तते गंगा चैवायाम इत्युच्यते गंगा चाप्यायता वाराणस्यप्यायता तत्र प्रकर्षगतिर्विज्ञास्यते साधीयो यस्यायाम इति साधीयश्च गंगायाः न वाराणस्याः तिष्ठद्गुकिमर्थश्चकारः एवकारार्थः तिष्ठद्गुप्रभृतीन्येव यथा स्युः मा भूत् परमं तिष्ठद्गु तिष्ठद्गु कालविशेषे तिष्ठद्गु कालविशेष इति वक्तव्यं तिष्ठन्ति गावो यस्मिन्काले स तिष्ठद्गु वहद्गु खलेयवादीनि प्रथमान्तान्यन्यपदार्थे खलेयवादीन्यन्यपदार्थे समस्यन्त इति वक्तव्यं खलेयवं खलेबुसं लूनयवं पूनयवं प्रथमा ॥६॥

णासंबंधः नेतरस्य॥ ॥तिष्ठद्गु किमर्थ इति समुच्चेतव्यस्याभावात्प्रश्नः एवकारार्थ इति अनेकार्थत्वान्निपातानामिति भावः तेनेति तिष्ठद्गुप्रभृतीन्येवैकार्थीभावविषयाणि भवंति ननु शब्दांतरेणैकार्थीभावं प्रतिपद्यंत इत्यर्थः वहद्गु इति अस्य कालविशेषवृत्तित्वप्रदर्शनार्थं उपक्षेपः खलेयवादीनीति अव्यतिरिक्तैव प्रातिपदिकार्थे एषां प्रयोगः कर्त्रन्यत्वेनान्यत्रेति भावः अन्यपदार्थ इति न कालएवापि त्वन्यत्रापीत्यर्थः॥ ॥ ॥

=ननु अतिरिक्ते समुपजात भेदे प्रातिपदिकार्थेकं यं प्रथमांतान्येव प्रथमांतान्येव प्रयोजनानि सत्त आह अन्यतिरिक्त एवेति भेदान्वयायोग्ये इत्यर्थः नान्यत्रेति अतएव प्रथमांतान्येवैतानि प्रयोज्यानि न विभक्त्यंतराणि संबंधं न प्रतिद्विनिकालेअर्थस्यानं एवं चरवलेया

राम०
२६

=एतस्मादिति=एतस्माद्यावचनं किमर्थमिति पूर्वपक्षादुपरितदुत्तरकाले तत्समाधानमुक्तं यावन्निर्दिष्टं पठतीत्यर्थः।१२= =उभयथापि सिद्धान्ती स्वपक्षार्थः।१९=

पारे वा वचनमिति॥ महाविभाषया वचनात् समस्य षष्ठीसमासस्य च सिद्धत्वादिति भावः॥ इतरो न्यायप्रपंचार्थं स्ववाचा वाजत्यपि तु स्वाशयमभिप्रकाशयन्नाह विभाषेति अयमपीति षष्ठीसमासे प्राप्ते अव्ययीभाव आरभ्यते स नित्यं बाधकः प्राप्त इति महाविभाषाधिकारात् विकल्पेन बाधको भवतीति पक्षे षष्ठीसमासः सिध्यति सोऽपि विकल्पेन विधीयत इति वाक्यमपि भविष्यतीत्यर्थः अत उत्तरमिति एतस्मात् पक्षादुपरीत्यर्थः वक्तव्यमिति कुतः सौत्रसावरूपके कुतः एकदेशिप्रधान इति ननु पूर्वकायः साद्ये पूर्वपरार्थे एकदेशाः प्रधानं न तत्वेकदेशी एवं तर्हि एकदेशिनो नूद्यमानत्वात् प्राधान्यं समासस्य तु विधेयत्वात् प्राधान्यं न

पारे मध्ये वा वचनं किमर्थं विभाषा समासो यथा स्यात् समासेन मुक्ते वाक्यमपि यथा स्यात् पारंगाया इति नैतदस्ति प्रयोजनं प्रकृता महाविभाषा तया वाक्यमपि भविष्यति इदं तर्हि प्रयोजनं अव्ययीभावेन मुक्ते षष्ठीसमासो यथा स्यात् गंगापारमिति एतदपि नास्ति प्रयोजनं अयमपि विभाषा षष्ठीसमासोऽपि तावुभौ वचनाद्भविष्यतः अत उत्तरं पठति पारे मध्ये षष्ठ्या वा वचनं पारेमध्ये षष्ठ्या वेति वक्तव्यं अवचने हि षष्ठीसमासाभावो यथैकदेशिप्रधाने अक्रियमाणे हि वाचने षष्ठीसमासस्याभावः स्यात् यथैकदेशिप्रधाने तद्यथा एकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति किं पुनः कारणं एकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति समासतद्धितानां वृत्तिर्विभाषा वृत्तिविषये नित्योऽपवादः इह पुनर्नैकदेशिनः प्रधानमिति षष्ठीसमासेन समास उच्यते अथवा प्राधान्येन निमित्तत्वं लक्ष्यत इति बहुव्रीहावपि न दोषः समासतद्धितानामिति तुल्यन्यायत्वादिचारो यतद्धिता अपि निर्दिष्टाः इह वाक्येनाभिधाने प्राप्ते वृत्तिरारभ्यमाणा वाक्यस्य बाधिका प्राप्नोतीति विकल्पेन वाक्यस्य पक्षेऽनुज्ञानं क्रियते तत्रापवादेऽपि विकल्पेन विधीयमाने विकल्पो वाक्यस्यैवानुज्ञानं करोतीति उत्सर्गस्य नित्येन बाधे न भाव्यं तत्र वाग्रहणेनोत्सर्गोऽपि पक्षेऽभ्यनुज्ञायत इति त्रैरूप्यं सिध्यति॥ ॥

एकयेति विभाषयेत्यर्थः अपरयेति इदमेव वाचनमु दश्चितोन्यतरस्यामिसन्यतरस्यां ग्रहणं च ज्ञापकं यन्नोत्सर्गापवादौ वृत्ति सुविभाषात्तत्रापवादेन मुक्त उत्सर्गो न भवतीति सप्तम्या अलुके नितसु रूपे कृतीतिबहुलग्रहणादिति भावः। येदात्वम्या इति पारेगंगादागत इत्यादौ सप्तम्यर्थाभावात्सप्तम्यभावः॥ ॥

एकयावृत्तिर्विभाषा अपरयावृत्तिविषयेनित्सोपवादः एकारांतनिपातनंच एकारांतनिपातनंचकर्त्तव्यं पारेगंगमिति नकर्त्तव्यं सप्तम्या अलुका सिद्धं भवेत् सिद्धपदा सप्तमी पदात्वन्या विभक्त्यस्तदा न सिध्यति नदीभिश्च नदीभिः संख्यासमासेऽन्यपदार्थे प्रतिषेधः नदीभिः संख्यासमासेऽन्यपदार्थे प्रतिषेधो वक्तव्यः द्वीरावती को देशः त्रीरावती को देशः नदीभिः संख्येति प्राप्नोति न वक्तव्यः इह कश्चित्समासः पूर्वपदार्थप्रधानः कश्चिदुत्तरपदार्थप्रधानः कश्चिदन्यपदार्थप्रधानः कश्चिदुभयपदार्थप्रधानः पूर्वपदार्थप्रधानोऽव्ययीभावः उत्तरपदार्थप्रधानस्तत्पुरुषः अन्यपदार्थप्रधानो बहुव्रीहिः उभयपदार्थप्रधानो द्वंद्वः॥

नदीभिः अर्थविशेषमनुपादाय पूर्वपदोत्तरपदमात्रनिर्देशे न समासोयं विधीयमानो द्विगोरिव बहुव्रीहेरपि बाधकः स्यादिति नदीभिरितिवार्त्तिकारंभः न वक्तव्य इति भाष्यकारेण वार्त्तिकं प्रत्याख्यातं पूर्वाचार्यविहितगुरुसंज्ञाश्रयणाद्यदुपाधीनां पूर्वाचार्योः संज्ञां प्रतिपत्तं दुपाधीनामेवैता भवंति॥ ॥

नचाव्येति॥ द्वैरावतीक इत्यादौ ननु पंचनदं द्वियमुनमित्यादौ समाहारेऽपि पूर्वपदार्थप्राधान्यं नास्ति समाहारे ह्यत्र समासार्थः स च पदैः समाहरणं समाहार इति भाव
रूपस्तदन्यपदार्थप्राधान्यं अथ समाह्रियत इति समाहारस्तथापि द्वियमुने समाहृते द्वियमुनमिति पूर्वपदार्थविशिष्ट उत्तरपदार्थः प्रधानं नैष दोषः समाह्रियमाणार्थः
समाहारः तत्र पूर्वं द्विशब्दार्थ उपक्रमे केवे इत्याकांक्षायां परा यमुने इत्युच्यते तेन तदोत्तरपदार्थस्य विशेषणत्वं विशेष्यत्वं पूर्वपदार्थस्य अथवा गाहन्नि विषये द्व्यादयः संख्यान
मात्रे वर्तन्त इति यमुनयोर्द्वित्वमित्यत्रार्थे द्वियमुनशब्दो वर्तत इति भवत्येव पूर्वपदार्थप्राधान्यं इदानीं चोदकोऽन्यपदार्थमाक्षिपति ननु चेति अयं भावः द्वैराव

नचात्र पूर्वपदार्थप्रधान्यं गम्यते ननु च यच्छब्देनोच्यते स तस्यार्थो भवति अत्र च वयमेताभ्यां पदाभ्यामेतमर्थमुच्यमानं पश्यामः एतदेव न
जानीमः यच्छब्देनोच्यते स तस्यार्थ इति अपि चान्यपदार्थप्रधानता न कल्पेत चित्रगुः शबलगुरिति किं कारणं अत्रापि हि वयमेताभ्यां शब्दा
भ्यामेतमर्थमुच्यमानं पश्यामः यद्यप्येताभ्यां पदाभ्यामेषोऽर्थ उच्यतेऽन्यपदार्थोऽपि गम्यते तत्रान्यपदार्थाश्रयो बहुव्रीहिर्भविष्यति॥ ॥

तीक इति देशविशेषोऽभिधीयते स च पूर्वोत्तरपदयोः सहितयोरर्थ इति द्वाभ्यामप्यसौ व्यपदिश्यते ततः पूर्वपदार्थत्वाद्देशस्य तस्य प्राधान्यात् प्राप्तोऽव्ययीभावः एत
देवेति सिद्धान्तवादी तस्याभिप्रायः समासेनान्यपदार्थः प्रतीयते न तु पूर्वोत्तरपदाभ्यां तयोरन्वयव्यतिरेकाभ्यां अर्थान्तराभिधायित्वावधारणात् तथा हि द्विशब्दो द्वित्वाव
च्छिन्नं संख्येयमात्रमाह न देशं इरावतीशब्दोऽपि नदीविशेषमाह न देशमिति द्विशब्दो देशस्यावाचक इति कथं पूर्वपदार्थप्राधान्यमभिधीयते अपि चेति लक्ष
णाभ्युपगमो दोषवानित्यर्थः चोदकश्चोद्यमुद्भावितं परिहरति यद्यपीति स एव परस्य चोद्यमापादयति॥ ॥ ॥ ॥

इहापीति॥ प्राप्नोतीत्यंतं। अयमभिप्रायः पूर्वपदोत्तरपदव्यतिरेकेण समासाभावात्तयोरेव समुदितयोर्देशो यथेति पूर्वोक्तन्यायेन पूर्वपदस्याप्यसावयवत्वे इति प्राप्नोत्येवाव्ययीभावः एवं तर्हीति। पुरस्तादपवादन्यायेनायं द्विगुमेव बाधते बहुव्रीहिणानुपरत्वाद्बाध्यते शेषग्रहणं च तत्र प्रत्याख्यातं त्रिकाण्डेऽपि शेषः एकनदीतरइति पदिसमाहारग्रहणं न क्रियते तदा पुरस्तादपवादा इत्यनेनन्यायेनायं समासः पूर्वकालैकेति समासं बाधेत समाहारे तु परत्वाद्द्विगुः स्यात्। तत्रैकनदीत्यत्राव्ययीभावे कृते तन्निवृत्तोनदीपौर्णमास्याग्रहायणीभ्य इति वा टच्प्राप्नोति नपुंसकत्वं च। यस्त्वगोदावर्योश्च नद्याश्चेत्यसमासांतः सोऽप्यसन्न्यायेन योगविभागेन क्रियते स चेष्टप्रसिद्ध्यर्थ इति

न्यप१
इहापि तर्हि पदद्वयपदार्थोऽवगम्यते स्व पदार्थोऽपि गम्यते तत्र सत्त्वादन्ययोऽव्ययीभावः प्राप्नोति। एवं तर्हीदमिह संप्रधार्यमव्ययीभावः क्रियतां बहुव्रीहिरिति बहुव्रीहिर्भविष्यतीति विप्रतिषेधेन भवेदेकसंज्ञाधिकारेऽसिद्धं परं कार्यत्वेनतु न सिध्यति पारंभसामर्थ्यादव्ययीभावः प्राप्नोति परं कार्यत्वात् बहुव्रीहिः परंकार्यत्वे च नदीभिः संख्यायाः समासेऽव्ययीभावो वक्तव्यः। सचावश्यं वक्तव्यः। सर्वमेकनदीतरे॥ ॥द्विगुश्च। द्विगोस्तत्पुरुषत्वे कानि प्रयोजनानि द्विगोस्तत्पुरुषत्वे समासांताः प्रयोजनं। द्विगोस्तत्पुरुषत्वे समासांताः प्रयोजयंति। पंचगवं दशगवं पंचराजं दशराजं॥ ॥ ॥

=सर्वमेकनदीतरइति सूत्रमेतत्र प्रयोगः। एकनदीसेनावनातमुराहरणं०२=

तत्पुरुषे प्रयोगादर्शनादेकनदीसत्त्वनप्रवर्तते अव्ययीभावे तु पंचनदमिति सूत्रमवसेय एकापूर्वीवत्समाहारविवक्षायामेकनदं एकनदीति भवती साधुः॥ ॥द्विगुः॥ ॥
समासांता इति यद्यपि टचावेव तत्पुरुषनिबंधनौ पंचगवं द्व्यंगुलमिति तथापि प्रकृतिभेदाद्बहुवचननिर्देशः पंचराजमिति अकारांतोत्तरपदत्वाभावात्स्त्रीत्वाभावः पद्धानुसमासोत्तरपदांतः समासांत इति पक्षः तदा तु पात्रादित्वात् स्त्रीत्वाभावः॥ ॥७॥ ॥

द्वितीया गमिगाम्यादीनामिति औणादिकानामन्येषां च संग्रहार्थमुभयोरुपादानं ग्रामं गमीति गत्यर्थकर्मणीत्यत्र द्वितीयाग्रहणमपवादविषयेपि विधानार्थमिति क्तस्य योगे द्वितीयैव भवतीति इति षष्ठ्याः प्राप्तिरेव वक्तुं नास्तीति येन त्वाच्छके नो रिति निषेधं वर्णयन्तीति ते पूर्वापरविस्मरणशीलता उपेक्ष्याः भाष्यकारेण तु गत्यर्थसूत्रस्य प्रत्याख्यानात् क्तस्य योगे षष्ठ्येव स्यात् इति तद्दर्शने सौत्रः षष्ठीनिषेधः श्रितादिभिरिति यः कष्टं श्रितः कष्टमनेन श्रितमिति बहुव्रीहिणैव विवक्षितार्थावगमादर्थरूपस्वरभेदाभावात्तत्पुरुषो न विधेय इत्यर्थः। अहीनवाचिन्या इति यः कष्टं श्रितः कष्टं तेन न हीनमित्यर्थ इति भावः

द्वितीया श्रितादिषु गमिगाम्यादीनामुपसंख्यानं। श्रितादिषु गमिगाम्यादीनामुपसंख्यानं कर्तव्यं। ग्रामं गमी ग्रामगमी ग्रामं गामी ग्रामगामी श्रितादिभिरहीने द्वितीयासमासवचनानर्थक्यं बहुव्रीहिकृतत्वात्। श्रितादिभिरहीनवाचिन्या द्वितीयायाः समासवचनमनर्थकं किं कारणं बहुव्रीहिकृतत्वात् इह यः कष्टं श्रितः कष्टमनेन श्रितं भवतीति तत्र बहुव्रीहिणा सिद्धं अहीने द्वितीयास्वरवचनानर्थक्यं च अहीने द्वितीया पूर्वपदप्रकृतिस्वरं भवतीत्येतच्च स्वरवचनमनर्थकं किं कारणं बहुव्रीहिकृतत्वादेव ॥२०॥

अत्ययतिरयं गतौ वर्त्तत इति गत्यर्थत्वात्कर्त्तरि क्तः ततः श्रितपतितगतैः समासोयं न विधेयः अतीतादिभिस्तु स्वरसिध्यर्थो विधेयः तैर्हि तत्पुरुषे सति थाथादिस्वरेण भाव्यं अतीतात्यस्तयोरहीन इति निषेधात् प्राप्तापन्नयोरहीने द्वितीयानुपसर्ग इति निषेधात् पूर्वपदप्रकृतिस्वरो नास्ति बहुव्रीहौ तु पूर्वपदप्रकृतिस्वरेण भाव्यं यद्यप्यनुजातिकालसुखादीनि पूर्वपदानि तदा तच्चापि बहुव्रीहितत्पुरुषयोः स्वरभेदाभावः। बहुव्रीहिकृतत्वादिति बहुव्रीहिणा रूपस्य साधितत्वादित्यर्थः॥

भा०कै०२ जातिस्वरप्रसंग इति॥ यदि बहुव्रीहिरेव क्रियते जातिकाले संज्ञो दात्तत्वं प्राप्नोतीत्यर्थः बहुव्रीहिवादीस्वरदोषं परिहरति तद्वेति वाजातइत्यिन्यासमपास्य वाजातादिष्विति वक्ष्यतेतेन
२९ पक्षे च्यंतोदात्तत्वपक्षे ऽपूर्वपदप्रकृतिस्वरत्वमितिस्वरद्वयसिद्धिः इमेइति श्रितगतपतिशद्वाः तत्र ष्वाहीनेद्वितीयेतिन वक्तव्यमितित्ला घवंभवति तत्पुरुषवाद्या हनतु
29 चेति बहुव्रीहिवाद्याह नास्ति भेद इति द्वौ स्वराविति तत्पुरुषे च्पहीने द्वितीयेति एवं पदप्रकृतिस्वरः बहुव्रीहौ जातिकाले संज्ञो दात्तत्वं द्विस्वरमिति वाजातादि

जातिस्वरप्रसंगस्तु जातिस्वरप्रसंगस्तु प्राप्नोति ग्रामगतः च्पराप्रपगतइति जातिकालसुखादिभ्यो नाच्छादनात् क्तोऽकृतमितप्र
तिपन्नाइति तत्र जातादिषु वाच नास्तिद्धं पदेन द्वा जातइति एतद्वाजातादिष्विति वक्ष्यामि इमेजातादयो भविष्यंति ननु च भेदो भ
वति बहुव्रीहौ सति समासांतोदात्तत्वे नापि भवितव्यं पूर्वपदप्रकृतिस्वरत्वे नापि तत्पुरुषत्वे सतिपूर्वपदप्रकृतिस्वरत्वेनैव नास्तिभे
दः योपि हि तत्पुरुषमारभते तेन तस्यदंडवारितो बहुव्रीहिः तत्र तत्पुरुषे सति द्वौ समासौ द्वौ स्वरौ बहुव्रीहौ सति एकसमासो द्विस्वरत्वं ए
वं तर्हि सिद्धे सति पत्रतत्पुरुषं शास्ति तज्ज्ञापयत्याचार्यः समानार्थे केवलं विग्रहभेदाद्यत्र तत्पुरुषः प्राप्नोति बहुव्रीहिश्च तत्र तत्पु
रुष एव भवति किमेतस्य ज्ञापने प्रयोजनं॥ ॥ ॥

ष्विति सूत्रन्यासेन एवं तर्हीति तत्र च बहुव्रीह्यभावात् कष्टश्रितइत्यादाव हीनेद्वितीयेति पूर्वपदाद्युदात्तत्वं भवति निष्ठा च द्व्यजनादिसाद्युदा राम०
त्तात्कष्टशब्दस्य ननु जातिलक्षणा बहुव्रीहिनिबंधनमंतोदात्तत्वं च्प व्यविकल्पस्यापवादेनेनज्ञापकेन स्मारितः॥ ॥ ॥ २९

एतः सखेति सख्यस्यो भयाधिष्ठानत्वाद्राजा सखास्येत्ययमर्थोऽन्तर्भूत इति बहुव्रीहिः स्यात् अस्मात्तु ज्ञापकान्न भवति अत्र कश्चित् उत्सर्गापवादन्यायेन बहुव्रीत्य
भावं मन्यमान आह नैतदिति अर्थाभेदे बहुव्रीहौ प्राप्ते तत्पुरुषस्यारंभात् ज्ञापकवाद्यपवादवादिनोः अत्राह पुरुषिके वत तत्पुरुषारंभे बहुव्रीहिबाधकत्वस्य एतत्तु फ
लं न भिद्यते विशेषविहितेनेति श्रितादयुपादानेन विधानाद्दस्य विशेषविहितत्वं अथ नेति कष्टश्रित इति स्वपदार्थे तत्पुरुषविधानात् न च बहुव्रीहेरप्राप्तत्वा
त्वात्तिसामान्यविहितत्वं अन्तर्भूतस्यार्थो न शब्दसंस्कारनिमित्तं किंतु शब्दवाच्य एव यदुच्यत इति अर्थभेदात् श्रितादिग्रहणं कृतमिति भावः ननु कष्टश्रि

एतः सखा राजसखः राजा सखास्येति बहुव्रीहिर्न भवति नैतत् ज्ञापकसाध्यम अपवादे हि उत्सर्गो बाध्यत इति बाधके न भवितव्यं सामान्य
विहितस्य विशेषविहितेन अथ न सामान्यविहितः यदुच्यते बहुव्रीहिः कृतत्वादिति एतदयुक्तं अस्ति खल्वपि विशेषो बहुव्रीहेस्तत्पुरुषस्य च किंश
ब्दकृतः अथार्थकृतः शब्दकृतश्चार्थकृतश्च शब्दकृतस्तावद्बहुव्रीहौ सति कपा भवितव्यं तत्पुरुषे सति न भवितव्यं अर्थकृतः तत्पुरुषे सति
हादीनां कः कर्तरि भवति धात्वर्थस्यानपवर्गे प्राक् कोरक्षं देवदत्तः बहुव्रीहौ ॥ " " "

तइति समासप्रयोगे लोके विग्रहवाक्याप्रयोगात् तासयोर्भेदादस्ति बहुव्रीहिः कृतत्वमित्याशंक्याह अस्ति खल्वपीति सर्वोऽर्थे न्यायेनार्थरूपस्वरेषु विशेषमपश्यन्स्पृ
च्छति किमिति बहुव्रीहाविति शेषादिभावेस्मिन्ने न कष्टश्रितक इति तत्पुरुष इति कष्टश्रित इत्यादौ गुहादीनामिति आदिशब्दः प्रकारे तेन गसर्थादपोपिरस्यंते धात्वर्थ
स्येति सर्वस्य धात्वर्थस्यानिष्ठितत्वेपि तदेकदेशभूतत्वाश्रयेणारोहणक्रियाविशिष्टे एव वृक्षमारूढ इति शब्दशक्तिस्वाभाव्यादिदमभिधीयते यथा गदोऽबंधनमनुभवन्ने
" वोच्यते तथा कष्टश्रित इति कष्टमनुभवन्ने वोच्यते॥ "

मा०कौ० २ व्यपवृक्त इति। सर्वात्मना व्यावृत्त इत्यर्थः। यथा भुक्त ओदन इति भुजिक्रियायाः समाप्तौ प्रयुज्यते। भेदांतरमप्याह अन्यथेति। प्रत्यक्षेणेति शब्दस्य व्यवधानेनेत्यर्थः। अव

३० व्यवधानोपलक्षणत्वात् असक्षस्य ज्ञापकफलमपि निराकर्तुमाह उभयमिति। सोमसखेति बहुव्रीहित्वात् समासांताभावः। गवां सख इति तत्पुरुषत्वात्समासांतः तस्त्वत्पुरुषे कृति

30 बहुलमिति षष्ठ्या आक्रोश इति वा षष्ठ्या अलुक्॥ ॥ खट्वा खट्वारूढ इत्यत्र क्षेपहेतोर्धर्मस्यानिर्देशात् क्रियाकारकसंबंधमात्रावगमान्न क्षेप इति। किमुदाहरणमिति। समा

सक्षेपो ह्यर्थः। नचात्रास्तीत्याह खट्वारूढ इति। अधीत्येति ब्रह्मचारिणा वेदाध्ययने निषादिते गृहस्थाश्रमः कर्तव्यः। अपथेति। असमाप्तेऽध्ययने भूमिशयनाहोपः

व्यपवृक्ते कर्मणि भवति। पारूढो हि क्षेपो देवदत्तेनेति। अन्यथाजातीयः खल्वपि प्रक्षेपार्थसंप्रत्ययः। अन्यथाजातीयकः संबंधानुराज्ञः सखा राजसखः संबंधा
देन कृतत्वं नूनं राजा पश्यस्य सखेति। उभयं खल्वपीष्यते स्वस्ति सोमसखा पुनरेहि गवां सख इति। खट्वा क्षेपे किमुदाहरणं खट्वारूढः क्षेपे इत्युच्यते कः
क्षेपो नाम। अधीत्य स्नात्वा गुरुभिरनुज्ञातेन खट्वा रोढव्या। य इदानीमतोऽन्यथा करोति स उच्यते खट्वारूढोऽयं जाल्मो नातिव्रतवान्। असंत अ
संतसंयोगे समासस्याविशेषवचनात् क्तेन समासवचनानर्थक्यं। असंतसंयोगे समासस्याविशेषवचनात् क्तेन घाक्तेन च कालाः
क्तेनेति तत्समासवचनमनर्थकं। असंतसंयोग इत्येव सिद्धं। अनसंतसंयोगार्थं तु। अनसंहियोगार्थं तर्हीदं वक्तव्यं। प्रणमुहूर्तोऽप्रसर्पताः॥

खट्वारोहणं करोतीत्यर्थः। खट्वारोहणं चाविनयोपलक्षणार्थमित्याह नातिव्रतवानिति॥ ॥ असंत ॥ ॥ कालाः इति प्रत्ययोगेन क्तांतेन समासविधानं रम०

नक्तेन यं कालाः असंतसंयोग इत्येक एव योगः कर्तव्यः। तत्र च क्तेनेत्यस्य निवृत्तत्वात् सर्वत्र समा(मासः)स्यादिति ध्वनीतीति मत्वाह असंतसंयोग इति॥ ॥ ३०

कदाचिद्दहरिति॥ उत्तरायणे कदाचिद्रात्रिमिति दक्षिणायने तत्रश्चब्द्धिर्मुहूर्त्तैरहोरात्रैश्च नास्यसंततसंयोगः चराचरा इति चरंती सर्थः चरित्वलिपनिवदीनाम
व्याकृताभ्यासस्येति द्विर्वचनम् आगागमस्य क्रमेण च गच्छेतः संकलय्यपदिश्यंते एषवैकदेशगमनाद्गच्छंतीत्युच्यते गतग्रहणादित्रियाश्रितेसत्र निर्दिष्टात् मासमभि
त इति आदिकर्मणि क्तः नेरिक्तः मासंपरिछेत्तुमारब्धवानित्यर्थः मति पच्छेदेण च मासस्यासंततसंयोगाभावः॥ ॥तृतीयातत्कृतार्थेनेतिकिमर्थमिति अयंभाव
दध्ना पटुरित्यत्रपदिदधिकृते पाटवे विवक्षिते तदाभवितव्यं समासेन विशिष्टद्रव्यसंस्कृते दध्यपि पाटवं करोतीति तत्कृततत्त्वसंभवात् अथ भोजनाद्यपेक्षो दध्नः

नेकदाचिदहर्गच्छति कदाचिद्रात्रिं अहर्गताः रात्रिगताः नैतदस्ति गतग्रहणादप्येतत्सिद्धं इदंतर्हि अहरतिसृताः रात्रिमतिसृताः मासप्रमित
श्चंद्रमाः॥ ॥तृतीयातत्कृतार्थेनेतिकिमर्थं दध्ना पटुः घृतेन पटुः नैतदस्ति असामर्थ्यादत्र न भविष्यति कथम सामर्थ्यं सापेक्ष
मसमर्थं भवतीति नहि दध्नः पटुना सामर्थ्यं केन तर्हि भुजिना दध्ना भुंक्ते पटुरिति इहापि तर्हि न प्राप्नोति शंकुलाखंडः किरिका
ण इति अत्रापि न शंकुलायाः खंडेन सामर्थ्यं केन तर्हि करोतिना शंकुलया कृतः खंड इति॥ ॥ ॥

करणाभावः दध्ना भुंक्ते पटुरिति तदसामर्थ्याभावात्समासो न भविष्यति दध्ना पटुरिति असाप्ययं भावः सर्वत्र क्रियाद्वारकेण संबंधेन भवितव्यं तत्र इहापि क्रिया
द्वारकसंबंधसंभवात्समासः स्यात् असामर्थ्यादिति यत्र साक्षात्सामर्थ्यं नास्ति दध्नोदन इत्यादौ तत्र वचनसामर्थ्यात्तृतीयमानं क्रियाद्वारकसंबंधाश्रयेण समा
सः इह तु शंकुलयाखंड इत्यादौ साक्षात्सामर्थ्यसंभवे वचनस्य सावकाशत्वात् दध्नापटुरित्यत्र न भविष्यति इहापीति खंडशब्दस्य गुणोपसर्जनद्रव्यवाचित्वा
त् साक्षात्संबंधाभावाच्छंकुलया अवयवं क्रियापेक्षितख्यातामंतरेण कारकत्वायोगात्॥ ॥ ॥ द्वितीय

वचनादिति। करोतिक्रियाकृतसंबंधाश्रयेणेत्यर्थः। इहापीति परस्परसंबंधापचेत्सर्वेत्र क्रियाव्यतिरिक्तापेक्ष्यतेन तदाश्चापि तदपेक्ष सामर्थ्यसद्भावात् समासप्रसंगइ त्यर्थः। परस्तात्तु तत्कृतार्थग्रहणं निराकरिष्यते 'गुणवचनेनेति किमर्थमिति' अयं भावः जातेर्निःसत्त्वात्तत्कृतत्वाभावाज्जातिवचनेन समासो न भविष्यति क्रियावचनेन तु कर्तृकरणे कृता बहुलमिति भाष्ये समासेन 'स्वभावसिद्धं च द्रव्यमिति तत्कृतत्वाभावात् द्रव्यवाचिनापि न भविष्यति' 'गोभिर्वपावानिति' गोसंबंधिदध्याद्युपयोगाद्वपावत्त्वमिति तत्कृतत्वमस्ति वपावच्छब्दस्तु गुणवचनो न भविष्यति यो हि गुणमुक्त्वा द्रव्यमभिधत्ते यथा शुक्लः पट इति शुक्लशब्दः

वचनाद्भविष्यति। इहापि तर्हि वचनात्प्राप्नोति दध्ना पटुः घृतेन पटुरिति तस्मात्तत्कृतार्थग्रहणं कर्तव्यं 'गुणवचनेनेति किमर्थं' गोभिर्वपावान् धान्येन धनवान् 'किं पुनरिहोदाहरणं शंकुलाखण्डो देवदत्त इति' कथं पुनर्गुणवचनेन समास उच्यमानो द्रव्यवचनेन स्यात्' इह तृतीया तत्कृतार्थेन गुणेनेतीयता सिद्धे सोऽयमेवं सिद्धे सति यद्वचनग्रहणं करोति तस्यैतत्प्रयोजनं एवं यथा विज्ञायेत गुणमुक्तवता
गुणवचनेनेति कथं पुनरयं गुणवचनः सन् द्रव्यवचनः संपद्यते॥ ॥

स गुणवचनः वपावच्छब्दस्तु सर्वदा वपासंबंधविशिष्टं द्रव्यमाहेति नासौ गुणवचनः 'किं पुनरिति' दध्ना जाड्यं घृतेन पाटवमिति साध्ये केवलगुणवाचिना समासो नेष्यते गुणोपसर्जनद्रव्यवचनस्तु द्रव्यवचनत्वाद्गुणवचनो न भविष्यतीति प्रश्नः' गुणेनेति' अर्थेन च समासासंभवात् गुणवचनेन न भविष्यति तद्वचनग्रहणं तु तत्कालपरिग्रहाद्गुणमुक्तवता संप्रति गुणोपसर्जनद्रव्यवाचिना समासो भवतीत्यर्थः। कथं पुनरिति' निःसत्त्वाच्छब्दार्थसंबंधस्योपात्तार्थपरित्यागे
नार्थान्तराभिधानं न संभवतीति प्रश्नः॥ ॥ ॥

आरभ्यत इति अर्थभेदेन शब्दभेदात् सादृश्यनिबंधनत्वाच्च प्रसभिज्ञाया एकत्वेवानेकशक्तियोगात् प्रयोगभेदेनानेकार्थसंबंध इति भावः भवति हीति अ व्यतिरिक्त कल्पांतरं गप्रतीयमानसमासांतर्भूतकरोति क्रियाद्वारकमिति भावः। दध्नापटुरित्यत्र तु विपर्ययात् सामर्थ्यात् समासाभावः अर्थग्रहणिरिति तत्कृतस्यार्थेनाव्यभिचारादित्यर्थः निर्देशमिति चेदिति सामर्थ्यलभ्यस्यापि पदविस्पष्टार्थमुपादानमित्यर्थः। योगविभाग इति तत्कृतेति तृतीयायाः कृतार्थेन संकृतेन इत्यर्थेन इत्येव

आरभ्यते तत्र मतुब्लोपः गुणवचनेभ्यो मतुपो लुगिति तद्यथा शुक्लगुणः शुक्लः कृष्णगुणः कृष्णः एवं खंडगुणः खंडः यद्येवं नार्थस्तत्कृतार्थग्रहणेन भवति हि शंकुलाया खंडेन सामर्थ्यं। अ सामर्थ्याच्चात्र न भविष्यति दध्ना पटुः घृतेन पटुरिति तस्मान्नार्थस्तत्कृतार्थग्रहणेन तृतीयासमासे अर्थग्रहणमनर्थकमर्थगतित्वाद्वचनात् तृतीयासमासे अर्थग्रहणमनर्थकं किं कारणं अर्थगतित्वाद्वचनात् अंतरेणापि वचनमर्थगतिर्भविष्यति निर्देशमिति चेत् तृतीयार्थे निर्देशोपि अर्थे वमपि निर्देशः कर्त्तव्य इति चेत्तृतीयार्थे निर्देशोपि कर्त्तव्यः स्यात् तृतीया तदर्थेकृतार्थेनेति वक्तव्यं तन्नर्हि वक्तव्यं न वक्तव्यं नायमर्थेनिर्देशः किं तर्हि योगांगमिदं निर्दिश्यते सति च योगांगे योगविभागः करिष्यते तृतीया तत्कृतेन गुणवचनेन समस्यते ततोर्थेन अर्थशब्देन च तृतीया समस्यते धान्यार्थः वसनार्थः हिरण्यार्थः पूर्वसदृशसमोनार्थ इत्यर्थग्र

करादमिति वा कुभेदः संपद्यते। न कर्त्तव्यमिति अर्थशब्देन समासार्थमित्यर्थः सत्वे निविशते पैतीति लक्षितस्य गुणस्येह ग्रहणे कुंकुमलोहितादीन्यप्युदाहरणानीति करोति क्रियात्त्रावश्यापेक्ष्येति खंडादीनां संभवदपि धातुवाच्यक्रियारूपत्वंभाष्यकारेणोक्तं॥ ॥ ॥ ॥

पूर्वे पूर्वसूत्रे ऽर्थशब्देन समासस्य साधितत्वादिहार्थग्रहणं मूलेनाभिसंबध्यमानं तद्योगं विकल्पादीनां समासं साधयति पूर्वसूत्रेऽत्रिहसमर्थग्रहणं प्रत्याख्यातं ऽर्थे प्रधानत्वान्निर्देशस्योनाद्योनामंतरेणाप्यर्थग्रहणं समासस्य सिद्धत्वात् सदृशग्रहण उक्तमिति वक्ष्यमाणसापि बुध्यानिरूपितत्वादनुकालसंप्रेक्षितत्वाद्वाभूत निर्देशः सदृशप्रतिरूपयोः सादृश्य इत्यत्र वक्ष्यते पूर्वपदप्रकृतिस्वरविधानार्थं सदृशग्रहणमनर्थकं मात्रा सदृशो मातृसदृश इति पूर्वसदृशेति समासे कृते तेन मुख्य हेतुत्वादर्थेति प्रकृतिस्वरो भविष्यति अथोच्यते तुल्यार्थे योगे ष्यपि पक्षे विधीयते तत्र मातुः सदृशो मातृसदृश इति यदा षष्ठीसमासः क्रियते तदा पूर्वपदप्रकृति

=तुल्यार्थेति निर्देशे तृतीयासमासे तत्पुरुषत्वान्न तत्समासं प्रेक्षितत्वान्न कालाद्यपेक्षणं इत्यर्थः॥

पूर्वसदृश पूर्वादिष्ववरस्योपसंख्यानं पूर्वादिष्ववरस्योपसंख्यानं कर्तव्यं मासावरोऽयं संवत्सरावरोऽयं सदृशग्रहणमुक्तं किमुक्तं सदृशग्रहणमनर्थकं तृतीयासमासवचनात् षष्ठ्यर्थमिति चेत् तृतीयासमासवचनानर्थक्यमिति॥ कर्तृकरणे कृता बहुलं कर्तृकरणे कृता क्तेनेति वक्तव्यं अहिहतः नखनिर्भिन्नः दात्रेण लूनं परशुच्छिन्नं क्तेनेति किमर्थं इह माभूत् दात्रेण लूनवान् परशुनाछिन्नवान् तत्तर्हि वक्तव्यं न वक्तव्यं बहुलवचनात्सिद्धं॥ ॥ ॥

स्वरार्थं सदृशग्रहणं तथा च दास्याः सदृश इत्याक्रोशेषष्ठ्या अलुक्स्वरः सिध्यतितदा तृतीयासमासे सदृशग्रहणं न कर्तव्यं षष्ठीसमासेनैव स्वररूपयोः सिद्धत्वात्॥ अथोच्यते हेतुतृतीयार्थमिह सदृशग्रहणं विद्यया सदृशो विद्यासदृश इति तदपि संबंधमात्रविवक्षायां षष्ठीसमासेनैव स्वररूपयोः पूर्वसूत्रेणवातत्कृतत्वात् सिद्धत्वात्॥ ॥कर्तृबहुलवचनादिति अयं भावः क्तेनेत्युच्यमाने घञादिभिर्नखनिर्भेद इत्यादौ समासो न प्राप्नोति तस्माद्बहुलग्रहणमेवाव्याप्त्यतिव्याप्तिपरिहारार्थमाश्रयणीयं॥ ॥ ॥

कृतैः स्कृतिनिंद्रापरत्वात्क्रियोपादानस्य कृत्ते करणायोगौणत्वात्स्पर्धेण प्राप्तः समासोनेन विधीयत इति केचिदाहुः अन्ये तु प्रपंचार्थमेवेदं दिसाहुः तथा च कारूपी मानदीसकृतैरप्यधिकार्थवचने समासो दृश्यते कृतैरिति तस्य नेदं नियमार्थं अपि तु प्रपंचार्थं बुसोपेंध्यमिति अन्येरन्यत्वात् काष्ठमेनत् हुसेन प्रज्वलनीयमितस र्थः। घनश्यामसमिति घनेनायः प्रभृतिनाद्यासस्य काठिन्यं प्रतिपाद्यते साधनं कृतेति बहुलग्रहणसहितसूत्रसंदर्भापेक्षो विकल्पः पादाभ्यामिति अपादाने पंचमी हारक इति कृतस्युटो बहुलमिति बहुलग्रहणात्कर्मणि णवुल् चोपक इति चुपेरुपेतस्य कर्मणि णवुल्॥ ॥ अन्येन तुल्यन्यायत्वात् युगपत्सूत्रद्वयस्य विचारः द्वयो

कृतैः [अथवा] कृतैरधिकार्थवचनेऽन्यत्रापि दृश्यते कृतैरधिकार्थवचनेऽन्यत्रापि दृश्यत इति वक्तव्यं बुसोपेंध्यं तृणोपेंध्यं घनश्यामं साधनं कृतेति वा पादहारकाद्यर्थं साधनं कृता समस्यत इति वक्तव्यं किं प्रयोजनं पादहारकाद्यर्थं पादाभ्यां ह्रियते पादहारकः गले चोप्यते गलेचोपकः अन्नेन व्यं जनं भक्ष्येणमिश्रीकरणं अन्नेन व्यंजनं भक्ष्येणमिश्रीकरणमित्यसमर्थसमासोपं द्रष्टव्यः किंकारणं कारकाणां क्रियासमर्थत्वात् कारकाणां क्रियया सामर्थ्यमस्ति न तेषामन्योन्येन तद्यथा निश्रयणाभ्यां काष्ठाभ्यां सामर्थ्यं न तेषामन्योन्येन एवं तर्ह्याहायं अन्नेन व्यंजनं भक्ष्येणमिश्रीकरणमिति न चास्ति सामर्थ्यं तत्र वचनात्समासो भविष्यति वचनप्रामाण्यदिति चेत् ॥ ॥

दनइसादृशैः क्रियावाची शब्दो न प्रयुज्यते यथा कष्टश्रित इति क्रियामन्तरेण च द्रव्याणां परस्परसंबंधो नास्तीत्याह अन्नेनेति किंकारणमिति समासाडुपसेकादि क्रियावगमात्तत्कृतमस्य बुसामर्थ्यमिति प्रश्नः क्रिययेति तस्मान्नु वाचको नास्तीति तदभावात्सामर्थ्याभावः निश्रयणा इति निश्रयणी शब्देन समुदायवृत्तिनाउप चारात् सोपानप्रत्तकान्यभिधीयंते द्वाभ्यामिति उद्धाभ्यामि त्यर्थः एवमसामर्थ्यं प्रतिपादिते आचार्यदेशीय आह एवं तर्हीति॥ ॥ ॥

नानाकारकाणामिति। भिन्नक्रियापेक्षयाकारकाणामित्यर्थः। तिष्ठतु दध्नेति दध्ना भ्रियतां जीवतित्यर्थः। तत्र दध्नः करणत्वं एवं सूत्रन्यासं दूषयित्वा वार्त्तिककारन्या
लीयं न्यासं दर्शयति। सिद्धं त्विति। उत्तरपदलोपप्रसंगेनान्यदप्याह। षष्ठीसमासश्चेति अभ्यानामिति। संबंधविवक्षायां षष्ठीत्याद्यध्न इति। असमासे दर्शनादिति
असमासो वाक्यं तत्रैव युक्तादयो न दृश्यन्ते अभ्यानां रथोऽभ्यरथः दध्नो घटो दधिघट इति युक्तादिशब्दप्रयोगमंतरेणापि संबंधप्रतीतेरेव युक्ताद्यर्था

नानाकारकाणां प्रतिषेधः वचनप्रामाण्यादिति चेन्नानाकारकाणां प्रतिषेधो वक्तव्यः। तिष्ठतु दध्ना ओदनो देवदत्तेन भुज्यत इति। सिद्धं तु समाना
धिकरणाधिकारे कस्तृतीयापूर्वपदलोपश्च। सिद्धमेतत्कथं समानाधिकरणाधिकारे वक्तव्यं क्तांतस्तृतीयापूर्वपदः समस्यते सुपा उत्तरपद
स्य च लोपो भवतीति दध्ना उपसिक्तः दध्युपसिक्तः दध्युपसिक्तः ओदनो दध्योदनः गुडेन संसृष्टाः गुडसंसृष्टाः गुडसंसृष्टाः धानाः गुडधानाः ष
ष्ठीसमासश्च युक्तपूर्णात षष्ठीसमासश्च युक्तपूर्णातः समस्यते उत्तरपदस्य च लोपो वक्तव्यः। अभ्यानां युक्तो भ्य [redacted] युक्तः अभ्ययु
क्तो रथोऽभ्यरथः दध्नः पूर्णो दधिपूर्णः दधिपूर्णो घटो दधिघटः। तत्तर्हीदं वक्तव्यं। न वाऽसमासेऽदर्शनात् न वा वक्तव्यं किं कारणमसमासेऽदर्शना
त्। यद्यसमासे दृश्यते समासे च न दृश्यते ततिल्लोपारंभप्रयोजनयति। न चासमासे उपसिक्तशब्दः संसृष्टशब्दो युक्तशब्दः पूर्णशब्दो वा दृश्यते कथं तर्हि सा
‹‹मर्थ्यं गम्यते॥ ॥ ॥

नामाक्षेपात् दधिपूर्णो घट इत्येतत्तु शब्दांतरमेव तत्स मानार्थेन तु दधिघट इत्येतस्यैतद्वाक्यं अन्यत्र तु प्रसयत्न क्षणार्थेल्लोपारंभः यथाऽग्निचित् दधिपंचेति
इहतु लोपाख्यानेप्रयोजनाभावः॥ ॥श्री॥ ॥७॥ ॥ राम०
३३

युक्तार्थसंप्रत्ययादिति युक्तग्रहणं योग्यक्रियोपपन्नस्तरगामित्युपसेकादयोपि गृह्यन्ते न तु अयुक्तं भवति दध्योदन इत्युक्ते दध्नः संस्कारकत्वं ओदनस्य च संस्कार्यत्वं प्रतीयते न
न चोपसेकमन्तरेण संस्कार्यसंस्कारकभावो स्तीति सामर्थ्यादुपसेकप्रतीतिः संप्रत्ययाच्चेति सर्वलोकव्यवहारप्रसिद्धत्वादिति भावः अतएव न प्रतिज्ञार्थैकदेशो हेतुः ता०
तदर्थाध्यवसानमिति संदेहरहितस्तदर्थनिश्चय इत्यर्थः मंदकमिति मंदजातं उत्तरकमिति परिपक्वावस्थोपरिघनभावः निलीनकमिति पक्वावस्थाया
अनिश्चितार्थे नियुक्तार्थतासंप्रत्ययेसाध्यत्वेन प्रतिज्ञानेन तत्र हेतुः ... साध्यैकदेशस्य ... संप्रत्ययमात्रस्य नेतुत्वं साध्यस्य हेतुतासंभवात् अनैकान्तिकत्वेन हेत्वाभासत्वाच्चेति भावः ॥२८॥

युक्तार्थसंप्रत्ययाच्च सामर्थ्ये दध्ना युक्तार्थता संप्रतीयते कथं पुनर्ज्ञायते दध्ना युक्तार्थता प्रतीयत इति संप्रत्ययाच्च तदर्थाध्यवसानं
संप्रत्ययाच्च तदर्थाध्यवसीयते अवश्यं चैतदेवं विज्ञेयं संप्रतीयमानार्थलोपे ह्यनवस्था पोहि मन्यते संप्रतीयमानार्थानां शब्दानां लो
पो भवतीति अनवस्था तस्य लोपस्य स्यात् दधीत्युक्ते बह्वो योगम्यन्ते मंदकमुत्तरकं निलीनकमिति न ह्यानिर्दिष्टानां शब्दानां लोपो वक्त
व्यः स्यात् तथा गुड इत्युक्ते मधुरशब्दस्य शृङ्गवेरमिति चक्र उकशब्दस्य अन्तरेणापि खलु शब्दप्रयोगं बह्वो र्था गम्यन्ते अक्षिनिकोचैः पा
णिविहारैः न तत्रानिर्दिष्टानां शब्दानां लोपो वक्तव्यः स्यात् ॥ ॥ ॥

अत्रैवं एषां विशेषाणां संभवाद्दधीत्युक्ते संप्रत्ययः अक्षिनिकोचैरिति प्रकारान्तरेणाविधित्वेन (निषेध) स्वेणाध्यवसायाच्चरितार्थत्वात् यथा शब्दानां प्रयोगो
नास्ति तथा युक्तादीनामपीत्यर्थः ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

भा॰कै॰२ चतुर्थी। चतुर्थी चाशिषीति हितयोगे या चतुर्थी तदन्तस्य समासो न भवति समासाद्राशिषोऽनवगमादिति केचिदाहुः पाणिनीये लक्षणे ऽस्ति यादृशं पुनरु

३४ क्तं चेद्दृष्टा पूर्वाचार्यन्यासे लक्ष्या दृशं मत्वा विचारः क्रियते किं चतुर्थ्यन्तस्येति विशेषानुपादानाद्दोषदर्शनाच्च प्रश्नः इतरः स्ववचनेनैव दोषमभिधाय पि तु मा

३५ ह एवं भवितुमर्हतीति सर्वप्रसंग इति असत्यपि प्रकृतिविकारभावे दस्यर्थैः यो हीति देयस्य बलेः संप्रदानार्थतास्तीति तदर्थो ऽयं समासः सिद्धः

=इतरः किं तर्हि स्ववचनेनैतन्[illegible] स्ववचनेनैव सर्पः॥=

चतुर्थी किं चतुर्थ्यन्तस्य तदर्थमात्रेण समासो भवति एवं भवितुमर्हेति चतुर्थीतदर्थमात्रेण चेत्सर्वप्रसंगो विशेषात् चतुर्थी तदर्थमात्रेण चेत्सर्वप्रसंगः सर्वस्य चतुर्थ्यन्तस्य तदर्थमात्रेण सह समासः प्राप्नोति अनेनाप्राप्नोति रंधनाय स्थाली अवहननायोलूखलमिति किं कारणमविशेषात् न हि कश्चिद्विशेष उपादीयते एवंजातीयकस्य चतुर्थ्यन्तस्य तदर्थेन सह समासो भवतीति अनुपादीयमाने विशेषे सर्वप्रसंगः बलिरक्षिताभ्यां चानर्थकं वचनं बलिरक्षिताभ्यां समासवचनमनर्थकं यो हि महाराजाय बलिः स महाराजार्थो भवति तत्र तदर्थ इत्येव सिद्धं यदि पुनर्विकृतिश्चतुर्थ्यन्ता प्रकृत्या सह समस्यत इत्येतल्लक्षणं क्रियेत विकृतिः प्रकृत्येति चेदश्वघासादीनामुपसंख्यानं विकृतिः प्रकृत्येति चेदश्वघासादीनामुपसंख्यानं कर्तव्यं अश्वघासः श्वश्रूसुरं हस्तिविधेति अर्थेन नित्यसमासवचनं अर्थशब्देन नित्यसमासो

ऽवक्तव्यः ब्राह्मणार्थं क्षत्रियार्थं ॥ ॥ ॥

इदानीं पूर्वाचार्यसूत्रं विचार्यते यदि पुनरिति अश्वघास इति तादर्थ्यमत्रास्ति न तु प्रकृतिविकारभावः श्वश्रूसुरमिति विभाषा सेनासुरेति नपुंसकत्वं हस्तिवि एम॰

धेति विधा हस्त्यन्नं माषादि अर्थेनेति महाविभाषाधिकारात् विकल्पनिवृत्त्यर्थं वचनं॥ ॥श्री॥ ॥०॥ ३४

द्विविकृतिरितितदनंतरमभिधानान्नस्यैवलक्षणस्यदोषांतरंमन्यते नेत्याहेति आनंतर्यसामर्थ्याभावेसत्यकारणमित्यर्थः सर्वलिंगताचेतिपरवल्लिंगमितिपुंस्त्वमेवप्रा
प्नोति अभिधेयवशेनचसर्वलिंगताविज्ञेयेतिदर्शयति ब्राह्मणार्थमिति किमर्थेनेति पूर्ववत्प्रश्न प्रतिवचनेइदानीभाष्यकारः पाणिनीयसूत्रंसमर्थपितुंचोदकमु
=चोदकमुखेनेतिन्येनचोदकेनपूर्वाचार्यलक्षणेएवपाणिनीयलक्षणेदोषआपादितस्तमुखेनपाणिनीयलक्षणंसमर्थयितुंदोषाभावप्रतिपादनंकारयितुंपूर्वाचार्यलक्षणेगौरवोद्भावनपूर्वकमाहेत्यर्थः॥१९=
किंविकृतिप्रकृत्यर्थतापकृत्यासहसमस्यतइत्यतोऽर्थेननित्यसमासोवक्तव्यः नेत्याह सर्वथाऽर्थेननित्यसमासोवक्तव्यः किंकारणंविग्रहोमाभूदिति
सर्वलिंगताचसर्वलिंगताचवक्तव्याब्राह्मणार्थंपयः ब्राह्मणार्थःसूपः ब्राह्मणार्थायवागूरिति किमर्थेननित्यसमासइत्यतः सर्वलिंगतावक्तव्या
नेत्याहसर्वथासर्वलिंगतावक्तव्या किंकारणं अर्थशब्दोऽयंपुल्लिंग उत्तरपदार्थप्रधानश्चतत्पुरुषः तेनपुल्लिंगस्यैवसमासस्याभिधा
नंस्यात्स्त्रीनपुंसकलिंगस्यनस्यात् तच्चहीदंबहुवक्तव्यं विकृतिःप्रकृत्येति वक्तव्यंअश्वघासादीनामुपसंख्यानंकर्तव्यं अर्थेननित्यसमासोवक्त
व्यः सर्वलिंगताचवक्तव्या। नवक्तव्यंयत्तावदुच्यतेविकृतिःप्रकृत्येतिवक्तव्यमितिनवक्तव्यं। आचार्यप्रवृत्तिर्ज्ञापयतिविकृतिप्रकृत्यर्थतापकृत्यासह
समस्यतइति यदयंबलिरक्षितग्रहणंकरोति कथंकृत्वाज्ञापकंयथाजातीयकानांसमासेबलिरक्षितग्रहणेनार्थः तथाजातीयकानांसमासःय
दिचविकृतिप्रकृत्यर्थतापकृत्यासहसमस्यतेनतदर्थमात्रेणततोबलिरक्षितग्रहणमर्थवद्भवति यदप्युच्यतेऽश्वघासादीनामुपसंख्यानंकर्तव्य
मितिनकर्तव्यंअश्वघासादयःषष्ठीसमासाभविष्यंतियदिपदर्थेभवति॥ ॥
खेनाह तत्तर्हीतियदितदर्थमात्रेणचतुर्थीसमासःस्यात्तदाबलिरक्षितग्रहणंकुर्यान्नादर्थ्येस्यासंभवात्तदर्थग्रहणेनैवसमासस्यसिद्धत्वात्॥ ॥श्री॥ ०
यत्प्रमिति॰१

अयमपीति तादर्थ्यसंबंधविशेषो विशेषे च सामान्यमवरुद्धं भवतीति तन्मात्रविवक्षायां षष्ठी प्रवर्त्तेतएवेतिभावः। अथवा ब्राह्मणार्थो यास इति योग्यतामात्रं विव-
क्ष्यतेनतुतादर्थ्यं धनस्यात्स्यादयस्त्वनभिधानात्षष्ठीसमासा न भवंति यूप दार्वादिषु चतुर्थी तदर्थ इति स्वरसिध्यर्थं तादर्थ्यमेव संबंधविशेषो विवक्ष्यते
न संबंधसामान्यमिति समासाभावः सर्थ विति तदर्थविकृते रित्यत्र तदर्थं सर्थ विति क्रियते तादर्थ्ये न चतुर्थी समर्थविभक्तिराक्षिप्यते तस्मैहितमिसतो

अयमपि तत्राभिसंबंधो भवसस्येदमिति तद्यथा गुरोरिदं गुर्वर्थमिति ननु स्वरे भेदो भवति चतुर्थीसमासे सति पूर्वपदप्रकृतिस्वरत्वेन भ-
वितव्यं षष्ठीसमासे सति पुनरंतोदात्तत्वेन नास्ति भेदः चतुर्थीसमासेपि संतोदात्तत्वे नैव भवितव्यं कथं आचार्यप्रवृत्तिर्ज्ञापयति कृति अनु-
पी नोचेलर्थ३ वर्त्तमाना प्रकृतिस्वरा भवति न चतुर्थीमात्रमिति परं चतुर्थी तदर्थे ग्रहणं कुग्रहणं च करोति कथं कृत्वा ज्ञापकं यथाजातीयकानां प्रकृतिस्वर-
त्वे र्थग्रहणेन कुग्रहणेन चार्थः तथाजातीयकानां प्रकृतिस्वरत्वं पदिच विकृति अनुवर्त्तमाना प्रकृत्या भवति न चतुर्थीमात्रं ततो र्थग्रहणं
कुग्रहणं चार्थवद्भवति परस्तु च्यते र्थेन नित्यसमासो वक्तव्य इति नवक्तव्यः सर्थे प्रसंग्रयः करिष्यते किं कृतं भवति नचैव हि कदाचित्स्वप-
येन विग्रहो भवति अपि च सर्वलिंगता सिद्धा भवति यदि सर्थे प्रसंग्रयः क्रियते इत्संज्ञा न प्राप्नोति॥ [redacted] ॥

वानुवर्त्तते तेन चतुर्थ्यंतानां तादर्थ्येभिधेये समर्थ्यप्रसंग्रयो भवति सकारः पदत्वार्थं तेन राजार्थं भवदर्थमित्यादौ न लोपादी निभवंति पकारोनुदात्तार्थः तेन प्रकृ- राम०
तेर्यथाप्राप्तं स्वरो भवतीति अर्थ इति स्वरार्थं सूत्रं न कर्त्तव्यं भवति न चैवेति प्रत्ययेकृते तद्धितत्वात् प्रातिपदिकत्वात् सुब्लुकामवितव्यमिति विग्रहाभावः॥ ॥ ३५

अथापीति आदिर्ञिटुडवश्चः प्रत्ययस्येति संहितया सत्त्वशठे सकारस्याप्रिकृतत्वस्य निर्देशादितिभावः शोभनमिति सुशब्दपर्यायेण शोभनशब्देन विग्रहः सु
शब्दस्य तत्समत्ववाचित्वात्तेन नास्ति विग्रहः अत्र च ब्राह्मणार्थो यस्येति विग्रहे न भवतीति विवक्षितं ब्राह्मणो यस्मै स एवं समानाधिकरणत्वविग्रहे भवत्येव अ
=इतिभवदिति नत्वसुखिनो रित्वं शास्त्रविभक्तिः नविभक्तावितिनिषेधात् नयसनः यकारादितत्र ... अतद्धित ... विधानादितिभावः=
अथापि कथं चिदितिसंज्ञा स्यात् एवमपि अन्यपदार्थे अर्थे अंगस्येतीयडुवङौ स्यातां एवं तर्हि बहुव्रीहिर्भविष्यति किं कृतं भवति। भवति चैव
कश्चिदस्य पदविग्रहो बहुव्रीहिः तद्यथा शोभनं मुखमस्याः सुमुखीति नैवं शक्यं इह हि महदर्थमिसात्वकृपौ प्रसज्येयातां एवं तर्हि
तदर्थस्योत्तरपदस्यार्थशब्द आदेशः करिष्यते किं कृतं भवति नचैव हि कदाचिदादेशेन विग्रहो भवति अपि च सर्वलिंगता सिद्धा भ
वति न तर्हि वक्तव्यं। न वक्तव्यं योगविभागः करिष्यते चतुर्थी तदर्थैरेतेन सह समस्यते ततस्तदर्थोर्थेन तदर्थस्य चोत्तरपदस्यार्थशब्द
आदेशो भवति इहापि तर्हि प्राप्नोति छात्राय हितं छात्राय स्वदितमिति आचार्यप्रवृत्तिर्ज्ञापयति नातदर्थे या चतुर्थी सा समस्यतेन
चतुर्थीमात्रमिति यदयं हितसुखग्रहणं करोति कथं कृत्वा ज्ञापकं यथाजातीयकानां समासे हितसुखग्रहणेनार्थस्तथा
जातीयकानां समासः यदि च तादर्थ्ये या चतुर्थी सा समस्यते न चतुर्थीमात्रं ततो हितसुखग्रहणमनर्थकं भवति इहापि तदर्थस्योत्तरप
दस्यार्थशब्द आदेशः प्राप्नोति पृथ्वायददारु यूपदारु वा वचनं च ॥ ॥
अर्थशब्दः प्रयोजनवाची एवं तर्हीति ब्राह्मणाय पयइति समासे कृते ययः शब्दस्थाने अर्थशब्द आदेशः क्रियते तेन ब्राह्मणपय इति तादर्थ्ये प्रयोगो न भवति
चतुर्थ्याश्च समासे निवृत्तत्वादादेशेनार्थशब्देन विग्रहाभावः अर्थविशेषाभि व्यक्तये पयः शब्दस्य प्रयोगः इहापीति यदि चतुर्थी सेनाव च्छत्रणां क्रियेत

वाचेति महाविभाषया यथोद्देशो विकल्पनेनेनष्ट पार्थेदारूरूपप्रदार्वितिद्वैरूप्यं भवति पदयमिति कुबेराय बलिः कुबेरबलिरिति रूपद्वये सिद्धे बलिरक्षितग्रहणं
ज्ञापकं प्रकृतिविकारभावादन्यत्र नित्यो यथोद्देशः तदर्थस्य भवतीति उदकार्थ इति यदि विविधशब्दस्यार्थो देशः क्रियेत तदानस्य स्यान्निवृत्ता वान्मयोर्द

वा च विधास्यते इहापि तर्हि विभाषा प्राप्नोति ब्राह्मणार्थं क्षत्रियार्थमिति एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति प्रकृतिविकृत्योर्यः
समासः तत्र तदर्थशब्दस्योत्तरपदस्यार्थशब्दआदेशो भवति अन्यत्र नित्य इति यदयं बलिरक्षितग्रहणं करोति एवं तर्हि उद
कार्थो विवधः स्यान्निवृत्ता वा उदभावः प्राप्नोति तस्मान्नैवं शक्यं न चेदेवमर्थेन नित्यसमासो वक्तव्यः सर्वलिंगता च नैष दोषः
इदं तावदयं प्रष्टव्य अथेह ब्राह्मणेभ्य इति कैषा चतुर्थी तादर्थ्य इत्याह यदि तादर्थ्ये चतुर्थी अर्थशब्दस्य प्रयोगेण न भवि
तव्यं उक्तार्थो नामप्रयोग इति समासोपि तर्हि न प्राप्नोति वचनात्समासो भविष्यति यदप्युच्यते सर्वलिंगता वक्तव्येति न

९ वक्तव्या लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्य चतुर्थी॥ ॥

दनेति पक्षे उदकशब्दस्योदादेशः प्राप्नोति समासोपीति चतुर्थ्यन्तस्यार्थशब्देन समासो विधीयते न चैतत्प्रयोगयोग्यं नाभावइति भावः वचनादिति अस
त्यपि लौकिके युगपत्प्रयोगे प्रक्रियायां यौगपद्यमस्त्येवेत्यर्थः॥ लिंगमिति तत्तस्य परवल्लिंगमित्यस्य लक्षणस्याभावाल्लौकिकप्रयोगाश्रयात्सर्वलिं एम०

९ गता भविष्यतीत्यर्थः॥ ॥ ॥ ३६

पंचमी। भयेनेतिस्वरूपग्रहणाद्व्याप्तिमत्वाद्वार्त्तिकारंभः व्याख्यानादर्थग्रहणे वृकेभ्य इत्यादावपि प्रसंगः॥ ॥सप्तमी शौंडादिभिरिति वक्तव्यमिति बहुवचनम र्थग्रहणे सति पर्यायार्थं वा स्यात् बहुवचनात् समासविधानार्थं वा गणपाठस्तु सत्त्वप्यसंग्रहीतत्वादकिंचित्करः स्यादिति भावः बहुवचननिर्देशादिति धूर्त्तादीनां सा हचर्यादारोपितशौंडशब्दस्वरूपाणां शौंडशब्देनाभिधानात् यथा छत्रिणो गच्छंतीति भावः इसंतर्भूतप्रसक्त्यादिक्रियापेक्षो ऽक्षादीनामाधारभावः। छंतं शरोत्र

पंचमीभयेन। अस्याल्पमिदमुच्यते भयेनेति भयमीतभीतिभीभिरिति वक्तव्यं। वृकाद्भयं वृकभयं वृकाद्भीतः वृकभीतः वृकाद्भीतिः वृकभीतिः वृकात् भीः वृकभीरिति। अपर आह भयनिर्गतजुगुप्सुभिरिति वक्तव्यं वृकभयं ग्रामनिर्गतः अधर्मजुगुप्सुः पंचमीभयेन। सप्तमी शौंडैः शौंडादिभिरिति वक्तव्यं इहापि यथा स्यात् अक्षधूर्तः स्त्रीधूर्तः अक्षकितवः स्त्रीकितव इति तन्न हि वक्तव्यं। न वक्तव्यं बहुवचननिर्देशाच्छौंडादिभिरिति विज्ञास्यते सप्तमी शौंडैः ध्वांक्षेण क्षेपे ध्वांक्षेणेत्यर्थग्रहणं ध्वांक्षेण क्षेपे ऽर्थग्रहणं कर्त्तव्यं इहापि यथा स्यात् तीर्थकाक इति क्षेप इत्युच्यते क इह क्षेपो नाम यथा तीर्थकाका न चिरं स्थातारो भवंति एवं योगुरुकुलानि गत्वा न चिरं तिष्ठति स उच्यते तीर्थकाक इति ध्वांक्षे। कृत्यैर्ऋणे कृत्यैर्नियोगे पद्ग्रहणं कृत्यैर्नियोगे यत्प्रत्यये नेति वक्तव्यं इहापि यथा स्यात् पूर्वाह्णे गेयं साम प्रातरध्येयो ऽनुवाक इति तन्न हि वक्तव्यं। न वक्तव्यं ऋण इत्येव सिद्धं इह यद्यस्य नियोगतः [redacted] कार्यमृणं तत्स्य भवति तत्र ऋण इत्येव सिद्धं यद्ग्रहणं कर्त्तव्यं इह माभूत् पूर्वाह्णे दातव्या

पद्यतेतद्योगे ऽवयविन आधारत्वविवक्षायां सप्तमी॥ ॥ध्वांक्षेण ऽधाराधेयभावावगमात् क्षेपासंभवं मत्वा पृच्छति क इति उपमानोपमेयभावेन कार्येष्वस्थिरत्वात् क्षेपः समासात्प्रतीयत इत्यर्थः॥ ॥कृत्यैर्ऋणे पूर्वाह्णे गेयमिति। तत्पुरुषे कृति बहुलमित्यलुक् यद्यस्येति अवश्यकर्त्तव्यतासामान्यादुपचारादन्यत्रापि ऋणशब्दस्य प्रयोगद र्शनात् गौणस्यापि प्रयोगस्य शास्त्रे लक्ष्यवशेन क्वचिद्ग्रहणादित्यर्थः॥ ३६॥ ॥ ॥

भा०कै०२
३७
37

क्षेपे अवतप्तेनकुलेति चापलादिति भावः॥ पात्रेपरमं पात्रेसमिता इति वैयधिकरण्येपि विस्पष्टपटुवत्सुपेति समासः प्राप्नोति परममिति क्रियाविशेषणं पर
माः पात्रेसमिता इतितु पाठो ज्यायान्॥ ॥पूर्वं एकशब्दप्रसंगे नदीभिश्चेत्यत्रोक्तं वस्तु स्मारयितुमाह इह कस्मादिति नचात्रेति एकत्वविशेषणान्नद्यत्रप्राधा

क्षेपे किमुदाहरणं अवतप्तेनकुलस्थितं त एतत् क्षेप इत्युच्यते क इह क्षेपो नाम यथा अवतप्ते नकुलाः न चिरं स्थातारो भवन्ति एवं कार्याण्यार
भ्य यो न चिरं तिष्ठति स उच्यते अवतप्तेनकुलस्थितं त एतदिति क्षेपे समस्यतं क्तांतेन सह समस्यत इत्युच्यते तत्र ते गतिकेन स नकुलेन च समा
सो न प्राप्नोति क्षेपे उक्तं किमुक्तं कृद्ग्रहणे गतिकारकपूर्वस्यापीति क्षेपे पात्रेसमितादयश्च किमर्थश्चकारः एवकारार्थः पात्रेसमितादय एव
क्रमाभूत् परमं पात्रेसमिता इति पात्रेसमिते पूर्वकालैकसर्वजरत्सु इह कस्माद्व्ययीभावो न भवति एका नदी एकनदी नदीभिः संख्येति प्राप्नोति।
इह कश्चित्समासः पूर्वपदार्थप्रधानः कश्चिदुत्तरपदार्थप्रधानः कश्चिदन्यपदार्थप्रधानः कश्चिदुभयपदार्थप्रधानः पूर्वपदार्थप्रधानो
व्ययीभावः उत्तरपदार्थप्रधानस्तत्पुरुषः अन्यपदार्थप्रधानो बहुव्रीहिः उभयपदार्थप्रधानो द्वंद्वः न चात्र पूर्वपदार्थप्राधान्यं गम्यते अ
थवाव्ययीभावः क्रियतां तत्पुरुष इति तत्पुरुषो भविष्यति विप्रतिषेधेन भवेदेकसंज्ञाधिकारे सिद्धं परं कार्यत्वे तु न सिध्यति आरंभसामर्थ्याच्चा
व्ययीभावः प्राप्नोति परं कार्यत्वाच्च तत्पुरुषः प्राप्नोति परं कार्यत्वे च न दोषः कथं नदीभिः समाहारेऽव्ययीभावो वक्तव्यः स चावश्यं वक्तव्यः सर्वमेकनदी
नैषदोषः४
तरे॥ ॥इति भगवत्पतंजलिविरचिते व्याकरणभाष्ये द्वितीयस्याध्या

न्येन प्रतीयते अवशिष्टं भाष्यं तत्रैव व्याख्यातं॥ ॥इत्युपाध्यायजय्यटपुत्रकै
यटकृते भाष्यप्रदीपे द्वितीयस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकं॥

॥ ॥श्री॥ ॥

[illegible]

एम०
३७

तद्धितार्थे समाहार इति कोयमिति । किं भावसाधनोथ कर्मसाधनः तत्र भावसाधने द्रव्यस्यानयनादिकं न प्राप्नोति समूहरूपत्वाच्च समाहारस्य तद्धितार्थग्रहणेन समास सिद्धत्वाद्देनोपादानमनर्थकं प्राप्नोति कर्मसाधने तु उपसर्जनह्रस्वत्वं न प्राप्नोति द्विगुरेकवचनमित्येतच्च वक्तव्यं भवतीति प्रश्नः कर्मसाधन इति द्रव्यस्यैव कार्यसंबंधदर्शनादिति भावः संज्ञाग्रहणं च द्यज्विधौ प्रसाख्यातमित्सः संज्ञायामपि घञ् भवति यदीति कुमार्यर्थस्य प्राधान्यात् । समासशास्त्रे च प्रथमानिर्देशाभावात् ह्रस्वाप्रसंगः । यद्यप्यत्र नपुंसकह्रस्वत्वं सिध्यति पंचखट्वीति तु न सिध्यति पक्षे हि खट्वीबलं तत्खट्वीबत्वे ह्रस्वत्वे सति पंचखट्वमिति सिध्यति स्त्रीत्वे तु अनुपसर्जनत्वात् ङ्या

तद्धितार्थोत्तरपदसमाहारे च समाहार इति कोयं शब्दः समाङ्पूर्वाद्धरतेः कर्मसाधनो घञ् समाह्रियते समाहार इति यदि कर्मसाधनः पंचकुमार्यः समाहृताः पंचकुमारि दशकुमारि गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वं न प्राप्नोति द्विगुरेकवचनमित्येतच्च वक्तव्यं एवं तर्हि भावसाधनो भविष्यति समाहरणं समाहारः अथ भावसाधने सति किमभिधीयते पंचदौत्तराधर्यं कः पुनर्गवां समाहारः पत्त्रदर्जनं क्रयणं भिक्षणमपहरणं वा यद्येवं विक्षिप्तेषु पूलेषु गोषु चरंतीषु न सिध्यति एवं तर्हि समभ्याशीकरणं समाहारः ॥ ॥ ॥

ह्रस्वत्वे ङ्नंतत्वात् ङीबभावात् पंचखट्वा इति स्यात् अत्र हि टाबंत इति पक्षे स्त्रीत्वं द्विगुरिति अनेकार्थत्वात्समासस्येति भावः अथेति लोके समाहार एकप्रदेशसंघटनमुच्यते तस्य पंचग्राम्यादावभाव इति भावः । यत्तदिति पंचमूल्यादौ तत्स्य संभवादिति भावः कः पुनरिति औत्तराधर्यस्यासंभवादाशयः यत्तदर्जनमिति एकस्यां क्रियायां गुणे वा बुद्ध्यासमीपीकरणं समाहार इत्यर्थो विवक्षितः तत्रार्जनं निमित्तत्वादर्जनं समाहार इत्युक्तं तच्च क्रयादिनाभवतीति तन्निर्देशः ऌत्तः यथोक्तमप्रतिपद्यमानः पर आह यद्येवमिति गोष्विति नानास्वामिकानामर्जनाभावमाह समभ्याशीकरणमिति समीपीकरणमित्यर्थः ॥ ॥ ॥श्री॥

मा॰कै॰२ एवमपीति। ग्रामादीनां नियतदेशावस्थानत्वात् समीपीकरणाभाव इति भावः। पदार्थं ग्रामशब्दो देशविशेषवाची तदायं दोषः। पुरुषवाचित्वे तु न दोषः तेषां समीपी
३८ करणसंभवात्। समेकत्ववाचीति भिन्नदेशानामेकवर्गीकरणे तद्देशान्तरप्रापणं समाहारः। स च ग्रामादीनां नास्तीति भावः। नावश्यमिति। तत्रस्थग्रामादीनामपि त्वादि
38 सदृशधर्मानुगमात् समाहारसद्भावः। अथ वेति। केवलेन पदार्थेन व्यवहाराभावादेवं शंक्ये क्रियागुणो वापेक्ष्यते तत्र च बुद्ध्या भिन्नदेशानामप्यस्ति समीपीकरण

एवमपि पंचग्रामी षण्णगरी (त्रिपु) इति न सिध्यति। किं कारणं समेकत्ववाची आङ् अभिमुख्ये वर्त्तते हरतिर्देशान्तरप्रापणे। नावश्यं हरतिर्देशान्तरप्रापण
एव वर्त्तते किं तर्हि सादृश्येऽपि वर्त्तते। तद्यथा मातुरनुहरति पितुरनुहरतीति। अथवा पंचग्रामी षण्णगरी त्रिपुरीति नैवेदमियसेवा वर्तिष्यते। अवश्य
मसौ ततः किंचिदाकांक्षति क्रियां गुणं वा यदाकांक्षति तदेकं स च समाहारः। अयं तर्हि भाव साधने सति दोषः। पंचपूली आनीयतामिति भावानायने चोदिते द्र
व्यानयनं न प्राप्नोतीति नैष दोषः इदं तावदयं प्रष्टव्यः अथेह गोरनुबंध्योऽजोऽग्नीषोमीय इति कथमाकृतौ चोदितायां द्रव्ये आरंभणालंभनप्रोक्षणविशसनानि
क्रियन्त इति। असंभवात्। आकृतौ आरंभणादीनां संभवो नास्तीति कृत्वा आकृतिसहचरिते द्रव्ये आरंभणादीनि क्रियन्ते। इदमप्येवंजातीयकमेव। असंभ
वाद्भावानयनस्य द्रव्यानयनं भविष्यति। अथवा अव्यतिरेकात् द्रव्याकृत्योः। किं पुनर्द्विगुसंज्ञा प्रत्ययोत्तरपदयोर्भवति। एवं भवितुमर्हति। द्विगुसंज्ञा प्रत्य
योत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिः। द्विगुसंज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिः। का इतरेतराश्रयता॥ ॥

मिसर्थः। स च समाहार इति। तन्निमित्तत्वादिसर्थः। असंभवादिति। द्रव्यानयनमन्तरेणासर्थः। अथवेति। पूर्वमुपायभावेन द्रव्यानयने प्राप्तेऽस्य वद्रव्यस्य क्रियायामनुप्र ग्राम॰
वेशः कथितः। इदानीं तु वास्तवभेदाभावात् बुद्धिपरिकल्पितभेदसद्भावादिति विशेषः। किं पुनरिति। काशकृत्स्नस्य प्रत्ययोत्तरपदयोरिति सूत्रे न द्विचारयति पाणिनीयं तु ॥ ॥ ॥ ३८
पश्चाद्विचारयिष्यति दोषस्य तु प्रतिविधानत्वादाह। एवमिति॥

द्विगुसंज्ञानिमित्ते इति। पंचसु कपालेषु संस्कृत इति समासे सति प्रातिपदिकत्वात् प्रत्ययेन भाव्यं प्रत्यये च परतो द्विगुरिति इतरेतराश्रयः। पंचगावो धनमस्येत्यत्रापि पदद्वय
समस्तसुरूपे कृते बहुव्रीहिः क्रियते इति पक्षाश्रयेणेतरेतराश्रयो द्रावनं धनशब्दस्य समस्तत्वेनोत्तरपदत्वे पूर्वयोः पदयोः समासेन भवितव्यं सति च पदद्वयसमासे बहुव्री
हिणा तस्मिन्सति धनशब्दस्योत्तरपदत्वेन सुप्सुपेति संख्याया विवक्षितत्वात्त्रयाणां पदानां बहुव्रीहिणा न भवितव्यमिति मन्यते यदा त्वनेकग्रहणं सदत्रयस्यापि
बहुव्रीहिर्भवतीति तदा नास्तीतरेतराश्रयदोषः। अथ वायं भावः समास इत्यन्वर्थसंज्ञेयं समसनं समासः संक्षेपः स चासंक्षिप्तानां क्रियते यदि पूर्वं बहुव्रीहिः प्रव

द्विगुसंज्ञानिमित्ते प्रत्ययोत्तरपदे प्रत्ययोत्तरपदनिमित्ता च द्विगुसंज्ञा तदेतदितरेतराश्रयं भवतीत्युत्तरेतराश्रयाणि च कार्याणि न प्रकल्प्यन्ते ए
वं तर्ह्यर्थे इति वक्ष्यामि अर्थे चेत्तद्धितानुत्पत्तिर्बहुव्रीहिवत् अर्थे चेत्तद्धितोत्पत्तिर्न प्राप्नोति मातुरः द्वैमातुरः पांचनापितिः किंकाररां
द्विगुनोक्तत्वाद्बहुव्रीहिवत् न घर्षाचित्रगुः शबलगुरिति बहुव्रीहिणोक्तत्वान्मत्वर्थे समत्वर्थीयो न भवति। एवं तर्हि॥ ॥

त्वेते नदा संक्षिप्तत्वादेकार्थीभावात् किमपरः संक्षेपः क्रियते तस्मात्त्रसुरूषगर्भो बहुव्रीहिः तत्र चेतरेतराश्रयत्वं पाणिनीयलक्षणं निरूपयितुमाह एवं तर्हीति त
द्धितार्थे तद्धिताभिधेये अनुत्पन्न एव तद्धिते द्विगुरिति नास्त्यन्योन्याश्रयत्वमिति भावः। अर्थे चेदिति यदि तद्धितार्थे अभिधेये समासः क्रियते तदा समासेनैव तस्यार्थस्याभि
हितत्वात्प्रकृत्यर्थव्यतिरिक्तप्रत्ययार्थाभावात्पांचनापितिरित्यादौ तद्धितो न प्राप्नोति। ॥श्री॥ ॥ ॥

भा०कै०२
३५
39

समासतद्धितविधाविति। न्यासद्वयेऽपदर्शनात् समासान्तरमाश्रीयते समासे विधीयमाने तद्धिते च द्विकं रत्नेषु पासह समस्येते इति लक्षणाश्रयात्वास्तीतरेतराश्रयदोषः परनि
मित्तानपेक्षणात्तद्धितविषये प्रागेव समासविधानादिति भावः। अन्यत्रेति यथा स्वरे परांगवद्भावो विधीयमानः षत्वणत्वयोर्न भवति एवं स्वरे द्विगुसंज्ञा न स्यात् इगंतेति च लक्ष
णं समाहारद्विगोः सावकाशं यानि तु द्विगोर्लुगनपत्य इत्यादीनि तेषु वचनसामर्थ्यात् द्विगुसंज्ञा प्रवर्त्तते इत्यभिप्रायेणान्यत्र सावकाशे स्वरे दोष उक्तः पंचारत्निरि

समासतद्धितविधाविति वक्ष्यामि समास[illegible]तद्धितविधाविति चेदन्यत्र समाससंज्ञाभावः समासतद्धितविधाविति चेदन्यत्र समाससंज्ञा न प्राप्नोति
क्वान्यत्र स्वरे पंचारत्निः इगंते द्विगौ विशेषः स्वरो न प्राप्नोति। सिद्धं तु प्रत्ययोत्तरपदयोश्चेति वचनात् सिद्धमेतत् कथं प्रत्ययोत्तरपदयोश्चेति वच
नात् प्रत्ययोत्तरपदयोर्द्विगुसंज्ञा भवतीति वक्तव्यं॥ ननु चोक्तं द्विगुसंज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिरिति नैष दोषः इतरे
तराश्रयमात्रमेतच्चोदितं सर्वाणि चेतरेतराश्रयाण्येकत्वेन परिहृतानि सिद्धं तु नित्यशब्दत्वादिति नेदं तुल्यमन्यैरितरेतराश्रयैः नहि संज्ञा
९ नि सा॥ ॥ ॥

तिं पंचारत्नयः प्रमाणमस्येति प्रमाणे ल्लो द्विगोर्नित्यमिति मात्रचो लुक् सिद्धे ल्वि ति पांचनापितिः पंचगवधन इति च स्थितानामेव शब्दानामनुव्याख्यानं क्रियते
ततः प्रत्ययोत्तरपदे स्थिते एवेति नास्ति दोषः नहि संज्ञेति प्रत्ययसंज्ञासंबंधं संज्ञाप्रतिबद्धं चोत्तरपदत्वमाश्रित्यायं समासः क्रियते न च प्रत्ययसमाससंज्ञे लोके स्तः॥ राम०
३९

समाससं

९ ॥श्री॥ ॥ ॥

एवं तर्हीति॥ प्रसयोरुत्तरपदयोरिति विषयसप्तमी न तु परसप्तमी सत्त्वतासंयेयाशानीयं समर्थयितुमाह अथवेति तद्धितश्चासावर्थः प्रयोजनं तस्मिन् कर्तव्ये द्विगुर्भवती
त्यर्थः स्यादिति प्राप्त्यर्थेनेलिङ् अत्रापि पक्षे स्वरे द्विगुसंज्ञां न प्राप्नोतीत्याह द्विगोरिति अभिधेयवचनेऽप्यर्थग्रहणे तद्धितानुत्पत्तिदोषो नास्तीत्यर्थः समाहारसमूहयोरि

एवं तर्हि भाविनी संज्ञा विज्ञास्यते तद्यथा कश्चित्कंचित्तन्तुवायमाह अस्य सूत्रस्य शाटकं वयेति यदि शाटको न वातव्यः अथ वातव्यो न शाटको वातव्यः शाटकश्चेति विप्रतिषिद्धं भवति भाविनी खल्वस्य संज्ञाभिप्रेता स मन्ये वातव्यः यस्मिन्नुते शाटक इत्येतद्भवतीति एवमिहापि तस्मिन् द्विगुर्भवति यस्याभिनिर्वृत्तस्य प्रत्यय उत्तरपदमिति चैते संज्ञे भविष्यतः अथवा पुनरस्त्वर्थ इति ननु चोक्तमर्थे चेत्तद्धितानुत्पत्तिर्द्वेरूप्यं हि वदतीति नैष दोषः नावश्यमर्थशब्दोऽभिधेय एव वर्तते किं तर्हि स्यादर्थेऽपि वर्तते तद्यथा दारार्थं घटामहे धनार्थं भिक्षामहे दाराः नः स्युर्धनं नः स्युरिति एवमिहापि तद्धितार्थे द्विगुर्भवतीति तद्धितः स्यादिति द्विगोर्वा लुग्वचनं ज्ञापकं तद्धितोत्पत्तेः अथवा पदद्वये द्विगोर्लुगनपत्ये इति द्विगोरुत्तरस्य लुकं शास्ति तज्ज्ञापयत्याचार्यः उत्पद्यते द्विगोस्तद्धित इति समाहारसमूहयोरविशेषात्समाहारग्रहणमनर्थकं तद्धितार्थेन कृतत्वात्। समाहारः समूह इत्यविशिष्टावेतावर्थौ समाहारसमूहयोरविशेषात्समाहारग्रहणमनर्थकं किं कारणं तद्धितार्थेन कृतत्वात् तद्धितार्थे द्विगुरित्येवमत्र द्विगुर्भविष्यति यदि तद्धितार्थे द्विगुरित्येवमत्र द्विगुर्भविष्यति तद्धितोत्पत्तिः प्राप्नोति उत्पद्यतां लुग्भविष्यति लुकि कृतानि प्राप्नुवन्ति।

९ कानि पंचपूली दशपूली अपरिमाणबिस्ताचितकंबल्येभ्यो न तद्धितलुकीति॥०॥

ति सरूपपदार्थैकत्वाद्भिन्नार्थत्वादेकशेषाभावः॥ अविशेषादिति एकार्थत्वादित्यर्थः॥ ॥श्री॥ ॥७०॥ ७ं

प्रतिषेधः प्राप्नोतीति॥ यथा पंचभिरश्वैः क्रीता पंचाश्वेति अपरिमाणेति नतद्धितलुक्यतद्धितलुकीत्यपास्य सूत्रद्वयेपि समाहारग्रहणं क्रियते समाहार एव तद्धित
लुकि ङीप्समासान्तो भवतो नान्यत्रेति नियमविधानात् नास्तिदोषः अविशेषेणेति गोरित्येकं सूत्रं क्रियते गोशब्दान्तस्य तत्पुरुषस्य टच्भवति ब्राह्मणगव इत्यतो
द्विगोः समाहार इति द्वितीयं सूत्रं नियमार्थमित्यर्थः अभिधानार्थं लिंगेति समासे न समाहारस्याभिधानं यथा स्यात् तद्धिते न माभूदित्यर्थः॥ समाहारेणेति समा

प्रतिषेधः प्राप्नोति पंचगवं दशगवं गोरतद्धितलुकीति टच् न प्राप्नोति नैष दोषः अविशेषेण द्विगोर्ङीप्भवतीत्युक्त्वा अपरिमाणबिस्ताचि
तकंबल्येभ्यः समाहार इति वक्ष्यामि तन्नियमार्थं भविष्यति समाहार एव नान्यत्रेति गोरकारो द्विगोः समाहारे अविशेषेण गोष्टज्भ
वतीत्युक्त्वा द्विगोः समाहार इति वक्ष्यामि तन्नियमार्थं भविष्यति समाहार एव नान्यत्रेति अभिधानार्थं तु अभिधानार्थं तु समाहारग्र
हणं क्रियते समाहारेणाभिधानं यथा स्यात् तद्धितार्थे न माभूदिति किंच स्यात् तद्धितोत्पत्तिः संप्रसज्येत उत्पन्नस्य तस्य लुग्भविष्यति लुकृ
तानि प्राप्नुवन्ति सर्वाणि परिहृतानि सर्वाणि परिहृतानि पंचकुमारि दशकुमारि लुक् तद्धितलुकीति ङीपो लुक् प्रसज्येत द्वंद्वतत्
पुरुषयोरुत्तरपदे नित्यसमासवचनं द्वंद्वतत्पुरुषयोरुत्तरपदे नित्यसमासो वक्तव्यः॥ ॥ ॥

हारेभिधेये द्विगुरित्य भिधानं यथा स्यात् एवं चाभिधाने समासेनोक्तत्वात्तद्धितो नोत्पद्यते तद्धितार्थे नेति तद्धितार्थे द्विगुरित्यभिधानं माभूदित्यर्थः॥ एवमभिधा एम०
नेहि तद्धितः स्यात् अर्थे शब्दस्य स्यादर्थत्वाज्ज्ञापकाद्वा उत्तरपदप्रसंगेन विधानांतरमाह॥ द्वंद्वेति॥ ॥श्री॥ ॥ ४०

वाग्दृषद्प्रियः इति॥ वाक् च दृषच्च प्रिये अस्य पञ्चगावः प्रिया अस्येति त्रिपदे बहुव्रीहौ कृते उत्तरपदे परतो महाविभाषाधिकाराद्विकल्पेन द्वन्द्वतत्पुरुषौ प्राप्तौ नित्यौ
तु वक्तव्यौ अन्यथा समासाभावपक्षे समासान्तो न स्यात् जातिरप्राणिनामिति चात्र समाहारद्वन्द्वः यदि त्वितरेतरयोगे एव द्वन्द्वः स्यात् तदा कार्ये नैव भेदः स्यात् समुदा
यवृत्त्याविति बहुव्रीहाविसर्थः वृत्तिपक्ष इति एकार्थीभाव इत्यर्थः। न च समुदायस्यैकार्थीभावे तदभावोऽवयवयोर्युक्तः विरोधादित्यर्थः यदाऽ इति रि

पंचगवप्रियः १ ... नवक्तव्यं २

वाग्दृषद्प्रियः छत्रोपानहप्रियः दशगवप्रियः किं प्रयोजनं समुदायवृत्तावयवानां मा कदाचिद् वृत्तिर्भूदिति तत्र हि वक्तव्यं इह द्वौ पक्षौ
वृत्तिपक्षश्चावृत्तिपक्षश्च यदा वृत्तिपक्षः तदा सर्वेषामेव वृत्तिः यदाऽवृत्तिपक्षः तदा सर्वेषामवृत्तिः उत्तरपदे न परिमाणिनां द्विगोः समासवच
ने उत्तरपदे न परिमाणिनां द्विगोः समासो वक्तव्यः द्वौ मासौ जातस्य यस्य सः द्विमासजातः त्रिमासजातः किं पुनः कारणं न सिध्यति स्तु प्रत्युपे
ति वर्त्तते एवं तर्हि इदं स्यात् द्वौ मासौ द्विमासं द्विमासं जातस्येति नैवं शक्यं स्वरे हि दोषः स्यात् द्विमासजात इति प्राप्नोति द्विमासजात इति चेष्यते
द्व्यह्नजातश्च न सिध्यति द्व्यहजात इति प्राप्नोति न चैवं भवितव्यं भवितव्यं च यदा समाहारे द्विगुः द्व्यह्नजातस्तु न सिध्यति किमुच्यते परिमाणिनेति न
९ पुनरप्यत्रापि पञ्चगवप्रियः दशगवप्रियः॥ ॥

ति द्वन्द्वतत्पुरुषभाविनोपदाय पेक्षालक्षणं सामर्थ्यं तदा बहुव्रीहिर्न भवतीत्यर्थः द्विगोरि तिद्विगोर्निष्पन्नस्य इत्यर्थः द्वौ मासौ जातस्येति कालाः परिमाणिनेति त्रिप
दः समास इष्यते स च स्तु प्रत्युपेति संख्याया विवक्षितत्वान्न प्राप्नोति तस्मिंश्च कृते उत्तरपदे परतो द्विमासशब्दयोः समासः क्रियते कालान्ते द्विगौ पूर्वपदमकृतिस्वरो यथा स्या
त् द्व्यह्नजात इत्यत्र च समासान्तः द्वौ मासौ द्विमासमिति समाहारद्विगुः यात्रादिभ्यः प्रतिषेध इति स्त्रीत्वाभावः स्वरे दोष इति समासान्तो दात्तत्वेन जातशब्द उदात्तः स्यादित्यर्थः॥

भा॰कै॰२ अन्यत्रेति॥ पंचगवधन इत्यादौ बहुव्रीहौ कृते पूर्वयोः समासांतादिकार्ये सिद्धये एकार्थीभावे प्रागपि सत्येव पुनः समासः क्रियते एतेन पूर्वोक्त इतरेतराश्रयदोषोऽपि
४१ परिहृतः सर्वत्रेति यद्यर्थे शब्दः स्याद्यर्थे यद्विचाभिधेयवनो ज्ञापकाच्च तद्धितो सन्निः तदा मतुप स्तद्धितत्वात्तदर्थे यमेव समासः स्यात् न तु बहुव्रीहिः अन्यो पत्ता
५१ त्तरस्तु चित्रगवादिरवकाशः तस्मान्मत्वर्थे प्रतिषेधो वक्तव्यः पंचखट्वेति पंचखट्वा पस्याविद्यत इति यदि द्विगुः स्यात्तदा टाबंतः स्त्रियां भाष्यत इति पक्षे द्विगो

अन्यत्र समुदाय बहुव्रीहित्वादुत्तरपदप्रसिद्धिः अन्यत्र समुदायो बहुव्रीहिसंज्ञः अन्यत्र समुदायबहुव्रीहित्वादुत्तरपदं प्रसिद्धं
उत्तरपदप्रसिद्धे रुत्तरपद इति द्विगुर्भविष्यति सर्वेत्र मत्वर्थे प्रतिषेधः सर्वे खु पक्षे पु द्विगुसंज्ञायाः मत्वर्थे प्रतिषेधो वक्तव्यः किं
प्रयोजनं पंचखट्वा दशखट्वा द्विगो रिति ङीकारो माभूत् पंचगुर्दशगुः गोरतद्धितलुकीति टच् माभूदिति तद्धितार्थोत्तरपद॥ ॥

रिति ङीप् प्राप्नोति पक्षे च नपुंसकत्वं पंचगुरिति तत्पुरुषे समतिटच् प्राप्नोति न च स्मिन्समासे सति मतुपं श्रवणं प्रसज्येत न च द्विगोर्लुगिति लुगस्ति प्राग्दी
व्यत इत्यधिकारात् एवं तर्हि दोषोपलक्षणं भाष्ये मतुपो लुग्वक्तव्य इति दोषः तल्लुकि वड्डी समासांतो प्रतिषेधादेव न भविष्यतः पंच ऽणाढकाय स्याः सा पंचाढ एम॰
केसत्र तु ङी प्राप्नोति॥ ॥श्री॥ ॥श्री॥०॥ ४१

संख्याग इह कश्चिदवयवो पेक्ष्यते यत्रैतदुच्यते अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति क्वचित्तु समुदायो यथा नोतःपाद मिति पाठे संहिताधिकारविहितस्य सर्वस्य कार्यस्य
निषेधः क्रियते ततः संदेहा स्याद्गच्छेत्ति किमनंतर इति पूर्वमात्र इति अत्र पक्षे समानाधिकरणसमासस्त्रि स्त्रीविहितस्तत्पुरुष एव गृह्यते अन्यथा द्विमुनिव्याकरणस्ये
त्यव्ययीभावस्यापि द्विगुसंज्ञा स्यात् ततश्चैकं गते द्विगुरिति स्वरः प्रसज्येत एकशाटीति एकः शाट इति पूर्वकाले ति समासः शाट शब्दस्याकारांतोस्ति तस्यैव कृनिल्लु
ते शाटक इसेवं रूपं संभवति एकभिक्षेति भिक्षशब्दो घञंतोस्ति तथा च भिक्षरं न प्रकाशयेदिति प्रयोगः तत्रैको भिक्ष इति पूर्ववत्समासे कृते समासार्थस्य स्त्रीत्वोप

संख्यापूर्वो द्विगुः। किमनंतरे योगे यः संख्यापूर्वः स द्विगुसंज्ञः आहोस्वित्पूर्वमात्रे किं चातः यद्यनंतरयोगे एकशाटीति द्विगोरितीकारो न प्राप्नोति अथ
पूर्वमात्रे एकभिक्षा अत्रापि प्राप्नोति अस्त्वनंतरे कथमेकशाटी ईकारांतेन समासो भविष्यति एका शाटी एकशाटी इह तर्ह्येकोऽस्यपी द्विगो
रितीकारो न प्राप्नोति॥ अस्तु तर्हि पूर्वमात्रे कथमेकभिक्षा टाबंतेन सह समासो भविष्यति एका भिक्षा एकभिक्षा इदं तर्हि॥ ॥

जनात् ङीप्प्रसज्येत यथा जनानां पदं जनपद इति समासे कृते समासार्थस्य पुंस्त्वमेवमिहापि स्त्रीत्वमिति मन्यते ईकारांतेनेति शाटशब्दाज्जातिलक्षणो
ङीषि कृत इति भावः। एकापूपीति एकश्चासावपूपश्चेति पूर्ववत्समासः अत्र द्विगुत्वे सत्यकारांतोत्तरपदो द्विगुः स्त्रियां भाष्यत इति द्विगोरितीकारः सिध्यति नान्यथा केवलस्या
पूपशब्दः पुंसि वर्तत इति जातिलक्षणो ङीष् नास्ति। टाबंतेनेति भिक्षाशब्देन समासे कृते अनत इत्यधिकारात् ङीबभाव इत्यर्थः भिक्षाशब्दस्य गुरोश्च हल इति स्त्रि
यां सुसाध्यते वा टाबंत इत्यनेन पक्षेन पुंस्कत्वं न भवति यद्वा स्थितविभाषाविज्ञानात् यत्रापो ह्रस्वत्वं क्रियते पंचखट्वं पंचखट्वी स्यादेतत्रैव वा स्त्रीत्वं विधीयते
१ भिक्षाशब्देन त्वभिधानात्समासो न भवतीति मन्यते अन्यथा तत्रैकभिक्षीति स्यात्॥ ॥

सप्तर्षय इति । दिक्संख्ये संज्ञायामिति समासः । कः पुनरिति । अनेकविषयत्वात्समाहारस्य एकस्य तदसंभवात् प्रश्नः । यन्नदिति एकमप्यपूर्वं कश्चित्प्रयोगे दर्दने
कमिति मन्यते । दाने श्रद्धाति शय्या हाम हत्वा ह्यत्र अनेकस्मिन्नुः संभ्रमः स एकस्मिन्नपि कर्तव्यो भवति । अथ वेति पूर्वत्रापरितोषेणोत उच्यते भाषायामपि
सप्तर्षि शब्दोन्तोदात्त इष्यते प्रकृतिस्वरः पूर्वपदस्य स्यात् अत एवैकं शाटी सादावपि द्विगुस्वराभावः ॥ ॥ कुत्सितानि० ॥ किं व्याकरणमिति अयं भावः या दृष्टा

रकमाणीति एकावाचेयन्ये चतिविधेनेन सर्वकालेके निसमासे शंतेन यपदे द्विगोस्वरः ... एनेनयगन्ध शब्देन समासे द्विगोरिति ... तस्य लिंगाविशिष्ट परिभाषया ... दिगंतसप्त

सप्तर्षयः । इगन्ते द्विगौ विशेषः स्वरः प्राप्नोति । अस्तु तर्थे नेतरे कथमेकाप्यपी समाहार इत्येव सिद्धं कः पुनरत्र समाहारः यन्न दानं संभ्रमो वा इह
तर्हि पंचहोतारो दशहोतारः इगन्ते द्विगौ विशेषः स्वरो न प्राप्नोति अस्तु तर्हि सर्वमात्रे कथं सप्तर्षयः अन्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दसी
त्येवमेतत्सिद्धं अथवा पुनरस्तु अनन्तरे कथं पंचहोतारः दशहोतारः आद्युदात्तप्रकरणे दिवोदासादीनां छन्दसीत्येव सिद्धं संख्या
कुत्सितानि कुत्सनैः किमुदाहरणं वैयाकरणखसूचिः किं व्याकरणं कुत्सितमाहोस्विद्वैयाकरणः वैयाकरणः कुत्सितः तस्मिन्कु
१ त्सिते तत्स्थमपि कुत्सितं भवति । कुत्सितानि ॥ ॥ ॥

त्रिनिमित्तकुत्सायामयं समास इष्यते वैयाकरणश्चौर इत्यादौ मा भूदिति तत्र व्याकरणस्य वेदांगत्वान्नास्ति कुत्सा नापि तदधीयानस्य वैयाकरण इतियः पृष्टो
निष्प्रतिभत्वात्तं सूचयति अहो गगनं निर्मलमिति भ्रमं विस्मारयितुं स निष्फलत्वाद् व्याकरणाध्ययनत्वात् कुत्स्यते तत्स्थमपीति । पापाश्रयदोषादाश्रितस्या राम०
१ पि निःफलत्वात् ॥ ॥ ॥ ४२

उपमानानि कानीति सूत्रानुरोधे नबहुवचनं कृतं किं पदेवोपमानमिति अत्र तूपमानमात्रस्य जिज्ञासितत्वाद्बहु त्वविवक्षायाः प्रयोजनाभावादेकवचन
निर्देशः ननु कमेकरणयोर्भेदादेकत्वविषये संदेहाभावात् प्रश्नानुपपत्तिः अयं भावः शास्त्री श्यामा देवदत्तेति श्यामत्वस्य वाश्रयस्यापि पदभिन्नं विवक्षितं तत
दां द्वारेण शास्त्री देवदत्तयोरुपमानोपमेयत्वात्तस्य च तयोर्विशिष्टत्वात् तद्द्वारकस्तयोर्भेद इति पदेवोपमानं तद्देवोपमेयमिस [illegible] स्युपगतं भवति न
चैतद्युक्तं शास्त्री शब्दप्रयोगवैयर्थ्यप्रसंगात् अथाधारभेदात् श्यामत्वस्य भेदस्तदा शास्त्रीदेवदत्तास्थयोः श्यामगुणयोर्भेदान्नास्तितद्द्वारक उपमानोपमे

उपमानानि सामान्यवचनैः उपमानानीत्युच्यते कानि पुनरुपमानानि किं पदेवोपमानं तद्देवोपमेयं आहोस्विदन्यदुपमानमन्यदुप
मेयं किं चातः यदि पदेवोपमानं तद्देवोपमेयं क इहोपमार्थः गौरिव गौरिति अथान्यद्देवोपमानमन्यदुपमेयं क इहोपमार्थो गौरि
वाश्व इति एवं तर्हि यत्र किंचित्सामान्यं कश्चिच्च विशेषः तत्रोपमानोपमेये भवतः किं वक्तव्यमेतत् नहि कथमनुच्यमानं गंस्यते ॥०॥

प्रभावः ॥ किं चात इति स्ववाचाभिप्रायमभिधापयितुं प्रश्नः ॥ गौरिवेति व्यक्तिगतानां भेदानां शब्देनासंस्पर्शात् सामान्यमुखेन द्रव्यावसायादिति भावः गो
रिवाश्व इति असंतभेदविवक्षायामिदमुच्यते यदालम्बस्य जाड्यादिधर्मप्रतिपादनाये दमुच्यते तदाभवसेवोपमानोपमेयभावः किंचित्सामान्यमिति
श्यामत्वस्याधारभेदाद्भेदोप्याश्रीयते गुणजाते रेकत्वाद्भेदेऽपीसर्थः किं वक्तव्यमिति यथोपवर्णितं वचनेन विना कथं प्रतिपत्तुं शक्यमिति भावः ॥ इत
रेतरनिर्वचनेन यथोक्तं प्रतिपादयितुमाह नहीति ॥ ॥श्री॥ ॥७॥ ॥

मानं हीति यथा प्रस्थादिना नद्धिसाकल्येन मेयं परिच्छिद्यते तत्समीप इति मानस्य समीप इत्यर्थः परिच्छेदवशाच्च सामीप्यं परिकल्प्यते न त्वत्र मुख्यं सामीप्यमस्ति उपमानानीति निपातनात्तत्पुरुषः अव्ययीभावे त्वेतद्रूपं न स्यात् कामं तर्हीति नतत्स्वव्यवस्थानं प्राप्नोतीति भावः बाढमिति अपेक्षानिमित्तकः पितापुत्रादिव्यवहारवदुपमानोपमेयभाव इति न कश्चिद्दोष इत्यर्थः किं पुनरिति अयं भावः यदा शस्त्रीशब्दः शस्त्र्यामेव वर्त्तते श्यामाशब्दोपि तस्यामेव तदा समासेनोपमेयायाः देवदत्ताया अभिधानं न प्राप्नोति अथ श्यामाशब्दो देवदत्तायां वर्त्तते तदा वैयधिकरण्यात् समासाप्रसंगः वचनसामर्थ्यात्समासे मृगी

मानं हि नामानिर्ज्ञातज्ञानार्थमुपादीयते अनिर्ज्ञातमर्थं ज्ञास्यामीति तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानं गौरिव गवय इति गौर्निर्ज्ञातः गवयोऽनिर्ज्ञातः कामं तर्ह्यनेनैव हेतुना यस्य गवयो निर्ज्ञातः स्यात् गौरनिर्ज्ञातः तेन कर्त्तव्यं स्यात् गवय इव गौरिति बाढं कर्त्तव्यं किं पुनरिहोदाहरणं शस्त्रीश्यामा क पुनरयं श्यामाशब्दो वर्त्तते शस्त्र्यामित्याह केन तर्हीदानीं देवदत्ताभिधीयते समासेन॥ ॥

वचपला मृगचपलेति पुंवद्भावो न प्राप्नोति शस्त्रीश्यामेति साधारणधर्मविशिष्टोपमेयार्थवृत्तिः पाठः सामान्यवचनशब्देन वचनग्रहणादुच्यते यथा गुणवचनशब्देन गुणोपसर्जनद्रव्यवाची कं पुनरिति उभयथा दोषदर्शनात् प्रश्नः केनेति पूर्वपदोत्तरपदयोरुपमानत्वे तद्व्यतिरिक्तशब्दान्तराभावात् प्रश्नः समासेनेति स्वाभाविकत्वादर्थाभिधानस्यान्यपदार्थग्रहणमन्तरेणाप्यश्वकर्णादिवज्जातिविशेषस्य शस्त्रीश्यामादिकः समास उपमेयस्य वाचक इत्यर्थः॥ ॥श्री॥ ॥

यद्येवमिति। गुणवचनस्याश्रयलिंगानुविधायित्वात्स्त्रीलिंगेन श्यामाशब्देन समासे कृते रूपस्य प्रसिद्धिः। उपसर्जनस्येति। अप्राधान्यादुपसर्जनत्वं
मन्यते समासवाच्यत्वादुपमेयं हि प्रधानं प्रदर्शितं हीति। ह्रस्वविधौ कृत्रिममेवोपसर्जनं गृह्यते न तु लौकिकमपि कृत्रिमाकृत्रिमयोः कृत्रिमे कार्य
संप्रत्यय इति न्यायाल्लौकिकग्रहणे दोषप्रसंगाच्च। तित्तिरिकल्माषीकुंभकपाललोहिनी सत्त्रोपमानस्य पुंवद्भावस्त्रीलिंगत्वात्समासात्स्त्रीकृतस्त्री
प्रत्ययो नास्ति समासे कृते। अनुपसर्जनाधिकारात् ङीप् ङीषोः प्रतिषेधः प्राप्नोति सत्यपि वा ङीषि सति शिष्टत्वादुपमानस्वरं बाधित्वा ङीष्स्वरः

यद्येवं शस्त्रीश्यामो देवदत्त इति न सिध्यति। उपसर्जनस्येति ह्रस्वत्वं भविष्यति। यदि तर्ह्युपसर्जनाप्येवंजातीयकानिमं वृत्तिं तित्तिरिकल्मा
षीकुंभकपाललोहिनी अत्र तूपसर्जनलक्षण ईकारो न प्राप्नोति। एवं तर्हि शस्त्रीमेव शस्त्रीशब्दो वर्तते देवदत्तायां श्यामाशब्दः। एव
मपि गुणो न निर्दिष्टो भवति बहवः शस्त्रीगुणाः तीक्ष्णा सूक्ष्मा स्पृष्टेत्युपमिति अनिर्दिश्यमानस्यापि गुणस्य भवति लोके संप्रत्ययः तद्य
था चंद्रमुखी देवदत्तेति बहवश्चंद्रगुणाः पाचासौ प्रियदर्शनता गम्यते एवमपि समानाधिकरणेनेति वर्तते व्यधिकरणत्वात्समासो
न प्राप्नोति॥०॥

प्राप्नोति एवं तर्हीति ततः पूर्वोक्तदोषाभावः। शस्त्रीश्यामो देवदत्त इति श्यामाशब्दस्य देवदत्तवृत्तित्वात् तित्तिरिकल्माषीति स्त्रीप्रत्ययान्तेनोपमेयवृत्तिना समासवि
धानात्। एवमपीति। श्यामाशब्दस्य देवदत्ताभिधाने चरितार्थत्वाच्छस्त्रीगतो गुणो न निर्दिष्टः स्यादिति निपतद्गुणनिमित्तसादृश्यप्रतीतिप्रसंगः इत्यर्थः। चं
द्रमुखीति अयं भावः। प्रज्ञानिर्दिष्टोपि गुणो वृद्धव्यवहारवशादुपमानिमित्तत्वेन प्रतीयते तत्रोपमेये श्रुतः संनिधानादुपमानं कथं न स्पृक्ष्यति १२

भा०कै०२ ४४ ५५

किं हि वचनादिति। दुर्बलं प्रकरणं श्रुत्या बाध्यत इत्यर्थः। पुंवद्भाव इति। पुंवत्कर्म्मधारयजातीयदेशीयेष्वित्यनेन। न न स्त्रीपूर्वपदस्य विवक्षितत्वान्मृगक्षीरादिवन्मृगचपलेति भविष्यति यद्यप्यत्र स्त्रिया पश्चात् पत्न्या अन्यसुंसस्तथापि पुंवद्भावेन स्त्रीप्रत्ययनिवृत्तेर्नास्ति स्त्रीत्वलक्षणविशेषावगतिः प्रकरणादिवशात्तु स्त्रीत्वप्रतिपत्तौ जातिमात्रोपादानेपि तत्प्रतीतिर्भविष्यति सा च बहिरंगत्वात् स्त्रीप्रत्ययोत्पत्तिनिमित्तं न भवति। एवं तर्हि प्रतिपत्तिगौरवप्रसंगादेतदत्र भाष्यकारेणाश्रितं गत्यन्तरसंभवात्। च्च तद्दर्शयति एवं तर्हीति। यथा स्त्रीसादृश्याद्देवदत्ता शस्त्रीशब्देनोच्यते सादृश्यनिमित्ताद् भेदो

किं हि वचनान्न भवति। यद्यपि तावद्वचनात्समासः स्यात्। इह खलु मृगी च चपला मृगचपला समानाधिकरणलक्षणः पुंवद्भावो न प्राप्नोति। एवं तर्हि तस्यामेवोभयं वर्त्तते। एतच्चात्र युक्तं यत्तस्यामेवोभयं वर्त्तेत इति। इतरथा हि बहुपेक्ष्यं स्यात्। यदि तावदेवं विग्रहः क्रियते शस्त्रीव श्यामा देवदत्तेति शस्त्र्याः श्यामेसे तदपेक्ष्यं स्यात्। अथाप्येवं विग्रहः क्रियते यथा शस्त्री श्यामा तद्वदियं देवदत्तेति एवमपि देवदत्तायां श्यामेसे तदपेक्ष्यं स्यात्॥ ॥ ॥

पचारात् यथा गौर्वाहीक इति। पूर्वावस्थाश्रयेण च शस्त्र्या उपमानवाचित्वमवसेयं यदि तावदिति। पदार्थ्यामाशङ्क्य देवदत्तायां वर्त्तते शस्त्रीशब्दः शस्त्र्यामेव तदा शस्त्रीगतं श्यामत्वमनेकगुणसंभवे गुणान्तरव्यवच्छेदायोपमाननिमित्तं प्रतिपादयितुं श्यामेसपेक्षणीयं। अथापीति यदा श्यामामेव शस्त्री[illegible]ब्दो वर्त्तते श्यामाशब्दोपि तस्यामेव तदा देवदत्तागतश्यामत्वप्रतिपादनाय श्यामेसपेक्षणीयं न च शब्दस्यावृत्तिरस्ति येनोभयगतं श्यामत्वं प्रतिपादयेत्॥ ॥ एम० ४४

अत्रापि दोषमाह । एवमपीति यदा शस्त्री सादृश्याद्देवदत्तायां शस्त्रीत्वमारोप्यते तदा कं गुणमाश्रित्य तयोः सादृश्यमाश्रीयतामित्यर्थः । उत्तरं तु पूर्वमेव व्याख्यातं यद्यपि पू
र्वयोरपि पक्षयोरेष परिहारोऽस्ति तथापि द्वयोः स्त्रीप्रसङ्ग यस्तत्स्वरूपं वक्तुं वासिध्या पक्षद्वयं परिहृत्यायं पक्ष आश्रितः । उपमानसमास इति शस्त्रीशब्दसंनिधौ श्यामा
शब्दः प्रयुज्यमानः शस्त्रीगतं श्यामत्वं गुणं प्रतिपादयति न च शस्त्र्या गुण आश्रीयेतेति वक्तव्यं इति सामान्यवचनत्वाभावादसमर्थः । न वेति शस्त्रीशब्दोपादा
श्यामादेवदत्तेसत्रशस्त्री २

एवमपि गुणेन निर्दिष्टे भवति बहुव्रीहेः शस्त्र्यां गुणः तीक्ष्णत्वस्यापृथगिति अनिर्दिष्टे उपमानस्यापि गुणस्य भवति लोके संप्रत्ययः तद्यथा चन्द्रमु
खी देवदत्तेति बहुव्रीहौ द्रष्टुं गुणाः प्राचास्तौ प्रियदर्शनता सा गम्यते उपमानसमासे गुणवचनस्य विशेषभावात् सामान्यवचना प्रसिद्धिः उपमा
नसमासे गुणवचनस्य विशेषभावात् सामान्यवचनत्वप्रसिद्धिः स्यात् शस्त्रीश्यामेति श्यामाशब्दोऽयं शस्त्रीशब्देनाभिसंबध्यमानो विशेषवचनः
संपद्यते तत्र सामान्यवचनैरिति समासो न प्राप्नोति न वा श्यामत्वस्योभयत्र भावात् तद्वाचकत्वाच्च शब्दस्य सामान्यवचनत्वस्य प्रसिद्धिः न वा एष
दोषः किं कारणं श्यामत्वस्योभयत्र भावात् उभयत्रैवात्र श्यामत्वमस्ति शस्त्र्यां देवदत्तायां च तद्वाचकत्वाच्च शब्दस्य तद्वाचकश्चात्र श्यामाशब्दः
प्रयुज्यते किं वाचकः उभयवाचकः श्यामत्वस्योभयत्र भावात् तद्वाचकत्वाच्च शब्दस्य सामान्यवचनत्वं प्रसिद्धं सामान्यवचनत्वे प्रसिद्धे सामान्यव
चनैरिति समासो भविष्यति नावश्यं स एव सामान्यवचनः यो बहूनां सामान्यमाह द्वयोरपि यः सामान्यमाह सोऽपि सामान्यवचन एव अथ सामान्यव

न सामर्थ्यात् श्यामगुणसंनिधानाच्च यादृशं शस्त्रीश्यामत्वं अनवविलक्षणं तादृशं देवदत्ताया इति संप्रत्ययात् उभयसाधारणं श्यामत्वं भवति सामान्यमिति न
कश्चिद्दोषः तत्र सादृश्यं सामान्यमुच्यते गुणो वा द्विष्ठ इति भिन्नोऽप्यभिन्नत्वेन विवक्षितः सामान्यं ॥ ॥श्री॥ ॥छ॥ ॥

भा०कै०२ ४५ 75

सर्वश्चेति॥ शब्दांतरसंबंधे सर्वः शब्दो विशेषवाचित्वात् सामान्यवचनो न भवतीति सामान्यवचनग्रहणोपादानसामर्थ्याच्छब्दांतराभिसंबंधात्समासरूपात् प्राग्यः शब्दः सामान्यवचनः स गृह्यते केवलश्च श्यामाशब्दः श्यामगुणविशिष्टं स्त्रीलिंगयुक्तं द्रव्यमात्रमाहेति सांप्रतिकाभावे भूतपूर्वगत्याश्रयणात्सिद्धमिष्टं॥ ॥
उपमितं पुरुषोयं व्याघ्र इव शूर इति उपमानप्रतिपादनपरमेतत् चेयधिकरणादेवात्र समासस्याप्रसंगः पदांतु व्याघ्रशब्दः शौर्यादेः उरुपार्थे एव वर्तते

सर्वेश्चशब्दोन्येन शब्देनाभिसंबध्यमानो विशेषवचनः संपद्यते तत एवं विज्ञास्यामः प्रागभिसंबंधाद्यः सामान्यवचन इति उपमानानि उपमितं व्याघ्रादिभिः सामान्याप्रयोगे सामान्याप्रयोग इति किमर्थमिह मा भूत् पुरुषोयं व्याघ्र इव शूरः पुरुषोयं व्याघ्र इव बलवान् सामान्याप्रयोग इति शक्यमवक्तुं इह कस्मान्न भवति पुरुषोयं व्याघ्र इव शूरः पुरुषोयं व्याघ्र इव बलवान् असामर्थ्यात् कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति एवं तर्हि सिद्धे सति यत्सामान्याप्रयोग इति प्रतिषेधं शास्ति तत् ज्ञापयत्याचार्यो भवति वै प्रधानस्य सापेक्षस्यापि समास इति किमेतस्य ज्ञापने प्रयोजनं राजपुरुषोभिरूपः राजपुरुषो दर्शनीयः इत्यत्र वृत्तिः सिद्धा भवति॥ ॥ ॥

तदा सामानाधिकरण्ये सति समासे न भाव्यं तत्र पदाप्रकरणादिवशान्नियतसाधारणगुणप्रतिपत्तिस्तदा सामान्याप्रयोगे सति समासः यदा तु गुणांतरव्यवच्छेदाय विशिष्टसाधारणगुणवचनशब्दप्रयोगः पुरुषो व्याघ्र इव शूर इति तदा समासाभावाय सामान्याप्रयोगग्रहणं भवति वै प्रधानस्येति एम० ४५
न्यायसिद्ध एवार्थे लिंगदर्शनमिदं प्राधान्यादेवानेकोपकारकोपकार्यत्वाविरोधात्समासस्य सिद्धत्वात्॥ ॥ ॥

विशेषणं। विशेषणविशेष्ययोरिति उभयापेक्षेयं षष्ठी नित्यसापेक्षत्वाच्चोभयशब्दस्य शास्त्रान्तरेण समासो भवतीति विशेषणविशेष्याभिमतयोर्द्वयोर्द्वैरूप्यसद्भा
वात् समासिद्धावप्यनियतः पूर्वनिपातः प्राप्नोतीति विशेषः कृष्णशब्द इति कृष्णशब्द उच्चरितो भ्रमरकोकिलादि द्रव्यमात्रं प्रतिपादयतीति तिलशब्देन त्वभिसंब
ध्यमानस्तिले एव नियम्यते इति कृष्णशब्दो विशेष्यत्ति तिलशब्दो विशेषणं एवं तिलशब्दस्यापि विशेष्यत्वं कृष्णशब्दस्य च विशेषणत्वमवसेयं नवेति इत्यन्य

विशेषणं विशेषणविशेष्ययोरुभयविशेषणत्वादुभयविशेष्यत्वादुपसर्जनाप्रसिद्धिः विशेषणविशेष्ययोरुभयविशेषणत्वादु
भयोश्च विशेष्यत्वादुपसर्जनस्याप्रसिद्धिः कृष्णतिला इति। कृष्णशब्दोयं तिलशब्देनाभिसंबध्यमानो विशेषणवचनः संपद्येतेत
था तिलशब्दः कृष्णशब्देनाभिसंबध्यमानो विशेषणवचनः संपद्येतेत उभयं विशेषणं भवत्युभयं च विशेष्यं विशेषणविशेष्ययो
रुभयविशेषणत्वादुभयोश्च विशेष्यत्वादुपसर्जनस्याप्रसिद्धिः नवान्यतरस्य प्रधानभावात्तद्विशेषकत्वाच्चापरस्योपसर्जनप्रसि
द्धिः नवा एष दोषः किं कारणं अन्यतरस्य प्रधानभावात् अन्यतरदत्र प्रधानं तद्विशेषकत्वेन तद्यदा तिलाः प्रधानं कृष्णो विशेषणं कामं त
र्हि नैव हेतुनायस्य कृष्णाः प्राधान्येन विवक्षिता भवंतीति तिला विशेषणत्वेन तेन कर्त्तव्यं तिलकृष्णा इति न कर्त्तव्यं॥× कृतत्वाच्चापरस्य तद्वि

तरस्य द्रव्यस्यैवेत्यर्थः अपरस्येति गुणस्यैवेत्यर्थः परास्य तिला इति तेहि द्रव्यरूपत्वात्तत्क्रियासिद्धये साक्षादुपयुज्यमानाः प्राधान्येन विवक्ष्यंते कृष्णस्तु गुणत्वा
त् द्रव्यव्यवधानेन क्रियायामुपयोगाद्विशेषणं तिलानां संपद्यते इतरेतरप्रयोक्तं न्यायमबुध्वा विवक्षामात्रनिबंधनत्वमनेन विशेषणविशेष्यभावस्य प्रतिपादितं
विवक्षायाश्च सा तं प्रादनियमात् प्रयोगानियम इति मन्यमानः पृच्छति कामं तर्हीति॥ ॥ ॥ ॥

चापरं अन्यतरस्य प्रधानभा
वात्तद्विशेषकत्वाच्चापरस्योपसर्ज
नसंज्ञा न विध्यति यदास्य तिलाः प्रा
धान्येन विवक्षिता भवंति तदा कृष्णा विशे
५४२

भा०कै०२
४६
46

सा०

नह्ययमिति॥ नहि गुणशब्दस्य व्यवाचिनो द्वंद्व उपपद्यते गुणवचनस्य द्रव्यापेक्षत्वात्सामर्थ्याद्भेदेन सह विवक्षाया असंभवात् यदि तु द्वंद्वः स्यात् एव तिलकृष्णा इति
प्रयोगः नखल्वपीति गुणेन सह षष्ठी समासनिषेधादिति भावः प्रधानशब्दाविति प्रथमांतावित्यर्थः अनेन षष्ठीसमासविपरीतत्वं कथितं एकस्मिन्नर्थे इ
त्यनेन तु द्वंद्वविपरीतत्वं कथितं द्वंद्वे हि सर्वपदार्थानां प्राधान्यात् अस्ति द्वंद्वे सर्वपदार्थानामेकस्मिन्नर्थेऽवस्थानं एतच्चावयवार्थापेक्षयोक्तं समुदायार्थापेक्षायां तु
समुदायलक्षण एकस्मिन्नर्थे सर्वेषां पदार्थानां वृत्तिरस्त्येव प्रधानशब्दयोरिति परस्परविशेषणत्वेनानुपकारकयोः स्वतंत्रयोरित्यर्थः यत्रोभावि
ति द्वयोरपि गुणत्वात् द्रव्यस्य बाधानेन क्रियासाधनत्वाविशेषादिति भावः यत्त्वन्यतरद्रव्यमिति तत्र नास्ति संदेह इति वाक्यशेषः य द्रव्यमिति

नह्ययं द्वंद्वः तिलाश्च कृष्णाश्चेति नखल्वपि षष्ठीसमासः तिलानां कृष्णा इति किं तर्हि द्वाविमौ प्रधानशब्दौ एकस्मिन्नर्थे युगपद्वर्त्तेते न च द्वयोः
प्रधानशब्दयोरेकस्मिन्नर्थे युगपद्वर्त्तमानयोः किंचिदपि प्रयोजनमस्ति तत्र प्रयोगादेतदुक्तं नूनमत्रान्यतरत्प्रधानं तद्विशेषकं चापरमि
ति॥ तत्रत्वेतावान्संदेहः किं प्रधानं किं विशेषणमिति सचापि न संदेहः यत्रोभौ गुणशब्दौ तद्यथा खंजः कुब्जः कुब्जः खंज इति यत्र ह्यन्यतर द्रव्यम
न्यतरो गुणः तत्र य द्रव्यं तत्प्रधानं तद्यथा शुक्लमालभेत कृष्णमालभेतेति न पिष्टपिंडीमालभ्य कृती भवत्यपि तर्हि यद्गुणं द्रव्यमाकांक्षति॥

साक्षात्क्रियासाधनत्वादिति भावः नतु तिलशब्दो जातिवाची तत्र जातिविशिष्टद्रव्यवाचित्वाद्यदि द्रव्यवाची स उच्यते तदा कृष्णशब्दोऽपि गुणविशिष्टद्रव्यवाचित्वा
द्द्रव्यवचन एव प्राप्नोत इति नानयोः कश्चिद्विशेषः नैष दोषः उत्पत्तिप्रभृत्याविनाशाज्जातिर्द्रव्यं न जहातीति न च शब्देन द्रव्याद्व्यतिरेको जातेः प्रसाध्यते नहि भवति शाबले
यस्य गौरिति किं तर्हि गौः शाबलेय इति तस्माज्जात्यात्मकमेव द्रव्यं प्रतीयत इति जातिशब्दो द्रव्यवचनत्वेनावस्थाप्यते गुणः पुनरुत्पादिनश्चापायिनश्च परस्य शुक्लो रक्त इति व्य
तिरिक्तोऽपि द्रव्यात् स्वशब्देन गुणः प्रसाध्यत इति गुणात्मकत्वं द्रव्यस्य नास्तीति न गुणशब्दो द्रव्यवचनत्वेनावस्थापनमर्हतीति एतन्न्यायाश्रयेण वैदिकव्यवहारनि
दर्शनायोपन्यस्यति तद्यथेति छागमालभेतेति चोदनायां श्वेताभावे कृष्णः छाग एवालभ्यते छागाभावे तु शुक्लस्य द्रव्यांतरस्यालंभो नास्ति॥ ॥ एम०
४६

जाति

कथं तर्हीति द्वयोरपि शब्दत्वात् द्रव्यवाचित्वात् प्रधानत्वं नास्ति अन्यतरस्य विशेषणत्वमिति प्रश्नः। नैतयोरिति। आवश्यकमस्मिन्नस्तीत्यर्थे आदित्वाद् वस
यः। अयं भावः। यदा प्रथममेव विशेष्य उपक्रम्यते शिंशपेति तदा वृक्षविशेषस्यैवाक्रान्तत्वाद् विशेषस्य च सामान्याव्यभिचाराद् वृक्षशब्दस्य नैव प्रयोगेण भाव्यं यदा
तु प्रथमं सामान्यमुपक्रम्यते वृक्ष इति तदा तद्विशेषणाय शिंशपाशब्द उपादीयमानो विशेषणमेव भवतीति शिंशपा वृक्ष इत्येव भाव्यं। अत्र केचिदाहुः शिं
शपाया अपि फलमवच्छेदायोपादीयमानो वृक्षः किमिति विशेषणं न भवतीति तत्राह भवितव्यं वृक्षः शिंशपेत्यपीति तदयुक्तं वृक्षत्वस्य व्यापकत्वात् तद्
रात्प्रथमतस्तस्यैवोपलम्भात् द्विशेष्यत्वमेव शिंशपात्वं तु स्वल्पविषयत्वात् पश्चाद्ग्रहणात् अनुमुल्लादिगुणकल्पत्वाद् विशेषणमेवेति नास्ति प्रयोगस्यानिय

कथं तर्हीमौ द्वौ प्रधानशब्दावेकस्मिन्नर्थे युगपदवरुध्येते वृक्षः शिंशपेति। नैतयोरावश्यकः समावेशः। न ह्यवृक्षः शिंशपास्ति। पूर्वापरप्रथम
अथ किमर्थमुत्तरत्रैवमाद्यनुक्रमणं क्रियते न विशेषणं विशेष्येण बहुलमित्येव सिद्धं॥ ॥ ॥

मः। तथा च वृक्षविशेषस्य खदिरादेः प्रतिनिधिर्भवति न तु वृक्षत्वाभावे फलपुष्पादेरुपादानं क्रियत इति न्यायविद आहुः। न त्ववृक्ष इति। नानुपलम्भस्यैव
नैतदस्ति वृक्षप्रतीतिमव्यवधाने न फलप्रतीतेरुत्सादाद् बहिरङ्गत्वाद् वृक्षावसायस्य प्रागुत्सादादन्तरङ्गत्वात् विशेषणं विशेष्येणेति द्वयोरुपादानं विस्पष्टार्थं संबन्धिशब्दत्वा
देवान्यतरेण तस्याक्षेपात् बहुलग्रहणाच्च तत्र कः सर्व्वो हि तत्लक्षक इत्यादौ समासाभावः॥ ॥पूर्वा॥ अथ किमर्थमिति एतत्सूत्राद्युत्तरसूत्रानुक्रमणमित्य
र्थः। पूर्वकाले सर्वं तु योगः पूर्वकालादीनां पूर्वनिपातनियमार्थः। दिक्संख्ये इति संज्ञायां नियमार्थः। कुत्सितानीति विशेष्यस्य पूर्वनिपातार्थं एवमन्यत्रापि
प्रयोजनमूह्यं यत्तु प्रयोजनाभावः पूर्वापरप्रथमेत्यादौ तस्याप्याक्षेपः पूर्वोक्तो वसमासस्य सिद्धत्वात्॥ ॥

महाविषयत्व

भा०कै०२
४७
57

बहुलवचनस्याकृत्स्नत्वात् इति। अकृत्स्नप्रतिपत्तिविषयत्वात् इत्यर्थः। नहि मंदबुद्धयो बहुलग्रहणमात्रेण समासासमासविषयविवेकमवगंतुं क्षमा इत्यर्थः।
इतरो यथोक्तमकृत्स्नशब्दार्थमप्रतिपद्य बहुलवचनस्याव्यापकत्वमकृत्स्नत्वं मत्वा चोदयति। यद्यकृत्स्नमिति तत्तर्हि निःप्रयोजनं बहुलवचनमिति भावः॥
कृत्स्नं चेति पर्यायोपादानं लौकिक्या वाचोयुक्त्या सामर्थ्यविघातप्रतिपादनार्थं यथा स्वामी प्रभुरीश्वरो भगवानिति। चतुर्भिः शब्दैः प्रभुत्वाख्ये बहुलशब्दार्थो
इति क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिरित्यादयः संगृहीता इत्येके आहुः। तेन कृष्णसर्प इत्यादौ नित्यः समासः। रामो जामदग्न्य इत्यादावसमासः। नीलमुत्पलं

बहुलवचनस्याकृत्स्नत्वादुत्तरत्रानुक्रमणसामर्थ्यम्। अकृत्स्नं बहुलवचनमित्युत्तरत्रानुक्रमणं क्रियते। यद्यकृत्स्नं पदेनेन कृतमकृतं
ततस्तदेवं तर्हि न ब्रूमोऽकृत्स्नमिति। कृत्स्नं च कारकं च साधकं च निर्वर्तकं चेत्यर्थानेन कृतं सुकृतं तत् किमर्थं तत्सर्वमाद्यनुक्रमणं क्रियते उ
दाहरणभूयस्त्वात्। एते खल्वपि विषयाः सुपरिगृहीता भवंति येषु लक्षणं प्रपंचश्च केवलं लक्षणं केवलं प्रपंचो वा न तथा कारकं भ
वति॥ ॥ ०

नीलोत्पलमित्यादौ विकल्पः। सुसूक्ष्मजटकेशेत्यादौ अवयवसमासाभावः। अन्ये त्वाहुः। कृत्स्नमिति सर्वस्य संग्रहकत्वाद्व्यापकमित्यर्थः। केन रूपेण व्यापक
त्वमित्याह कारकमिति। कुर्वदपि न विपर्ययेण करोतीत्याह साधकमिति न वा कस्यचिद्व्याजेनेन प्रवर्तकं इत्याह निर्वर्तकमिति। अथवा साधकं पारंपर्येण
स्यात् वर्णोपदेश इव प्रत्याहारद्वारेण लक्ष्यसंस्कारे इत्याह निर्वर्तकमिति साक्षात्कार्यं निष्पादयतीत्यर्थः। उदाहरणभूयस्त्वादिति विभाषागुणे स्त्रियामि
ति पंचमी। अस्यैव लक्षणस्य भूयांस्युदाहरणानि प्रदर्शयितुमित्यर्थः। केवलमिति केवलेन लक्षणेन मंदबुद्धिर्विषयविभागं नावधारयति केवलेन प्रपंचेन राम० ४७
सामान्यलक्षणरहितेन प्रतिपदपाठस्यानंत्यस्य गौरवप्रसंगः॥ ॥ ॥

व्यवस्थितविभाषैव कस्मान्नाश्रीयते किं बहुलग्रहणेनेत्याह। अवग्रहमिति। वैदिकव्यवहारानुसरणपरैः शब्दैरिह व्यवहार इत्यर्थः सर्ववेदपारिषदमिति परिष
दं इदं पारिषदं साधारणमित्यर्थः प्रत्याधर्युं परिषदश्चैतत् इत्यस्मात्तु पारिषदः परिषत्संबन्धी क उच्यते सच परिषत्संबन्धी धारणं इति पारिषदत्वेन साधारणत्वं लक्ष्यते सर्व
वेदंगतत्वात्सर्ववेदसाधारणं लक्षणं बहुलादिग्रहणोपेतं क्रियते आनुषंगिको लौकिकशब्दसंस्कार इति वेदग्रहणं कृतं॥ ॥श्रेण्यादयः॥ श्रेण्यादय इति अ
त्र एवात्रादिशब्दो व्यवस्थावाची कृतादिरित्यत्रादिशब्दः प्रकारवाची प्रयोगाद् दर्शनाच्चोदाहरणस्थानीयाः कतिपये दर्शिताः प्रदर्शिताः एकशिल्पप्रणाश्च

अवग्रहः खल्वप्यसामिरिदं वक्तव्यं बहुलमन्यतरस्यामुभयथा वा एकेषामिति सर्ववेदपारिषदं हीदं शास्त्रं तत्र नैकः पन्थाः शक्य आस्थातुं श्रे
ण्यादयः श्रेण्यादयः पूर्वान्ते कृतादिराकृतिगणः श्रेण्यादिषु च्व्यर्थवचनं श्रेण्यादिषु च्व्यर्थग्रहणं कर्तव्यं अश्रेणयः श्रेणयः कृताः श्रे
ण्यादिः श्रेणय एव किंचित्क्रियते तदा मा भूदिति। अन्यत्रायं च्व्यर्थग्रहणोपुच्छान्तस्य प्रतिषेधं प्राप्तिर्न दिहननतथा किं कारणं अन्यत्र पूर्वे च्व्यन्त
णिकृताः यत्र॰ "कार्यं परं च्व्यर्थकार्यं इह पुनः पूर्वे च्व्यर्थकार्यं परं च्व्यन्तकार्यं॥ ॥

यणेन जीविनां संघः श्रेणिः तत्र पदार्थस्थितानां श्रेणीकरणं तदा समासो यथा स्यात् यदा तु श्रेणीस्थानामेव दंडनादिरूपकरणं तदा मा भूदित्येवमर्
थमाह श्रेण्यादिषु च्व्यादिः अन्यत्रेति साक्षात्प्रभृतीनि चेत्यत्र च्व्यर्थवचनमित्युक्त्वा च्व्यन्ते प्रतिषेध उक्त इह तु कस्मान्न कृत इति प्रश्नः अन्यत्र पूर्वमिति साक्षा
ल्लेलप न च्व्यन्तत्वे सति नित्यविकल्पितगतिसंज्ञाप्रसंगेन परत्वात् विकल्पः स्यादिति तत्र च्व्यन्तप्रतिषेधः क्रियते तेन नपूर्वाणि सागतिसंज्ञा भवति
इह तु श्रेणीकृता परत्वान्नित्यो गतिसमासः सिध्यतीति नार्थ इह च्व्यन्तप्रतिषेधेनेत्यर्थः॥ ॥श्री॥ ॥९॥
इति॰

क्तेन विशिष्टशब्दोपादावधारणरहिताधिक्यवाच्युपात्तः तदातिव्याप्तिपरिहारायाह । नञ्विशिष्ट इति समानत्वमर्थरूपाभ्यां बोद्धव्यं गौरवमप्यस्मिन्पक्ष इत्या
ह । अनञिति चेति नविद्यते नञ् यस्मिन् पूर्वपदे तदनञ् तच्च प्रत्यासत्त्या क्तान्तमेवेह गृह्यते तेन द्वयमर्थः आधिक्यमात्रवचने विशिष्टशब्द उपादीयमाने क
र्त्तव्यमकृतमित्यत्रापि समासप्रसंगः समानप्रकृतित्वं चास्तीति वार्त्तिकेनापि समासो न निवारितः ततश्चानञ्ग्रहणं क्तान्तपूर्वपदनिर्देशार्थं क
र्त्तव्यमिति अवधारणसहिताधिक्यवचने त्वव्याप्तिरिति तत्परिहारायाह नुडिट् उधिकेन चेति यद्यपि नुडिटौ तद्भक्तौ तथापि श्रुतिभेदहेतुत्वात्

क्तेन नञ् नञ्विशिष्टे समानप्रकृतिग्रहणं नञ्विशिष्टे समानप्रकृतिग्रहणं कर्त्तव्यं इह माभूत् उत्सिद्धं चाप्युक्तं चेति अनञिति च प्रतिषे
धो वक्तव्यः इह माभूत् कर्त्तव्यमकृतमिति । नुडिडधिकेन च नुडिडधिकेन च समासो वक्तव्यः इहापि यथा स्यात् अशिता नशितेन जीवति क्लि
ष्टाक्लिशितेनेति किमुच्यते समानप्रकृतिग्रहणं कर्त्तव्यमिति यदा नञ्विशिष्टेनेत्युच्यते न चात्राकृत एव विशेषः किं तर्हि प्रकृतिकृतो
पि अयं विशिष्टशब्दोऽस्त्येवावधारणे वर्त्तते तद्यथा देवदत्तयज्ञदत्तावाढ्यावभिरूपौ दर्शनीयौ पक्ष्मवन्तौ देवदत्तस्तु यज्ञदत्तात् स्वाध्या
येन विशिष्टः स्वाध्यायेनैवेति गम्यते अन्ये गुणाः समा भवन्ति अस्त्याधिक्ये वर्त्तते तद्यथा देवदत्तयज्ञदत्तावाढ्यावभिरूपौ दर्शनीयौ पक्ष्म
वन्तौ देवदत्तस्तु यज्ञदत्तात् स्वाध्यायेन विशिष्टः स्वाध्यायेनाधिकः अन्ये गुणा अविवक्षिता भवन्ति ॥

अवधारणे न च श्रुतिभिन्नस्य निराकरणं तदधिकस्याप्राप्तिरिति भावः । नुडिड्ग्रहणमागममात्रोपलक्षणार्थमिति छिन्नाच्छिन्नमित्यत्र नुगधिकस्यापि समासो भव
ति । अर्थभेदमकुर्वतो विकारस्याप्युपलक्षणमिति छातच्छिन्नमित्यत्र शाछोरन्यतरस्यामितीत्त्वे कृते तदधिकेनापि समासो भवति ज्ञाताज्ञातमित्यादौ तु नत्वस्यासिद्धत्वाद्भे एम०
दकत्वाभावः । तद्यथेति यदा समसंप्रधारणा प्रतिपाद्यते तदावधारणे विशिष्टशब्दः । स्वरूपवर्णनमात्रे त्वाढ्यादिगुणद्वारेण क्रियमाणे आधिक्यमात्रे विशिष्टशब्दः ॥ ० ॥ ४८

तद्यदेति॥ इह क्ते नञ्{स}न ञितिसिद्धे विशिष्टग्रहणात्सावधारणाधिक्यगतिः स्यात् गुरुत्वात्प्रयत्नादरेत्वाधिक्यमात्रं न्निर्विशिष्टग्राहकस्य तेइति द्वैतोपपत्तिः अवधारणं नञाचेदिति एवं क्त एवार्थे ऽप्रायेयासंग्रहीतः अञिसेत तूत्र कृतमेवेति अर्थायां कर्तव्यत्वेन नोक्तं इदानीमव्याप्तिव्याप्तिपरिहाराय न्यासान्तरमाह सिद्धं त्विति विसमाप्तिरसमाप्तिः कृताकृतमित्यत्रैकदेशे करणाकरणाभ्यां करणस्यासमाप्तिर्गम्यते इति भवति समासः कृतापकृतमित्यत्राप्य

तद्यदातावदवधारणो विशिष्टशब्दस्तदानैवार्थः समानप्रकृतिग्रहणेन नेह भविष्यति सिद्धं चाभुक्तं चेति नाप्यनञिति प्रतिषेधेन नेह भविष्यति कर्तव्यमकृतमिति तुदिरुधिके नापितु तदा समासो न प्राप्नोति यदापि केवल विशिष्टशब्दस्तदा समानप्रकृतिग्रहणं कर्तव्यमिह माभूत्

वक्ष्य सिद्धं चाभुक्तं चेति अनञिति च प्रतिषेधो ऽयं इह माभूत्कर्तव्यमकृतमिति तुदिरुधिके नापि तदा समासः सिद्धो भवति तत्राधिक्ये विशिष्टशब्दमत्वा समानप्रकृतिग्रहणं चोद्यते अवधारणं नञाचेत्तु द्विविशिष्टे नप्रकल्प्येत अप्यचेदधिकविवक्षा कार्यतुल्यप्रकृतिकेन॰ कृतापकृतादीनां चोपसंख्यानं कृतापकृतादीनां चोपसंख्यानं कर्तं कृतापकृतं भुक्तविभुक्तं पीतविपीतं सिद्धं तु क्ते न विसमाप्तावनञ् सिद्धमेतत्कथं क्तान्तेन क्रियादिसमाप्तावनञ्क्तान्तं समस्यत इति वक्ष्यं गतप्रत्यागतादीनां चोपसंख्यानं गतप्रत्यागतं यातानुयातं पुटापुटिका क्रयाक्रयिका फलाफलिका मानोन्मि-

समाप्तिर्गम्यते यत्कृतं तत्तदेवापकृतं विरूपं कृतं इत्यस्य योऽवगमात् एवं भुक्तविभुक्तमिति यद्भुक्तं तदेव भुक्तं विरूपं भुक्तं अभुक्तमिति वार्थे विशब्दस्य प्रतिषेधार्थत्वात् भुक्तविभुक्तत्वं चैकदेशद्वारकं भोजनकार्याकरणाद्वा बोद्धव्यं सिद्धमभुक्तं कर्तव्यमकृतमित्यत्र प्रतिषेधमात्रावगमाद्विसमासभावात्समासाभावः॥ यत्सर्वथा वक्तव्यं तदाह गतप्रत्यागतादीनां चेति केपि केसाद्यावत्स्य इति क्रमस्य यस्तरंतस्य स्वभावात्क्वचित्स्त्रियां वर्तन्ते क्रयाक्रयिके सत्येषामपीति दीर्घः॥ ॥

मा० कै० २ युवाऽप्रयुक्त इति ॥ पुल्लिंगस्य स्त्रीलिंगेन सामानाधिकरण्यं नोपपद्यत इत्यथोपसापरिभाषा ज्ञाप्यते तेन युवतिजरतीति स्त्रीलिंगयोः समासः नन्वेनयोरपि विरु

४९ द्धवयोवाचित्वान्नास्ति समानाधिकरण्ये नैष दोषः जरसां युवतिधर्म्मोपलंभात् युवत्वे वा जरतीधर्मसद्भावात् तद्रूपारोपात् युवतिशब्दस्यैवं पूर्वनिपातार्थे

मिदमनियमो हि गुणशब्दत्वात् स्यात् जरद्विरिति पिपाठयिष्या आचार्येण बोधिता इति युवजरन्निति सपि भवति ॥ ॥ वर्णो दृढमिति बुद्ध्या परामृष्टं वस्तु म

त्क्षवाचिना सर्वनाम्ना परामृश्यते तत्ताव दस्मिन्न देशे सूत्रस्य प्रसाख्यानं पश्चात् भविष्यति इह कृष्णसारंग इति सारंगशब्दः शबल पर्यायः सच गुणोप

युवा खलति पलित अप्रयुक्तोय निर्देशः समानाधिकरणोनेति वर्तते कः प्रसंगोय द्व्यधिकरणानां समासः स्यादेवं तर्हि ज्ञापयत्याचार्यः य

थाजातीयकमुत्तरपदं तथाजातीयकेन पूर्वपदेन समासो भवतीति किमेतस्य ज्ञापने प्रयोजनं प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि

ग्रहणं भवतीत्येषा परिभाषा न कर्त्तव्या भवति युवा वर्णो वर्णेन इदं विचार्यते वर्णेन तृतीयासमासो वा स्यात् कृष्णेन सारंगः कृष्णसारंग

इति समानाधिकरणो वा कृष्णः सारंगः कृष्णसारंग इति कथ्या नविशेषः वर्णेन तृतीयासमास एतत्प्रतिषेधे वर्णग्रहणं वर्णेन तृतीयास

मासे एतत्प्रतिषेधे वर्णग्रहणं कर्त्तव्यं तृतीयापूर्वपदं प्रकृतिस्वरं भवति ॥ ॥

सञ्ज्ञेन द्रव्यवाचित्वा [redacted] गुणवचनो भवति सारंगत्वस्य च कृष्णकृतत्वमस्ति तस्मिन्न स

ति स्याभावादिति शंकुला खंडवत् समासः सिद्धः अवयवतुल्यावयवत्वात् सारंगत्वजातिः कृष्णशब्दः तदा समानाधिकरणपदः समासः स च गौणेपि सामानाधिकरण्ये ब रामo

हुवचनाद्विशेषणं विशेष्येणेति सिद्ध इति कृष्णेनेति हेतुतृतीयाकथ्यात्रेति कुलाद्यर्थं इति प्रश्नः एतत्प्रतिषेध इति स्वरे विधीयमान इत्यर्थः ॥ ॥ ॥ ४९

=लक्ष्येनेति सर्वयोगप्रसंग लक्षणेनेति लक्ष्यसारंग कर्मैतत्पुरुष आदिसमासार्थवाक्यमर्थः अनेनेति तृतीयातत्पुरुषेनेत्समानंतरमपि नेन वर्णैर्विशेषेनेतिप्रत्ययेणेत्यर्थः सारंगशब्दः तत्र शब्दश्च नानावर्णसमाहारस्य वचनी तत्र लक्षणगुणाधिमात्रकान्तरान्तर्यतद्रुपलक्षितलंबावोध्यं २=

अनेने वर्णा इति लक्ष्यसारंग इत्यादौ तत्पुरुषे तुल्यार्थतृतीयेति पूर्वपदप्रकृतिस्वरे सिद्धे अनेने वर्णा इति सूत्रं कर्तव्यं वर्णवाचि पूर्वपदं एतदुत्तरपदे प्रकृतिस्वरं न भवतीत्यर्थः तेन कृष्णेन इति समासान्तोदात्तत्वमेव भवति कृष्णेनेति सह योगे इत्थंभूतलक्षणे वा तृतीया अनेने न समासः वर्णा [redacted] ग्रहणाच्च हिमेन एतो हिमैत इत्यादौ पूर्वपदप्रकृतिस्वर एव भवति हिमेनेति हेतौ तृतीया तृतीयातत्कृतार्थेति समासः कृत्स्वरस्तु नास्ति उणादीनामव्युत्पन्नत्वात् अकारकत्वाद्वा हिमस्यैव द्यवर्णा इति वर्णस्य ग्रहणस्य अवच्छेद्यत्वे न प्रयोजकोनास्तीति भावः। इतरः पराभिप्रायमबुध्वा सूत्रं प्रतिपादयितुमाह ननु चेति कृष्णे

अनेने वर्णा इति वक्तव्यं इह मा भूत् हिमेन एतः हिमैतः अथ द्वितीये न वर्णग्रहणे नैतद्विशेषणेनार्थः बाढमर्थः यद्यवर्ण एतश्शब्दोस्ति ननु चायमस्ति श्याइतः एतः कृष्णेतो लोहितेन इति नार्थः एवमर्थे न वर्णग्रहणे नयदितावद्यं कर्मणि क्तः तृतीया कर्मणीत्यनेन स्वरेण भवितव्यं अथापि कर्तरि परत्वात्कृत्स्वरेण भवितव्यं अथ समानाधिकरणः समानाधिकरणे द्विर्वर्णग्रहणं समानाधिकरणे द्विर्वर्णग्रहणं कर्तव्यं वर्णो वर्णेष्वनेन इति वक्तव्यं एकं वर्णग्रहणं कर्तव्यमिह मा भूत् परमक्लुप्तः परमकृष्णः द्वितीयं वर्णग्रहणं कर्तव्यं इह मा भूत् कृष्णतिला इति एकं वर्णग्रहणमनर्थकं अवर्णस्य वर्णे वर्णस्य चावर्णे अन्यतरत्र केस्मान्न भवति॥ ॥ ॥

तद्इति ओमाउः श्वेतिपररूपं तृतीया कर्मणीति अनेनत इति प्रतिषेधस्यानंतर्यान्मध्येऽपवादा इति वा तत्पुरुषे तुल्यार्थे स एव बाधक इत्यभिप्रायः परत्वादिति कृष्णेन अश्वादिनाकरणे नञ्आगतः कृष्णेत इत्यत्र अनेनत इति प्रतिषेधः पूर्वपदप्रकृतिस्वरस्यैव बाधको न कृत्स्वर इति विचारे परत्वात् कृत्स्वर एव बाधक इति नार्थः एतद्विशेषणार्थे न वर्णग्रहणेनेत्यर्थः। कृत्स्वरमपि बाधित्वा थाथादिस्वरेण त्वभाव्यं विशेषाभावात् अनुभाषकारेणेत न्यो कं अपवा परत्वात्कृत्स्वरान्तरप्राप्तत्वात्कृत्स्वरः थाथादिस्वर इत्यर्थः॥ ॥ ॥

=नत्वोत्वाभावादिति॰पक्षमिकाल्लसांवंगवस्नाराववितानयोगस्वसंश्रुतलक्षणेवात्तृतीयापक्षेतल्लनतत्संभवकाभापिदेकत्तृतीयापक्षेनवांभयोर्वजनरेणस्तंभवेपि [redacted] ेनतदर्थवचनस्यावश्यकं अनभिधानेनापिसमासाभावस्यतत्रवक्तुंशक्यत्वात्॰कुकवभ्रुरिसवतुरेवतृती

मा॰कै॰२
५०
50

लक्षणप्रतिपदोक्तयोरितिं वर्णो वर्णेनेति यः समासः स एव स्वरविधौ द्वितीयवर्णग्रहणमंतरेणापि ग्रहीष्यते नेनातिप्रसंगो न भविष्यतीत्यर्थः। प्सुकबभ्रुरिति प्सुको हरितः प्सुक्लोवा बभ्रुः कपिलः ततः तेंत्कतत्वाभावात् प्सुकेन बभ्रुरिति तृतीयासमासो योग इत्यंभूतलक्षणेवाकर्तृत्वाभावात्समासादितिएतत्सूचनाना

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति एवं सति तान्येतानि त्रीणि वर्णग्रहणानि भवंति समासविधौ द्वे स्वरविधौ चैकं यस्यापितृतीया समासस्तस्यापितान्येव त्रीणि वर्णग्रहणानि भवंति समासविधौ द्वे स्वरविधौ चैकं सामान्येन समस्तृतीया समासो भविष्यतितृतीयातत्कृ तार्थेनगुणवचनेनेति इष्पवर्णेपवर्णेनप्रतिपदं समासो वक्तव्यः यत्रतेननसिध्यतितदर्थंवक्तव्यतेननसिध्यति प्सुकबभ्रुर्हरितबभ्रु रितितथासतितान्येतानित्रीणिवर्णग्रहणानिभवंतिसमासविधौ द्वे स्वरविधौ चैकं अथैतानीसमानाधिकरणः सामान्येन सिद्धः स्यात् बाढं सिद्धः कथं विशेषणं विशेष्येण बहुलमिति एवमपिद्वेवर्णग्रहणे कर्तव्ये स्वरविधावेव प्रतिपदोक्तस्याभावात् तस्मात्समानाधिकरण इसे षपक्षोज्यायान् समानाधिकरणाधिकारे प्रधानोपसर्जनानां परं परं विप्रतिषेधेन समानाधिकरणाधिकारे प्रधानोपसर्जनानां परं परं भवति विप्रतिषेधेन प्रधानानां प्रधानमुपसर्जनानामुपसर्जनं प्रधानानां तावत्प्रधानं वृंदारकनागकुंजरैः पूज्यमानमित्यस्यावकाशः गोवृंदारकः अश्ववृंदारकः पोटायुवतीनामवकाशः इभ्यायुवतिं आढ्ययुवतिः इहोभयं प्राप्नोति नागयुवतिः वृंदारकयुवतिः प्रधानानां परं प्रधानं भवति विप्रतिषेधेन उपसर्जनानां परमुपसर्जनं सन्महत्सरमोत्तमोत्कृष्टा इत्यस्यावकाशः सद्गुरुः सद्वैद्यः कुत्सितानिकुत्सनैरित्यस्यावकाशः वैयाकरणखसूचिः तुल्यश्वेतः इहोभयं प्राप्नोति सुतुल्यसत्तुल्यमहानुपसर्जनानां परमुपसर्जनं भवति विप्रतिषेधेन॥ ॥ ॥

रंभा लाघवादित्यर्थः प्रधानोपसर्जनानामिति प्रधानग्रहणेन समासशास्त्रे तृतीयांतानि लक्ष्यंते उपसर्जनशब्देन समासशास्त्रे प्रथमानिर्दिष्टमुच्यते॥ —॥

एम॰
५०

मानाः सर्वधातुसंभवात्प्रसंगात्स्यर्थ्वंकर्तृत्वमिति सामासः

समानाधिकरणसमासादिति समानाधिकरणसमासाद्बहुव्रीहिः कदाचित्कर्मधारयः सर्वधनाद्यर्थ इति वार्त्तिककारेणेष्टिरूपेण पठितं भाष्यकारस्तु न्यायव्युत्पा
दनाय विप्रतिषेधमुपन्यस्य दूषयित्वा इष्टिरूपतां स्थापयिष्यति प्रसामर्थ्येनः सामर्थ्यस्य बलवत्त्वाश्रयेणोक्तं कण्ठेकाल इति व्यधिकरणानां बहुव्रीहिः सप्तम्युपमानस्य पूर्वनिपा
तविधानेन ज्ञाप्यते वीरपुरुषक इति बहुव्रीहिसंज्ञायां सत्यां पूर्वपदप्रकृतिस्वरः पाक्षिकश्च कप् समासान्तो भवति बहुव्रीहिसंज्ञायां शेषग्रहणप्रत्याख्याने
विप्रतिषेधः श्लिष्यते कदाचिदिति विषयविशेषनिर्देशाय क्वचिदिति वक्तव्ये कदाचिदित्यनेन विषयविशेषावच्छिन्नः कालविशेषो निर्दिष्ट इति नास्ति

= न तु त्रिकतः शेषपक्षे कण्ठेकाल इति व्यधिकरणानां बहुव्रीहिसंज्ञायाः प्रसंगात् ... समानाधिकरणानामिति ... शेषस्याश्रयणादित्यर्थः॥

समानाधिकरणसमासात् बहुव्रीहिः समानाधिकरणसमासाद्बहुव्रीहिर्भवति विप्रतिषेधेन समानाधिकरणसमासस्यावकाशः वीरः पुरुषो
पुरुष वीरपुरुषः बहुव्रीहेरवकाशः कण्ठेकालः इहोभयं प्राप्नोति वीरपुरुषको ग्रामः बहुव्रीहिर्भवति विप्रतिषेधेन कदाचित्कर्मधारयः सर्वधनाद्यर्थः कदा
चित्कर्मधारयो भवति बहुव्रीहेः किं प्रयोजनं सर्वधनाद्यर्थः सर्वधनी सर्वबीजी सर्वकेशी नटः गोखरवद्वदरणं पक्षस्य सर्पवान् लवीकः लोहि
तशालिमान् ग्रामः किं प्रयोजनं कर्मधारयप्रकृतिभिः मत्वर्थीयैरभिधानं यथा स्यात् किं च कारणं न स्यात्॥

वस्तुभेदः सर्वधनीति सर्वाणि धनान्यस्येत्यस्यार्थे विवक्षायां कर्मधारये कृते मत्वर्थीय इतिनत्यर्थे पूर्वविप्रतिषेधः प्राश्रयणीय इत्युक्तं भवति किं प्रयोजनमि
ति सर्वधनाद्यर्थमिति मत्वर्थीयरहितस्य सर्वधनशब्दस्योपादानात्तस्य च केवलस्यान्यपदार्थे विवक्षायां प्रयोगादर्शनाच्च स्वपदार्थे च बहुव्रीहेरप्रसंगात्कर्म
धारयस्यानुक्तसिद्धत्वात्प्रश्नः कर्मधारयप्रकृतिभिरिति मत्वर्थीयप्रकृतिः सर्वधनशब्दो वार्त्तिके उक्तः ननु स्वतन्त्र इत्यर्थः॥ ॥ ॥

मि.

बहुव्रीहिर्णेति। सर्वाणि धनान्यस्येति विवक्षायां परि बहुव्रीहिः क्रियते तदा तेनैव मत्वर्थस्योक्तत्वान्मत्वर्थीयो न स्यात् कर्मधारये तु सतितेन मत्वर्थस्यानुक्तत्वात्
मत्वर्थीय इत्यर्थः यद्युक्तत्वमिति सर्वाणि धनान्यस्येत्यर्थविवक्षायां पूर्वविप्रतिषेधेन यदि कर्मधारयः क्रियते तदा तेनापि मत्वर्थ उच्यत एव न हि बहुव्री
हिकर्मधारयसंज्ञामेदमात्रेण स्वरव्यवस्थावत् सदर्थसाभिधानमभिधानव्यवस्थाप्युच्यते तस्याः स्वाभाविकत्वात् एवं तर्हीति अनपेक्षितान्यपदार्थे कर्म
धारयं कृत्वा मत्वर्थीयो यो भवेत् तरे विधास्यत इत्यर्थः नित्यमेवं सतीति यथा पूर्वविषयभेदविवक्षयाकदाचिदित्युक्तं तथा नेत्यर्थविषयव्याप्त्यपेक्षया सर्वत्रेति
बहुव्रीहिणोक्तत्वात् मत्वर्थस्य यद्युक्तत्वे हेतुः कर्मधारयेण प्युक्तत्वान्न प्राप्नोति न खल्वपि संज्ञाश्रयो मत्वर्थीयः किं तर्ह्यर्थाश्रयः सर्वथैव बहु
व्रीहिणोक्तत्वान्न भवति एवं कर्मधारयेणोक्तत्वान्न भविष्यति एवं तर्हि इदं स्यात् सर्वाणि धनानि सर्वे धनानि सर्वे धनान्यस्य संतीति सर्वधनी नै
वं शक्यं नित्यमेवं सति कर्मधारयः स्यात् तत्र यदुक्तं कदाचित्कर्मधारय इति एतद् युक्तं एवं तर्हि भवति वै किंचिदाचार्याः कार्यं बहुव्रीहिं कृत्वा
पठंति कार्याः शब्दा इति तद्विदं पठितं समानाधिकरणसमासाद्बहुव्रीहिः कर्तव्यः कदाचित्कर्मधारयः सर्वधनाद्यर्थ इति यदुच्यते समाना
धिकरणसमासाद्बहुव्रीहिर्भवति विप्रतिषेधेनेति॥ ॥ ॥

वक्तव्ये नित्यमुक्तं एतदुक्तं भवति। अनेन न्यायेन सर्वत्र मत्वर्थीयप्रकृतिभिः कस्मादिति कदाचित्ग्रहणं विषयविशेषनिर्देशार्थं वक्तव्यं भवति इदानीमन्यथा
मत्वर्थीयोऽत्र निमाह एवं तर्हीति। भवतीति एवं जातीयकं वस्त्विसर्थः किं तदित्याह आचार्या इति अथवा पठि क्रिया भवति क्रियायाः कर्त्री भवति कार्याः शब्दा इति द
र्शनेन लक्षणादेव शब्दानामर्थव्यवस्थाततोऽन्यपदार्थे बहुव्रीहिशासनात्तस्यैव तत्समासायनेन तु कर्मधारयस्य तत्र सर्वाणि धनान्यस्येत्यर्थविवक्षायां पूर्वविप्रतिषेधे राम०
न कर्मधारयः क्रियमाणोऽन्यपदार्थं नाभिधत्त इति तदभिधानाय मत्वर्थीय उत्पाद्यत इत्यर्थः॥ ×मधारयः×४ ॥ ॥ ॥ ५१

विप्रतिषेधापनयनायाह ॥ नैष युक्त इति स्वपदार्थे इति मध्य मध्यमवीरश्चेति स्वपदार्थमात्राश्रयेणाभिधानादन्यपदार्थानाश्रयणादिति भावः इतरो विषयविशे
षे बहुव्रीहिं साधयति । अस्त्विति यथोक्तेन प्रकारेणान्त रङ्गत्वं कर्मधारयस्य भवत्विति अर्थः विभाषेति नात्र महाविभाषा विवक्षिता तया हि पक्षे व्यपेक्षैव प्रतिपाद्य
ते न त्वेकार्थीभावे संज्ञाया भावाभावौ क्रियेते । तस्माद्विभाषा कर्मधारय इत्यस्यायमर्थो विकल्पितः कर्मधारयो विषयविभागेनावस्थानात्स्वपदार्थे स्य सोऽवर्न्ने

नैष युक्तो विप्रतिषेधः अन्तरङ्गः कर्मधारयः कान्तरङ्गता स्वपदार्थे कर्मधारयः अन्यपदार्थे बहुव्रीहिः अस्तु विभाषा कर्मधारयः यत्र न कर्मधार
यस्तत्र बहुव्रीहिर्भविष्यति एवमपि यद्यत्र कृष्णचित्रकर्मधारयो भवति कर्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानं प्राप्नोति सर्वे श्वायमेवमर्थो यत्नः कर्म
धारयप्रकृतिभिर्मत्वर्थीयैरभिधानं माभूदिति एवं तर्हि नेदं तस्य योगस्योदाहरणं विप्रतिषेधे परमिति । किं तर्हि इ ष्टिरियं पठिता समानाधिकर
णसमासाद्बहुव्रीहिरिष्टः कृष्णचित्रकर्मधारयं सर्वेधनाद्यर्थे इति यदीष्टिः पठिता ॥ ॥श्री॥ ॥

तेनान्यपदार्थे सत्युक्तं भवति । अनपेक्षितान्यपदार्थे स्वपदार्थमात्रविवक्षायां भवतु कर्मधारयः पूर्वमेव तत्रान्य पदार्थ विवक्षायां वीरपुरुषक इत्यादौ बहुव्रीहिः सिध्यति एव
मपीति पूर्वमनपेक्षितेऽन्यपदार्थे यदि कर्मधारयः क्रियते तदा पश्चादन्यपदार्थविवक्षायां वीरपुरुषवान् ग्राम इत्याद्यपि स्यादित्यर्थः इष्टिरियमिति वीरपुरु
षादौ प्रथममेवान्यपदार्थविवक्षा कार्या सर्वधनीत्यादौ तु पश्चादिति विवक्षानियम इष्टसिद्धये प्रतिपाद्यत इत्यर्थः ॥ ॥ ॥

भा० वै० २
५२
52

नार्थोनेनेति न्यायसिद्धत्वात् इति भावः । परिकर्म्मधारयान्मत्वर्थीयः क्रियते तदा स्वपदार्थं प्राधान्यमाश्रित्य कर्म्मधारयः कृतेभ्यः तेषामेव पदार्थो नामन्यत्र गुण
भावमाश्रित्य मत्वर्थीय उत्पाद्यत इति प्रतिपत्तिगौरवप्रसंगः पदाद्वयमेवान्यपदार्थं विवक्षातदावृत्तिपदार्थानां तत्र गुणभावएवाश्रीयत इति प्रतिपत्तिलाघवं भवति
अन्येतु शबलत्वाघवमन्यं तेवरु ब्रीहिरन्यान पेक्षोन्यपदार्थं प्रतिपादयति कर्मधारय स्तु मत्वर्थीयसहित इतिबहु गौरवप्रसंगः एतच्च शब्दगौरवं तथा प्रयोगद

नार्थोनेन इह सर्वे मनुष्या अल्पेनाल्पेन महतो महतोर्थो नाकांक्षंति एकेन माषेण शतसहस्रं एकेन कुद्दालकेन खारीसहस्रं तत्र कर्मधारयप्र
कृतिभिर्मत्वर्थीयैरभिधानमस्तु बहुव्रीहिर्निवृत्तिरिति बहुव्रीहिणाभविष्यति लघुत्वात् कथं सर्वधनी सर्वबीजी सर्वकेशी नट इति प्रकरणे सर्वादे इति२
रितिवक्ष्यामि तच्चावश्यं वक्तव्यं इनो बाधनार्थं कथं गौरखर वद्दरण्यं गौरमृग वद्दरण्यं कृष्णसर्पवान्वल्मीकः लोहितशालिमान्ग्रामः
अस्त्वत्र विशेषः जात्या चाभिसंबंधः क्रियते कृष्णसर्पो नाम सर्पजातिः सास्मिन्वल्मीकेस्ति पदान्तरेण जातिंत द्वताभिसंबंधः क्रिय
ते कृष्णसर्पो वल्मीक इसेवतदाभवति ॥ ॥ ॥

शेनाद्वतैवविषयत्र आश्रीयत इति हृक्ष्मवनस्पत्यादिषुनप्रसंजनीयं सर्वादेरितितत इत्वात्र वच नाल्लाघवं नाश्रीयत इति कर्मधारयेकृते इनिः कृतेभ्य इ
सर्थः । इनो बाधनार्थ इति यो पीष्टिमारभते तेनापि कर्मधारयाद्बन्बा धनाये निरेवेति वक्तव्यमित्यर्थः जात्यन्ते ति जातिश्चाकृतेकर्मधारयेन प्रतीयते पदाहीति
विशिष्टगुणेन द्रव्येण तद्वत्तायां विवक्षितायामित्यर्थः ॥ ॥ श्री ॥ ॥ श्री ॥ ॥

एम०
५२

पूर्वपदातिशाय इति । अतिशयेन सूक्ष्माणि वस्त्राण्यस्येत्यर्थे विवक्षायामुभयप्रसंगे पूर्वं बहुव्रीहिरिष्यते तेन ततो बहुव्रीहेः प्रत्ययः भाष्यकारस्तु विप्रतिषेधं प्रसाध्य
पूर्ववदुपन्यस्य सामर्थ्याश्रयेण दूषयित्वेष्टिं स्थापयिष्यति । आप्रातिपदिकादिति न तु प्रकर्षे आतिशायिकः प्रकर्षश्च समासार्थस्य भवति न च पदादेवोत्प

पूर्वपदातिशाये आतिशायिकाद्बहुव्रीहिः सूक्ष्मवस्त्रतराद्यर्थः पूर्वपदार्थातिशायविवक्षायामातिशायिकान्तबहुव्रीहिर्भवति विप्रतिषेधेन किं प्रयो
जनं सूक्ष्मवस्त्रतराद्यर्थः आतिशायिकस्यावकाशः पटुतरः बहुव्रीहेरवकाशः चित्रगुः शबलगुः इहोभयं प्राप्नोति सूक्ष्मवस्त्रतरः तीक्ष्णशृं
गतरः बहुव्रीहिर्भवति विप्रतिषेधेन नैष युक्तो विप्रतिषेधः विप्रतिषेधे परमित्युच्यते पूर्वश्च बहुव्रीहिः पर आतिशायिकः इष्टवाची परश
ब्दः विप्रतिषेधे परं यदिष्टं तद्भवतीत्येवमप्ययुक्तः अन्तरङ्ग आतिशायिकः कथमन्तरङ्गता आप्रातिपदिकादातिशायिकः सुबन्तानां बहुव्रीहिः आ
तिशायिकोऽपि नान्तरङ्गः कथं समर्थानां हि तद्धित उत्पद्यते सामर्थ्यं च सुबन्तेन एवमप्यन्तरङ्गः कथं स्वपदार्थे आतिशायिकः अन्यपदार्थे बहुव्रीहिः
एवमपि नान्तरङ्गः कथं सर्वं ह्युपमातिशायिको भवति न चान्तरेण प्रतियोगिनं स्पर्द्धो भवतीत्येवं वात्रातिशायिकः प्राप्नोति किं कारणमसाम
र्थ्यात् कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति यावता वस्त्राणि तद्धितमपेक्षन्ते ॥ ॥ ॥

तथं एवं तर्ह्यधिकारमात्रमाश्रित्यैवमुक्तं अत एवोच्यते समर्थादिति सुबन्तेनेति हेतोरत्तीयासुबन्तेन पदेन प्रकर्षानुभवविषयं सामर्थ्ये मर्थ
स्यान्यापेक्षस्यार्थः आतिशायिकस्य प्रतियोगिवस्त्वन्तरापेक्षया बहुव्रीहिणा सामर्थ्यं प्रतिपाद्य सर्वथानुपपत्तिं प्रतिपादयितुमाह नैवेति ॥ ॥

तदंतमिति॥ वस्तुस्वामिनमित्यर्थः। अस्माति शायेन सूक्ष्माणि वस्त्राणीति तदुतोपेक्षणात् स स्वामिनि तत व्य यथा प्रतियोग्यपेक्षायां प्रसयो भवत्येवं तदपेक्षा
यामपि कस्मान्न भवतीति भावः। वस्त्राणीति। अतिशयानानि वस्त्राणि। अतिशयमानानि वस्त्राणि। अपेक्षं तदर्थः। एवं सापेक्षत्वाद् द्वयोरपि निराकृतयोर
र्थोतरत्वमाह। एवं तर्हीति। नार्थो नेनेति। इष्या विनाप्यर्थस्य सिद्धत्वात् इति भावः। पैषा युक्तिरुक्तेति। सानाम्नी यत इत्यर्थः। कथं तर्ह्यो म्नी यत इत्याह। यद्वा हीति। अ

तदंतमपेक्ष्य वस्त्राणां वस्त्रैर्युगपत्सम्बन्धो भवति ननु चाय मातिशायिक एवमात्मकः सत्सोव्यपेक्षायां विधीयते सत्समेवमात्मकः यांच नांतरेण
अपेक्षामातिशायिकस्य प्रवृत्तिस्तत्सांसत्सां भवितव्यं कांचनांतरेण अपेक्षामातिशायिकस्य प्रवृत्तिः याहि प्रतियोगिनं प्रतिअपेक्षायां हि तदं
तं प्रतिनतत्सां भवितव्यं बहुव्रीहिर पि न प्राप्नोति किंकारणमसामर्थ्यादेवं कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति यावता वस्त्राणि व
अप० वस्त्रांतरापेक्षेनेतदुताचाभिसंबंधः एवं तर्हि नेदं नत्स्य योगस्योदाहरणं विप्रतिषेधे परमिति किं तर्हि इष्टिरियं पठिता पूर्वपदातिशये अप्राति
शायिका बहुव्रीहिरिष्टः सूक्ष्मवस्त्रतराद्यर्थं इति यदीष्टिरियं पठिता नार्थो नेनं कथं पैषा युक्तिरुक्ता वस्त्राणां वस्त्रांतरैर्युगपत्सम्बन्धोतं
दुता भिसंबंधः क्रियते निष्ठान्तिद्वंद्वस्तदा बहुव्रीहिं बहुव्रीहेरातिशायिकं कथं पुनरन्यस्य प्रकर्षेणान्यस्य प्रकर्षः स्यात्॥×दुताचाभिसंबंध इति। यदा

न्यपदार्थमात्रविवक्षायां बहुव्रीहौ कृते पश्चादातिशायिकः क्रियते। अतिशयमात्रविवक्षायां तु प्रत्यये कृते पश्चाद् बहुव्रीहिः स्यात सूक्ष्मतरवस्त्र इत्यपि
सिध्यति इष्टौ तु समासे तन्न सिध्येत् यदुक्तं बहुव्रीहौ कृते पश्चादातिशायिकः क्रियत इति तमाह। कथं पुनरिति। अप्रतिशायेन सूक्ष्मवस्त्र इति बहुव्रीहेः
प्रत्यये क्रियमाणे वस्त्रगतसौक्ष्म्यप्रकर्षे कथमन्यपदार्थप्रकर्षः स्यादित्यर्थः॥×॥ ननु तर्हीदानीमिदं भवति सूक्ष्मतरवस्त्र इति भवति यदांतरेण तदंतं वस्त्राणां वस्त्रांतरैः राम०
५३

[illegible] [redacted] [illegible]

अत्रोत्तरं॰ नैवान्यस्येति॰ सर्वत्रैव यतः प्रत्ययो विधीयते तदर्थस्य स्वतः प्रकर्षाभावादन्यगत एव प्रकर्ष आश्रीयते॰ यथोक्तं॰ द्रव्यस्याव्यपदेश्यस्य य
उपादीयते गुणः। नैदकोव्यपदेशाय तत्प्रकर्षोभिधीयते इति॰ एक एवासौ प्रकर्ष इत्यर्थः। यद्यप्यत्राश्रयान्तरव त्त्रिगुणप्रकर्षस्तथा

नैवान्यस्य प्रकर्षेण स्वप्रकर्षेण भवितव्यं यथैवायं द्रव्येषु यत्नेन वस्त्राणिमे स्युरिति एवं गुणेष्वपि यत्नेन सूक्ष्मतराणिमे स्युरिति नात्रातिशा
यिकः प्राप्नोति किं कारणं गुणवचनादित्युच्यते। न च समासो गुणवचनः समासोपि गुणवचनं कथं अजहत्स्वार्था वृत्तिरिति अपि अजहत्स्वा
[redacted] र्थायां तु दोष एव जहत्स्वार्थायां च न दोषः भवति बहुव्रीहेः तद्गुणसंविज्ञानमपि न यथा शुक्लवाससमानय लोहितोष्णीषाः
प्रचरंतीति तद्गुण आनीयते तद्गुणाश्च प्रचरंति उत्तरपदातिशये आतिशायिको बहुव्रीहेः बह्वाढ्यतराद्यर्थः उत्तरपदातिशये आतिशा
यिको बहुव्रीहेर्भवति विप्रतिषेधेन किं प्रयोजनं बह्वाढ्यतराद्यर्थः बह्वाढ्यतरः बहुसुकुमारतरः कः पुनरत्र विशेषः बहुव्रीहेर्वा
तिशायिकः स्यात् आतिशायिकांतेन वा बहुव्रीहिः स्वरकृतोपि विशेषः यद्यत्रातिशायिकाद्बहुव्रीहिः स्यात्॥ ॥७॥ ॥

पियत्र यथान्यतः संभवति तत्र तथान्यत आश्रीयते॰ गुणवचनादिति॰ नात्राजादी गुणवचनादेवेति बोद्धव्यं तरपोत्र प्रकृतत्वात्॰ तस्माद्गुणस्यैव प्रक
र्षः संभवति न द्रव्यस्येत्याश्रित्यैतदुक्तं॰ अजहत्स्वार्थेति॰ तत्र स्वक्ष्मार्थस्य विद्यमानत्वात्प्रकर्षसंभवः॥ ॥७॥ ॥७॥ ॥७॥

बह्वाच्यतरइति·यद्यत्र बहुव्रीहिं कृत्वा आतिशायिकः क्रियते तदा बहोर्नञ्वदुत्तरपदभूम्नीसंतोदात्तत्वमाद्यशष्टाकारस्य स्यात्·रेफाकारस्य चेष्यते·अ
यमर्थो न्यायसिद्धो यदि समासात्प्रकर्षप्रत्यय उत्पद्यते तदा किं बहुत्वगुणाश्रयः प्रकर्ष उत आच्यत्वाश्रयः प्रत्ययोत्पत्तिनिमित्तमिति संदेहः स्यात्·तस्मा
त्सर्वप्रकर्षस्य विवक्षा पश्चादन्यपदार्थस्य·शाकभोजीति·शाकभोजित्वात्तत्साहचर्यात्तद्व्यपदेशान्नार्थ उत्तरपदलोपेनेत्याहुः॥ . ॥चतुष्पा·॥

बह्वाच्यतर एवं स्वरः प्रसज्यते बह्वाच्यतर इति चेष्यते· बह्वाच्यकतर इति च प्राप्नोति बह्वाच्यतरक इति चेष्यते· समानाधि
करणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च·समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसं
ख्यानं कर्त्तव्यं उत्तरपदलोपश्च वक्तव्यः। शाकभोजीपार्थिवः शाकपार्थिवः। कुतपवासाः सौश्रुतः कुतपसौश्रुतः·अ
जापएपस्तौल्वलिरजातौल्वलिः। यष्टिप्रधानो मौद्गल्यः यष्टिमौद्गल्यः॥ ॥चतुष्पादो गर्भिण्या·॥ ॥चतुष्पाज्जातिरि
[redacted]ति वक्तव्यं·इह मा भूत्·कालाक्षीगर्भिणी·स्वस्तिमतीगर्भिणी·॥ ॥मयूरव्यंसकादयश्च·॥ किमर्थश्चकारः। एव
कारार्थः। मयूरव्यंसकादय एव· क्व मा भूत्· परमं मयूरव्यंसक इति·॥ ॥इति श्रीमहाभाष्ये द्वितीयस्याध्यायस्य प्रथमे पादे
समासाः
तृतीयमाह्निकं·पादश्च समाप्तः॥

चतुष्पाज्जातिरिति· केचिज्जातिग्रहणमनुवर्त्यमित्याहुः। अन्ये त्वाहुः। शब्दान्तरसन्निधिनिरपेक्षा ये च
तुष्पाज्जातिवचनास्त एवान्तरङ्गत्वाद्गृह्यन्ते न तु कालाक्ष्यादयो यौगिकाः शब्दान्तरसन्निधानाच्चतुष्पाज्जातिविषयाः॥ ॥मयूर·॥
मयूर इव व्यंसको धूर्त्तः छात्र इव व्यंसकः कांबोज इव मुंडः इत्युपमानसमासः प्रतिपदविहितोपमानसमासविषयपूर्वपदप्रकृति
स्वरबाधनार्थ इत्याहुः॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे द्वितीयाध्यायस्य प्रथमपादे तृतीयमाह्निकं·॥

अर्द्धं नपुंसकस्याव्यवस्थितत्वात्कृते च समासे पूर्वपदार्थस्य लिंगविशेषानवधारणात्कृतमपि नपुंसकग्रहणं अकृतसममिति मत्वा पृच्छति इहेति किं पुनरि
ति नपुंसकत्वावधारणहेतावर्थे प्रश्नः। अवयववाची पुंल्लिंग इति नियमेन नपुंसकलिंगेन भवतीत्येवंपरमेतत् अवयववाचीत्यभिधेयवशात् सर्वलिंगः
तथा च प्रयोगो दृश्यते अपूपार्द्धं मयाभक्षितं दंतार्द्धं मासस्येति तमिति नरत्र नपुंसकग्रहणात् यस्मिन्नर्थविशेषे नियमेन नपुंसकत्वं तदर्थवृत्तिरेवा

अर्द्धं नपुंसकम्॥ इह कस्मान्न भवति ग्रामार्द्धो नगरार्द्ध इति अर्द्धशब्दस्येदं नपुंसकलिंगस्य ग्रहणं पुंल्लिंगश्चायमर्द्धशब्दः किं पुनरयं नपुंसकलिं
गः किं पुंल्लिंगः समप्रविभागे नपुंसकलिंगः अवयववाची पुंल्लिंगः इह कस्मान्न भवति अर्द्धं पिप्पलीनामिति न वा भवत्यर्द्धपिप्पल्य इ
ति भवति पदाखंडसमुच्चयः अर्द्धं पिप्पली चार्द्धं पिप्पली चार्द्धं पिप्पली च अर्द्धपिप्पल्य इति पदात्वेन तद्वाक्यं भवति अर्द्धं पिप्पलीनामिति
तदा न भवति तत्र तदा कस्मान्न भवति एकाधिकरण इति वर्त्तते न तु हीदानीमपीदं भवति। अर्द्धराशिरिति भवत्येकमेवेदमधिकरणं योसौ
ऽराशिर्नाम॥ ॥

र्द्धशब्दः आश्रीयते तेनैवार्थेन नपुंसकत्वस्याव्यभिचारात् अर्द्धमिति निर्द्देशादेव नपुंसकत्वे लब्धे नपुंसकग्रहणं ज्ञापकं निर्द्देशे पुंल्लिंगाविवक्षायाः
पदान्तरेण तदिति अर्थे प्राप्ते अभिधीयत एवं समासे कृते अर्द्धपिप्पलीसेव स्यात् पूर्वपदार्थस्य प्राधान्यात्तस्य चैकत्वात् अर्द्धराशिरिति राशेरवयवव्यतिरेके
ण सत्त्वादवयवानां बहुत्वादेकत्वाभावं मन्यते एकमेवेति शब्दादेकस्यैवार्थस्य प्रतिरोहितभेदस्यावगमात्॥ ॥ ॥

द्वितीय॑ अन्यतरस्यांग्रहणस्य पक्षे षष्ठीसमासप्राप्त्यर्थं कृतस्य ज्ञापकत्वं नान्तरीयकतया प्रतिपादयितुं पूर्वपक्षोपन्यासः। यद्यपि पारे इत्यत्रायमर्थो
ज्ञापितः तथापि ह्रस्वग्रहणं यत्पुनर्ज्ञाप्यते अवयवविधान इति सामान्याश्रयसमूहापेक्षया प्रतिनियतो विशेष एकदेशो भवतीति विशे
षविषयं विधानमवयवविधानशब्देनोक्तं किमेतस्येति न्यायादेव विशेषविधिः सामान्यविधेर्बाधक इति मत्वा पृच्छति भिन्नमिति विशेषादे

द्वितीयतृतीय॥ अन्यतरस्यांग्रहणं किमर्थं। अन्यतरस्यां समासो यथा स्यात् समासेन मुक्ते वाक्यमपि यथा स्यात् द्वितीयं भिक्षाया इति नैतद
स्ति प्रयोजनं प्रकृता महाविभाषा तया वाक्यमपि भविष्यति। इदं तर्हि प्रयोजनं एकदेशिसमासेन मुक्ते षष्ठीसमासोपि यथा स्यात् भिक्षा
द्वितीयमिति एतदपि नास्ति प्रयोजनं अयमपि विभाषा षष्ठीसमासोपि तावुभौ वचनाद्भविष्यतः अत उत्तरं पठति द्वितीयादीनां
विभाषाप्रकरणे विभाषावचनं ज्ञापकमवयवविधाने सामान्यविधानाभावस्य द्वितीयादीनां विभाषाप्रकरणे विभाषावचनं क्रियते ज्ञापका
र्थं किं ज्ञाप्यते एतज्ज्ञापयत्याचार्यः अवयवविधौ सामान्यविधिर्न भवतीति किमेतस्य ज्ञापने प्रयोजनं छिन्नत्रि भिन्नत्रिश्र पिकृतेश
प्र भवतीति नैतदस्ति प्रयोजनं शबादेशाः प्रपन्नादयः करिष्यं तेन तत्र हि शपो ग्रहणं कर्तृत्वं न कर्तृत्वं प्रकृतमनुवर्तते कप्रकृतं कर्तरि शपा
विहितत्वे प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टे न चेहार्थः इषादिभ्य इत्येषा पंचमी यद्यपि प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति प्रत्ययविधिर
यं न च प्रत्ययविधौ पंचम्यः प्रकल्पिका भवंति नायं प्रत्ययविधिः विहितः प्रत्ययः प्रकृत एवानुवर्तते एवं तर्हि ज्ञापयत्याचार्यः यत्रोत्सर्गापवा
कफलत्वाद्बाध्यबाधकत्वं इह तु भिन्नदेशत्वाद्विरोधाभावो विकरणानां चानर्थक्यादेक " दं विभाषा तत्रापवादेन मुक्ते उत्सर्गो न भवतीति किमेतस्य ज्ञाप
फलत्वाभावो वा त्रिककारस्य मते नेदमुक्तं स हि विरोधाभावे बाध्यबाधकभावं नेच्छति तथा चाह अथ रुज्जकक्ष्यन्नादेशात्वा उत्सर्गप्रतिषेध इति भाष्यकारस्तु विना
पि विरोधेन सामान्यविशेषविध्योर्बाध्यबाधकभावमभ्युपगच्छति अपयोभिधाने साहाय्यकप्रतिपत्तौ एकफलतापन्नयोरस्ति॥ ॥श्री॥ ॥

प्राङ्मुखीति॥ अस्वाङ्गपूर्वपदाद्वेत्यतो ङीब्विधौ वेत्यनुवृत्तिः नैतदस्तीति वार्त्तिककारस्य मतमाश्रित्य प्रयोजनप्रदर्शनं यद्यपूर्वो ङीब्विधीयते तदा प्राग्गुल्फाङ्ग्ज
घ्नेत्यादावपि स्यात् ङीष् एव तु उदात्तविधाने ङीषो न प्रतिषिद्धत्वाद्दोषाभावः। तदेवं नित्यस्वरमात्रविधाने नास्ति सामान्यविशेषविधित्वं इति विषय इति। एका

प्राङ्मुखी प्राङ्मुखा प्रत्यङ्मुखी प्रत्यङ्मुखा ङीषा मुक्ते ङीष् भवति नैतदस्ति प्रयोजनं बह्वचस्येत्यतदिक्पूर्वपदान्ङीषो नुदात्तत्वं ङीब्विधानेऽ
न्यत्रापि ङीब्विषयात् ङीष्प्रसंग इति इदं तर्हि प्रयोजनमर्द्धपिप्पली अर्द्धकोशातकी एकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति उ
न्मत्तगङ्गं लोहितगङ्गं अव्ययीभावेन मुक्ते बहुव्रीहिर्न भवति द्व्याक्षिः त्र्याक्षिः इत्यामुक्तेऽण् न भवति यद्येतं ज्ञाप्यते उपगोरपत्यमौ
पगवः तद्धितेन मुक्ते उपगव्यमिति न सिध्यति अस्त्यत्र विशेषः द्वैप्यत्र विभाषे दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्यो
ऽन्यतरस्यां समर्थानां प्रथमा द्वेति तत्रैकया वृत्तिर्द्विधा पा अपरया त्रिविधये विभाषा पचाद्दः क्रियमाणेपि वै अन्यतरस्यां ग्रहणेप
ष्ठीसमासो प्राप्नोति किं कारणं पूरणेनेति प्रतिषेधात् नैतत्पूरणं तं अन्ना एतत्प्रत्यये वपन्ने एतदपि पूरणं तमेव पूरणं नामार्थं त
माहृतीयशब्दः अतः पूरणं यो सौ पूरणानां तत्त्वार्थे भागे अन्नसोपि पूरणमेवं एवं तत्रैन्यतरस्यां ग्रहणसामर्थ्यात् षष्ठीसमासो भविष्य
१ति॥ ॥

ष्यीभावविषय इत्यर्थः। नैतदिति। पूरणगुणेत्यत्र पूरणाधिकारविहितप्रत्ययान्तग्रहणादिति भावः। अ नैतदिति पूरणग्रागे तीयादन्नितिस्वार्थिकेनाप्य
विहितमित्यर्थः। एतदपीति पूरणगुणसुहितार्थेत्यत्रार्थशब्दस्य प्रत्येकं संबंधात्पूरणार्थग्रहणं ननु तदधिकारविहितप्रत्ययग्रहणमित्यर्थः॥ ॥

प्राप्ता ॥ ॥ अत्वं च भवतीति चकारेण समुच्चयार्थेनाकारप्रश्लेषोऽनुमीयते सौत्रत्वाच्च निर्देशस्य प्रकृतिभावः अप्राप्त्या श्रयो न भवति यद्वा समाहार द्वन्द्वे
ऽत्र ते विषयसप्तम्यप्रकरणादेशापेक्षा क्रियते सुविति चानुवर्तनात् प्राप्तापन्नयोर्दवसंनिधानात् उपसर्जनसंज्ञा भवति सूत्रारंभसामर्थ्याद्वा प्राप्ता जीवकामि
ति लिंगविशिष्टपरिभाषया प्राप्ताशब्दस्य समासः ॥ ॥ कालाः इह रात्रिवाक्ययोः समानार्थत्वं त्वाप्यं मासो जातस्येति च वाक्ये जातस्य विशेषण

प्राप्ता ॥ ॥ किमर्थश्चकारः अनुकर्षणार्थः किमनुकृष्यते अन्यतरस्यामिति तदनुकृष्यते किं प्रयोजनं अन्यतरस्यां समासो
यथा स्यात् समासेन मुक्ते वाक्यमपि यथा स्यात् जीविकां प्राप्त इति नैतदस्ति प्रयोजनं प्रकृता महाविभाषा तया वाक्यमपि भविष्यति
इदं तर्हि प्रयोजनं द्वितीयासमासोऽपि यथा स्यात् जीविकां प्राप्त इति एतदपि नास्ति प्रयोजनं अयमप्यनु(?)ते द्वितीयासमासोऽपि तत उ
भयं वचनाद्भविष्यति एवं तर्हि नायमनुकर्षणार्थश्चकारः किं तर्हि त्वमनेन विधीयते प्राप्तापन्ने द्वितीयान्तेन सह समस्येते अ
त्वं च भवति प्राप्तापन्नयोरिति प्राप्ता जीविकां प्राप्तजीविका आपन्ना जीविकामापन्नजीविका कालाः परि किं प्रधानोऽयं समासः
उत्तरपदार्थप्रधानः यद्युत्तरपदार्थप्रधानः स धर्मेणानेनान्यैरुत्तरपदार्थप्रधानैर्भवितव्यं अन्येषु चोत्तरपदार्थप्रधानेषु येऽवा
सावंतवर्त्तिनी विभक्तिस्तस्याः समासेऽपि श्रवणं भव तिन यथा राज्ञः पुरुषो राजपुरुष इति इह पुनर्वाक्ये षष्ठी समासे प्रथ
मा केनैतदेवं भवति योऽसौ मास जातयोरभिसंबंधः समासे स निवर्तते ॥ ॥

लाद प्रधानत्वं समासे तु मास जातो दृश्यतामिसाद्दौ जातस्यैव कार्यसंबंधावं मात्रप्राधान्यमन्योत्तरपदार्थप्रधानवैधर्म्यं च लक्ष्यत इति मत्वा पृच्छति किं प्रधा
न इति योऽसाविति षष्ठी निर्दृत्तो न्यायकथनं संबंधस्य चांतर्भावादनुद्भव एव निवृत्तिः ॥ ॥ श्री ॥ ॥ ७ ॥

अभिहित इति॥ प्रथमोऽस्ति निमित्तं कथं न मनु द्रूतोऽपि संबन्धो गुणभावे समासाभिधेयत्वादभिहित इत्युच्यते तत्राभिहितोऽपि कश्चिन्नान्तर्भवति यथा राज्ञः पुरुष इत्यत्र वा
क्ये षष्ठ्या संबन्धोऽभिधीयते ननु कश्चिदन्तर्भावमुपयाति राजसखादौ बहुव्रीह्यर्थे स्वान्तर्भावोऽस्ति न त्वभिधानमित्युभयोपादानं इह परिमाणं जातस्य प्रति पादयि
तुं वाक्ये परिमाणिन एव षष्ठी कर्तव्या मासो जातस्येति मासस्य जात इति ह्यभिधीयमाने विवक्षितोऽर्थो न प्रतीयते तत्र यथा चित्रा गावो यस्येति वाक्ये यद्यपि गवां प्राधा
न्यं तथापि चित्रगुरिति वृत्तौ वस्त्राधान्यमेव तथेहापि वृत्तिवाक्ययोः परिमाणिनः प्राधान्यात्प्राधान्ये शब्दशक्तिस्वाभाव्याद्भवतः भवति वा ह्यमिति परिमा
ण परिमाणिसंबन्ध एव समासेऽन्तर्भूतो ननु वाक्यसंबन्धस्यापेक्षो मासजातस्य वस्त्रमिमासादिरपि संबन्ध इत्यर्थः न हि जातस्येति तस्य हि दिव्यादिः परिमाणं ननु मासः

अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः संपन्नः तत्र प्रातिपदिकार्थे प्रथमेति प्रथमा भविष्यति न तर्हीदानीमिदं भवति मासजातस्येति भवति वाक्य
मर्थमभिसमीक्ष्य षष्ठी कालस्य येन समासस्तस्य परिमाणित्वादनिर्देशः कालस्य येन समासः सोऽपरिमाणी तस्यापरिमाणित्वादनिर्देशः अ
गमको निर्देशः अनिर्देशः न हि जातस्य मासः परिमाणं कस्य तर्हि त्रिंशद्रात्रस्य तद्यथा द्रोणो बदराणां देवदत्तस्येति न देवदत्तस्य द्रोणः परि
माणं कस्य तर्हि बदराणां सिद्धं तु कालपरिमाणं यस्य स कालस्तेन समस्यत इति वक्तव्यं
सिध्यति सूत्रं तर्हि भिद्यते यथा न्यासमेवास्तु ननु चोक्तं कालस्य येन समासस्तस्यापरिमाणित्वादनिर्देश इति किं पुनर्भवान्कालं मत्वाह काल
नापितस्तत्राया मासः परिमाणं सत्त्वानि सत्त्वान्यपि जन्मक्रियायास्तस्या एकक्षणभावित्वात् मासेन संबन्धासंभवात् त्रिंशद्रात्रस्येति ननु त्रिंशद्रात्र एव मा
सो नापर इति भेदाभावादयुक्तमेतन्नैष दोषः कालो जातस्य मासेन परिच्छिद्यते तथा हि क्रिया न कालोऽस्य नस्येति मध्ये मास इत्यादि प्रतिवचनं स च परिच्छिद्य
मानत्रिंशद्रात्रात्मक एव संपद्यत इत्यभिप्रायेणैतदुक्तं एतेन देवदत्तेऽप्येतत्प्रतिपत्तव्यमिति सिद्धं त्विति कालशब्देन कालसामान्यमुच्यते यस्य जातादेः संबन्धिनः कालसामा
न्यस्य परिमाणं मासादिस्तेन स कालो मासादिः समस्यते। अथवा कालशब्देन मासादिः कालविशेष उच्यते स कालः परिमाणं यस्य कालसामान्यस्य संबन्धिनस्तेन स कालो
मासादिः समस्यत इत्यर्थः। किं पुनरिति प्रतिदिनं स एको विभुः कालः तदा तस्य भेदाभावात् परिच्छेदकत्वासंभवः अथोपाधिभेदात्तस्य भेदस्तदा तद्भेदभिन्नस्य जातं प्र

भा० कै० २
५७
57

येन मूर्त्तीनामिति तेनरुतगणलताप्रभृतीनां कदाचिदुपचयोन्यदापचयः संप्रत्ययांतराविशेषेपि यत्कृतः समात्म इत्यर्थः ॥ यद्येवं तस्यैकत्वात् कथं महारादिवि भाग इत्याह तस्यैवेति परोपाधिक एव सर्वस्य भेदः तथाचोक्तं हरिणा कालसमुद्देशे तस्यात्मा बहुधा भिन्नो भेदैर्धर्मांतराश्रयैः नहि भिन्नमभिन्नं वा वस्तु किंचन विद्यते नैको नचाप्यनेकोस्ति न शुक्लो नापि चासितः ॥ इमात्मा सतु संसर्गादेवं रूपः प्रकाशते संसर्गिणां तु ये भेदा विशेषास्तस्य तेमताः संभिन्नस्तैर्य्य वस्थानां कालो भेदाय कल्प्यः इति कयाक्रिययेति क्रियाया एकत्वात्तस्याश्च पिभेदकत्वं नास्तीति प्रश्नः ॥ आदित्यगत्येति आदित्यादिसाधनभेदात् भिन्नैव

येनमूर्त्तीनामुपचयाश्चापचयाश्च लक्ष्यन्ते तं कालमिसाहुः तस्यै वहि कयाचित्क्रियया युक्तस्याहरिति च भवति रात्रिरिति च कयाक्रियया आदित्यगत्या तयैवावृत्त्या मास इति च भवति संवत्सर इति च भवति यद्येवं भवति जातस्य मासः परिमाणं एकवचनं द्विगोश्चो पसंख्यानं एकवचनं नानानामिति वक्तव्यं इहमा भून्मासौ जातस्य मासाज्जातस्येति द्विगोश्चेति वक्तव्यमिहापि यथा स्यात् द्विमासजा तस्त्रिमासजातः उक्तं वा किमुक्तं एकवचनेनावउक्तं अनभिधानादिति द्विगोः किमुक्तं उत्तरपदेन परिमाणिना द्विगोः समासव

॥ च नमिति काला: परि ॥

क्रियाख्याते न तु सानि वृत्तभेदोच्यते । शब्दशक्तिस्वाभाव्यान्न तु तस्या भेदो नास्ति यद्येवमिति जातस्य जननक्रिया वधिर्मासेन परिच्छिद्यते न च मासव्यति रिक्तः कश्चित्त्रिंशद्रात्रोत्पत्तिर्यस्य मासः परिमाणं स्यात् न च कालसामान्यं परिच्छेद्यं काल एव हि संसर्गिभेदाद्वा मासादिभेदव्यवहारः क्रियायाः परिमाणं न वृत्त्यंतर स्य अनभिधानादिति समासे द्विलादेरनवगमात् एकत्वत्वात् प्रातिपदिकार्थे सतयाभूतत्वान्त्रित्रीयनेव वृत्त्यंतराननपेक्षत्वाच्च द्वित्वादिकानु संख्यावृत्त्यंतरापे क्षत्वाद्बहिरंगा न उक्तं हरिणा शेषे पि केमासजाते च परिमाणं स्वभावतः उपाधिभूतमाश्रित्य संख्याभेदे न वर्त्तते इति उत्तरपदेनेति तद्धितार्थे तत्रेद मुक्तं तदेव

प्रमा० ५७

=ऽत्रेति नञिति तस्य अर्थो ऽन्यपदार्थः सर्वपदार्थः उत्तरपदार्थे [redacted] वानञ्समस्तेषु एवमर्था नानिर्दिष्टत्वात् अर्थः ॥४॥ यदि चेति । यदि नञा ब्राह्मणार्थ्य अविषयत्वार्थप्रतिषेधः स्याभावविशिष्टबोधस्तदा अभावप्रतियोगी ब्राह्मणः अन्यत्र सर्वात्मना ब्राह्मणेन तत्त्वात् तत्र अर्थस्याभावा

नञ्ग इह ब्राह्मणादिना क्षत्रियादेरभिधानं लोके दृश्यते तत्र प्रक्रियागतगुणदोषनिरूपणाय प्रश्नः किंप्रधान इति त्रयश्चात्र पक्षाः अन्यपदपूर्वपदोत्त
रपदार्थप्राधान्यलक्षणाः संभवन्ति यदा जातौ ब्राह्मणशब्दो वर्तते तदा अविद्यमानं ब्राह्मण्यं यस्य सो ब्राह्मणः क्षत्रियादिः तदान्यपदार्थप्रधानं पदात्वसत्ता
मान्यवृत्तिर्नञ् ब्राह्मणादिभिर्विशेष्यते ब्राह्मण[redacted]त्वेनासत्त्वं अन्यपदानुसन्धेयः क्षत्रियादिर्ब्राह्मणशब्देनोच्यते तदा पूर्वपदार्थः प्रधानं । यदा तु दूरू
पदेशान्मिथ्याज्ञानात् ब्राह्मणशब्दः क्षत्रिये प्रयुज्यते ब्राह्मणपदार्थे निवृत्तिश्च स्वाभाविकी नञा द्योत्यते तदोत्तरपदार्थप्रधानः यद्यपि इहार्थो न निर्दिष्टः तथा
प्यभिधानशक्तिस्वाभाव्याल्लभ्यते हृदवस्तुस्वतन्त्रपदार्थद्वयानवगमात् उभयपदार्थप्राधान्येन नाशक्तितः एवं पक्षत्रयसंभवे त्यप्रतिविधेय पक्षमाश्रयितुमा

=अत्र व्यत्यासाद्भावकत्वात् निकाधिकारब्राह्मणभिन्नस्यार्थः कथितः ॥२॥

नञ् किंप्रधानोयं समासः उत्तरपदार्थप्रधानः यद्युत्तरपदार्थप्रधानः अब्राह्मणमानयेत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोति अन्य
पदार्थप्रधानस्तर्हि भविष्यति परिः अन्यपदार्थप्रधानः अवर्षाः हेमन्त इति हेमन्तस्य यल्लिङ्गं वचनं च तत्समासस्यापि प्राप्नोति पूर्वप
दार्थप्रधानस्तर्हि भविष्यति । यदि पूर्वपदार्थप्रधानं अव्ययसंज्ञा प्राप्नोति अव्ययं त्यस पूर्वे पदमिति ॥ ॥

इह उत्तरपदार्थप्राधान्य इति ब्राह्मणमात्रस्येति । इह नियतगुणस्य गुणविशेषप्रतिपादनाय विशेषणं प्रवर्त्तते न तदुपद्यानपर्यरिचु नञा ब्राह्मणार्थः
प्रतिषिध्यते तदा सर्वात्मना तदर्थस्याभावात् कथं प्राधान्यं स्यात् तस्मात् उत्तविशेषावचनान्नञनर्थक एवेति ब्राह्मणब्राह्मणशब्दयोः पर्यायता प्रसज्येत अ
नारम्भाद् असाधुत्वं एवं भूतस्यार्थवदनर्थकावयवस्य समासस्य स्यात् । अवर्षा इति । न चात्र परवल्लिङ्गता स्तिय स्मान्न्यासमभेदेन द्वन्द्वैकदेशिसमासयोरेवसोक्ता वचनदोषस्त्व
यथा न्यासे प्रपरिहार्ये एवं किं च नञ्समासस्यान्यपदार्थप्रधानत्वे अश्रीयमाणोपकारत्वादनेन बहुव्रीहेर्बाधनाद्ब्राह्मणको देश इत्यादि न सिध्यति । असः असर्वस्मा इति चो
त्तरोपसर्जनत्वात् सर्वादिसर्वनामकार्यप्रसंगः सर्वादीनि सर्वनामानीत्यत्र संज्ञोपसर्जनस्य प्रतिषेधाभिधानात् । अव्ययसंज्ञेति अलिंगमसंख्यमव्ययमिति सर्थाश्रयेण
पदार्थस्यो१ अव्ययसंज्ञाविधानादिति भावः ॥ ८ ॥

पक्षांतराश्रयेणापि परिहारा भवंतीति पाठमाश्रित्याह। नैष दोष इति पाठे नापीति पाठाभावात्समासस्य माभूद् द्रव्यपसंज्ञा लिंगसंख्यायोगस्तु नञर्थप्रधान
त्वाच्च प्राप्नोतीत्यर्थः। नेदं वाचनिकमिति वचनं प्रयोजनमस्येति वाचनिकं एतदुक्तं भवति शब्दशक्तिस्वाभाव्याद् असत्वरूपमर्थं वाक्ये नञाह समासे तु सत्वरूप

=प्रयोजनमितिकरणव्युत्पत्त्या प्रयोजकमित्यर्थः।।२८

नैष दोषः पाठे नाप्यद्रव्यसंज्ञा क्रियते न च नञ्समासस्तत्रोपपद्यते यद्यपि नञ्समासो न तत्रोपपद्यते नञ्तूपपद्यते। पाठे नाप्यद्रव्यसं
ज्ञायां सत्यां अभिधेयवल्लिंगवचनानि भवंति पश्चेहार्थोऽभिधीयते न तस्य लिंगसंख्याभ्यां योगोऽस्ति। नेदं वाचनिकं अलिंगता अ
संख्यता वा किं तर्हि स्वाभाविकमेतत् तद्यथा समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यंते अपरे न न चेदानीं कश्चि
दर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुं कश्चिद्वानर्थक इति सर्वैरनर्थकैस्तत्र किमस्माभिः शक्यं कर्तुं यत्नतः प्राक् स
मासाल्लिंगसंख्याभ्यां योगो नास्ति समासे च भवति स्वाभाविकमेतत्॥ अथवा आश्रयतो लिंगवचनानि भविष्यंति गुणवच
नानां हि शब्दानामाश्रयतो लिंगवचनानि भवंति तद्यथा शुक्लं वस्त्रं शुक्ला शारी शुक्लः कंबलः शुक्लौ कंबलौ शुक्लाः कंब
ला इति यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिंगं वचनं च तद् गुणस्यापि भवति एवमिहापि यदसौ द्रव्यं श्रितो भवति॥ ० ॥

पं केचिदर्थैरिति धर्मो धर्मेषु शास्त्र। अथ वेति। ब्राह्मणाभावस्य गुणत्वात्तद्युक्तद्रव्याभिधायित्वाच्च समासस्य क्षत्रियाद्याश्रयगते लिंगसंख्ये भविष्यत इ एम०
त्यर्थः। पूर्वत्र स्वाभाविकदर्शने साक्षादेव लिंगसंख्यायोगः॥ इह त्वाश्रयद्वारक इति विशेषः॥ ॥ ७ ॥ ॥ ५८

समास इति॥ समासार्थ इत्यर्थः। अत्रापि पक्षे दोषः प्रदितावत् स्वाभाविकदर्शनमाश्रीयते तदानेनापवादत्वादव्ययीभावस्य बाधनप्रसंगाद् मक्षिकमित्यादि
न सिध्यति तस्मात्तु निर्मक्षिकमित्यादिरवकाशः। अस्य सर्वस्मा इत्यादौ पूर्ववत् स्याद्यसिद्धिः स्यात् आश्रयद्वारकलिंगसंख्याभ्युपगमे अवर्षो हेमंतोऽर्थः स्त्री
त्यादौ हेमंताद्याश्रयगतलिंगसंख्या प्रसंग इत्यालोच्याह अथ वेति एतत्तदोः सुलोप इत्यत्र नञ्समासग्रहणं लिंगमुत्तरपदार्थप्रधानत्वस्य अन्यथैतत्तदोर
र्थद्वारेण संबंधिनः सुशब्दस्य लोपो विधीयमानो नञो द्वारा स सोऽददातीत्यत्र कथं प्राप्नुयात् नञ्विशिष्टस्येति आरोपितब्राह्मणस्य क्षत्रियादेरित्यर्थः कः पुन
= अर्थद्वारेणेति। एवं परस्मैपददत्ता [illegible] भावादिति भावः। १२
समासस्तस्य यल्लिंगं वचनं च तत्समासस्यापि भविष्यति अथवा पुनरस्तु उत्तरपदार्थप्रधानः ननु चोक्तमब्राह्मणमानयेत्युक्ते ब्राह्मणमात्र
स्यानयनं प्राप्नोतीति नैष दोषः इदं तावदयं प्रष्टव्यः अथेह राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं कस्मान्न भवति अस्त्यत्र विशेषः रा
जाविशेषकः प्रयुज्यते तेन विशिष्टस्यानयनं भवति इहापि तर्हि नञ्विशेषकः प्रयुज्यते तेन नञ्विशिष्टस्यानयनं भविष्यति कः पुनरसौ
निवृत्तपदार्थकः यदा पुनरस्य पदार्थो निवर्त्तते किं स्वाभाविकी निवृत्तिराहोस्विद्वाचनिकी किं चातः यदि स्वाभाविकी किं नञ् प्रयुज्यमानः क
= [illegible] भावाभावयोरिति। १२
रोति॥ ०
रस्यावितिभावाभावयोर्विरोधात् नञ्विशिष्टे ब्राह्मणार्थो नोपपद्यते निवृत्तपदार्थक इति निवृत्तः पदार्थो मुख्यब्राह्मणं यस्मिन् स क्षत्रियादिरित्यर्थः सा
दृश्यादिना आरोपितब्राह्मणेन नञ् द्योतिततद्वस्थ इत्यर्थः॥ इदानीं नञो वाचकत्वद्योतकत्वपरीक्षणायाह यदा पुनरिति किं स्वयं निवृत्तस्य ब्राह्म
णपदार्थस्य नञा निवृत्तिर्द्योत्यते अथ स्थितस्यैव नञा निवृत्तिः क्रियते मंत्रे शेषवित्प्राप्तादि सामर्थ्यस्येति प्रश्नः किं न जिते ब्राह्मणशब्द एवाराच्छ
इदं परमदूरं च विद्यमानब्राह्मणमविद्यमानब्राह्मणं वक्ष्यत्रियादिकं वक्ष्यतीति नास्ति नञो व्यापार इत्यर्थः॥ ॥ ॥

भा०कै०२ प्रत्ययेति। नञः पदार्थनिवृत्तौ सामर्थ्यस्याप्रसिद्धत्वात् पूर्वमेतद्वक्तव्यमिति सोऽयमसमुपदृष्ट इति नञ्प्रयुज्यमान इति ननु स्वाभाविकनिवृत्तिदर्शनेन कथं पदार्थे न
५८ नञ् निवर्त्येत वा वाचनिकनिवृत्तिदर्शनेन द्योतत इत्युपते वक्तुं एवं तर्हि पदार्थप्रत्यय एव प्रचारणात् पदार्थे शब्दे नोच्यते यथा सिंहमध्यापयेदिति सिंहशब्दे न माण
59 वक इत्यर्थः अयमत्रार्थः केवलो ब्राह्मणशब्दः प्रयुज्यमानः प्रसिद्धिवशान्मुख्य एव ब्राह्मणार्थे प्रत्ययमादधाति नञ्प्रयोगे तु निवृत्तपदार्थक
णत् त्वा ब्राह्मणशब्दस्य प्रतीयते यथा प्रतिष्ठत इत्यत्र यद्यपि तिष्ठतिरेव गतिवचनस्तथापि तस्मिन् केवले प्रयुज्यमाने प्रस्थानं न गम्यत इति द्योतकत्वे
न प्रश्नोपपेक्ष्यते तथेह नञ् पदार्थे शब्दे न पदार्थप्रत्यय उपचारादुच्यते कथं पुनः स्वहेतोरुत्पद्यमानः पदार्थप्रत्ययो नञा निवर्त्येत इत्या

अथवा वाचनिकी तद्वक्तव्यं नञ् प्रयुज्यमानः पदार्थं निवर्तयतीति एवं तर्हि स्वाभाविकी निवृत्तिः ननु चोक्तं किं नञ्प्रयुज्यमानः करोतीति न नी९
प्रयुज्यमानः पदार्थं निवर्तयति कथं कीलप्रतिकीलवत् तद्यथा कीलमाहन्यमानः प्रतिकीलं निर्हन्तीति यद्येतन्नञो माहात्म्यं स्यात्
न जातु चिद्राजानो हस्त्यश्वं बिभृयुः नैव राजानो ब्रूयुः एवं तर्हि स्वाभाविकी निवृत्तिः ननु चोक्तं किं नञ्प्रयुज्यमानः करोतीति। न
न्निमित्तात् उपलब्धिः तद्यथा सम्यग्धकारे द्रव्याणां समवस्थितानां प्रदीपनिमित्तं दर्शनं न च ते प्रदीपो निवर्तको भवति। प्रदीपु
=[illegible]सर्थः।२= ॥ न रयं निवृत्तपदार्थको ब्राह्मणशब्दः किमर्थं प्रयुज्यते॥ ॥ ॥

हकीलप्रतिकीलवदिति यथा महता कीलेन प्रतिकील उत्खन्यते। तथा क्षत्रिये सादृश्यादिनिमित्तोत्पन्नस्य ब्राह्मणप्रत्ययस्य नञ्प्रयोगे निवृत्तिरित्यर्थः॥ इतरोऽपयोज्यम
भिप्रायमप्रतिपद्य पदार्थ एव नञा निवर्त्येत इति ज्ञात्वा पर्यनुयुंक्ते यद्येतदिति प्रश्ननिवारणाय नञ्मेव प्रयुञ्जीरन्न तु न दर्घे हस्त्यश्वादि विभृयुरित्यर्थः। इदानीमभिमा
यस्य रूपितुमाह। एवं तर्हीति नञ्निमित्तेति क्षत्रियादौ सादृश्यनिमित्तादारोपितं ब्राह्मण्यं न तु तात्त्विकमिति नञ्प्रयोगेण द्योत्यत इत्यर्थः। यदि पुनरिति। प्रत्यये प्रत्यायनाय श एम० ५९
ब्दः प्रयुज्यते सैव चेन्निवृत्तः किमर्थमसौ प्रयुज्यते॥ ॥श्री॥ ॥७॥ ॥

=वेदुन्नोसंदेहः स्यादिति भाष्ये नञुसमभिव्याहृतपञ्चमुख्यार्थकत्वरूपयोग्यतासंभवान्नोपलक्षणत्वं ततः प्रयोगाद्द्रष्टव्योतिरेकं तदर्थे न्ययोग्यपदाक्षेपकत्वमपि क्वचिद्द्योतकत्वं यथा प्रादेशं विमिमीते इत्यत्र विवेकिमाये दिव्यत्वं ताक्षेपकत्वं तथा नञः प्रतियोगिवाचकपदाक्षेपकत्वं तत्र च

प्रकरणप्रमाणेऽर्थे [illegible] प्रतियोगि नञः स्वार्थिकी स्यादिति ॥२८॥

एवं यथेत्यादि प्रतिषेधविषयप्रदर्शनाय बुद्ध्या ब्राह्मणार्थे निरूप्यत इत्यत्र क्षत्रियादौ मुख्यसत्ताविरहप्रतिपादनाय नञ् सहितो ब्राह्मणशब्दः प्रयुज्यत इत्यर्थः स वेद जितत्र पक्षे वशुणसमस्ताभाविकी निवृत्तिः न स्ये वासो नञ्ज्योत्सते अवशिष्टानां तु गुणानामर्थात्सद्भावो गम्यते गुणशब्देन चात्र धर्ममात्रं परामृश्यमुच्यते स्मृतिशास्त्राश्रयेण निदर्शनाय ब्राह्मणस्य गुणानाह तप इति तपश्चान्द्रायणादिकर्म श्रुतं वेदवेदाङ्गादीनामध्ययनं योनिर्ब्राह्मणत ब्राह्मण्यां जन्म ब्राह्मणकारकमिति शेषः षष्ठीसमासः ब्राह्मणव्यपदेशस्य तत्कारकं निमित्तमित्यर्थः गुणसमुदायाभावेऽपि तदेकदेशे प्रयोगदर्शनादाह तपः श्रुताभ्यां

एवं यथा विज्ञायेत अस्य पदार्थो निवर्तत इति नेत्युक्ते संदेहः स्यात् कस्य पदार्थो निवर्तत इति तत्रासंदेहार्थो ब्राह्मणशब्दः प्रयुज्यते एवं चेन तत अथ वा सर्व एते शब्दा गुणसमुदायेषु वर्तन्ते ब्राह्मणः क्षत्रियो वैश्यः शूद्र इति तपः श्रुतं च योनिश्चेत्ये तत् ब्राह्मणकारकं तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः तथा गौरः शुच्याचारः पिङ्गलः कपिलकेश इत्येतानप्यभ्यन्तरान् ब्राह्मण्ये गुणान् कुर्वन्ति समुदायेषु च वृत्ताः शब्दाः अवयवेष्वपि वर्तन्ते तद्यथा सर्वे पञ्चालाः उत्तरे पञ्चालाः तैलं भुक्तं घृतं भुक्तं शुक्लो नीलः कपिलः कृष्ण इति एवमयं समुदाये ब्राह्मण

॥ शब्दः प्रवृत्तोवयवेष्वपि वर्तते जातिहीने गुणहीने च गुणहीने तावत् अब्राह्मणोऽयं ॥ ॥

मिति अधुना लोकप्रसिद्धानवादरुत्ये न तथा दृष्टान्तगुणानाह गौर इति सर्वे पञ्चाला इति अवयवे समुदायरूपारोपाच्छब्दप्रवृत्तिर्विज्ञेया न तु शब्दः स्वार्थे परिसज्य अर्थान्तरं वक्तुं समर्थः संबन्धस्यानित्यत्वाप्रसंगात् तैलमिति यदा संस्कारादियुक्तं विशिष्टमात्रापरिमितं समुदायमाह तैलशब्दस्तदा समुदायवचनो यदा तु जातिशब्द एवायं शुक्ल इति स यमशुक्लोप्यवयवः शुक्लावयवान्तरासादितशोक्ल्यसमुदायरूपारोपेण शुक्लशब्दाभिधेयस्तदेव समुदाहरणं स्वयं लवयवस्य शौक्ल्यो मुख्य एव

॥ शुक्लशब्दः ॥ ॥१०॥

यस्तिष्ठन्निति। तपःश्रुतयोरभावान्निंदया त्याग ब्राह्मणशब्दप्रयोगस्तत्र जातिमात्रे ऽवयवे समुदायरूपारोपाद्ब्राह्मणशब्दप्रयोगेन त्वानुस्वाभाविकीत तपःश्रुत नि
वृत्तिर्घोत्यते ऽनेन च भिन्नविषयत्वं पूर्वे पदे ऽन्तर पदयोराशंकनीयं द्वयोरपि समुदायविषयत्वात् एकदेशनिवृत्तिसद्भावप्रतिपादनद्वारेण जातिहीने इति तत्र तु स्व
स्य ब्राह्मणशब्दस्य प्रवृत्तिरध्ययनादिगुणसद्भावप्रतिपादनाय संदेहादिति संदेहनिमित्तगुणः संदेहशब्देनोक्तः गुणैकदेशदर्शनाच्च गुणसमुदा
यस्य सन्निधिमवसाय यदप्रमाणं तरेण जात्यभावं प्रतिपाद्य तेनतरां तद्द्योतनाय नञ् प्रयुक्तोऽब्राह्मणोऽयमिति। जातिकृतेति जातस्याभावकृतेत्यर्थः यथा

यस्तिष्ठन्मूत्रयति स ब्राह्मणोऽयं यस्तिष्ठन्भक्षयति जातिहीने संदेहात् दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते संदेहात्तावत् गौरं शुच्या
चारं पिंगलं कपिलकेशं दृष्ट्वाध्यवस्यति ब्राह्मणोऽयमिति ततः पश्चादुपलभते नायं ब्राह्मणः अमुष्मिन्नवकाशे ब्राह्मणोऽयमिति। तत्र संदेहाद् ब्राह्मण
शब्दो वर्तते जातिकृताचार्यस्य निवृत्तिः दुरुपदेशाच्च दुरुपदिष्टमस्य भवति अमुष्मिन्नवकाशे ब्राह्मणस्तमानयेति स तत्र गत्वायं पश्यति तमध्यव
स्यति ब्राह्मणोऽयमिति ततश्च पश्चादुपलभते नाब्राह्मणः अब्राह्मणोऽयमिति निर्ज्ञातं तस्य भवति तत्र दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते जातिकृ
ताचार्यस्य निवृत्तिः आतश्च संदेहात् दुरुपदेशाद्वा न ह्ययं कालं माषराशिवर्णमापणे आसीनं दृष्ट्वाध्यवस्यति ब्राह्मणोऽयमिति निर्ज्ञातं तस्य भव
वर्षकृतं दुर्भिक्षमिति। अर्थस्येति। समुदायस्येत्यर्थः। अयमत्रार्थः एकदेशविगमात्समुदायो निवृत्त उच्यते एकदेशांतरसद्भावाच्च तस्य सद्भावोऽभिधीयते यथैकदेश
करणाकरणाभ्यां कृताकृतः संघात उच्यते माषराशिवर्णमिति कालत्वविशेष प्रतिपादनपरमेतत् आपणे आसीनमिति आचाराभावकथनं निर्ज्ञातमिति भ्रांतिबी
जाभावात्तथास्थितं वस्तुतत्त्वं तस्य ज्ञातमिति ब्राह्मणारोपाभावात् ब्राह्मणशब्दस्य तत्राप्रयोगाद् ब्राह्मणशब्दस्यापि प्रयोगाभाव इत्यर्थः। तदेवं दोषपरिहारादुत्तरपदा
र्थप्रधानत्वं स्थापितं॥ १२॥

इदानीं तत्रैवोपचयमाह । इदं खल्वपीति । अनेकमिति उत्तरपदार्थप्रधानत्वे सति प्रधानगतसंख्या अयमेकवचनं सिध्यतीत्यन्वये इत्यर्थः । कथं पुनरिति । अनेकशब्दो
यदि बहूनां वाचकस्तदा बहुवचनं प्राप्नोतीत्यर्थः । एकत्वप्रतिषेधमात्रमस्यार्थस्तदानेको जन आगत इति बहूनां संप्रत्ययो न प्राप्नोति प्रसज्यायमिति विधायेत्यर्थः । निरा
श्रययोश्चैतयोरसंभवाद् नियतसंख्या उत्थाक्षेपे सत्येकप्रतिषेधाद् बहूनां प्रतीतिरित्यर्थः । एतच्च प्रसज्यप्रतिषेध उच्यते । पर्युदासे तु द्व्यादिसंख्या उक्त एवाने
कशब्दस्यार्थः । यस्माद् द्व्यादिष्वेकत्वमारोप्य प्रतिषिध्यते यथा अक्षत्रियाद्द्वौ ब्राह्मणत्वं ततो यथा अब्राह्मणः क्षत्रियादिरुच्यते तथा अनेकशब्देन संख्यान्तरमु

इदं खल्वपि भूयउत्तरपदार्थप्राधान्ये सति संगृहीतं भवति । किं अनेकमिति किमत्र संगृहीतं एकवचनं कथं पुनरेकस्य प्रतिषेधे द्विबहूनां सं
प्रत्ययः स्यात् प्रसज्यायं क्रियागुणौ ततः पश्चान्निवृत्तिं करोतीति यथा अप्रशायय भोजय अनेकमिति यद्यपि तावदत्रैतच्छक्यते वक्तुं य
त्र क्रियागुणौ प्रसज्येते यत्र खलु पुनर्न प्रसज्येते तत्र कथमनेकं तिष्ठतीति भवति चैवंजातीयकानामप्येकस्य प्रतिषेधे न बहूनां संप्र
त्ययः । तद्यथा न न एकं प्रियं न न एकं सुखमिति ॥ ॥

क्तः यत्र तु खल्विति यत्र तु पूर्वमेव प्रतिषेधः पश्चात् क्रियागुणविधानं तत्र कथं बहूनां संप्रत्यय इति प्रश्नं भवतीत्यर्थः । आख्यातस्य पश्चात्प्रयोगे सत्यपूर्वं
बाधात्वर्थेन नञावकारः कस्मात् हेतोर्वशं भावीति तत्रैकप्रतिषेधे सामर्थ्याद् द्वित्वादियोगिसाधनाक्षेपः । न न इति । आबाधे चेति द्विर्वचनं शत्रोः प्रियेण सुखेन च प्रयो
गेण बाधो न इति वा षष्ठी अत्रैकप्रतिषेधे सामर्थ्याद् द्वित्वसंख्यान्तरमुक्तं वस्तु प्रतीतिः अन्यथा न प्रियमित्येव वाच्यं स्यात् तस्माद्यत्र वाक्येपि सामर्थ्यात् संख्यान्तरगतिर्भ
वति तत्र समासे वा कस्मिन् क्षणे धर्मप्रादुर्भावहेतौ किं न भविष्यतीत्युक्तं भवति ॥ ॥ ॥ ॥

भा॰कै॰२
६१
61

अब्राह्मणत्वमिति न ब्राह्मणस्य भाव इति युगपद्भाव प्रतिषेधसंबंधविवक्षायां प्रत्यय समासप्रसंगे परत्वात्प्रत्ययः स्यात् पुनः प्रसंग विज्ञानाच्च पश्चा-
न्नञ्समासः क्रियते तदा तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरेणाद्युदात्तं पदं स्यात् प्रत्ययस्वरश्चेष्यत इति नञ्समासे नु कृते त्वतलौ कार्यौ तत्राभावप्रत्य-
यत्वात्वतलोः सर्वस्य सापेक्षत्वादसामर्थ्यान्न भवति नञ्समासस्तु प्रधानस्य सापेक्षत्वाद्भवतीत्याहुः॥ ॥ईषत् ईष द्गार्ग्ये इतियथैकार्थे समवेत

इहाब्राह्मणत्वमब्राह्मणतापरत्वात् त्वतलौ प्राप्नुतः तत्र को दोषः स्वरे हि दोषः स्यात् अब्राह्मणत्वमित्येवं स्वरः प्रसज्येत अब्राह्मण-
त्वमिति चेष्यते नञ्समासे भाववचने उक्तं किमुक्तं त्वतलभ्यां नञ्समासः पूर्वविप्रतिषिद्धं त्वतलोः स्वरसिद्ध्यर्थमिति नञ् ईषद-
कृता ईषद्गुणवचनेन नञ् ईषद्गुणवचनेनेति वक्तव्यं अकृतेति ह्युच्यमाने इह च प्रसज्येत ईषद्गार्ग्यः इह च न स्यात् ईषत्कडारः इति ई-
षद् षष्ठी कृद्योगा च कृद्योगा च षष्ठी समस्यत इति वक्तव्यं इध्मप्रव्रश्चनः पलाशशातनः किमर्थमिदमुच्यते प्रतिपदविधा
ना च षष्ठी न समस्यत इति वक्ष्यति तस्यायं पुरस्तादपकर्षः॥ ॥

क्रियागुणापेक्षया जातेः प्रकर्षादियोगः गार्ग्येत रो गार्ग्यपाश इति नत्थेषदर्थे नापि योगः ईषत्कडार इतिं गडेः कडुचे स्यात् नु प्रत्ययान्तत्वात् कृदन्तः कडा-
रः शब्दः क्रियाकारकसंबंधसापेक्षप्रत्ययान्तः कृदन्त इति केचिदाहुः तदयुक्तं कृच्छ्रेण हि कृतं संज्ञकः प्रत्यय उच्यते अथा पुराणादीनामव्युत्पत्तिपक्षाश्रयणा-
दत्र समासः स्यात् तथापीषद्गुणं ईषद्गुणनतरस्त्वत्र न स्यात्॥ ॥षष्ठी किमर्थमिति सूत्रे योगविभागात्समासः सिद्ध इति प्रश्नः। अपकर्ष इति अपवादत्वसर्थे॥ एम॰ ६१

कापुनरिति॥ प्रतिपदविधानायामपि समासप्रतिषेधविषये कृद्योगोऽस्ति कृद्योगायामपि प्रतिपदविधानमिति विषयविभागाज्ञानात् पृच्छति सर्वैव षष्ठीति
साक्षादनुकारकविशेषोपादानेन विधानात् प्रतिपदविधाने सर्वथाः। कृच्छब्दोपादानेन नतु यावि हिता सैव कृद्योगोच्यते तत्र शेषविवक्षायां षष्ठी शेष इत्यनेन
विहितायां षष्ठ्यां ज्ञोऽविदर्थस्य करण इत्यादिप्रकरणं समासनिवृत्त्यर्थमेवारब्धं षष्ठी भवत्येव श्रूयत एव नतु तस्याः समासो भवतीत्यर्थः। समासे हि सति त
स्या रूपाभावः स्यात्। तस्मात्प्रतिपदविधानेति न वक्तव्यं तस्मिन्नेव समानेन कृद्योगेति न वक्तव्यं। अप्रतिषेधविषये विधानार्थत्वात् कर्तृकर्मणोः कृतीत्यस्य समासनिवृ
त्तौ सामर्थ्याभावात् सूत्रेऽस्मिन्नेव समासस्यासिद्धत्वात् प्रतिप्रसवप्रसंगेनाप्युक्तदपि कृष्यते तस्येति न च्छब्देन सन्निधानात् गुण एव परत्र मत्वर्थे नेनायमर्थः स्वात्मनि ये
गुणाः अवस्थितास्तैः सह समासो न च स्वात्मन्यवस्थानं गुणानां भवति भेदनिबंधनत्वात् मुख्या धाराधेयभावस्य सर्वस्य च गुणस्य द्रव्याश्रयत्वात्

कापुनः षष्ठी प्रतिपदविधाना का च कृद्योगा सर्वैव षष्ठी प्रतिपदविधाना शेषलक्षणां वर्जयित्वा कर्तृकर्मणोः कृतीति तु या षष्ठी सा कृद्योगा तस्यैव गुणैः
न तस्यैव गुणैः षष्ठी समस्यत इति वक्तव्यं। ब्राह्मणवर्णः चंदनगंधः पटस्य शुक्लः नारीघोषः न तु तद्विशेषणैः॥ ॥ ॥

स्यादभिधानव्यापारापेक्षया तस्यत्वमुच्यते इह केचित् गुणाः शब्देन द्रव्यान्निष्कृष्टा एव प्रत्याय्यंते न तु द्रव्यस्योपरंजकत्वेन यथा चंदनस्य गंध इति सर्वदा वैयधिकरण्ये
न गुणगुणिनोः न कदाचिच्चंदनं गंध इति सामानाधिकरण्यं भवति शुक्लादयस्तु गुणाः कदाचिन्निष्कृष्टरूपाः शब्देनोच्यंते पटस्य शुक्ल इति कदाचित् द्रव्येणैकत्वमापन्नाः
शुक्लः पट इति। तस्मात् तद्विविधगुणासद्भावात्तस्येति विशेषणं रूपादिगुणपरिग्रहार्थमुपात्तमिति। ब्राह्मणवर्ण इत्युदाहरणं अथ बलाकायाः शौक्ल्यमिति समासः
कस्मान्न भवति तस्य हि शौक्ल्यं सर्वदा वैयधिकरण्येन संबंधात्। नैष दोषः शौक्ल्यशब्देन शुक्लो गुणोऽभिधीयते शुक्लशब्दस्य द्रव्येवर्तमानस्य तस्मिन्नेव प्रवृत्तिनिमित्ते
भावप्रत्ययविधानात्। न चासौ तस्य अभेदाध्यवसायेन द्रव्यमस्तु रंजकत्वदर्शनाच्छुक्लः पट इति अर्थस्य च तस्य त्वमाश्रीयत इति शब्दभेदे प्यर्थस्याभेदात् नास्ति शु
क्लस्य गुणस्य तस्यत्वं रूपवान् पट इत्यादौ तु नास्ति गुणगुणिनोरभेदाध्यवसायं भेदाश्रयेणैव मत्वर्थीयप्रयोगादिति रूपस्य तस्यत्वमव्याहतमिति पटरूपमिति समासो
भवत्येव॥ ॥

भा० कै० २
६२
62

ननु तद्विशेषणैरिति। तच्छब्देन गुणाः परामृश्यन्ते तेषां गुणानां यानि विशेषणानि तद्वचनैः सह समासो न भवतीत्यर्थः। घृतस्य तीव्र इति तीव्रो गन्धस्य विशेषणं चंदनस्य मृदुरिति स्पर्शस्य मृदुत्वविशेषणं ननु घृतस्य गन्धेन संबन्धो न तु तद्गुणेन तीव्रेण विशेषणेनेति सामर्थ्याभावात् समासस्य प्राप्तिरेव नास्ति तत्किं प्रतिषेधेन एवं तर्हि यदा प्रकरणादिवशात्तीव्रशब्द एव विशिष्टगन्धवृत्तिस्तदा तद्योपजनित एव व्यतिरेके घृतस्येति षष्ठी तदा षष्ठीति समासप्रसंगः प्रकृष्टगन्धविशेषवचनस्तीव्रशब्दस्तस्य द्रव्यवाचिना सामानाधिकरण्याभावाद्गन्धशब्दस्येव तत्स्थगुणाभिधायित्वात् न तु समासप्रसंगे

ननु तद्विशेषणैरिति वक्तव्यं इह माभूत् घृतस्य तीव्रो गन्धः चंदनस्य मृदुरिति किमर्थमिदमुच्यते गुणेनेति प्रतिषेधं वक्ष्यति तस्यायं पुरस्तादपकर्षः किं पुनः कारणं गुणेनेत्युच्यते न पुनर्गुणवचनेनेत्युच्येत नैवं शक्यमिह हि न स्यात् काकस्य कार्ष्ण्यं बलाकायाः शौक्ल्यमिति एतदेव खल्वपि तस्मिन्योगे उदाहरणं यद्वीदं ब्राह्मणस्य शुक्लाः वृषलस्य कृष्णाः। असामर्थ्यादत्र न भविष्यति कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति द्रव्यमत्रापेक्ष्यते दंताः तस्माद्गुणेनेति वक्तव्यं गुणेनेत्युच्यमाने तत्स्थैश्च गुणैरिति वक्तव्यं। तत्स्थैश्च गुणैरित्युच्यमाने ननु तद्विशेषणैरिति वक्तव्यं। षष्ठीनिर्धारणे प्रतिपदविधानाच्च प्रतिपदविधाना च षष्ठी न समस्यत इति वक्तव्यं इह माभूत् सर्पि

प्रतिषेध उच्यते ननु च तीव्रं घृतं मृदु चंदनमिति सामानाधिकरण्यदर्शनात्तत्स्थत्वाभावात् समासप्रसंगात् तत्प्रतिषेधो नर्थकः एवं तर्हि सौत्रस्य प्रतिषेधस्य विषयकथनं ननु तद्विशेषणैरिति तत्स्थत्वाभावान्नैः समासः प्रतिषिध्यत एवेत्यर्थः न पुनरिति तत्र गुणोपसर्जने न द्रव्यवाचिना समासो निषिध्यते इति केवलगुणवाचिना रूपादिशब्देन समासो भविष्यतीत्यर्थः। एतदेवेति केवलगुणवाच्येवेत्यर्थः। द्रव्यमत्रेति तत्र च दंतापेक्षया ब्राह्मणस्येति षष्ठी शुक्लार्थेन संबंधा ॥
भावात्समासस्य प्रसंगाभावात् नार्थः प्रतिषेधेन॥ ॥ राम०
६२

पूरण ॥ अर्थे शब्दस्य प्रसेकं संबंधात् गुणेति स्वरूपग्रहणं न भवतीति नाप्यदेङां किं तर्हि सत्त्वे निविशते पैती से न स्वलक्षणलक्षितो गुणो गृह्यते संसर्गिभेदकमित्या
दिलक्षणयुक्तो गृह्यते सामान्यादेरपि ग्रहणप्रसंगात् नापि शुक्लादेरेव ग्रहणं कंटकस्य तैक्ष्ण्यमित्यस्योदाहृतत्वात् गो विंशतिरित्यादौ संख्यायाः समासो न
निषिध्यते शतसहस्रान्ताच्च निष्कात् क्रोशशत योजनशतयोरुपसंख्यानं खरीशतमपि ददातीति मुनित्रयवचनात् ज्ञापकादुत्तरपदार्थस्याधा
न्यमिसादेः स्वमुनिप्रयोगादस्य प्रतिषेधस्यानित्यत्वाद्वा गोरश्वादिशब्दसिद्धिः गुणेकिमिति वक्ष्यमाणोऽभिप्रायः भवतीति यदा प्रकरणादिव

पूरणगुणसुहितार्थेति किमुदाहरणं ब्राह्मणस्य शुक्लाः वृषलस्य कृष्णाः इति नैतदस्ति प्रयोजनम् असामर्थ्यादत्र न भविष्यति कथमसाम
र्थ्यं सापेक्षमसमर्थं भवतीति द्रव्यमत्रापेक्ष्यते दन्ताः इदं तर्हि काकस्य कार्ष्ण्यं कंटकस्य तैक्ष्ण्यं बलाकायाः शौक्ल्यमिति इदं चाप्युदाहरणं ब्रा
ह्मणस्य शुक्लाः वृषलस्य कृष्णा इति ननु चोक्तमसामर्थ्यादत्र न भविष्यति कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति द्रव्यमत्रापेक्ष्य
ते दन्ता इति नैष दोषः भवति वै कस्यचिदर्थात्प्रकरणाद्वापेक्ष्यं निर्ज्ञातं तदा हत्त्रिः प्राप्नोतिः सति किमुदाहरणं ब्राह्मणस्य पक्ष्मन् ब्राह्म
णस्य पक्ष्माणः नैतदस्ति प्रतिषिध्यतेऽत्र षष्ठी लप्रयोगे नेति या च श्रूयते एषा बाह्यमर्थमपेक्ष्य भवति तत्रासामर्थ्यात् भविष्यति कथम्
“ सामर्थ्यं सापेक्षमसमर्थं भवतीति द्रव्यमत्रापेक्ष्यते ओदनः इदं तर्हि ॥ ॥ ॥

यगादन्ताद्यर्थ एवावसितवृत्तिः शुक्लादिशब्दस्तदा तदर्थोपजनित एव ब्राह्मणादेर्व्यतिरेक इति सामर्थ्यसद्भावात्समासप्रसंग इत्यर्थः । ननु गुणस्य गु
णपेक्षत्वाद्गुणिन एव समासनिषेधेन भाव्यं न च ब्राह्मणः शुक्लगुणाधारः नैष दोषः गुणशब्देन केवलगुणवाचिनो गुणोपजनद्रव्यवाचिनश्चाप्रि
न्यायाश्रयेण ग्रहणं तदिति गुणिनो गुणाधारसंबंधिनश्चोपपन्नः समासप्रतिषेधः प्रतिषिध्यतेत्रेति प्रावर्जेन वाचिपच्याश्रयेण ब्राह्मणं पचेः कर्म्ममस्यते
यथा सलोकपङ्क्तिर्लोकावर्जेनमित्यर्थः ततश्च ब्राह्मणस्येति षष्ठी पाकापेक्षया कर्म्मणि न भवतीत्यर्थः ॥ ॥ ॥

चोरस्य द्विषन्निति॥ नौ सदिस तत्र नौ ग्रहणस्योपाध्यसंसर्गार्थत्वात् द्विषो मित्र इत्येन तत्सूत्रविहितोपि शतामत्संज्ञः नन्वचात्रापीति तृन्निति प्रत्याहारे
ण शतुरपि ग्रहणं तं सूर्यस्योदेतोरिति सूर्योदयात्पूर्वमित्यर्थः। वक्ष्यस्योपरीत्यादीन्युदाहरणानि। राज्ञः पाटलिपुत्रकस्येति विशेषणसमा

चोरस्य द्विषन् वृषलस्य द्विषन् नन्वचात्रापि प्रतिषिध्यते वक्ष्यत्येतद्विषः शतुर्वा वचनमिति अव्ययेक्रिमुदाहरणं ब्राह्मणस्यो
च्चैर्वृषलस्य नीचैरिति नैतदस्ति असामर्थ्यादत्र न भविष्यति कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति द्व्यमत्रापेक्ष्यते। आस
नं इदं तर्हि ब्राह्मणस्य कृत्वा वृषलस्य कृत्वेति एतदपि नास्ति प्रतिषिध्यते तत्र षष्ठी अव्ययप्रयोगे नेति याच श्रूयते एषा
वास्यार्थमपेक्ष्य भवति तत्रासामर्थ्यात्त्र भविष्यति कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति द्व्यमत्रापेक्ष्यते कटः इदं तर्हि
पुरा सूर्यस्योदेतोराधेयः पुरा वत्सानामपाकर्तोः नन्वचात्रापि प्रतिषिध्यते अव्ययमिति कृत्वा वक्ष्यत्येतत् अव्ययप्रतिषेधेतो
सुन्कसुनोरप्रतिषेध इति समानाधिकरणेकिमुदाहरणं राज्ञः पाटलिपुत्रकस्य अमुकस्य माणविकस्य पाणिनेः सूत्रकारस्य नैतदस्ति
असामर्थ्यादत्र न भविष्यति कथमसामर्थ्यं समानाधिकरणमसमर्थवद्भवतीति इदं तर्हि सर्पिषः पीयमानस्य यजुषः क्रियमाणस्य
नन्वचात्राप्यसामर्थ्यादेव न भविष्यति कथमसामर्थ्यं समानाधिकरणमसमर्थवद्भवतीति अधात्वभिहितमित्येवं तत्॥ ॥

सोऽत्र भवत्सेवतन्तो विशेषणस्यैव पूर्वनिपातः सिद्धो भवति षष्ठीसमासे तु परवे निपातस्यानियमः स्यादिति स प्रतिषिध्यते विशेषणसमासे च वचनसाम
र्थ्यात्समानाधिकरणमसमर्थवदिति नाश्रीयते। अधात्वभिहितमिति एवं च कटस्य क्रियमाणस्येत्याद्युदाहरणं॥ ॥ ॥ राम०
६३

कर्म्मणि। क्तषष्ठ्योः प्रकृतत्वादन्यतरविशेषणे हेत्वदर्शनात् पृच्छति। कथमिति। अकर्त्तरि क्तेति यः कर्त्तरि विधीयते यथा कुंभकार इति तत्र परत्वा
उपपदसमासेन भाव्यं कश्चित्तु तजकाभ्यां कर्त्तरि कर्त्तरि चेति प्रतिषेधेन समभिप्रायेण कर्त्तरि तृचं इध्मप्रव्रश्चन इति करणे ल्युट् कर्मणि षष्ठी॥ ॥

कर्मणि च॥ कथमिदं विज्ञायते कर्मणि या षष्ठी सा न समस्यत इति। आहोस्वित् कर्मणि यः क्त इति। कुतः संदेहः। उभयं प्रकृतं तत्रा-
न्यतरच्छक्यं विशेषयितुं कस्मात्र विशेषः कर्मणि षष्ठीति निर्देशश्चेद् अकर्त्तरि क्तान्तसमासवचनं कर्मणि षष्ठीति निर्देशश्चेद् क-
र्त्तरि क्तान्तसमासो वक्तव्यः इध्मप्रव्रश्चनः पलाशशातनः। तजकाभ्यां चानर्थकः प्रतिषेधः तजकाभ्यां चानर्थकः कर्त्तरि प्रति-
षेधो भवति पुरां भेत्ता यवानां लावकः अपां स्रष्टा कर्मणी सेव सिद्धं अयस्तर्हि कर्मणि यः क्त इति। किमुदाहरणं ब्राह्म-
णस्य भुक्तं वृषलस्य पीतमिति क्तनिर्देशे असमर्थत्वात् प्रतिषेधः अनर्थकः प्रतिषेधः अप्रतिषेधः समासः कस्मान्न भ-
वति असामर्थ्यात् कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति द्रव्यमत्रापेक्ष्यते ओदनः॥ ॥

तजकाभ्यां चेति। कर्त्तरि यौ तजकौ न तत्रासामर्थ्यात् कर्म्मण्येव षष्ठी सन्नेव प्रतिषेधः सिद्धः इममत्रेति ब्राह्मणस्येति षष्ठी भुक्तापेक्षया न भवति न
लोकाश्रय निष्ठेति प्रतिषेधात् ततश्च ब्राह्मणस्य ओदनादिस्सोन्येन भुक्त इत्यर्थः प्रतीपत इति ब्राह्मणस्य भुक्ते न संबंधाभावः॥ ॥

प्रतिषेध्यमिति चेदिति॥ पदार्थान्तरे पर्यवसंबन्धसंभवादुत्पत्तिवैकल्पचिरिति न्यायादा समासशंकानिवारणायानुधानोप न्नः क्रियते तदा तिप्रसंगोपत्तस्ते स्यर्थः इत्यर्थ इति अनेकार्थत्वान्निपातानां तेनकर्मतीत्युक्ते या षष्ठी विधीयते सा न समस्यत इत्यर्थः ततश्च स्वाम्यर्थो

प्रतिषेध्यमिति चेत्कर्तर्यपि प्रतिषेधः अथैवं सति प्रतिषेधः कर्तव्य इति मन्यसे कर्तर्यपि प्रतिषेधो वक्तव्यः स्यात् ब्राह्मणस्यागतः ब्राह्मणस्य ज्ञात इति पूजायां च प्रतिषेधानर्थक्यं पूजायां च प्रतिषेधोऽनर्थकः एतत्पूजितः राज्ञामर्चित इति कर्मणीत्येव सिद्धं तस्मादुभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधः तस्मादुभयप्राप्तौ कर्मणीत्येवं या षष्ठी तस्याः प्रतिषेधो वक्तव्यः स तर्हि वक्तव्यः न वक्तव्यः इत्यर्थे पंचमः पठितः कर्मणि च कर्मणीत्येवं या षष्ठी कर्मणि नित्यं कीडरान्नीषि कयोः किमिह नित्यग्रहणेनाभिमते विधिराहोस्वित्प्रतिषेधः विधिरित्याह कुत एतत्तु विधिर्हि विभाषानित्यः प्रतिषेधः नि संबध्य

सं॥ २०॥

गवां दोहो गोपालकेन स्वाद्युदाहरणं॥ ॥ नित्यं प्रतिषेधे सिद्धे स्यारम्भाद्विधिरयं तत्र संभाव्यते अनन्तरत्वाच्च प्रतिषेधोपीति प्रश्नः किमिहेति विधिर्हीति महाविभाषाधिकारात् नित्य इ [redacted] ति विधि विकल्पे नैव पाक्षिकस्य प्रतिषेधस्य सिद्धत्वात् प्रतिषेधारंभसामर्थ्यादेव नि त्यः प्रतिषेधः सिद्ध इति किं नित्यग्रहणेनेत्यर्थः॥ २० ॥

कुगति॥ प्रादिप्रसंग इति प्रादिग्रहणस्येहागसर्थत्वात्कर्मप्रवचनीयानां प्रतिषेध उच्यते प्रसादिविषय एवायं निषेधः तथा च सुसोः समासो भवत्येव वृक्षं प्रतीति वृक्षविद्योतनयोः प्राप्तिक्रियाजनितस्य लक्ष्यलक्षणसंबंधस्यावच्छेदकः प्रतिरिति सामर्थ्यसद्भावात्समासप्रसंगः संबंधाभावेतु द्वितीया पि न स्यात्। व्यवेतानामिति व्यवहितानां परं तरेण पदानां समासो न भवतीत्यर्थः। आमं द्रेरिति याहीत्यस्यां क्रियायां द्वयोरूपनिपातात् द्वारको द्योदनाद्वि व्यवपरस्यसंबं

=प्रसादिविषय एवेति वार्त्तिकमतेक्वाङ्स्वतीति वचनैः कर्मप्रवचनीययोगे पि सुसोः समासस्येष्टत्वादिति भावः॥२= संबंधस्यावच्छेदक इति संबंधस्य द्योतक इत्यर्थः॥२= व्यवहितानामिति स्वान्वययोग्यार्थवाचकपदापेक्षया व्यवहितानां पदानां व्यवधायकपदांतरेणाव वहितानां समासो न भवतीत्यर्थः॥३=

कुगति प्रादयः॥ प्रादिप्रसंगे कर्मप्रवचनीयप्रतिषेधः प्रादिप्रसंगे कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः वृक्षं प्रति विद्योतते विद्युत साधुर्दे वदत्तो मातरं प्रति व्यवेतप्रतिषेधश्च व्यवेतानां प्रतिषेधो वक्तव्यः। आमंद्रैरिंद्र हरिभिर्याहि॥ सिद्धं तु क्वाङ्स्वतिदुर्गतयः समस्यंत इति वक्तव्यं कुब्राह्मणः कुवृषलः कु ओड् कोष्णः कदारः। आपिंगलः आडु सुब्राह्मणः सुवृषलः सुस्थिता। अतिब्राह्मणः अतिवृषलः अतिदुरूढ्ढ दुर्ब्राह्मणः दुर्गतिप्रकारकः प्रणायकः प्रसेवकः उरीकृत्य उररीकृत्य प्रादयः क्तार्थे प्रादयः क्तार्थे समस्यंत इति वक्तव्यं। प्रगतः आचार्यः प्राचार्यः प्रांतेवासी प्रपितामहः। एतदेव च सौनागैर्विस्तरतरकेण पठितं स्वती पूजायां स्वती पूजायामिति वक्तव्यं॥ ×दुर्गतिवचनात् सिद्धमेतत्कर्षं

घोऽस्तीति समासप्रसंगः। तथा चैकत्वर्थस्यादिति तत्प्रतिषेध उच्यते एवं पाणिनीये लक्षणे अतिव्याप्तिमुद्भाव्य कात्यायनः आत्मीयं लक्षणं करोति सिद्धं त्विति तेन मतादीनां न भवति। आमंद्रैरित्यत्राङ् ग्रहणेन प्राप्नोतीति सामर्थ्यमेव नास्तीति वक्तव्यं प्रादयः क्तार्थ इति। अगसर्थमिदं द्वन्द्वविषये क्तार्थ इत्येव प्रादयः। एतदेवेति कात्यायनाभिप्रायमेव दर्शयितुं सौनागैरतिविस्तरेण पठितमित्यर्थः॥ ॥ ॥

भा॰कै॰ २ सुराजेति। नपूजनादितिसमासांतप्रतिषेधः। उपाधीनांप्रयोगविषयोपलक्षणार्थत्वादन्यत्रापिसमासोभवति। तेनातिक्रमणेप्यतिः समस्यते अतिसिक्त

६५ मेवभवतेति। स्वतिक्रर इत्यादौ तत्पुरुषसमासोस्त्येव। दुर्निंदायामिति। प्रादिग्रहणेनयः समासस्तस्यायंविषयनिर्देश इत्यर्थोन्तरेपिगतित्वात्समासोभवति

65 दुःकृतमिति। आङीषदर्थ इतिक्रियायोगेनुगतित्वात्समासः। आबद्धमिति। आमंद्रेरित्यत्रतुसत्यपिसामर्थ्येमंद्रस्यगतित्वात्तद्धितेषदर्थाभावाच्चस

=सुबन्तस्य तत्र स्वल्पार्थे एवं दुःकृतमित्यत्र दुःकृतार्थे २= नत्वेवंकि एवं चक्रकवत्सेतदर्थमुपाधेकपलक्षणसंनावधयकं अतिसिक्तमित्याद्यर्थं भवसेशेतिबोध्यं २=

सुराजा अतिराजा [redacted] दुर्निंदायामिति वृक्तव्यं। दुष्कुलं दुर्गवः। आङीषदर्थे आङीषदर्थ इतिवक्तव्यं। आकडारः

आपिंगलः। कुः पापार्थे कुः पापार्थ इतिवक्तव्यं। कुब्राह्मणः कुपुरुषः। प्रादयोगताद्यर्थे प्रथमया प्रादयोगताद्यर्थे प्रथमयासमस्

स्यंत इतिवक्तव्यं। अतिक्रांतः स्वह्नामतिस्वद्वः अतिमालः। अवाकुंश्राद्यर्थे तृतीयया अवादयः कुष्टाद्यर्थे तृतीययासमस्यंत इ

तिवक्तव्यं। अवकुष्टः कोकिलया अवकोकिलः। पर्यादयोग्लानाद्यर्थे चतुर्थ्या पर्यादयोग्लानाद्यर्थे चतुर्थ्यासमस्यंत इतिवक्त

व्यं। परिग्लानोध्ययनाय पर्यध्ययनः। निरादयः क्रांताद्यर्थे पंचम्या निरादयः क्रांताद्यर्थे पंचम्यासमस्यंत इतिवक्तव्यं। निष्क्रांतः

×त इतिवक्तव्यं। प्रगतआचार्यः प्राचार्यः। प्रांतेवासी प्रपितामहः ×१ कौशांब्याः निष्कौशांबिः॥ ॥ ॥ ॥

×अत्यादयः क्रांताद्यर्थे द्वितीयया। अत्यादयः क्रांताद्यर्थे द्वितीययासम ×२

मासाभावः। कुः पापार्थ इति। प्रशस्तेपि द्वेषान्निंदाभ वतिपापंतु वस्तुस्थित्यागर्हितमिति निंदापापयोर्भेदः। पूर्ववदुपलक्षणार्थत्वादीषद

र्थेऽपिसमासोभवति कालवरामिति अन्येत्वाहुः। पृथिवीवाचिकुशब्द निरुत्तयेकुः पापार्थ इत्युच्यते ईषदर्थेतूत्तरपदे कादेशविधानात्समासो राम॰

ऽभवत्येव॥ ॥ ६५

= मावितिङंतस्येति उपपदस्येत्यर्थः।५= तिङंतार्थस्य समासासंभवादाह न च्छेदेनेति अनदर्थप्रति तिङंतार्थकः शास्त्रस्यार्थः।११= युक्तवः असत्वापदात्वादिस्वरूपः। उपग्रहः कर्त्रभिप्रायसादिः।१२=

अव्ययं प्रवृद्धादिभिरिति। आदिशब्दः प्रकारे तेन यस्याव्ययस्य समासो दृश्यते तस्यानेन समासः कार्यः सह सुपेत्युक्तमपि पुनर्ग्रहणं योक्तं अथ वा वार्त्तिककारदृ
ष्टो योगविभागेन तत्र साधितः इति पोनरुक्त्याभावः अनुव्यचलदिति। अत्र एवं परत्वात्तिङ् इति निघातस्तत उदात्तवत्त्वाभावात् इति मतेति पृथग्ग्रहणं तत्रत्र
याणां पदानां समासे कृते समासांतोदात्तत्वं भवति तसुरुषे तुल्यार्थेत्यनेन तु पूर्वपदप्रकृतिस्वरत्वं न भवति गतिर्गतावित्यनेनानोरनुदात्तत्वात्तत्रचोदात्तस्वरितयह
णानुवर्त्तनादिशब्दस्य एवं पदत्वाभावात् यत्सरियंतीति उदात्तवत उदाहरणं निपातैर्यद्यदीति निघातप्रतिषेधात् यतीत्यस्य प्रत्ययस्वरेण द्युदात्तत्वात्सरिशब्द
स्ययंतीत्यनेन समासः॥ ॥ उपपदमतिङ्। तिङ्किमर्थमिति यदि तिङं तस्य समासो निषिध्यते तदा सुप्सुपेत्यधिकारात्तिङं तस्य प्राप्त्यभावादन

अमयं प्रवृद्धादिभिः अव्ययं प्रवृद्धादिभिः समस्यत इति वक्तव्यं। पुनः प्रवृद्धं बर्हिर्भवति पुनर्गेयं पुनः स्वरंं इवेत्त विभक्त्यलोपः एवेप
दप्रकृतिस्वरत्वं चवासस्ती इवकन्येइव अव्ययमव्ययेन समस्यत इति वक्तव्यं प्रप्रयत्तयति उदात्तवता तिङा गतिमता चाव्ययं समस्यत इति वक्तव्यं अनुव्य
चलत् अनुव्याकरोति यत्सरियंति कुगति उपपदमतिङ् अतिङि तिङ्किमर्थं कारको व्रजति हारको व्रजति अतिङि तिप्राक्प्रसवत्तुं कस्मान्न भवति कार
को व्रजति हारको व्रजति सुप्सुपेति वर्त्तते अत उत्तरं पठति उपदमतिङि तितदर्थं प्रतिषेधः उपपदमतिङि तितदर्थं स्यायं प्रतिषेधः कस्य तिङ् पर्येसकः पु

र्यकः प्रतिषेधः अथ तिङ् शब्देन तिङ् पर्यो लक्ष्यते तिङं तावगाचिनः शब्दस्य समासनिषेधार्थे तथापि तदर्थे शब्दस्तिङं तएवमवतिइति पुनर्यकएव प्रतिषेध इति प्रश्नः
अत इतियस्मात्तिङं तस्मान्नर्यकः प्रतिषेध इत्यर्थः। तेच्छेदेनार्थशब्दसंनिधाने तिङ् पर्येउच्यते सतिङं तस्यार्थो योपस्यसंतदर्थः कस्येति सामान्याभिधानात् विशेषावधार
णाय प्रश्नः कः पुनरिति कालसाधन संख्यापुरुषक्रियोपग्रहरूपस्तिङ् पर्येस्तदर्थस्तु तिङं तएव संभवति नान्यत्रेति प्रश्नः क्रियेति अनेकार्थसंभवेपि साध्यत्वात्क्रि
याप्रधानं प्रधानं चार्थस्तिङ् यहणेन वचनसामर्थ्याल्लक्ष्यते॥ ॥ ॥श्री॥ ॥७॥ ॥

भा० कै० २ ६६ 66

क्रियाप्रतिषेधो वेति पदिति ङ्. ग्रहणेन वचनसामर्थ्यात् क्रियात्वलक्षणीयात तदाप्रतिपत्तिलाघवाय साक्षात् क्रियाप्रतिषेधः कृतः इत्यर्थः ॥ अत्रापि पक्षे सुबं
तस्य क्रियावाचित्वाभावात् निर्विषय एव प्रतिषेध इत्याह अथेति कारको गत इति गतशब्दः क्रियावाच्युपपदं तत्र तुमुन्ण्वुलाविति ण्वुलकर्तुं गत इति
अर्थः अत्रापि ङ्. ग्रहणात् समासाभावोऽन्यथा गतकारक इति स्यात् अत्र च प्रकृतिवाच्य क्रियाश्रयो ण्वुल् तदाश्रयं गतशब्दस्य क्रियावाचित्वमिति
समासनिषेधः नैतदिति सुबन्तविशेषणमिति ङ्. ग्रहणं नचात्र सुबन्ते क्रियावाचित्वं प्रकृत्यर्थस्य सत्त्वगुणाभावः प्रत्ययार्थस्य कर्तुः प्राधान्यं तस्य च द्रव्य
रूपेण कृताभिधानं प्रधाने न च पदे प्रोभवतीति द्रव्यवाची सुबन्तः अत एव गतशब्दस्य समासो न प्राप्नोतीति तस्यानुपपदत्वाद्गतो न क्रियावाचित्वात् तदा

= [illegible]

क्रियाप्रतिषेधो वा ॥ अपवादमेवेदं पठितव्यं उपपदमक्रियेति । अथाक्रियेति किं प्र सुराक्रियते कारकोगतः कारकोयातः ने
न क्रियावाचि किं तर्हि द्रव्यवाचि इदं तर्हि कारकस्य गतिः कारकस्य व्रज्येति । एतदपि द्रव्यवाचि कृदन्तकृदभिहितो भावो द्रव्यवद्भवती
ति एवं तर्हि सिद्धे सति यत् दतिङिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः ॥

= [illegible]

श्रयाप्रत्ययो सन्निरिति विरुद्धाविलार्थस्य प्रत्ययार्थे न संसृष्टत्वात्सदन्ते रौ कार्याभावात् संभवात् समासस्य प्रसंगः धातोः सुबन्तत्वाभावाच्च कारकस्य
गतिरिति गमनं गतिरिति भावे प्रत्ययविधानात् क्रियावाचित्वमस्तीति भावः एतदपीति धातुरत्र साध्यभूतां क्रियां प्रसाय तिप्रत्ययस्तस्या एव
क्रियाया उपसंहृतक्रमरूपां सत्वरूपतामाह प्रत्ययार्थस्य प्रधानमिति यत्सुबन्तं न तत् क्रियावाचि यत् क्रियावाचि न तत्सुबन्तमित्यर्थः द्रव्यवदिति एम० ६६
यथा घटादेर्द्रव्यस्य लिंगसंख्यासाधनसंबन्धः तथा कृदभिहितस्यापि भावस्येत्यर्थः ॥ ॥ ५ ॥ ॥

=योगविभागस्येति· अथवा ते ऽतिङिति पूर्वकत्वेनगतिरिती सर्वः ।१= योगद्वयविहितस्येति· समासस्येत्यर्थः । न दाहातिङंतस्य समासस्येति· २= पदकार्यार्थं· राजदृषीत्यादौ नलोपाद्यर्थं· ३= मद्ग्रहणादिति· कर्त्तृकरणयोः क्रियाक्षेपकता क्रियावाचिनाहरंतेन समासस्य सिद्धत्वात् ग्रहणस्याति दि

अनयोरिति॥ ननु चैवं सूत्रे ऽतिङ्ग्रहणात् सुपो निवृत्तिर्ज्ञाप्यतां पूर्वत्र कथं ज्ञाप्यते एवं तर्हि योगविभागः क्रियते तेनेनातिङिति सूत्रद्वयशेषो विज्ञायत इत्यदोषः। अतिङ्ग्रहणे न च योगद्वयविहितो विधेयते अतिङ् समासो भवतीति तेन सुपेसस्यैव निवृत्तिर्ज्ञाप्यते सद्वयग्रहणं तु पूर्वस्य पदस्य पदकार्यार्थमनुवर्त्तत एव भाष्येपि समुदायस्य निवृत्तिर्विवक्षिता न तु केवलस्य सुबिसस्य गतिकारकोपपदानामिति। एतत्सूत्रद्वये सुपेसस्य निवृत्त्या गतीनामुपपदानां च उत्तरपदात्सुबुत्पत्तेः प्राक् समाससिद्धिः कारकाणां तु कृत्तद्धितग्रहणे [redacted] ताबकुलमिति समासः क्रियते तत्र कृद्ग्रहणात्प्राक् सुबुत्पत्तेः समासः तिङ्तेन तृतीयांत सुपेसस्य तु वचनात् समासाप्रसंगात् कृदंते नैव समासे सिद्धे कृद्ग्रहणं कृदंतावस्थायामेवानुत्पन्ने सुपि समासार्थं अस्याश्च परिभाषायाः पुंयोगादाख्यायामिति सूत्रे प्रयोजनानि वक्ष्यंते यदि तर्हि उत्तरपदात्सुपनोत्पद्यते तेन दरदधि सेचाविसादौ पदादित्वाभावात्षत्वप्रतिषेधो न प्राप्नो

अनयोर्योगयोर्निवृत्तं सुपेति किमेतस्य ज्ञापने प्रयोजनं गतिकारकोपपदानां कृद्भिः सह समासो भवतीत्येषा परिभाषा न कर्त्तव्या भवति प्रघेतज्ञाप्यते केनेदानीं समासो भविष्यति समर्थेन प्रघेवं धातूपसर्गयोरपि समासः प्राप्नोति पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेति नैतद

स्ति पदत्वाभावात् उत्तरपदव्यपदेशश्च न तत्र तन्निबंधनत्वेन सिध्यति नैष दोषः निरुपपदात्से च पतेः क्विपि कृते षष्ठी समासः क्रियत इति षत्वनिषेधो भविष्यति यद्वा सुपेसस्य निवृत्तो प्रसंगश्चेत्कार्य सिद्धये कश्चिदुत्पन्ने सुपि समासः क्वचित्प्राक् सुबुत्पत्तेः। एवं कारकसमासोपि बहुलग्रहणात् क्वचित्सुबंतेन भवतीति साहितस्यघनक्रीतेत्यत्र योग उपपन्नः उत्तरशब्दः समासावयवविशेषस्य रूढिरिति तत्राप्यदोषः यद्येतदिति प्रवृत्ते नोत्तरपदस्यानुपादानात् अत्र समर्थेनेति सुबिसस्यानुवृत्तो समासस्य पदविधित्वात् समर्थपरिभाषोपस्थानात् यद्येवमिति तत्र श्रेष्ठकस्य यादिप्रसंगः शाकलप्रतिषेधप्रसंगश्च पूर्वं धातुरुपसर्गेणेति तत्र तयोः सामर्थ्यमस्ति उपसर्गार्थविशिष्टायाः क्रियायाः साधनयोगात्॥ ॥

=बहुलग्रहणादिति· बहुलग्रहणात्सुपेसस्यात्र संबंधाकल्पनादिसर्थः । नलक्षमाह· क्वचित्सुबंतेनेति· एतेन कृद्ग्रहणसामर्थ्यात्सुपेसस्या संबंधकल्पनमनुचितं काष्ठैः पचतितरामित्यादौ समासाभावार्थं कृद्ग्रहणस्य चरितार्थत्वादित्यपास्तं· इतएवासन्नालक्षा

भा०कौ०२
६७
67

पूर्वं धातुः साधनेनेति ननु पूर्वं साधनाभिधायिप्रत्ययोत्पत्तिः पश्चात् साधनसंसृष्टस्यैव धातुरुपसर्गेण युज्यते न केवल इति धातूपसर्गयोः समा
साभावात्तत्कृदन्तेन समासो भवत्येव तिङन्तेन त्व ङि.ति निषेधान्न भवति यत्र तु तिङं· नेन समास इष्यते स विषयो दर्शितः उदात्तवतेति अपि निर्दिष्टत्वसे
ति अनिष्पन्नस्य विशेषाकांक्षाया अभावात् अनुभूयते सुखमुपास्यते गुरुरित्यादौ धातुरेव सकर्मिकां क्रियां वक्त्युपसर्गस्तु द्योतक इति नास्ति कश्चि

पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण साधनं हि क्रियां निर्वर्तयति तामुपसर्गो विशिनष्टि अभिनिर्वृत्तस्य चार्थस्योपसर्गेण
विशेषः शक्यो वक्तुं षष्ठीसमासादुपपदसमासो विप्रतिषेधेन षष्ठीसमासादुपपदसमासो भवति विप्रतिषेधेन षष्ठीसमासस्या
वकाशः राज्ञः पुरुषो राजपुरुषः उपपदसमासस्यावकाशः स्तम्बेरमः कर्णेजपः इहोभयं प्राप्नोति कुम्भकारो नगरकारः उपप
दसमासो भवति विप्रतिषेधेन नवाषष्ठीसमासाभावादुपपदसमासः नवार्थो विप्रतिषेधेन किंकारणं षष्ठीसमासस्याभा
वादुपपदसमासो भविष्यति गतिकारकोपप दानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति समासवचनात्॥ ॥

दस्मिन्पक्षे दोषः षष्ठीसमासादिति निसत्वानि सत्वाभ्यामनयोर्विरोधसद्भावः कुम्भकार इति पञ्चकं प्रातिपदिकार्थे प्रातिपदिकेनैव कर्मण उक्त
त्वात् न तैर्वोपपदेऽणा भाव्यं अपवादविषयत्वात् द्वितीयानुत्पादात् कृते चाणि कर्तृकर्मणोरिति षष्ठी भवतीत्युभयप्रसङ्गः॥ गतिकारके राम०
तितत्पश्चोत्तरपदे विभक्त्युत्पत्त्यनपेक्षणादन्तरङ्गत्वादुपपदसमासो भवतीत्यर्थः॥ ॥ ॥ ६७

अथवेति॥ षष्ठीसमासेपि दोषाभावइत्यर्थः क्वचित्कार्ये दोषदर्शनादाह। अनेनेति। सिद्धे तत्समासयोरित्र नित्यसमासस्य ग्रहणे नास्वपदग्रहणं यथा स्यात् अं
तोदात्ता इत्तरपदादि तत्रानित्यसमासग्रहणे नास्वग्रहणंमा भूदिति भावः। यस्य विग्रहो नास्तीति। अस्यापि विग्रहाभावः षष्ठीसमासेन मुक्ते पक्षे उपप
दसमासस्य सद्भावात् नित्याधिकार इति नित्यशब्दस्य स्वरितत्वप्रतिज्ञानात्तदधिकारसंप्रत्ययः नैवं शक्यं मिति नित्यशब्दस्य स्वरितत्वं दोषबलान्न प्रति

अथवा विभाषा षष्ठीसमासः यदा न षष्ठीसमासस्तदोपपदसमासो भविष्यति। अनेनैव यथा स्यात् तेन मा भूदिति कृष्णा त्र विशेषः
तेन वा स्यादनेन वा स्य यमस्ति विशेषः उपपदसमासो नित्यसमासः षष्ठीसमासः पुनर्विभाषा ननु च नित्यः समासः स नित्यसमा
सः यस्य विग्रहो नास्ति नेत्याह नित्याधिकारे यः समासः स नित्यसमासः नैवं शक्यं अव्ययीभावस्यापि नित्यसमासता प्रसज्येत तत स्यान्नि म३
त्यः समासो नित्यसमासः यस्य विग्रहो नास्ति उपपद अमैवाव्ययेन एवकारः किमर्थः नियमार्थः नैतदस्ति प्रयोजनं सिद्धे विधिरारभ्यमाणोंऽतरेणैव
कारं नियमार्थो भविष्यति इष्टतोवधारणार्थं स्तर्हि भविष्यति यथैवं विज्ञायेत अमैवाव्ययेनेति मैवं विज्ञायि अमाव्ययेनैवेति अस्ति चे
दानीं कश्चिदनव्ययमम्शब्दः यदर्थो विधिः स्यात् अस्तीत्याह स्वशयं ब्राह्मणकुलमिति नैतदस्ति प्रयोजनम् अंतरंगत्वादत्र समासो भविष्यति इ
दं तर्हि प्रयोजनं॥ ॥

ज्ञायत इत्यर्थः॥ तदेवं प्रयोजनाभावाद्विभक्तिप्रतिषेधो न पठितव्यः॥ ॥ अमैव॥ पदार्थ इति यन्निवृत्त्यर्थो नियमः स्यादित्यर्थः स्वशयमिति अधिकरणे शेतेरित्यच् अ
तोमिति सोरंभावः। अनेनानव्ययेनासमासो मा भूत् तदित्येवमर्थोपि नियमः स्यात् अंतरंगत्वादिति। अनुत्पन्न एव सौ उपपदसमासेन भाव्यं पश्चात्सुपेति समास
विधानकाले अनव्ययत्वामोऽसंभवान्नियमांतरेण च नस्य चरितार्थत्वाद्विपरीतनियमो न भविष्यतीत्यर्थः॥ ॥ ॥

=अमि॰साहनिर्दितिः आसेपजन्मोर्थत्तरर्थकमाद्धप्रयोगमंतरेणाप्यशब्दबोधेनभासततस्त्वर्यमभिप्रेसाहनिरुच्यते अमैवक्त्वाविधानंसमुपपदंतरे [illegible] वाक्येनसमन्यते इत्येतावतैवामंतानि क्त्वाप्रत्ययेन समासाप्रसंगाद्धयसमांतलाक्षेपात् १= प्राप्तविभाषायामिति आ

भा० कै० २ अमैवेति ॥ एवकारसामर्थ्यादमैवस्याद्वृत्तिराश्रीयते ततोयेनवाक्येनामेवदेवक्त्वोविधीयतेनप्रत्ययांतरसहितस्तेनवाक्येनयद्विषीतेयेउपपदेत

६८ त्रसप्तमीनिर्देशान्नद्मासमस्ततेनान्यदित्यर्थः । अग्रेभोजमितिविभाषाग्रेप्रथमपूर्वेष्विति द्वयोःक्त्वाणमुलोर्विधानादत्रसमासोनभवति अयादिष्वि

६४ तिायगोऽप्राप्तविभाषाततः प्रत्ययोस्तन्नावग्यादीनांनिमित्तत्वात्निमित्तस्योपपदत्वात्समासप्रसंगः प्राप्तविभाषायांलयादीनांप्रत्ययोस्तन्नाव

निमित्तत्वात्तन्निवृत्त्यावेवहेतुत्वात्तस्यानुपपदत्वमित्यर्थः शेषो ॥ ॥पदस्यार्थस्य चसर्वस्योपयुक्तत्वाछेषमसंभाव्यपृच्छतिशेष इतिपदत

अमैवयत्तुल्यविधानंउपपदंतत्रयथास्यात अमाचान्येनयत्तुल्यविधानंतत्रमाभूदिति अग्रेभोजं अग्रेभुक्त्वा अयादिष्वप्राप्तविधेःसमास

प्रतिषेधंचोदयिष्यतिसनवक्तव्योभवति अमैशेषोबहुव्रीहिः शेषइत्युच्यतेकः शेषोनामयेषांपदानामनुक्तःसमासःसशेषःशेषवच

नंपदतश्चेन्नाभावात् शेषवचनंपदतश्चेत्तन्नकिंकारणंअभावात् नहिसंतितानिपदानियेषांपदानामनुक्तःसमासः अर्थतस्तर्हि

शेषग्रहणंयेष्वर्थेषुअनुक्तःसमासःसशेषः अर्थतश्चेदविशिष्टं अर्थतश्चेदविशिष्टमेतद्भवतिकुतः पदतं नहिसंत्यर्थाःयेष्वनुक्तः

समासःत्रिकतस्तर्हिशेषग्रहणंयस्यत्रिकस्यानुक्तःसमासःसशेषःकस्यचानुक्तःप्रथमायाः॥ ॥इतिश्रीभगवत्पतंजलिविरचितेम

१ हाभाष्येद्वितीयस्याध्यायस्यद्वितीयेपादेप्रथममाह्निकम्॥ ॥ ॥

अवेदितिापदेनपदतइत्याद्यादित्वात्तसिः नहीति सर्वेषांसामान्यविशेषरूपेणोपयुक्तत्वादित्यर्थः नहिसंत्यर्था इति पूर्वोत्तरान्यपदार्थेषुतत्पुरुषाव्ययीभावविएम०

धानात्प्रथमाया इति द्वितीयादीनांप्रतिपदंसमासविधानात्प्रथमायांशेषत्वंततश्च प्रथमांतानांपदानांबहुव्रीहिरित्यर्थात्समानाधिकरणानांभवति कं ६८

ठेकालइत्यादौतुसप्तमीविशेषणे इति पूर्वनिपातविधानात्ज्ञापकाद्भवति॥ ॥इत्युपाध्यायजय्यटपुत्रकैयटकृतेभाष्यप्रदीपेद्वितीयस्याध्यायस्यद्वितीयेपादेप्र

१ थममाह्निकंसमाप्तः॥ ०॥

अनेकानेकग्रहणस्य वार्त्तिककारः प्रयोजनं वक्ष्यतीति भाष्यकारः पदग्रहणस्यान्यग्रहणस्य च प्रयोजनमाचष्टे बहुवचनत्वाच्च पश्चादन्यग्रहणस्य विचारः पदग्रहणमिति अन्यार्थे इत्युच्यमाने स्वपदार्थे मतिरिक्ते अपर्योतरस्याग्रीयमाणे अन्यपदार्थो लभ्यते वर्त्तिपदानां च क्रियालक्षणे वाक्यार्थे वृत्त्यसंभवात्तन्निवृत्त्यर्थमपि पदग्रहणं नोपयुज्यत इति प्रश्नः यथा मे माता इति कश्चित्केन विशिष्टः कीदृशः कुलशीलादिना न वपिते इति स आह यथा मे माता इति एतानि पदानि तथा मे पिता इत्यस्य वाक्यस्यार्थं गमयन्तीति समासप्रसंगः अयथकाप्ताहीति कश्चित्केन विदुक्तः तं प्रत्याह यथा मे माता इत्यादि य

अनेकमन्यपदार्थे पदग्रहणं किमर्थं इहानेकमन्यार्थे इतीयत्युच्यमाने वाक्यार्थेऽपि बहुव्रीहिः स्यात् यथा मे माता तथा मे पिता सुस्नातं भो इति पदग्रहणे पुनः क्रियमाणे न दोषो भवति। अथान्यग्रहणं किमर्थं अनेकं पदार्थे इतीयत्युच्यमाने स्वपदार्थेऽपि बहुव्रीहिः स्यात् १ राजपुरुषः तत्पुरुष इति नैतदस्ति प्रयोजनं॥ ॥

यथा शुद्धकुला मे माता तथा पिता पीत्यभिजनशुद्धिरपि स्नानं किं बाह्येन स्नानेनेत्यर्थः ततः सुस्नातं भो इत्येतद्वाक्यार्थे वर्तमानानां पयाप्रतीतानां पदानां समासाभावार्थं पदग्रहणं अश्रुते वाक्यार्थे च पदानां वृत्तिर्दृश्यते यथा न घ्रांसि ह्यास्तु कश्चिदुच्यते न घ्राग्राहाः सन्तीति तस्माच्च मास्नासीरिति वाक्यार्थः प्रतीयते अथान्यग्रहणमिति। अन्तरंगत्वात्स्वपदार्थे समासे सिद्धे पदार्थग्रहणसामर्थ्यादन्यपदार्थो लभ्यत इति प्रश्नः स्वपदार्थेऽपीति अपिशब्दादन्यपदार्थेऽपीत्यर्थः पदार्थग्रहणं व्याप्तिसमाश्रयणार्थं स्यादिति स्वपदार्थोऽन्यपदार्थयोः समासः स्यात्॥ ॥

= समानाधिकरण[illegible]पदानां प्रथमान्तानां बहुव्रीहिर्भाष्यकृन्मते उक्तस्तस्मादाह वतीनदी

मा०कै०२ तत्पुरुष इति बहुव्रीहेस्त्वन्यपदार्थेऽवकाशः परं कार्यत्वाच्चेति ततश्च संज्ञयोः समावेशात् स्वरसमासांतप्रसंगः शेषवचन इति शेषग्रहणप्रत्याख्या
६९ नं स्मारयति संख्येति द्विगावती कोवीरपुरुषकोऽब्राह्मणको देश इति समासविधानुपयोगादशेषत्वात् बहुव्रीहिर्न प्राप्नोतीति तस्माच्छेषग्रहणं
69 न कर्तव्यं ततः स्वपदार्थे बहुव्रीहिनिवृत्त्यर्थे अन्यग्रहणं कर्तव्यमिति स्थितं अक्रियमाण इति नीलोत्पलंसर इत्यत्रापि विशेषानुपाद
नादन्यपदार्थेऽपि स्वपदार्थ इव तत्पुरुषो बहुव्रीहिं बाधेत कंठेकाल इत्यादिष्वधिकरणपदो बहुव्रीहेरवकाशः स्यात् अन्यग्रहणे तु स

तत्पुरुषः स्वपदार्थे बाधको भविष्यतीति भवेदेकसंज्ञाधिकारे सिद्धं परं कार्यत्वे तु न सिध्यति आरंभसामर्थ्यात्तत्पुरुषः परं कार्यत्वा
च्च बहुव्रीहिः प्राप्नोति परं कार्यत्वे च न दोषः शेष इति वर्तते अशेषत्वान्न भविष्यति शेषवचन उक्तं किमुक्तं तत्र शेषवचना
द्दोषः संख्यासमानाधिकरणनञ्समासेषु बहुव्रीहिप्रतिषेध इति अथैकसंज्ञाधिकारेनार्थोऽन्यग्रहणेन एकसंज्ञाधिका
रे च कर्तव्यं। अक्रियमाणे ह्यन्यग्रहणे यथैव तत्पुरुषः स्वपदार्थे बहुव्रीहिं बाधत एवमन्यपदार्थेऽपि बाधेत अथाने
कग्रहणं किमर्थं अन्यपदार्थे इतीयत्युच्यमाने एकस्यापि पदस्य बहुव्रीहिः स्यात्॥ ॥ ॥

ति स्वपदार्थे सावकाशं तत्पुरुषं परत्वाद्बहुव्रीहिर्बाधत इति न कश्चिद्दोषः अथेति एकनिवृत्त्यर्थं तावदनेकग्रहणं नोपपद्यते पदविधित्वात्सामर्थ्ये राम०
सति बहुव्रीहिसंज्ञाविधानादनेकाधिष्ठानत्वाच्च सामर्थ्यस्यैकस्यापि बहूनां समासार्थमनेकग्रहणं तद्धितार्थे सनेन उत्तरपदे परतः समास ६९
संज्ञाविधानात्तज्ज्ञापकाद्बहूनां बहुव्रीहेः सिद्धत्वादिति प्रश्नः॥ ॥ ॥ ॥

सर्पिषोपि स्यादित्यिग् अपि शाकोविंशत्यर्थे वर्त्तते इति तस्यापि बहुव्रीहिसंज्ञाप्रसंगस्ततश्च कपसमासां तप्रसंगः पदान्तरेणास्यादिसन्नेन चास्य सामर्थ्यमस्तीति समर्थप
रिभाषापि न व्याहन्निकरोती सर्वे के चिद्याचक्षते अन्ये तु आहुः अपिः पदार्थे सन्नाप्यर्थेनाविंशाद्रे निराकृतात स्यात्स्यादिति पदं विंशत्यर्थे वर्त्तत इति तस्य बहुव्रीहिसंज्ञा
प्रसंगः। अपि तु ग्रहणेन च पूर्वमेव सुप्सुपे सस्य विच्छिन्नत्वादेकस्यापि त्रिंशत्. तस्य प्राप्तिः स्यात् नैतदिति योगद्वय एवेति ग्रहणेन सुप्सुपे सस्यासं
बंधो ज्ञापितोऽन्यत्र सुप्सुपेत्यनुवर्त्तनं एवेत्यर्थः। बहूनामपीति। अन्यथा सुप्सुपेति गुणे संख्याया विवक्षितत्वात् द्वयोरेव स्यात् उत्तरपद इति द्विगुग्र
हणं तद्धितार्थे सन्ने न विहितस्य समासस्योपलक्षणं तेन दिशः समानाधिकरणेनोत्तरपदे समासावयवविशेषे परतः समासविधानं बहूनां समास

सर्पिषोपि स्यात् नैतदस्ति प्रयोजनं सुप्सुपेति वर्त्तते इदं तर्हि प्रयोजनं बहूनामपि यथा स्यात् सुसूक्ष्मजटकेशेन सुनताजिनवाससा उत्तरार्थं
यौ के कग्रहणं कर्त्तव्यं चार्थे द्वंद्वः अनेकस्मिन्निति इहापि यथा स्यात् प्लक्षन्यग्रोधखदिरपलाशा इति एतदपि नास्ति प्रयोजनं आचार्यप्रवृत्ति
र्ज्ञापयति बहूनामपि समासो भवतीति यदयमुत्तरपदे द्विगुं शास्ति तत्सूत्रेपि तर्हि बहूनां प्राप्नोतीति नैष दोषः ग्रहणेन तत्सूत्र उच्यते तेन बहूनां न
भविष्यति अत उत्तरं पठति अनेकवचनमुपसर्जनार्थं अनेकग्रहणं क्रियते उपसर्जनार्थं प्रथमानिर्दिष्टं समास (उपसर्जन) मित्युपसर्जनसंज्ञा यथा स्यात्॥०॥

स्य ज्ञापकमित्यर्थः द्विगुस्तु द्व्यहजातादौ सावकाशत्वान्न ज्ञापकः तत्सूत्रेपीति ज्ञापकफलस्य विषयविभागाभावादनिष्टप्रसंगो महत्कष्टं श्रितं इत्यत्रापि
तत्सूत्रप्रसंगात् ग्रहणेनेति विशिष्टपूर्वोत्तरपदनिर्देशेनेत्यर्थः तत्र द्वितीयान्तस्य श्रितादिभिः समासविधानात् अस्य ग्रहणपरिभाषोपस्थानात् समु
दायस्याद्वितीयान्तत्वादत्र तत्सूत्रप्रसंगाभावः यद्येवमिहापि सुप्सुपेत्यनुवर्त्तनात् कथं बहूनां बहुव्रीहिरथ ज्ञापके न संख्याविवक्षा बाध्यते तदा द्वितीयादिष्व
पि संख्याया अविवक्षा स्यात् नैष दोषः तत्सूत्रविधौ सुप्सुपेति संख्याप्रतीपत्ते द्वितीये सर्पिर्द्वंद्वबहुव्रीह्योस्तु सुपेत्यत्रैव संख्याप्रतीतिस्तत्र ज्ञापकेनै
कैव संख्याप्रतीतिर्बाध्यते तावता चरितार्थत्वात् द्वितीयादिषु संख्याया अबाधः॥ ॥

भा॰कौ॰२
७०
70

चित्रगुरिति॥ सत्स्वनेकपदार्थेषु बहुव्रीहौ सत्यपि पूर्वपदस्य चानुवर्तने तेन तु स्रुपेति॥ तत्रिहृतस्य अर्थत्वात्तस्य तत्रोत्तरपदमपि तेन प्राप्यत इति समासशास्त्रे गो शब्दस्य प्रथमा निर्दिष्टत्वादुपसर्जनत्वाद्ध्रस्वसिद्धिः नवेति। अन्यपदार्थस्य प्राधान्यात् दर्शनाद्यनेकक्रियायोगादनेकविभक्तित्वेपि वर्तिपदानामेकविभक्तित्वादिसर्वैः यदि तर्हीति अयं भावः चित्रागावोऽस्येत्यस्मिन्विग्रहवाक्ये न कस्यचिदनेकविभक्तित्वं परं येक्षया वर्तिपदानामेकविभक्तित्वं स्यात्। अथ यथा कथं

चित्रगुः शबलगुरिति। न वैकविभक्तित्वात् न वा एतदपि प्रयोजनमस्ति किं कारणमेकविभक्तित्वात् एकविभक्ति चापूर्वनिपातइस्युपसर्जनसंज्ञा भविष्यति चित्रगुः शबलगुरिति चित्रा यस्य गावः श्चित्रगुस्तिष्ठति चित्रा यस्य गावः श्चित्रगुं पश्य चित्रा यस्य गावः श्चित्रगुणा कृतं चित्रा यस्य गावः श्चित्रगवे देहि चित्रा यस्य गावः श्चित्रगोरानय चित्रा यस्य गावः श्चित्रगोः स्वं चित्रा यस्य गावः श्चित्रगौ निधेहि चित्रा यस्य गावो हे चित्रगो इति यदि तर्हि कुतश्चिदेव किंचित्सदमधाह सएकविभक्तियोगः क्रियते एतदप्येकविभक्तियुक्तं इहापि प्राप्नोति राजकुमारीतश्च कुमारी राज्ञो या कुमारी राजकुमारी तिष्ठति राज्ञो या कुमारी राजकुमारीं पश्य राज्ञो या कुमार्या कृतं राज्ञो या कुमारी राजकुमार्यै देहि राज्ञो या कुमारी राजकुमार्या आनय राज्ञो या कुमारी राजकुमार्योः स्वं राज्ञो या कुमारी राजकुमार्यां निधेहि राज्ञो या कुमारी राजकुमारि इति एकविभक्तियुक्तमेवयच्चित्संनचैतत्त्विस्मेकविभक्ति [redacted] युक्तमेव राज्ञः कुमारीं पश्य राजकुमा

[illegible]

[illegible]

चित्स्यान्यस्यानेकविभक्तित्वमाश्रित्य सर्वत्रिपदस्यैकविभक्तित्वं व्यवस्थाप्यते तदा तिप्रसंगो राज्ञो या कुमारी तां पश्य तया कृतं तस्यै देहीत्यादिप्रयोगा कुमारीशब्दस्यैकविभक्तित्वादुपसर्जन ह्रस्वत्वं स्यात् एकविभक्तियुक्तमेवेति अयं भावः। नायं नियमः प्रथमान्तस्यैव कुमारीशब्दस्य षष्ठीसमासेन भाव्यं ॥ राम॰ ७०
किं तर्हि द्वितीयाद्यन्तस्यापि तत्र षष्ठीसमासे विधीयमाने एकविभक्तित्वाभावात्कुमारीशब्दस्योपसर्जनत्वाभावः॥ ॥

एकग्रहणसामर्थ्यादिति॥ एकैकस्मिन्प्रयोगे सर्वेष्वेव एकविभक्तित्वादेकविभक्तिग्रहणं पर्यायेणानेकविभक्तेर्निरासार्थमित्यर्थः। विभक्तियुक्तमिति एतदपि
किमर्थमुच्यत इति चेत्सत्ये हि निर्देशार्थे अन्यथा ह्यपूर्वनिपात इत्येतावदुच्यमाने सत्य निर्दिष्टः स्यात् पदार्थाभिधान इति देवदत्तपदस्य यावानर्थस्तावान्
बहुव्रीहिणा वक्तव्योऽन्यपदार्थे तस्य विधानात् ततो गतार्थत्वादनुप्रयोगो न प्राप्नोतीत्यर्थः। यथा चार्थद्वंद्वविधानाद्द्वंद्वे चशब्दस्य प्रयोगो न भवति

एकग्रहणसामर्थ्यात् यदि यदेकविभक्तियुक्तं चानेकविभक्तियुक्तं च तत्रस्यादेकग्रहणमनर्थकं स्यात् विभक्तियुक्तमपूर्वनिपात इत्येव ब्रूया
त्। पदार्थाभिधानेऽनुप्रयोगानुपपत्तिरभिहितत्वात्। पदार्थाभिधाने प्रयोगस्यानुपपत्तिः चित्रगुर्देवदत्त इति। किं कारणमभिहितत्वा
त् चित्रगुणाभिहितः सोऽर्थ इति कृत्वानुप्रयोगो न प्राप्नोति नवानभिहितत्वात् न वा एष दोषः किं कारणं अनभिहितत्वात् चित्रगुशब्देनानभिहि
तः सोऽर्थ इति कृत्वानुप्रयोगो भविष्यति कथमनभिहितः यदिदानीमेवोक्तं पदार्थाभिधानेऽनुप्रयोगानुपपत्तिरभिहितत्वादिति सामान्या
भिधाने हि विशेषानभिधानं सामान्येऽत्राभिधीयमाने विशेषो नाभिहितो भवति तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः चित्रगु
कः देवदत्त इति भवेत्सिद्धं यदा सामान्ये वृत्तिः यदा तु खलु विशेषे वृत्तिः तदा न सिध्यति चित्रा गावो देवदत्तस्येति चित्रगुर्देवदत्तः तदा

॥ पि सिद्धं कथं नेदमुभयं युगपत्संभवति वाक्यं समासश्च यदा वाक्यं न तदा समासः॥ ॥

एवमिहापि देवदत्तादिपदानां न स्यात् सामान्याभिधाने हीति चित्रगुशब्देन तद्रूपमात्रमुच्यते न तु विशेषः पदार्थः सामान्य इति चित्रा गावोऽस्येत्येवं विग्रहे कृतेऽन्य
पदार्थसामान्यस्य बहुव्रीहिणाभिधानाद्विशेषस्यानुप्रयोगः यदा विशिष्टेऽन्यपदार्थे बहुव्रीहिः क्रियते तदानुप्रयोगासिद्धिः नेदमुभयमिति लौकिके प्रयो
गे वृत्तिवाक्ययोर्युगपत्प्रयोगाभावात् एकेनैवार्थस्य प्रसाधितत्वादितरप्रयोगायोगात्॥ ॥ ॥ ॥

भा०कै०२ ७१ ॥

पदासमास इति॥ शब्दशक्तिस्वाभाव्यादन्यपदार्थसामान्यमेवाभिधातुं समर्थः समासो न विशेषमिति प्रक्रियायामपि सामान्येन विग्रहः कार्य इत्यर्थः॥
सामान्यस्यैव वर्त्तिर्हीति। सामान्यस्य समासेनैवाभिधानात् सामान्यमपीति यथा विशेषो विशेषान्तरस्य निवर्त्तकस्तद्वत्सामान्यमपि विशेषाणां निवर्त्तकं स्यादित्येष
एवेत्यर्थः। चित्रगुरिति लिंगसर्वनाम्नां नपुंसकेन निर्देशः सामान्यवृत्तितामेव प्रकाशयितुं कृतः सर्वं वा विभक्त्यवेत्य आकारप्रश्लेषः कृतो न्यथा प
र्यायप्रयोगं स्यात् तत्रावश्यमिति चित्रगुः सर्वमिति सुक्तेन लोकमेवेति विशेषावगतिर्भवतीत्यर्थः। अथवेति कृत्स्नपदार्थाभिधाने ह्यनुप्रयोगासि

पदासमासो न तदा वाक्यं पदासमासः सामान्येन तदा वृत्तिः तत्रावश्यं विशेषार्थिना विशेषोनुप्रयोक्तव्यः चित्रगुः कः देवदत्त इति सामान्य
स्यैव तर्ह्यनुप्रयोगो न प्राप्नोतीति चित्रगुः कः चित्रगुतच्चित्रगु किंचिच्चित्रगु सर्वमिति सामान्यमपि यथा विशेषस्तद्वत् न चित्रगवि
सुक्ते संदेहः स्यात् सर्वं वाऽविभक्तं वेति तत्रावश्यं विशेषार्थिना विशेषोनुप्रयोक्तव्यः चित्रगुतदिति अथवा विभक्त्यर्थोऽभिधीयते
एतच्चात्रयुक्तं यद्विभक्त्यर्थोऽभिधीयते तत्रा हि सर्वे पश्चात्सर्वं वर्त्तते ह्यस्येति विभक्त्यर्थाभिधाने द्रव्यस्य लिंगसंख्योपचारानु
पपत्तिः विभक्त्यर्थाभिधाने द्रव्यस्य लिंगसंख्याभ्यामुपचारेनुपपन्नः बहुयवं बहुयवा बहुयवः बहुयवो बहुयवा इति॥ ॥

द्विस्रोदितापरिहृता च यदा तु विभक्त्यर्थः संबंधादिरभिधीयते समासेन तदा तद्वाचिनी विभक्तिर्नानुप्रयोजि द्रव्यं त्वनभिहितमिति तद्वाची शब्दो वश्यानुप्र
योक्तव्यः कथं पुनरन्यपदार्थ इत्युच्यमाने विभक्त्यर्थ एव गम्यत इत्याह तत्र हीति पदेन प्रकृत्यर्थो पसर्जनः प्रत्ययार्थोऽभिधीयत इति विभक्त्यर्थस्यैव प्राधा
न्यादन्यपदार्थग्रहणेन ग्रहणमित्यर्थः सर्वे पश्चादिति भाष्यकारवचनप्रामाण्याद व्ययेनापि षष्ठीसमासः अद्रव्यस्येति अस्मलम्भत स्वविभक्त्यर्थस्य लिंगसं
ख्याभ्यां व्यवहारो नोपपद्यत इत्यर्थः॥ ॥ एम० ७१

अपर इति॥ अकारप्रश्लेषो व्याख्यानेन नास्ति आश्रयत इति पदात्पदावधिक्रमन्वाख्यानं तदा शुक्लो गुणोस्येति मतुब्लुका सामान्यमात्रे पदं संस्क्रियत इसेकत्व
नपुंसकत्वाश्रयेण पदप्रयोगे प्राप्ते विशेषणानां चाजातेरिति सूत्रे गुणवचनानामाश्रयतो लिंगवचनानि प्रतिपादितानि वाक्यसंस्कारे तु न्यायसिद्धान्याश्र
यविशेषाश्रयेणैव पदसंस्कारात् तत्र यद्यपि चित्रगुशब्दे न संबंधोभिधीयते तथाप्यभेदोपचारात् संबंध्यभिधीयते तत्र द्विष्ठत्वेपि संबंधस्य प्रधानत्वात् स्वामि

अपर आह विभक्त्यर्थोभिधाने द्रव्यस्य लिंगसंख्योपचारानुपपत्तिः विभक्त्यर्थोभिधाने द्रव्यस्य ये लिंगसंख्ये ताभ्यां विभक्त्यर्थस्योपचारोनुप
पन्नः बहुपटुं बहुपटवौ बहुपटवः बहुपटवी बहुपटवा इति कथं ह्यन्यस्य लिंगसंख्याभ्यामन्यस्योपचारः स्यात् सिद्धं तु यथा गुणवचनेषु सिद्धमेत
त्कथं। यथा गुणवचनेषु गुणवचनेषूक्तं गुणवचनानां शब्दानामाश्रयतो लिंगवचनानि भवंतीति तद्यथा शुक्लं वस्त्रं शुक्ला शाटी शु
क्लः कंबलः शुक्लौ कंबलौ शुक्लाः कंबला इति यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिंगं वचनं च तद्गुणस्यापि भवति एवमिहापि
यदसौ द्रव्यं श्रितो भवति विभक्त्यर्थः तस्य यल्लिंगं वचनं च तत्समासस्यापि भविष्यति यदि तर्हि विभक्त्यर्थोभिधीयते कस्तर्हि पदार्थः
कथमभिहितो भवति स द्रव्यः सलिंगः ससंख्यश्च॥ ॥

न एवाश्रयत्वमवस्थाप्यत इति तद्गते लिंगसंख्ये भवतः न तु गुणाश्रये यदि तर्हीति यथा शुक्लशब्देन कदाचिद्गुण उच्यते कदाचिद्गुणी तथा चित्रगुशब्दे
न केवलस्यापि संबंधस्याभिधानं प्राप्नोतीति संबंधि न एवं तु सर्वे दृश्यते तन्न सिध्यतीत्यर्थः। कस्तर्हि इत्युक्ते न देवकात्स्न्यं प्रतिपाद्यते स द्रव्य इति द्रव्यशब्देन स
स्वरूपोर्थ उच्यते॥ ॥

अभीसपचान्द्रव्याभिधानस्योक्तत्वाद्यदि तर्हि विचोपायोगनामकाल्पर्यन्ति एवं च कथमनभिहित इति भाष्यस्य सर्वदेसादिकोर्थः॥

=स्तर्थमिति अर्थग्रहणसामर्थ्यात्संबंधादिर्विभक्त्यर्थ आश्रयाभिन्न एव प्रतीयते न केवलोपि सतदित्यलं ।१=

भो० कै० २ अर्थग्रहणसामर्थ्यादिति यदि विभक्त्यर्थस्यैव प्रधानस्य ग्रहणमभिमतं स्यात् तदार्थग्रहणं न कुर्यात् अन्तरेणाप्यर्थग्रहणमर्थस्यैव लाभादित्यर्थः । पदितं हीति
७२ पथा बहुव्रीहिणा विभक्त्यर्थस्याभिधानात् षष्ठ्यादयो न भवन्ति एवं लिंगसंख्ययोरप्यभिधानात् तयोर्वाचकाः प्रत्यया न प्राप्नुवन्ति सिद्धं त्विति स्त्रियां यस्मात् परि
७२ कं वर्त्तते तस्मात् टाबादयो भवन्तीत्यर्थः । तत्पुरुषसमासे नाभिहितेपि स्त्रीत्वे द्योतकाष्टाबादयो भवन्तीति दोषाभावः कर्म्मादीनामिति चित्रगुरिति समासेनाप्रा
तिपदिकार्थमात्रस्य कर्मादिशक्तिरहितस्यैकत्वादय उक्ताः ततः कर्मादिगतैकत्वप्रतिपादनाय वचनानि भवन्ति चित्रं गुपश्य चित्रगुणा कृतमिति प्रथमेति

अर्थग्रहणसामर्थ्यात् इह ग्रहणेन कमन्यपदे इतीयता सिद्धं कथं पुनः पदेनामवृत्तिः स्यात् परं नामग्रहः शाब्दो बोधः शब्देस्य संभवात् पर्येकार्थविज्ञा
स्यते सोयमेवं सिद्धे सति पदर्थग्रहणं करोति तस्यैतत्प्रयोजनं कर्त्तृत्वः पदार्थो यथाभिधीयेत स द्रव्यः सलिंगः ससंख्यश्चेति यदि तर्हि कर्तृत्वः प
दार्थोभिधीयते लैंगाः सांख्याश्च विधयो न सिध्यन्ति उक्तं वा किमुक्तं लैंगेषु तावदुक्तं सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणत्वात्स्वार्थे टाबादय
इति सांख्येष्वप्युक्तं किमुक्तं कर्मादीनामनुक्ता एकत्वादय इति कृत्वा सांख्या भविष्यन्ति प्रथमा तर्हि न प्राप्नोति समयाद्भविष्यति परिसामपि
कीन नियोगतः अन्याः कस्मान्न भवन्ति कर्म्मादीनामभावात् षष्ठी तर्हि प्राप्नोति शेषलक्षणा षष्ठी अशेषत्वान्न भविष्यति ॥ ॥

समासेन संख्याया अभिधानात् समपादिति । परस्त्वेति नियमार्थमारब्धं न केवलात् प्रकृतिः प्रयोक्तव्या न केवलः प्रत्यय इति न नियोगत इति नियमेन प्रतिनियतै
वयहिन भवति विभक्तिः ततः समर्थपरिपालनाय द्वितीयादयोपि प्राप्नुवन्तीति नियमकारणाभावादित्यर्थः । कर्म्मादीनामभावादिति कर्मरूपे वृद्धितीयेते वं कर्म्मा एम०
दिषु द्वितीयादीनां नियतत्वात्तदभावे तासामभावः । षष्ठी तर्हीति कर्म्मादीनामभावात् शेषः स चात्रास्तीति भावः । अशेषत्वादिति प्रातिपदिकार्थमात्रस्य ७२
प्रथमाविधानादुपयोगान्नास्ति शेषत्वमित्यर्थः ॥ ॥ ॥

=नियमार्थमिति प्रातिपदिकात्सन्नः भस्य पुरुषभवतिनान्यः प्रत्ययः समातिपदिकात्सनरए भवति न केवलः नियमः एवं धातोरित्यपि ।२=

=अनुक्त इति। अनन्वितार्थकविभक्त्यपेक्षयानुवादकविभक्तेरेव न्याय्यत्वादिति भावः।१८= प्रकारान्तरेणेति। [illegible] रेणैव विग्रहवाक्यार्थस्य अनन्तः संख्याविशेषाभिव्यक्तिः वचनासंकरस्त्वनुवादकविभक्तेर्न्याय्यत्वेन परिहृतः। इदानीं तु संख्यासामान्यमेव समा साकुर्थ्यते इति सं

एवमपीति॥ समयास्तु प्रथमायामिष्यमाणायां वचनस्यातिक्रमप्रसंगः। अर्थे तद् इतीय यथान्यत्रैकत्वादिष्वेकवचनादीनि दृष्टानि तथैवात्रापि भवंस्येवं हि समयस्य परिपालितो भवेदर्थस्यानुसरतः। अथ वेति। असंकरं प्रथमाविधानं प्रकारान्तरेण प्रतिपादयति पराचित्रगुरिस्येकत्वविशिष्टः प्रातिपदिकार्थः प्रतिपिपादयिषितः तदा विभक्त्या विना सोऽनभिकान्ते इत्यपि तु मिति प्रथमैकवचनं विधेयं एवं द्वित्वबहुत्वयोर्द्विवचनबहुवचनविधिः परप्रधाने इति संख्येयप्रधाने इत्यर्थः। एवमपीति षष्ठ्यर्थस्यात्र भावात् व्यभिचरतीति लिंगं नरसंख्यांतरयोगेऽन्यलिंगसंख्यापरित्यागात्। अभि

एवमपि व्यतिकरः प्राप्नोति एकस्मिन्नपि द्विवचनबहुवचने प्राप्नुतः द्वयोरप्येकवचनबहुवचने बहुष्वप्येकवचनद्विवचने। अर्थे तो व्यवस्था भविष्यति। अथवा संख्यानामेयं परप्रधानासंख्येयम नयाविशेष्यं यदि चात्र प्रथमा न स्यात् संख्येयमविशेषितं स्यात्। अथवा वक्ष्यसे तत्वचनग्रहणस्य प्रयोजनं उक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यात् एवमपि षष्ठी प्राप्नोति किं कारणं व्यभिचरत्येवत्ययं समासे लिंगसंख्ये षष्ठ्यर्थे पुनर्न व्यभिचरति अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः संपन्नः तत्र प्रातिपदिकार्थे प्रथमेति प्रथमा भविष्यति न तर्हीदानीमिदं भवति चित्रगोर्देवदत्तस्येति भवति बाह्यमर्थमपेक्ष्य षष्ठी परिगणनं कर्तव्यं बहुव्रीहिः समानाधिकरणानां समानाधिकरणानां बहुव्रीहिर्वक्तव्यः किं प्रयोजनं व्यधिकरणानां मा भूदिति पंचभिर्भुक्तमस्येति प्रत्ययानां च अव्ययानां च बहुव्रीहिर्वक्तव्यः॥ ॥

हित इति संबंधस्य प्रातिपदिकार्थरूपत्वात्तस्याष्ट्यर्थेनानास्तीत्यर्थः। सर्व एवात्र संबंधोऽन्तर्भूतत्वात् प्रातिपदिकार्थतां गतः इति मत्वाह छति। न तर्हीति भवति बाह्यमिति तिगोभिरन्यपदार्थस्यायः संबंधः स एव समासेऽन्तर्भूतो न तु सर्वः। बहुव्रीहिरिति भाष्यकारेण त्रिकतः शेषोऽगत्यन्त इत्ययमर्थः स॥ ॥
॥धितो वार्त्तिककारेणानुवचनेन प्रतिपाद्यते॥

भा० कै० २ उच्चैर्मुख इति॥ उच्चैःशब्दस्याधिकरणप्रधानत्वादेयधिकरणपमिति वचनं कंठेस्थ इति सुपिस्थ इति कः अमूर्द्धमस्तकादि स्वलुक् समासे त्वसिद्धे वचन
७३ मुत्तरपदलोपार्थं उष्ट्रमुखमिवेति। अवयवधर्मेण समुदायस्य व्यपदेशात् उष्ट्रस्योपमानत्वेति उपमानपूर्वे उष्ट्रमुखशब्दः उपमानोपमेयपूर्व
73

उच्चैर्मुखमस्येति उच्चैर्मुखः नीचैर्मुखः सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च सप्तमीपूर्वस्योपमानपूर्वस्य च बहुव्रीहिर्वक्तव्यः उ
त्तरपदस्य च लोपो वक्तव्यः। कंठेस्थः कालोस्य कंठेकालः उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः खरमुखः समुदायविकारषष्ठ्याश्च बहु
व्रीहिर्वक्तव्यः उत्तरपदस्य च लोपो वक्तव्यः। केशसमाहार चूडा अस्य केशचूडः सुवर्णविकारो लंकारोस्य सुवर्णालंकारः प्रादिभ्यो धा
तुजस्य वा प्रादिभ्यो धातुजस्य बहुव्रीहिर्वक्तव्यः उत्तरपदस्य च लोपो वक्तव्यः। प्रपतितपर्णः प्रपर्णः प्रपतितपलाशः प्रपलाशः न
ञोस्त्यर्थानां च नञोस्त्यर्थानां बहुव्रीहिर्वक्तव्यः उत्तरपदस्य च वा लोपो वक्तव्यः। अविद्यमानः पुत्रोस्य अविद्यमानपुत्रः अपुत्रः अ
विद्यमानभार्यः अभार्यः तत्रहीदं बहुव्रीहिर्वक्तव्यं [redacted] नवा अनभिधानादसमानाधिकरणेषु समाससंज्ञाभावः॥ नवा वक्तव्यं। असमा
नाधिकरणानां बहुव्रीहिः कस्मान्न भव[redacted]ति पंचभिर्भुक्तमस्येति अनभिधानात् तच्चावश्यमनभिधानमाश्रयितव्यं क्रियमाणे
ऽपि परिगणने यत्राभिधानं न भवति तत्र न बहुव्रीहिः यथा पंचभुक्तवंतोस्येति॥ ॥

त्विला सदयोर्वैयधिकरण्यमत्रेति वचनमुत्तरपदलोपार्थं च समुदायविकारषष्ठ्या इति समुदायावयवसंबंधे प्रकृतिविकारसंबंधे च या षष्ठी एम०
तदंताद्यसर्वतदंतस्य शब्दांतरेण सह बहुव्रीहिरित्यर्थः॥ ॥ ॥ ७३

क्रियमेतदार्थपरिगणन॰

अथैतस्मिन्निति। अनभिधानमभ्युपगम्यापि पदिमं रबुद्धिमुत्पादनाय परिगणनं मपि कर्त्तव्यं वर्त्तनं वर्त्तः समासः सविद्यते यस्मिन् सवर्त्ती मत्वर्थग्रहणमिति। एवमर्थः सप्तम्यर्थे अमत्वर्थः। संख्यये तिसंख्येयस्य वार्थस्य चान्यपदार्थत्वात् सिद्धे समासे उत्तरस्तत्रमन र्थकस्मात् यदा त्वनेन मत्वर्थे समासस्तदासार्थकमिसर्थः। व्याख्यानोत्तरमाह अपर इति कर्म्मवचनेनाप्रथमाया इति प्रथमार्थं वर्जयित्वा सर्वत्रान्यपदार्थे कर्म्म

=अर्थसान्यपदार्थकस्मान्नियमेनापि विशेषेऽमत्वर्थग्रहणं कार्यमित्यर्थः।

अथैतस्मिन्सत्यनभिधाने पदिवृत्तिपरिगणनं क्रियते तर्हि वृत्तिपरिगणनमपि कर्त्तव्यं कथं कर्त्तव्यं अर्थनियमेमत्वर्थग्रहणं कर्त्तव्यं मत्वर्थेयः स बहुव्रीहिरिति वक्तव्यं। इहमाभूत् कष्टं श्रितमनेनेति तथा चोत्तरस्य वचनार्थः एवं च कृतोत्तरयोगस्य वचनार्थ उपपन्नो भवति केचित्तावदाहुः यद्वृत्तिस्तत्र इति संख्यायाव्ययासन्नादूराधिकसंख्याः संख्येय इति अपर आहुः पदार्त्तिके इति कर्मवचनेनाप्रथमायाः कर्मवचनेनाप्रथमाया बहुव्रीहिर्वक्तव्यः। ऊढो रथो येन ऊढरथो नड्वान् उपहृतः पशुः रुद्राय उपहृतपशू रुद्रः उद्धृतः ओदनः स्थाल्याः उद्धृतौदना स्थाली यदि कर्मवचनेनेत्युच्यते। अथ कर्तृवचनेन कथं प्राप्तमुदकं ग्रामं प्राप्तोदको ग्रामः आगता अतिथयो ग्रामं आगतातिथिर्ग्रामः कर्तृवचनेनापि कर्तृवचनेनापीति वक्तव्यं। अप्रथमया इति किं मर्थं वृष्टे देवे गतः। अप्रथमा

= प्रथमाया इत्युच्यमाने इह कस्मान्न भवति वृष्टे दे

वाचिनासमासो भवतीत्यर्थः। इदं च वार्त्तिकमेवमुपपद्यते यदि मत्वर्थे बहुव्रीहिर्भवति।

अन्यथैतदवक्तव्यं स्यात्। आद्यमेवत्युक्तं व्याख्यानं नहि वार्त्तिककारः स्ववचनमेव वृत्ताप कल्लेनोपन्यस्यति। ऊढरथ इति। रथशब्दः कर्म्मवचनऊढ

= शब्देन सामानाधिकरण्यात्॥ ॥श्री॥ ॥

बहिरंगेति। वर्त्तिपदार्थेनि मित्तांतरंगा बात्यपदार्थापेक्षा तु बहिरंगेति न गृह्यते ऽप्रसिद्धत्वादित्यर्थः। उपसर्गविभक्तीति। स्वरादिष्वस्ति शब्दपाठमनपेक्ष्यैत दुक्तं। प्रतिवचनमिति बहुव्रीहिपदार्थाबहुत्वसंख्यायुक्ताः एषामस्तत्वैकत्वसंख्यायुक्तेनान्यपदार्थविशेषणेन प्रतिवचनं नोपपद्यत इत्यर्थः इष्ट समासस्यापनायदिगंतराणि निरा कर्त्तुमुपन्यस्तमिति एवं तर्हीति प्रतिवचनमिति कुठानामिति प्रतिवचनेन भाव्यं ननु कुठ इत्यनेनेत्यर्थः। स्वरेचेसतो

बहिरंगा ऽऽत्रापथमास्तबधिकारे ऽस्ति क्षीरादिवचनं स्तुबुधिकारेस्ति क्षीरेस्तुपसंख्यानं कर्त्तव्यं। ऽस्ति क्षीराब्राह्मणीं तत्तर्हि वक्तव्यं। न वाव्यय त्वात् नवा कर्त्तव्यं किं कारणमव्ययत्वात् ऽव्ययमेषोस्ति शब्दः नैषोस्ते लेट् कथमव्ययत्वं उपसर्ग विभक्ति स्वरप्रतिरूपकाश्च निपाता भवंतीति निपातसंज्ञा निपातोव्ययमित्यव्ययसंज्ञा ऽथ किंस ब्रह्मचारीति कोयंसमासः बहुव्रीहिरित्याह कोस्यविग्रहः। केस ब्रह्मचारिणो स्येति यद्येवं कुठ इति प्रतिवचनं नोपपद्यते न त्यनात्र ऐनाप्यराख्येयं एवं तर्हि एवं विग्रहः करिष्यते केषांस ब्रह्मचारीकिंस ब्रह्मचारीति प्रतिवचनं चैवं नोपपद्यते स्वरे च दोषो भवति किं स ब्रह्मचारी त्येवं स्वरः प्रसज्येत किंस्वचारीति चेष्यते एवं तर्ह्येवं विग्रहः करिष्यते कः सब्रह्मचारी किंस ब्रह्मचारीति भवेत्प्रतिवचनमुपपन्नं स्वरे तु दोषो भवति एवं तर्ह्येवं विग्रहः करिष्यते कः सब्रह्मचारी तव किंसब्रह्मचारीत्वमिति। ऽथवा पुनरस्त्वयमेव विग्रहः केस ब्रह्मचारिणो स्येति [redacted] ननु चोक्तं कुठ इति प्रतिवचनं नोपप [illegible]

दात्रं स्यात् ऽऽायुदात्तत्वंच ष्यत इत्यर्थः। कः सब्रह्मचारीति सुप्सुपेति समासं मन्यते विशेषणविशेष्यभावाभावात्तु विशेषणसमासोनास्ति कः सब्रह्मचारीनवेति एकस्मिन् पक्षे एकवचनेन प्रतिवचनमुपपद्यते ऽत्रापिपक्षे कुठ इति प्रतिवचनं व्यधिकरणं प्राप्नोति ऽहं कुठ इति सामानाधिकरण्यं एप०
७४
इष्यत इति विशेषाभावं मत्वाह। ऽथवेति॥ ॥ ॥श्री॥

=विशेषणविशेष्यभावाभावादिति। परिच्छेद्यपरिच्छेदकभावो हि विशेषणविशेष्यभावस्तदभावादित्यर्थः॥=

अग्नौ करवाणि न्यायेनेति। अग्नौ करवाणीति यद्वाक्यं तदनुकरणमेतत् कर्म्मोपीति सकर्म्मकत्वाल्लोटि क्रियायाः एवं कठ इति न हि तेषां कठत्वे न विना
तस्य कठत्वोपपत्तिः। तथा हि समाने ब्रह्मणि व्रतचारी सब्रह्मचारी कथ्यते तत्र चरतस्येकचरणमध्ययनापेक्षं सब्रह्मचारित्वं न खल्वपीति वर्त्तिपदार्थो
नामुपसर्जनत्वात्तदुपलक्षितस्यान्यपदार्थस्य प्राधान्यात् किं सब्रह्मचारिशब्देन समासेन तेषामभिधानाभावात् कठा इति बहुवचनान्तं प्रतिव

अग्नौ कर वाणि न्यायेन भविष्यति तद्यथा कश्चित्कंचिदाह अग्नौ करवाणीति स आह कुर्विति कर्त्रैवानुज्ञाते कर्मोप्यनुज्ञातं भवति अपर आ
ह अग्नौ करिष्यं इति क्रियतामिति कर्मण्यनुज्ञाते कर्त्तोप्यनुज्ञातो भवति यथैव खल्वपि के सब्रह्मचारिण इत्युक्ते संबंधादेतद्गम्यते
नूनमयमपि कठ इति एवं कठ इत्युक्ते संबंधादेतद्गम्यते नूनं तेपि कठा इति न खल्वपि ते समासेन शक्या अतिनिर्देष्टुं उपसर्जनं हि ते भवंति अथा
र्द्धतृतीया इति कोयं समासः बहुव्रीहिरित्याह कोस्य विग्रहः अर्द्धं तृतीयमेषामिति कः समासार्थः समासार्थो नोपपद्यते अन्यपदार्थो हि ना
स भवति येषां पदानां समासस्ततोन्यस्य पदस्यार्थोन्यपदार्थः। एवं तर्ह्येवं विग्रहः करिष्यते अर्द्धं तृतीयमनयोरिति एवमपि कः षष्ठ्यर्थः षष्ठ्य
र्थो नोपपद्यते किं हि तयोरर्द्धं भवति असकृत् तस्येयमेव विग्रहः अर्द्धं तृतीयमेषामिति ननु चोक्तं समासार्थो नोपपद्यत इति नैष दोषः॥ ॥

वचनं न कदाचिद्द्वितीयार्थः। पदानुक्ते सब्रह्मचारिण इत्येतिवाक्येन प्रश्नः क्रियते न तु समासेन तदा कठा इत्येवमतिवचनं कः समासार्थ इति वर्त्तिपदार्थव्यतिरिक्ते
नान्यपदार्थेन भाव्यं इह बहुत्वान्यथानुपपत्त्या क्रियायां च वर्त्तिपदार्थस्याप्यंतर्भावादन्यपदार्थो नोपपद्यते किं हि तयोरिति तृतीयस्य हि तदर्द्धमिति द्वाभ्यां तस्यावय
वावयविभावलक्षणः संबंधो नास्ति स्वस्वामिसंबंधे चात्रानभिधानात् बहुव्रीहिर्न भवति समासस्यानुपपत्तिचोदनातन्मूलाभावात् द्विवचनप्रसंगो न चोदितः॥

=आत्मीयंतामिति बहुवचनवाच्यबहुत्वान्यथानुपपत्तेरर्थः।२= क्रियायां आनयनरूपायां २=

अवयवेनेति॥ अर्द्धस्य द्वयोरन्वयः समुदायः स समासार्थः समुदायावयवानां क्वचिद्भेदविवक्षा क्वचिदभेदविवक्षा यथा ब्राह्मणानां संघः संघीभवति ब्राह्मणा इति असि द्वितीय इति द्वयोः पूरणः द्वितीयः स च द्व्यात्मकस्य समुदायस्यावयवो भवतीति तदवयवस्य समुदायस्य समासेनाभिधानात् द्विवचनमसंगः।
अर्थेति नह्यत्र स्वस्वामिभावादिः संबंधोस्तीति भावः एतच्च वार्त्तमिति असार वाची वार्त्त शब्दः माता पित्रमामेव पुत्रयो जन्यजनक भावः संबंधो न तु प

अवयवेन विग्रहः समुदायः समासार्थः॥ यद्यवयवेन विग्रहः समुदायः समासार्थः असि द्वितीयो नुसंसार पांडवं संकर्षेण द्वितीयस्य बलं तत्स्य वर्द्धतामिति द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति अस्तु तर्ह्ययमेव विग्रहः अर्द्धं तृतीयमनयोरिति ननु चोक्तं षष्ठ्यर्थे नोपपद्यत इति नैष दोषः इदं तावदयं प्रष्टव्यः अथेह देवदत्तस्य भ्रातेति कः षष्ठ्यर्थ इति न चैतत्स्यात् एकस्मात्प्रादुर्भाव इति एतच्च वार्त्तं तद्यथा सार्थिकानामेकप्रतिश्रये उषितानां प्रातरुत्थाय प्रतिष्ठमानानां न कश्चित्परमभिसंबंधो भवति एवं जातीयकं भ्रातृत्वं नाम अन्वेषयुक्तः षष्ठ्यर्थो दृश्यते इहापि युक्तो दृश्यतां इह तर्हि अर्द्धतृतीया आनीयंतामित्युक्ते अर्द्धस्यानयनं न प्राप्नोति अस्तु तर्ह्ययमेव विग्रहः अर्द्धं तृतीयमेषामिति ननु चोक्तम् असि द्वितीयो नुससार पांडवं संकर्षेण द्वितीयस्य बलं तत्स्य वर्द्धतामिति द्विवचनं प्राप्नोतीति नैष दोषः अयं तीया[redacted]
तः शब्दो स्त्येव पूरणो वर्तते अस्ति सहायवाची तद्यः सहायवाची तस्येदं ग्रहणं असि द्वितीयः॥ असि सहाय इति गम्यते एवमप्यर्द्ध तृतीया इत्येकस्मिन्नेकवचनं प्राप्नोति एकार्था हि समुदाया भवंति यथा शतं यूथं वनमिति॥ अस्तु तर्ह्ययमेव विग्रहः अर्द्धं तृतीयमनयोरिति ननु चोक्तमर्द्धतृतीया

रस्य रेणकश्चिदिस्यर्थः॥ अत्र चेदिति परस्परोपकाराभावेपि यदि समानो देशापित्वमात्रेण कात्यनिकः संबंधः तदार्द्धस्य द्वाभ्यामेकमदेशावस्थानादिनिमित्तः संबंधो युक्त इत्यर्थः॥ इहतर्हीति अर्द्धतृतीयमनयोरिति द्वयोरेव समासार्थता दानयनं स्यात् नार्द्धस्येत्यर्थः॥ अस्ति सहायवाचीति अत्र सुस[redacted]न्न एवेत्यर्थः॥ ॥

यथो०

भवति बहुव्रीहाविति। उपलक्षणार्थं सहितयोरानयनं भविष्यतीत्यर्थः संयोगसमवायलक्षणे संबंधे यदा बहुव्रीहिस्तदा तद्गुणसंविज्ञानो भवति शुक्लवासातं
वकर्ण इति स्वस्वामिभावादिके तु संबंधे बहुव्रीहौ न तद्गुणसंविज्ञानाभावो यथा चित्रगुरिति संक्षेपेण विषयविभागः द्विवचनप्रसंगात् दुष्टोयं पक्ष इति मत्वाह
अथवेति संख्यानामेयमिति। अयमर्थः अर्द्धतृतीयमेषामिति बहुत्वसंख्याविशिष्टोन्यपदार्थो वाक्य उपात्त इति तथाभूतस्यैव समासो वाचक इति अव
यवप्रत्यार्थं बहुत्वं यथा च वृक्षा इति बहुत्वसंख्यायुक्तः समुदायः प्रतीयते धवखदिर पलाशा इति च तथार्द्धतृतीया इत्यर्थः। इह तर्हीति अर्द्धस ह

भवति बहुव्रीहौ तद्गुणसंविज्ञानमपि तद्यथा शुक्लवाससमानय लोहितोष्णीषाः ऋत्विजः प्रचरंतीति तद्गुण आनीयते तद्गुणाश्च प्रचरंति अ
यवा पुनरस्त्वयमेव विग्रहः अर्द्धतृतीयमेषामिति ननु चोक्तमेकवचनं प्राप्नोतीति नैष दोषः संख्यानामेयं परप्रधाना संख्येयमनया विशे
ष्यं यदि चात्रैकवचनं स्यात् संख्येयमविशेषितं स्यात् इह तर्ह्यर्द्धतृतीया द्रोणा इत्ययं द्रोणशब्दः समुदाये प्रवृत्तः अवयवे नोपपद्यते नैष दो
षः समुदायेषु हि प्रवृत्ताः शब्दाः अवयवेष्वपि वर्त्तंते तद्यथा पूर्वे पंचालाः उत्तरे पंचालाः तैलं भुक्तं घृतं भुक्तं शुक्लो नीलः कपिल इति
एवमयं समुदाये द्रोणशब्दः प्रवृत्तोवयवेष्वपि वर्त्तते कामं तर्ह्यनेनैव हेतुना यदा द्वौ द्रोणौ अर्द्धाढकं च तत्रेप्यर्द्धतृतीया द्रोणा इति नक्तं यं स
मुदायेषु वृत्ताः शब्दाः केष्ववयवेषु वर्त्तंते येवयवास्तं समुदायं न व्यभिचरंति किं च समुदायं न व्यभिचरति। अर्द्धद्रोणो द्रोणं अर्द्धाढकं पुनर्व्यभि

योश्च द्रोणयोर्यः समुदायः समासार्थस्तत्रार्द्धस्य द्रोणत्वाभावात् द्रोणा इति नोपपद्यत इत्यर्थः नैष दोष इति अर्द्धेपि द्रोणत्वोपचारात् द्रोणशब्दस्य प्रवृत्तिरित्य
र्थः। नकर्त्तव्यमिति स्वावयव एव समुदायरूपोपचारो नान्यदीये अवयव इत्यर्थः। अर्द्धे द्रोणो द्रोणमिति द्रोणेन विनास्याभावादित्यर्थः। अर्द्धाढकमिति।
=अर्द्धाढको द्रोणं न व्यभिचरतीति भाष्ये उक्तं तत्र ॰ चतुराढको द्रोणः तत्पश्च विनापि द्रोणो नैकाढकसद्भावे प्यर्द्धस्य भावः॥ " "
आह द्रोणो नेति द्रोणेन द्रोणवुद्ध्या विना अस्यार्द्धद्रोणवुद्धेरभावादिति भावः। एतसुतत्र विनापि द्रोणेन द्रोणवुद्ध्या एकाढकसद्भावेपि तद्बुद्धिसद्भावेपि अर्द्धस्य अर्द्धाढकस्य भाव इत्यर्थः॥ २=

=संशयेति॰ संशयापन्नत्वलर्थः। अनेककोटयवगाहिज्ञानस्य संशयत्वाद्वयोर्द्वित्वत्रयाणां त्रित्वं सर्वदा पदस्य तदेकवचनं बहुवचनमिति भावः॥४= अत्रेति॰ अनिर्ज्ञातेऽर्थे इत्यत्र॥५= अंतर्भाविनेति॰ अंतर्भाविना पूर्वसंख्याकालहित्वरूपायसंख्याबहुत्वसंख्यायाः इत्यर्थः। कतिपयेष्वसंख्या

=परस्परमतिक्षेपेणसमभिव्याहृतपदार्थमनाकुपसमविकल्पस्यान्यदर्थमात्रादिति भावः॥६=

भा॰कै॰२ संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये॥ द्वित्राइतिबहुव्रीहिनिमित्तस्पष्टचोदर्शनाद्वात्वाभावाच्चनिश्चितेबहुव्रीहित्वेविग्रहनिश्चयाययमप्रश्नः कोयंसमास इति स्वाभिप्रायंप्रकाशयितुमाह कोस्येति

७६ यदितावत् द्वौत्रयएषामुच्यमाना मितितदापत्वर्थत्वात्सर्वेणाबहुव्रीहिः सिद्धः समासांतत्स्तडजून सिध्यति अप्संख्येयइत्रित्वाद्बहुव्रीहेः अथ द्वौवात्रयो

७८ वेतितदा पक्षेद्विवचनप्रसंगः भवेद्यदेति विकल्पो वार्थ इति द्वित्रशब्दः कदाचित्द्वयोर्वाचकः कदाचित्त्रयाणां अनिर्ज्ञातेऽर्थे इति केचिद्बहुवचनमेतदिसा

हुः। अस्मेतुन्यायसिद्धमस्मेतेऽयमर्थः संशयो त्रवार्थो नविकल्पः संचानियतसंख्याविमर्शीति विमर्शविषयबहुत्वसद्भावाद्बहुवचनं अर्थशब्देनात्र

संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये॥ द्वित्राः त्रिचतुरा इति कोयं समासः बहुव्रीहिरित्याह कोस्य विग्रहः द्वौवा त्रयोवेति भवे यदाबहूना

मानयनं तदाबहुवचनमुपपन्नं यदातु खलु द्वावानीयेते तदासिध्यति तदापि सिद्धं कथं केचित्तावदाहुः अनिर्ज्ञातेऽर्थे बहुवचनं प्रयोक्तव्यमि

ति यथा कतिभवतः पुत्राः कति भवतो भार्या इति अपर आह द्वौवेत्युक्ते त्रयोवेतिगम्यते त्रयोवेत्युक्ते द्वौवेतिगम्यते सैषा पंचाधिष्ठाना वाक्तत्रयु

क्तं बहुवचनं अथ द्विदशाः त्रिदशा इति कोयं समासः बहुव्रीहिरित्याह कोस्य विग्रहः द्विर्दश द्विदशा इति संख्यासमासे सुजंतत्वात्संख्याप्रसि

द्धिः संख्यासमासे सुजंतत्वात्संख्येत्वप्रसिद्धिः नहि सुजंता संख्या स्तिएवं तर्ह्येवं विग्रहः करिष्यते॥ =विमर्शस्येति॰ संशयात्मकज्ञानस्येत्यर्थः। तथाचोभयपक्षावलंबिनः स्यानेकवि

संख्येवोच्यते संख्यायामविज्ञातायामित्यर्थः कतिभवत इति अंतर्भावितपूर्वसंख्या बहुत्वसंख्यापृच्छ्यत इति बहुवचनं द्वौवेति विरुद्धानेकविषयत्वाद्विमर्शस्य

पर्याय स्थितद्वित्वत्रित्वाश्रयवस्तुसंकलनया पंचाधिष्ठानमुच्यते द्वि र्दशेति अयंभावः द्वौदशेति विग्रहो विरोधान्नक्रियते तथाहि द्वित्वंदशसंख्यायाएकत्वान्नो राम॰

पपद्यते नापि संख्येयानां दशानां नस्माद्दिश [redacted] द्देन दशत्वावच्छिन्नगतद्वित्वसंख्याप्रतिपाद्यत इति सुजंते नवाक्यं क्रियते अत्र दूषणमाह संख्यासमास इति सुजंत ७६

॥ ९ स्वशब्दान्तरत्वात्संख्यावाचित्वंनास्तीत्यर्थः॥ ॥

=द्विशब्दाद्वृत्ती ति॰ ययमिक्रियाभावनिगतएनेसलद्वित्वविधानाद्दशत्वादृत्ती समंगांततथा दिशत्वनिष्ठा पाभ्यावृत्तिक्रियापा जनगणएनमेवेहविवक्षितं॥९= पर्यायेत्वपवतसमनिक्षेपेण स्थितस्यद्वित्वत्रित्वाभावस्तलनः संकलनयार्थज्ञानमस्यसमत्वसहितः

=क्रियाया आवृत्तिक्रियाया अभ्यावृत्तिलक्षणोऽर्थोऽन्यलक्षणोऽर्थः संख्येयो द्वयोरसंख्या [redacted] प्युक्तो द्वित्वसंख्ययापरिच्छेद्यः ॥=

द्वौ दश ताविति । द्वौ दश तौ द्वर्गो द्विरित्यर्थः नवेति नहि वाक्योपमर्देनेन समासः क्रियते लौकिके प्रयोगे द्वयोरपि नित्यत्वात् अन्वाख्यानमात्रं तु शास्त्रेण क्रियते तत्र
वृत्तिविषये सुच् मंतरेणाभ्यावृत्तिसंख्याभिधायी द्विशब्द इति संख्यावाचित्वात् समासो भवत्येवं न चात्रेति वृत्त्याविष्टार्थः अभिहित इति शब्दशक्तिस्वाभाव्यात्
समासः सुजर्थं प्रत्यायतीत्यर्थः इतरः कार्यशब्दः द्वन्नमाश्रित्याह किं चभो इति यथा चार्थे द्वंद्वस्य विधानात् द्वंद्वे च शब्देन प्रयुज्यते तथा पद्य यं स
मासः सुजर्थे विधीयते तदास्तु चोऽप्रयोगः स्यात् नान्यथेति प्रश्नः नखल्विति नहि शब्दैरर्थाभिधानं वाचनिकं किं तु स्वाभाविकं स चेति क्रियाभ्यावृत्ति

द्वौ दश तौ द्विदशा इति एवमपि अत्कारांतत्वात्संख्येयसम्प्रसिद्धिः नत्यकारांता संख्यास्ति अत्र तस्यैव विग्रहः द्विर्दश द्विदशा [redacted] इति । ननु चोक्तं सं
ख्यासमासे सुजंतत्वात्संख्येयसम्प्रसिद्धिरिति नवा सुजंतत्वात् नवा एष दोषः किंकारणमसुजंतत्वात् सुजंतस्येसुच्यते न चात्र सुजंतं पश्यामः
किं पुनः कारणं वाक्ये सुजदृश्यते समासे न दृश्यते सुजभावोऽभिहितार्थत्वात् समासे समासे सुजभावः किंकारणं अभिहितार्थत्वात् अभिहितः सु
जर्थः समासेनेति कृत्वा समासे सुज् न भविष्यति किं च भोः सुजर्थे इति समास उच्यते न खलु सुजर्थे इत्युच्यते गम्यते सुजर्थः कथं यावता सं
ख्येयोपसंख्या संख्यायते स च क्रियाभ्यावृत्त्यर्थः स चोक्तः समासेनेति कृत्वा समासे सुज् न भविष्यति अशिष्यः संख्योत्तरपदः संख्ये
यार्थाभिधायित्वात् अशिष्यः संख्योत्तरपदो बहुव्रीहिः किंकारणं संख्येयपदार्थाभिधायित्वात् [redacted]

तल्लक्षणोऽर्थः संख्येयो न तु दशसंख्या नापि तत्संख्यायुक्तः एतच्च पूर्वमुक्तं वाक्ये तु सुच् मंतरेण क्रियाभ्यावृत्तेरनवगमात् सुच् प्रयोगः ततश्चास्वपदविग्रहः क्रियते
द्विर्दश द्विर्दश इति । अनेनैव न्यायेन दश ताविति पि विग्रहः कार्यो न्यायसाम्यप्रतीयमानत्वात् भाष्यकारेण पुनर्न दर्शितः तदुक्तं शब्दांतरत्वात् वाक्ये खु विशे
षाय द्यपि श्रुताः वृत्ति शब्दोऽन्य एवायमर्थांतरनिबंधन इति ॥ ॥८॥ ॥ ॥

=दशता विस्पीति पूर्वस्मिन्पक्षे द्वौ द्विशब्दः सुजर्थ इति स्वरत्रपक्षे दशशब्दः स्वरतो दश सप्तर्परिमितं [redacted] उक्तावयवभेदश्चास्तो समासार्थ इति बहुवचनोपपत्तिः ॥=

=ऽतो विंशतिरिति ... दशतो परिमाणमस्येत्युभयथा तत्पुरुषो ...रिति भावः ॥ २ ॥=

भा०कै०२ संख्येयमिति॥ अधिका विंशतिर्यासां ता अधिकविंशा गाव इति संख्या न वृत्तिता द्विंशतिशब्दस्य संख्येयमन्यपदार्थ उपपद्यत इति भावः दशदर्थ इति संख्याने

७७ संख्येये चेत्यर्थः॥ अधिकदशा इति दशशब्देन संख्येयस्याभिधानादन्यपदार्थाभावः तस्माद्दशदर्थं सूत्रं कर्त्तव्यमेव इदानीमव्ययं निरूप्यते बहुव्रीह्यव्ययी

११ भावयोर्विषयविभागप्रदर्शनार्थं उपदशा इति दशानां समीप इति समासः सामीप्यप्राधान्ये बहुव्रीहिः समीपप्राधान्ये त्वव्ययीभाव इति प्रदर्शितं भवति सामी

प्यं तिं धर्मेण धर्मी लक्ष्यते कस्य सामीप्यवान् इत्यर्थः उपशब्दो हि समीपमात्रवाची उपकुंभादिषु दृष्ट इति तस्य समीपिवाचित्वं नास्ति नापि दशानां शब्दस्य समी

=शब्दस्य समासेनेति चेत्=

संख्येयं वार्थस्याभिधीयते तत्रान्यपदार्थ इसे वसिद्धं मवेत्सिद्धमधिकविंशाः अधिकत्रिंशा इति यत्रैतत्क्रियार्यते विंशत्यादयो दशदर्थे वा स्युः परि

माणिनि वेति इदं तु न सिध्यति अधिकदशा इति यत्र नियोगतः संख्यासंख्येये एव वर्त्तते अथो पदशा इति कोयं समासः बहुव्रीहिरित्याह को

स्य विग्रहः दशानां समीपे उपदशा इति कस्य पुनः सामीप्यमर्थः उपस्य यद्येवं नान्यपदार्थो भवति तत्र च प्रथमानिर्दिष्टं संख्याग्रहणं श

क्यमन्तुं मत्वर्थे वा पूर्वस्य विधानात् अथवा मत्वर्थे पूर्वो योगः अमत्वर्थोपमारंभः कबभावार्थं वा अथवा कप्मा भूदिति संख्यया॥ ०॥

प्यवानर्थः स एवाह यद्येवमिति यदोपशब्दस्यैवासावर्थ इत्यर्थः। एवमप्यया सन्नादूराधिकग्रहणं स्यापि तं संख्याग्रहणं तु न कर्त्तव्यं द्वित्रा इत्यादौ वार्थे सान्य

पदार्थत्वादित्याह तत्रेति इदानीमेतदपि स्थापयन्नाह। अथवेति ननु मत्वर्थे ग्रहणं तत्र न क्रियते द्वित्रा इति सिद्ध्य इत्याह कबभावार्थं वेति शेषाद्विभाषेत्य एम० ७७

त्र शेषाधिकारविहितो बहुव्रीहिर्गृह्यते अनेकमन्यपदार्थ इत्यत्रैव च शेषग्रहणमनुवर्त्तते नोत्तरेषु योगेषु॥ ॥ ॥

=शेषाधिकारविहित ... [illegible] ... शेषाधिकारविहितबहुव्रीह्यभावेन ... इति भावः ॥=

दिङ्नामानि तुल्यन्यायत्वाद्योगद्वयस्य सह विचारः दिक्समाससहयोगयोरिति। अभिधास्यत इति पूर्वे वार्त्तिकोक्तमपेक्ष्यते दक्षिणस्याश्च पूर्वस्याश्च दिशो
यदन्तरालं दिक् सा दक्षिणपूर्वेत्युच्यते तत्रान्तरालस्यान्यपदार्थत्वात् पूर्वेणैव सिद्धः समासः स पुनरुक्तः स्यात् अपि समासस्यापि नाम प्रधानमन्यपदार्थोऽभि
धेय इति नार्थः सूत्रद्वयेनेत्यर्थः। अथ पुनरिति। स्वार्थे भविशिष्टे काले इत्यर्थः। तत्रा र ब्धे यमर्थो व्याख्यायते अन्तराले यानि दिङ्नामानि व

=वर्त्तन्ते ... सह योगद्वयस्य ... इत्यादि॥

दिङ्नामान्यन्तराले तेन सहेति तुल्ययोगे दिक्समाससहयोगयोर्व्यान्तरालप्रधानाभिधानात् दिक्समाससहयोगयोश्चा
श्रिष्यो बहुव्रीहिः किं कारणं अन्तरालप्रधानाभिधानात् (धानाभि) दिक्समाससहयोगे चान्तरालं प्रधानं चाभिधीयते तेनान्यपदार्थ इत्येव सिद्धं य
द्येवं दक्षिणपूर्वादिक्समानाधिकरणलक्षणः पुंवद्भावो न प्राप्नोति अथ पुनरियं सैव दक्षिणा सैव पूर्वेति कृत्वा समाना
धिकरणलक्षणः पुंवद्भावः सिद्धो भवति॥ ॥ ॥

तेनैतानि समस्यन्ते दक्षिणादीनां च सामीप्यादन्तरालवृत्तित्वं ततश्च दक्षिणा चासौ पूर्वा चेति सामानाधिकरण्यात् पुंवद्भावः सिध्यति सूत्रे त्वनारब्धे
न्यपदार्थसंपादनाय दक्षिणपूर्वाशब्दयोः स्वार्थ एव वृत्तिरूपगन्तव्या ततो वैयधिकरण्ये ननु सामानाधिकरण्येऽपि विशेषण समासः सिध्य
तीति नारब्धव्यमिदं नैतदस्ति पूर्वपदप्रकृतिस्वरार्थं विभाषा दिक्समास इति विकल्पितसर्वनामसंज्ञार्थं बहुव्रीहिसंज्ञेष्टव्या॥ १८ ॥

=विषयस्तिनिमित्तेनेति। दृष्टान्ति दिक्प्रवृत्तिनिमित्तेन विनेत्यर्थः। रूढिशब्दानां प्रवृत्तिनिमित्तानभ्युपगमादिति भावः। २ व्यवस्थायां तामिति। अप्रमत्वात् सर्वनाम्नः पाकाद् बुद्धिविशेषादिषु मतस्वरूपव्यवस्थायां तावित्यर्थः। दिक्शब्देष्वपि क्रमेण रूपावधमैं। नायाः संभवात्

भा०कै०२ ७८ 78

न सिध्यतीति इति। न हि सामानाधिकरण्यमात्रप्रतिबद्धः पुंवद्भावः किंतु भाषितपुंस्कत्वनिबंधनोऽपि समानायां चाकृतौ यद्भाषितपुंस्कं तस्य पुंवद्भावो भाषितपुंस्कशब्दस्य त्वर्थः प्रवृत्तिनिमित्तलक्षणोऽन्यपदार्थोऽभिधेयो न प्राप्तः। दिक्शब्दा वितिविना प्रवृत्तिनिमित्तेन दिग्विशेषे रूढ्या प्रवृत्ता वित्यर्थः। यदि पुनरिति। ततश्च यंव स्याकृतौ समानायां भाषितपुंस्कत्वस्योपपत्तिः कथं यानीति यदि प्रवृत्तिनिमित्ताश्रयेण दिशि वर्त्तेते ननु रूढ्या न तादिक्शब्दत्वानु

न सिध्यति भाषितपुंस्कस्य पुंवद्भावः न चैतौ भाषितपुंस्कौ ननु चमोः दक्षिणाशब्दः पूर्वशब्दश्च पुंसि भाष्येते समानायामाकृतौ यद्भाषितपुंस्कं आकृत्यन्तरे चैतौ भाषितपुंस्कौ दक्षिणा पूर्वेति दिक्शब्दौ दक्षिणं पूर्वं इति व्यवस्थाशब्दौ यदि पुनर्दिक्शब्दा अपि व्यवस्थाशब्दाः स्युः कथं यानि दिक्षु परिदृश्यानि कार्याणि यदा दिशो व्यवस्थां वक्ष्यन्ति यदि ह्ययो योदिशि वर्त्तते स दिक्शब्दो रमणीयादिषु तिप्रसंगो भवति रमणीयादिकृशो भनादिति। अपमतमेतत् दिशि दृष्टो दिग्दृष्टः दिग्दृष्टः शब्दो दिक्शब्दः यो दिशं न व्यभिचरतीति न रमणीयादिषु तिप्रसंगो भवति पुंवद्भावस्त्वन प्राप्नोति एवं तर्हि सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्यः दक्षिणोत्तरपूर्वाणामित्येवमर्थं एवं चल्लत्वा त्कृदिक्समास सहयोगयोरंतरालप्रधानादिषु वं ननु चोक्तं दक्षिणपूर्वादिक् समानाधिकरणलक्षणः पुंवद्भावो न प्राप्नोतीति नैष दोषः सर्वनाम्नो वृत्तिमात्रे पुंवद्भावेन परिहृतः मत्वर्थे वा पूर्वस्य विधानात्। अपि वा मत्वर्थे पूर्वो योगः अमत्वर्थो प्यारंभः कथं भावार्थो

पपत्तिः। यदा दिशा इति विषयवशात्प्रवृत्तिनिमित्ताश्रयायामपि वृत्तौ दिक्शब्दत्वं पूर्वादीनां संभवतीत्यर्थः। दिशि दृष्ट इति रूढिरूपेण तत्र प्रवृत्त इत्यर्थः। राम० ७८
अत एवं द्वारयोयो गिकत्वान्न दिक्शब्दाः दक्षिणोत्तरपूर्वाणामिति। अत्र हि वैयधिकरण्यात् पुंवद्भावो न प्राप्नोति इत्यवश्यं वाच्यं सर्वनाम्न इति तेनैव दक्षि
णपूर्वेत्यादावपि भवतीति नार्थो नेन सूत्रे णेत्यर्थः॥

=विषयवशाद्दिति। नियतावधित्वापेक्षा भवि दिक्स्वविषयवशादित्यर्थः। प्रवृत्तिनिमित्ताश्रयायामितिः व्यवस्थायां सर्वेषां पाकाद्बुद्धि विशेषविषयरूपमप्रवृत्तिनिमित्ताश्रयायामित्यर्थः। ३८ रूढिरूपेणेति। तथा च दिशो व्यवस्थासंभवेपि न तद्रूपेण शब्दवान्तस

तत्रतेनेदं क्रियाभिधानादिति इतिकरणाद्विवक्षार्थो लेशाकेशिदंडादंडीतिसमासोयुद्धक्रियायामेव भवतिसचान्यपदार्थे इति पूर्वेणसिद्धःसमासइत्यर्थः। न
वेति केशेषुचकेशेषुचगृहीत्वेदं युद्धं दंडैश्चप्रहृत्वेदं युद्धमितियग्रहणेप्रहरणेचसहविवक्षितत्वात् सरूपत्वादेकविभक्तित्वाच्चैकशेषः प्राप्नोवचनसामर्थ्या
त्समूहान्यथानुपपत्त्यासमूहविषया नयाबहुव्रीहिसंज्ञयानवकाशयाबाध्यते पूर्वयोगेणतुपरत्वादेकशेषोनशक्यतेबाधितुमन्यपदार्थत्वापेक्ष

= युद्धक्रियायामेवेति युद्धक्लेवचनमेयुद्धक्रियायामितुक्ता प्रहरणेतादृशयोर्युद्धस्याविशेष्यसंभवायुक्तसमानाधिकरणक्रियामात्रवृत्तित्वं समासस्यसूचयति आक्षेपिक्रियाभिधानादितिबोक्तं एवंचकारणं कार्यप्रयतिते त्वाद्यनामपिसाधुत्वमितिकुः=

तत्रतेनेदं तृतीयासप्तम्यंतेषुच क्रियाभिधानात् तृतीयासप्तम्यंतेषुचाशिष्योबहुव्रीहिः किंकारणं क्रियाभिधानात् क्रियाभिधीय
तेतत्रान्यपदार्थ इत्येवसिद्धं नवैकशेषप्रतिषेधार्थं नवाशिष्यः किंकारणं एकशेषप्रतिषेधार्थमिदं वक्तव्यं पूर्वेदीर्घार्थं चपूर्वेदीर्घार्थंचेदं
वक्तव्यं केशाकेशिसादेतत्प्रयोजनं पदिनियोगतो [redacted] नेनैवदीर्घत्वंस्यात् अथेदानीमन्येषामपिदृश्यतइतिदीर्घत्वंनप्रयोजनंभवति
मत्वर्थेवापूर्वस्यविधानात्। अथवा मत्वर्थे पूर्वो योगः अमत्वर्थोयमारंभः कर्मव्यतिहारार्थं वा अथवाकस्मान्माभूदितितत्रतेनेदं॥०॥

= समूहान्यथेति अनेकसुबंत [redacted] समूहान्यथानुपपत्त्येत्यर्थः। समूहविषयमेति अनेकसुबंतविषयमेत्यर्थः। अनेकमिलित्समूहानुक्तेनोदितिभावः। यद्वा मत्वर्थ पर्याप्ति समूहविषयमेत्यर्थः। केशाकेशि सुकेशेषुयुध्यमानसंघातेमतिव्यक्तिकोग्रहणं प्रतीयते रूपनेदृश्यः

त्वात्समासबहिरंगत्वात् पूर्वेदीर्घार्थंचेति तत्रतेनेत्यायुद्धमिसाकारप्रश्लेषेणपूर्वपदस्यदीर्घोविधीयते उत्तरपदस्यतुयस्येतिलोपेनमावमितिप्र
योजनाभावादात्वाभावः। अथेदानीमिति एवंमुष्टामुष्टीत्यादिभवति आकारप्रश्लेषेतुमुष्टामुष्टीतिस्यात् कर्मव्यतिहारार्थं वेति। इच्कर्मव्यतिहारइति
कर्मभावपक्षेसावकाशः पक्षांतरेतुपरत्वाद्बाधित्वाकर्षप्राप्नोतिशेषग्रहणेनचशेषाधिकारोगृह्यतेनतूपयुक्तादन्यः॥ ॥

भा०कै०२ चार्थेचार्थे इत्युच्यत इति यदि तु समाहारेतरेतरयोगयोरिष्यते तदा न दोषः स्यात् प्राक् समासादिति वाक्ये च शब्दे नद्योतस्यार्थस्य लिंगसंख्ये न स्तः समास
७६ स्य तु वाचकत्वात्तदर्थस्य लिंगसंख्याभ्यां योग इत्यर्थः श्रितो भवति समास इति समासशब्देन समासार्थ उच्यते तेन तस्य समुच्चितद्रव्याश्रये लिंगसंख्ये भवि
७५

चार्थे द्वंद्वः चार्थ इत्युच्यते चश्चाव्ययं तेन समासस्याप्यव्ययसंज्ञा प्राप्नोति नैष दोषः पाठेनाव्ययसंज्ञा क्रियते न च समासस्तत्र पठ्यते पाठेना
प्यव्ययसंज्ञायां सत्त्वामभिधेयवल्लिंगवचनानि भवंति पश्चेहार्थोभिधीयते न तस्य लिंगसंख्याभ्यां योगोस्ति नेदं वाचनिकं अलिंगता असंख्य
ता वा किं तर्हि स्वाभाविकमेतत्तद्यथा समानमीहमानानां चाधीयानां च केचिदर्थैर्युज्यंते अपरे न न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थव
द्भिः शक्यं भवितुं कश्चिद्वानर्थक इति सर्वैरनर्थकैः तत्र किमस्माभिः शक्यं कर्तुं प्राक् समासाच्चार्थस्य लिंगसंख्याभ्यां योगो नास्ति समासे च भ
वति स्वाभाविकमेतत् अथवा आश्रयतो लिंगवचनानि भविष्यंति यथा गुणवचनेषु गुणवचनानां शब्दानामाश्रयतो लिंगवचनानि
भवंति तद्यथा शुक्लं वस्त्रं शुक्ला शाटी शुक्लः कंबलः शुक्लौ कंबलौ शुक्लाः कंबला इति यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिंगं वचनं
च तद्गुणस्यापि भवति एवमिहापि यदसौ द्रव्यं श्रितो भवति समासस्तस्य यल्लिंगं वचनं च तत्समासस्यापि भविष्यति अयेहकस्मान्न भवति याज्ञिक
श्चायं वैयाकरणश्च कठश्चायं बह्वृचश्च औक्थिकश्चायं मीमांसकश्चेति शेष इति वर्तते॥ ॥ ॥ ॥

पत इत्यर्थः याज्ञिकश्चायमिति एकस्मिन् धर्म्मिण्यनेकधर्मसमुच्चयाच्चार्थसद्भावाद् द्वंद्वसंज्ञाप्रसंगः तत्र श्चाभ्यां हितत्वाद्वैयाकरणशब्दस्यैव पूर्वनिपा एम०
तः स्यात्तत्पुरुषे तु कारणं वजवदनियमः परं कार्यत्वे चायं दोषः एकसंज्ञाधिकारे तु विप्रतिषेधविहितत्वात्तत्पुरुषसंज्ञैव भवतीति दोषाभावः॥ ॥ ७८

अशेषत्वादिति॥ विशेषणाभिसंबन्धोपयुक्तत्वादित्यर्थः। उपासनानादयः पंचतीर्थविशेषास्तां अश्वत्वंगं तु शक्रवांस्ततः कृताकृतेस्तुकृतं तु कृते त्वां मातान्प्रां
नतापयेतां इत्यर्थः। तीर्थस्नानप्रशंसेयं कृतं क्षीणं एंसत्तापपस्कृतत्वनिष्टफलहेतुत्वेन कृताकृते इत्येतदुदाहरणं अत्रकेननव्रिशिष्टेनानत्रितिस
मासविधानादशेषत्वाद्दंद्वाप्रसंगः कर्म्मसामान्यं चकृताकृतयोरेकमधिक[redacted]रणं मत्वाप्रश्नः अन्यदिकृतमितितत्तत्स्वैवैयधिकरण्यात्तत्पुरुषा
भावाच्छेषत्वमेव न स्यात्त्रैकं कर्म्माभिधेयत्वेन विवक्षितं किं तर्हि भिन्नेकर्म्मणी समुच्चिते चार्थे द्वंद्वचन इति चार्थानुवादेन द्वंद्वस्य विधानात्तस्य चानि
= न्यामिति नगाचारप्रवर्तकैर्मन्वादिभिः स्वयमाचरणेनप्रवर्तितं धर्मत कर्मं अहतं नाधिकं पापलक्षणं। अ= कर्मसामान्यं चेति कृताकृतयोः कर्मसामान्यं पुण्यपापकर्मसमुदायात्मकमेकमधिकरणं वाचकाभावे संबंधेनाश्रयतीत्यनाधिकरणमप्रयोगे यथा
अशेषत्वात्तन्न भविष्यति परिशेषत् इति व्रत्तेते उपास्नातं स्यूतसिक्तं तस्मीं गंगमहाह्रदं द्रोणं च दशकोगंतुं मात्वांतान्प्रां कृताकृते इत्येतन्न सि
ध्यतीने षदोषः। अन्यदिकृतमन्यदकृतं चार्थे द्वंद्ववचनेः समासेपि चार्थसंप्रत्ययादनिष्टप्रसंगः। चार्थे द्वंद्ववचनेऽसमासेपि चार्थसंप्रत्यया
दनिष्टं प्राप्नोति। अहरहर्नयमानो गामश्वं पुरुषं पशुं वैवस्वतो न तृप्यति सुरया इव दुर्मदी तित्इंद्रस्त्वष्टा वरुणो वायुरादित्य इति सिद्धं तु युगपदधि
करणे द्वंद्ववचनात्तस्ति द्वयेन त्व प्येयुगपदधिकरणे द्वंद्वो भवतीति वक्तव्यं तत्र पुंवद्भावप्रतिषेधः तत्रैतस्मिन्लक्षणे पुंवद्भावस्य प्रतिषेधो वक्त
= भिन्नेकर्मणी इति पुण्यपुण्यलक्षणे इत्यर्थः। यथा चनीलोत्पलमो भेद इत्यादेकस्यैव धर्मभेदमयुक्त भेदविवक्षायां सामानाधिकरण्यात्रार्थेत्यप्रसंगे द्वंद्वो विधीयते तथा कृताकृते इत्यत्र · पीतिमाप्ता॥=   ९ व्यः॥ २३
ष्टेपि विषये सद्भावादतिप्रसंग इत्यर्थः। दुर्मदीति दुःखेन यो माद्यति स यथा सुरया न तृप्यति एवं यमो गवादीन्नयमाद्इत्यर्थः। तत्र नयन क्रियायां गवादीनास्य
मुच्चयार्थ सद्भावादस्ति द्वंद्वप्राप्तिः। इंद्र इति इंद्रादीनां लोकपालत्वादृप्यमानक्रियायां समुच्चयोऽस्ति सिद्धं त्विति तिन्यासांतरेणाति प्रसंगपरिहारः। युगपदेकै
केन शब्देनाधिकरणमभिधेयं द्वंद्ववाच्यं समुदायरूपं यदोच्यते तदा द्वंद्वः गामश्वमित्यादौ तु परस्परनिरपेक्षाः स्वतंत्रा गवादयो भिन्नैरेव शब्दैः पृथक्पृथक्सार्थ्य
९ त इति युगपद्वाचित्वाभावान्न द्वंद्वाभावः॥ ॥

भा०कै०२ पद्मीमह्यामिति। एकैकेन शब्देनार्थद्वयस्याभिधानात् सामानाधिकरण्यमस्ति विप्रतिषिद्धेषु चेति। ये त्वर्था अविरुद्धास्तेषां भवत्वेकैकेनाभिधा
८० नं विरुद्धानां तु सहानवस्थानात् युगपदनुभवाभावात् सहविवक्षाभावाद्युगपद्वाचितानोपपद्यत इत्यर्थः। आरात्पुरादीनां विरुद्धार्थाभिधानं दृष्ट्वा
४० ष्टव्यमिति। किंकारणमिति सुखप्रतिघातेनेति। आरादयस्तु युगपद्विरुद्धार्थाभिधायिनो नैवाभ्युपगम्यन्ते दर्शनीयामातेति वक्तावेकार्थी

पद्मीमह्यौ समानाधिकरणाल्लक्षणः पुंवद्भावः प्राप्नोति विप्रतिषिद्धेषु चानुपपत्तिः विप्रतिषिद्धेषु युगपदधिकरणवचनतायामनु
पपत्तिः शीतोष्णे सुखदुःखे जननमरणे किंकारणं सुखप्रतिघातेन दुःखं दुःखप्रतिघातेन सुखं यत्तावदुच्यते तत्र पुंवद्भा
वप्रतिषेध इति इदन्तावदयं प्रष्टव्यः अथेह पुंवद्भावः कस्मान्न भवति दर्शनीयायामाता दर्शनीयामातेति अथमतमेतत् प्रा
क्समासाद्यत्र सामानाधिकरण्यं तत्र पुंवद्भावो भवतीति इहापि न दोषो भवति यदप्युच्यते विप्रतिषिद्धेषु चानुपपत्तिरिति सर्व एव
शब्दाः विप्रतिषिद्धाः इहापि प्लक्षन्यग्रोधाविति प्लक्षशब्दः प्रयुज्यमानः प्लक्षार्थं संप्रत्याययति॥ ॥

भावेन मात्रर्थे दृत्तिलाद्दर्शनीयायाः ह्रस्वस्य सामानाधिकरण्यमत्रास्ति अथमतमिति वृत्तौ सामानाधिकरण्यव्यभिचाराभावाद्यदि वाक्ये विपर्यये सामानाधि
करण्यमाश्रीयते तदा पद्मीह्यावित्यत्रापि न दोषः लौकिकं च यद्वाक्यं प्रयोगार्थं तत्र सामानाधिकरण्यमाश्रीयते न तु लौकिके प्रक्रियावाक्ये पद्मी एम०
च मृद्वी चेति विप्रतिषिद्धा इति विप्रतिषिद्धार्था इत्यर्थः॥ परस्परपरिहारेण सर्वेषामर्थानां शब्दैरभिधानात्॥ ॥ ॥ ८०

न्यग्रोधार्थमिति॥ एकस्मिन्नर्थे ऽप्रवृत्ते ऽपर्यायोर्द्वयोर्न तस्य निवृत्तिः इहापीति विरूढानाम पर्यायनामेकशब्दाभिधेयताया अविरोधात्तथाहि जन्ममरणयो
विरुद्धयोरप्येकसंज्ञा सह संभवस्याय क्रियते न तदा न छेवा च त्वं तयोर्भवत्येव इदानीं युगपद्वाचितायाः असंभवं प्रतिपादयति एवमपीति अभिधानक्रमात्
अभिधेयक्रमोऽवतिष्ठते यथा गुणवृद्धी वृद्धिर्गुणश्चेति तत्र शब्दक्रमात् क्रमवद्द्योर्वगमान्न संभवत्येकेनानेकस्याभिधानमित्यर्थः न्यग्रोधश
ब्द इति न्यग्रोधार्थप्रतिपत्तिकाले यदि प्लक्षार्थस्य नावगतिः स्यात्तु तदा न्यग्रोधशब्दादेकार्थत्वादेकवचनं स्यात्। तस्मात् द्विवचनान्यथानुपपत्त्या प्ल

न्यग्रोधार्थे निवर्तयति न्यग्रोधशब्दः प्रयुज्यमानो न्यग्रोधार्थं संप्रसाययति प्लक्षार्थे निवर्तयति अत्र चेद्युक्तायुगपदधिकरणवचनताद्
यते इहापि युक्ता दृश्यतां एवमपि शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानं शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानं प्राप्नोति अ
तः किं युगपदधिकरणवचनताया अनुपपत्तिः प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधा इति यथैव हि शब्दानां पौर्वापर्यं तद्दर्थानामपि भवितव्यं श
ब्दपौर्वापर्यादर्थपौर्वापर्याभिधानमिति चेत् द्विवचनबहुवचनानुपपत्तिः शब्दपौर्वापर्यादर्थपौ चेत् द्विवचनबहुवचनयोरनुपपत्तिः प्लक्षन्यग्रोधौ प्ल
क्षन्यग्रोधा इति प्लक्षशब्दः स्वार्थको निवृत्तो न्यग्रोधशब्द उपस्थित एकार्थः न स्येकार्थत्वादेकवचनं प्राप्नोति विग्रहे च युगपद्वचनं ज्ञापकं यु
गपद्वचनस्य विग्रहे खल्वपि युगपद्वचनता दृश्यते द्यावा ह क्षामा द्यावा चिदस्मै पृथिवी संनमेते इति॥ ×पर्यायाभिधानमिति×२ ॥

प्लक्षन्यग्रोधावित्याद्येकेको ऽनेकार्थोभिधायी सम्प्रुपगंतव्यं एवं च युक्ता युगपद्वाचिता प्रसाद्यागमेन प्रसाधयति विग्रहे चेति द्यावेति द्यौःशब्दो द्यावा पृथि
व्योर्वर्तते इतिततः परस्य प्रथमा द्विवचनस्य सुपां सुलुगित्याकारो गुणो गोतो णिदिति गोशब्दस्यौकारान्तत्वोपलक्षणार्थत्वात् णित्वात् वृद्धिः दिव उत् द्यावा दे प्राप्स्व एवं पृथिवीशब्दो दिवः
पृथिव्यो वन्नीति प्रथमा द्विवचनेवा छंदसीति पूर्वसवर्णदीर्घः संनमेते इति द्विवचनं तेन सामानाधिकरण्यात् पृथिवी इति पदकारे द्विवचनात्र यमगत्वसंज्ञा निषेध ॥
" न समस्तकृति भावस्य विधा नाद्युपर्यत्वं पृथिवीशब्दस्यावसीयते"

भा०कै०२
८१

किमेतदित्रिगायथोक्तमपतिपद्यपृच्छति उपोद्बलकमिति उत्कृष्टबलत्वमुद्बलकं प्रसक्तं तत्समीपमनुमानमुपोद्बलकं आगमसहानुमानत्वेनोपन्यासात् विग्रहे किलेतिसाहचर्यादिनिमित्ताश्रयेणगार्ग्यपिशब्दानामनेकार्थाभिधायित्वं यदा दृश्यते तदा समासे पूर्वपदार्थाणां वाक्ये दृष्टानामपि दर्शनादसंभावनोक्तार्थसमर्थः। युगपद्वाचित्वाभावे द्विवचनबहुवचनासिद्धिदोषं परिहर्तुमाह समुदायादिति द्वन्द्वे न समुदायरूपो

किमेतद्युगपदधिकरणवचनतायां उपोद्बलकं विग्रहे किलनामयुगपदधिकरणवचनतास्यात् किं पुनः समासे समुदायात्सिद्धं समुदायात्सिद्धमेतत् किमेतत्समुदायात्सिद्धमिति द्विवचनबहुवचनामसिद्धिरिति चोदितेनस्यायं परिहारः समुदायात्सिद्धमिति चेन्नैकार्थत्वात्समुदायस्य समुदायात्सिद्धमिति चेत्तन्न किं कारणं एकार्थत्वात्समुदायस्य एकार्थो हि समुदायो भवति न ह्यष्टाशतं शूर्पं वनमिति नैकार्थ्यं नायमेकार्थः किं तर्हि द्व्यर्थो बह्वर्थश्च प्लक्षोपि द्व्यर्थः न्यग्रोधोपि द्व्यर्थः यदि तर्हि प्लक्षोपि द्व्यर्थो न्यग्रोधोपि द्व्यर्थस्तयोरनेकार्थत्वाद्बहुवचनप्रसंगः तयोरनेकार्थत्वाद्बहुवचनं प्राप्नोति तयोरनेकार्थत्वाद्बहुवचनप्रसंग इति चेन्न बहुत्वाभावात् तयोरनेकार्थत्वाद्बहुवचनप्रसंग इति चेत्तन्न किं कारणं बहुत्वाभावात् नात्र बहुत्वमस्ति किं पुनस्तेन बहुत्वाभावादिति यदा इदानीमेवोक्तं प्लक्षोपि द्व्यर्थो न्यग्रोधोपि द्व्यर्थ इति याभ्यामेवात्रैको द्व्यर्थस्ताभ्यामेवापरोपि यद्येवमन्यवाचकेनान्यस्य वचनानुपपत्तिः अन्यवाचकेनान्यस्यार्थोभिधीयत इति द्विवचनसिद्धिः नैकर्थ्यमिति उद्भूतावयवभेदः समुदायोभिधेयो न तु तिरोहिता ॥ वचनं नोपपद्यते अन्यवाचकेनान्यस्यावयवभेद इत्यर्थः बहुवचनप्रसंग इति एकैकेन युगपदनेकस्यार्थस्याभिधानात् याभ्यामेवेति नात्र चलारोर्थाः किं तर्हि द्वावेवार्थो विसर्थः अन्यवाचकेनेति लोकिकात्प्रयोगात् शब्दानामर्थावधारणं तत्र यथा पटशब्दः घटार्थे न प्रसाप प्रतितथा प्लक्षन्यग्रोधशब्दौ परस्परार्थसमर्थसाय को ॥ नयुक्ताविसर्थः ॥

राम०
८१

प्लक्षस्येति॥ प्लक्षशब्दस्य न्यग्रोधार्थत्वान्न्यग्रोधशब्दस्य प्लक्षार्थाभिधायित्वात्स्वार्थस्यैवाभिधानेनास्य र्थान्तराभिधायित्वं लोकप्रसिद्धाल र्थान्तराभिधायित्वमुच्यते। इत्तिविषये चैकैकस्य द्वावर्थाविति स्वार्थावेव तौ भवतः प्लक्षोपि न्यग्रोध इति न्यग्रोधशब्दवाच्य इत्यर्थः एवं न्यग्रोधोपि प्लक्षशब्दवाच्य इत्यर्थः। कारणादिति शब्दार्थावसायहेतुर्लोकव्यवहारोत्र कारणशब्देन विवक्षितः न च लोकव्यवहारे प्लक्षशब्दस्य न्यग्रोधा

प्लक्षस्य न्यग्रोधत्वात् न्यग्रोधस्य प्लक्षत्वात्स्वशब्देनाभिधानं। अन्यवाचकेनान्यस्य वचनानुपपत्तिरिति चेत् एवमुच्यते तत्त्वं किं कारणं। प्लक्षस्य न्यग्रोधत्वात् न्यग्रोधस्य च प्लक्षत्वाच्च स्वशब्देनाभिधानं भवति। प्लक्षोपि न्यग्रोधः न्यग्रोधोपि प्लक्षः कथं प्लक्षोपि न्यग्रोधः स्यात् न्यग्रोधोपि प्लक्षः स्यात् यावता कारणं द्रव्ये शब्दनिवेशः कारणं द्रव्ये शब्दनिवेश इति चेत् तुल्यकारणत्वात्सिद्धं कारणात् द्रव्ये शब्दनिवेश इति चेत्, एवमुच्यते। तत्तु तुल्यकारणत्वात्सिद्धं तुल्यं कारणं। यदि तावत्प्रक्षरतीति स सा प्लक्षः स्यात् न्यग्रोधेप्येतद्भवति तथा न्यक्‌रोहतीति न्यग्रोधः प्लक्षेप्येतद्भवति। दर्शनं वै हेतुः न च न्यग्रोधे प्लक्षशब्दो वर्त्तते। दर्शनं हेतुरिति चेत् तुल्यं। दर्शनं हेतुरिति चेत्तुल्यमेतद्भवति प्लक्षेपि न्यग्रोधशब्दो दृश्यते न्यग्रोधेपि प्लक्षशब्दः तुल्यं हि कारणं न वै लोके एष संप्रत्ययो भवति। न हि प्लक्ष आनीयतामित्युक्ते न्यग्रोध आनीयते। तद्विषयं च तद्विषयं चैतत् द्रष्टव्यं प्लक्षस्य न्यग्रोधत्वं किं विषयं द्वंद्वविषयं॥ २७ पुनः२

भिधायित्वं प्रतीतं। इतरः शब्दप्रवृत्तिनिमित्तं शब्दप्रयोगस्य कारणमिति मत्वाह। कारणादिति। प्रक्षरणं विस्तारेणावस्थानं। न्यग्रोहणमधः शाखावस्थापनं इतरः स्वाभिप्रायं प्रकाशयति। दर्शनमिति लोकव्यवहार इत्यर्थः प्लक्षेपीति लोकव्यवहारे प्लक्षन्यग्रोधौ दृश्येतामित्युभयोः क्रियान्वयात् द्विवचनं दर्शनाच्च॥ तुल्यं हीति। तुल्यो लोकव्यवहार इत्यर्थः। तद्विषयं चेति। द्वंद्वावयवानामेवानेकार्थाभिधायित्वं न केवलानामित्यर्थः॥ २७ ॥ ॥

युक्तं पुनरिति॥ किं युक्तमेतदित्यर्थः बाढमिति॥ भिन्नरूपत्वात् भिन्नशक्तिकत्वाच्च। अश्वः शोण इति। यथाश्वादन्यत्र शोणादयो न वर्त्तन्ते तथा विना वृक्षा
त्प्लक्षादयो न्यग्रोधादयो न भवन्ती त्यर्थः यदि तर्हीति। ननु तद्विषयं चेत्युक्ते कोऽस्य दोषस्यावसरः एवं मन्यते। परस्परसन्निधाने न यदा द्वयोरपि साम
र्थ्यमाहितं तदान्यतरवियोगेऽपि सामर्थ्यहानाभावो यथा वह्निसंपादितपाकजरूपादिसद्भावो निवृत्तेऽपि वह्नौ॥ अननुक्त इति। न्यग्रोधशब्दप्रयोगमं
तरेणेत्यर्थः उक्तं त्वेतत् द्वाविति यथा नामेकानेकार्थाभिधायित्वेनैकत्वानां यथा वह्निसंनिधावेवताम्रद्रवरूपं भवति न तु तद्विनिवृत्तौ सहभूता विति।

युक्तं पुनर्यन्नियतविषया नाम शब्दाः स्युः बाढं युक्तं। अन्यत्रापि तद्विषयदर्शनात्। अन्यत्रापि नियतविषयाः शब्दाः दृश्यन्ते। तद्यथा। स
माने रक्ते वर्णे गौर्लोहित इति भवति। अश्वः शोण इति। समाने च काले वर्णे गोः कृष्ण इति भवति। अश्वो हेम इति। समाने शुक्ले वर्णे गौ
: श्वेत इति भवति अश्वः कर्क इति। यदि तर्हि प्लक्षोऽपि न्यग्रोधः न्यग्रोधोऽपि प्लक्षः एकेनोक्तत्वादपरस्य प्रयोगेऽनुपपन्नः एकेनो
क्तत्वात्तस्यार्थस्यापरस्य प्रयोगो नोपपद्यते प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः एकेनोक्तत्वादपरस्य प्रयोगेऽनुपपन्न इति चेदनुक्त
त्वात्प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः एकेनोक्तत्वादपरस्य प्रयोगेऽनुपपन्न इति चेन्न। किं कारणं अनुक्तत्वात् प्लक्षेण न्यग्रोधस्य न्यग्रोध
प्रयोगः अनुक्तः प्लक्षेण न्यग्रोधार्थ इति कृत्वा न्यग्रोधशब्दः प्रयुज्यते। कथमनुक्तः यावता [redacted] इदानीमेवोक्तं प्लक्षोऽपि न्यग्रोधः न्य
ग्रोधोऽपि प्लक्ष इति सहभूतावेतावन्योन्यस्यार्थमाहतुः न पृथग्भूतौ किं पुनः कारणं सहभूतावेतावन्योन्यस्यार्थमाहतु न पृथग्भूतौ। अभिधाने पुनः
स्वाभाविकं। स्वाभाविकमभिधानं अथवेह कौचित्साध्यमकल्पिकौ प्लक्षन्यग्रोधौ कौचित्क्रिययावा गुणेन वा प्लक्ष इत्ययं प्लक्षः न्यग्रोध इत्ययं

भाऽर्थवत्त्वस्य शक्यत्वाद्विभागात्। साध्यमकल्पिकाविति। लोकव्यवहारे परोच्चारणमात्रात्तदर्थावसा " न्यग्रोध इति। तत्र प्लक्षावित्युक्ते संदेहः स्यात्। किमिमौ
यान्मुख्यावित्यर्थः। कौचिदिति। तत्सहचरितगुणक्रियादर्शनात्तद्रूपात् गौणावित्यर्थः। यथोक्तं यदि प्लक्षरत्नीत्यादि। संदेहः स्यादिति।। उपक्रमे संदेहो गौणस्या
" प्यर्थस्य संभवमात्रेण। ननु मुख्यार्थसंभवे गौणस्य परामर्श एवास्ति तत्कुतः संदेहः॥

[redacted]

भाष्यकारः सूत्रन्यासं स्थापयितुमाह। इयमिति। दुःखेति। प्रतीतावनुपारोहात्। दुरुपपादेति। प्रमाणाभावात्। दृष्टव्यवहाराद्धि शब्दार्थावसायो न च तत्र प्लक्षशब्द-
स्य न्यग्रोधाभिधायित्वं दृश्यते।। न च गौणार्थत्वं प्लक्षशब्दस्य न्यग्रोधशब्देनैव न्यग्रोधस्य प्रतिपादितत्वात्। न च प्लक्षन्यग्रोधावित्युक्ते र्थद्वयप्रतीतेरावृत्तिः
यथा प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधाविति। समासस्य चानेकार्थाभिधायित्वात्ततः परयोर्द्विवचनबहुवचनयोरुपपत्तिरिति द्विवचनान्यथानुपपत्त्यापि नास्ति यु-

सेयं युगपदधिकरणवचनता नाम दुःखा च दुरुपपादा च। यच्चाप्यस्या निबंधनमुक्तं द्यावा ह क्षामेति। तदपि छांदसं तत्र सुपां सुपो भवंतीसे-
व सिद्धं [illegible] सूत्रं च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं चार्थे द्वंद्ववचने समासेऽपि चार्थसंप्रत्ययादनिष्टप्रसंग इति। नैष दोष
:।। इह चेद्वंद्व इतीयता सिद्धं। कथं पुनश्चेनाप्रवृत्तिः स्यात्। शाब्दो ह्येषः शब्दे संभवादर्थे कार्यं विज्ञास्यते।। सोऽयमेवं सिद्धे सति यदर्थग्र-
हणं करोति तस्यैतत्प्रयोजनं। एवं यथा विज्ञायेत। चेन कृतोऽर्थश्चार्थ इति किं पुनश्चेन कृतोऽर्थः।। ।। ।।

गपद्वाचिता प्रतिपत्तिः। लिंगदर्शनमपि निराकुर्वन्नाह। यच्चापीति।। एकवचनस्यास्थाने द्विवचनमित्यर्थः।। चेन कृतोऽर्थ इति। अर्थे शब्द[redacted]स्य सन्निधाना-
दुत्तरपदलोपी समास आश्रीयत इत्यर्थः।। ननु चेनार्थस्य कृतत्वमुत्पादनं वा स्यात् प्रकाशनं वा न त्रोत्पादनं तावन्नोपपद्यते।। नहि शब्दैरर्था उत्पाद्यं-
ते। यथोक्तं नहि शब्दकृतेन नाम अर्थेन भवितव्यमिति।। अथ प्रकाशनं तदा स एवातिप्रसंग इति मत्वा पृच्छति किं पुनरिति।। ।। ।।

भा०कै०२ ८३ 83

समुच्चय इति॥ यदा परस्परनिरपेक्षाः पदार्थाः क्रियायां समुच्चीयन्ते तदा समुच्चयः यथा योगमध्वं पुरुषमितो दैवाक्येपरस्परानपेक्षागवादयो नयन
क्रियासंबध्यन्ते तत्र चेनैते तोर्थ इत्यवधारण मर्थग्रहणसामर्थ्याद्राश्रीयते चेनैवयः प्रकाशितोर्थस्तत्रदं द्वोगामश्वमिसत्र तु विनापि चेन समुच्चया
वगमान्नासौ चेनैव प्रकाशित इत्युच्यते॥ सामर्थ्यं त्वेकक्रियाद्वारकं दध्योदनादिवत्स्यादिति नात्रा सामर्थ्यात्समासपरिहारो वाच्यः प्लक्षश्च न्यग्रोधश्च सुक्त इति।

समुच्चयः अन्वाचय इतरेतरयोगः समाहार इति॥ समुच्चये प्लक्षश्च सुक्ते गम्यते एतत्स्यग्रोधश्चेति। अन्वाचये प्लक्षश्च सुक्ते गम्य
ते एतत् सापेक्षोयं प्रयुज्यते इतरेतरयोगे प्लक्षश्च न्यग्रोधश्च सुक्ते गम्यते एतत्। प्लक्षोपि न्यग्रोधसहायो न्यग्रोधो पि प्लक्षसह
य इति। प्लक्षश्च न्यग्रोधश्च सुक्ते समाहारेपि क्रियते प्लक्षन्यग्रोधमिति तत्रायमप्यर्थः॥ ॥ ॥

न्यग्रोधोदृश्यतामिति सुक्तस्य यदा प्लक्षश्च सुच्यते। यदा लक्षस्य प्राधान्यं तदा इतरस्य तदनुरोधेन क्रियासंबंधात् भिन्नकक्ष्यतया नास्ति परस्परेण सामर्थ्यमि
ति अन्वाचये समासाभावः प्रधानाभिधायि पदं चार्थेन वर्त्तते अपि तु प्रधानमेवेति अनेकस्य पदस्य चार्थवृत्तित्वाभावात् द्वंद्वाभावः इतरेतरयोगः प
रस्परापेक्षाणामनेकस्मिन्नर्थे समन्वये सति भवतीति परस्परसहितता च शब्देनैव इति तत्र समासो भवति॥ समाहारेपीति। तत्रापि परस्परसहित
तावगमात॥०॥

राम० ८३

द्वंद्वैकवद्भाव इति। युगपदधिकरणवचनतायां द्वंद्वे तु वक्तव्यः स्यात् एकैकस्यानेकार्थत्वात्। न च विषयविभागार्थो सौ वक्तव्यः प्रयोगदर्शनाद्विषयविभा
गस्य सिद्धत्वात्। दशादिभिरिति। आदिशब्देन विंशत्यादयो गृह्यन्ते विंशत्याद्यर्थ एव चायं विचारो दशशब्देन तु द्वंद्वे न कश्चिद्दोषः वचनमिति द्विवचनं

द्वंद्वैकवद्भावो न पठितव्यो भवति। समाहारैकत्वादेव सिद्धं। एकादश द्वादशेति कोयं समासः एकादीनां दशादिभिर्द्वंद्वः एकादीनां दशादि
भिर्द्वंद्वः समासः। एकादीनां दशादिभिर्द्वंद्व इति चेद्विंशत्यादिषु वचनप्रसंगः। एकादीनां दशादिभिर्द्वंद्व इति चेद्विंशत्यादिषु वचनं प्रा
प्नोति एकविंशतिः सिद्धं त्वधिकांता संख्या संख्यया समानाधिकरणाधिकारेऽधिकलोपश्च सिद्धमेतत्कथं। समानाधिकरणाधिका
रे वक्तव्यं। अधिकांता संख्या संख्यया सह समस्यते। अधिकशब्दस्य च लोपो भवतीति। एकाधिका विंशतिः एकविंशतिः द्व्यधिका विंशतिः
द्वाविंशतिः। यदि समानाधिकरणः स्वरो न सिध्यति। यद्धि तत्संख्यापूर्वपदं प्रकृतिस्वरं भवतीति द्वंद्व इत्येवं नत् किं पुनः कारणं द्वंद्व इत्येवं
न तत् इह माभूत् शतसहस्रमिति। अस्तु तर्हि द्वंद्वः। ननु चोक्तं एकादीनां दशादिभिर्द्वंद्व इति चेद्विंशत्यादिषु वचनप्रसंग इति। नैष दोषः
सर्वो हि द्वंद्वो विभाषैकवद्भवति। यदा तर्ह्येकवचनं तदा नपुंसकलिंगं प्राप्नोति। लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येत्यर्थः॥ ॥

बहुवचनं चेत्यर्थः। सिद्धं त्विति। शाकपार्थिवादित्वात्। शतसहस्रमिति। षष्ठीसमासः सर्वो हीति। तिष्यपुनर्वस्वोरि[redacted] त्यत्र बहुवचनग्रहणेनैतज्ज्ञापि
तं। लिंगमशिष्यमिति। स नपुंसकमिति न कर्तव्यमित्यर्थः॥ ॥ ॥

उपसर्जनं॥ परप्रयोगनिरसार्थमिति। वाक्यवत् समासे पदानामनियतत्वे प्रयोगे प्राप्ते नियमार्थमेतदित्यर्थः। न वेति। निरस्तेषु शब्देषु प्रयोगसंकरे स्थिते
गव्यादिप्रयोगनिवारणायेदं शास्त्रं इह तु विपर्ययप्रयोगो नैव दृश्यत इति किं तन्निरसार्थेन यत्नेनेत्यर्थः। इदानीमारब्धे सूत्रे दोषमुद्भावयति। अथ

उपसर्जनं पूर्वं। किमर्थमिदमुच्यते। उपसर्जनस्य पूर्ववचनं परप्रयोगनिरसार्थं। उपसर्जनस्य पूर्ववचनं क्रियते। परप्रयोगो माभू
दिति। न वा निष्ठादर्शनात्। न वा एतत्प्रयोजनमस्ति। किं कारणं। अनिष्ठादर्शनात्। न हि किंचिदनिष्टं दृश्यते न हि कश्चिद्राजपु
रुष इति प्रयोक्तव्ये पुरुषराज इति प्रयुंक्ते। यदि चानिष्टं प्रसज्येत ततो यत्नार्हं स्यात्। अथ यत्र द्वे षष्ठ्यंते भवतः कस्मात्तत्र प्रधान
स्य पूर्वनिपातो न भवति। राज्ञः पुरुषस्य राजपुरुषस्येति। षष्ठ्यंतयोः समासेऽर्थाभेदात् प्रधानस्यापूर्वनिपातः षष्ठ्यंतयोः स
मासे अर्थाभेदात्प्रधानस्य पूर्वनिपातो न भविष्यति। एवं न चेदमकृतं भवति उपसर्जनं पूर्वमिति। अर्थश्चाभिन्न इति कृत्वा
प्रधानस्य पूर्वनिपातो न भविष्यति॥ उपसर्जनं॥ ॥

यत्रेति। राज्ञः पुरुषस्येति द्वयोरपि षष्ठीति समासशास्त्रे प्रथमानिर्दिष्टत्वादुपसर्जनत्वात् पूर्वनिपातानियमप्रसंगः। अर्थाभेदादिति॥ उपसर्ज
नसंज्ञान्वर्थतां प्रधानस्यैव भवति पुरुषश्चात्र राजापेक्षया प्रधानमेवेति पुरुषार्थो न भिद्यते राजापेक्षयान्यतिरिच्यत इत्यर्थः॥ न चेदमिति। अबुधश्रो
तिनिराकरणायाश्रितमेवेत्यर्थः॥ ॥

अल्पाच्तरं॥ किमयमिति किं तरबर्थः प्रकर्षआश्रीयते अथ स्वार्थे अत एव निपातनान्तरः कृत इति प्रश्नः द्वयोरिति। प्लक्षन्यग्रोधाविसादावेव स्यात् न्यग्रोधशब्दस्याल्पाच्त्वात् तद्पेक्षया प्लक्षशब्दस्याल्पाच्तरत्वात्। बहुषु तु सहितेषु द्विवचनोपपदत्वाभावात्तरपो नु सन्निरिति तत्रानियमप्रसंगः।

ततश्च शंखदुंदुभिवीणानामित्यत्र दुंदुभिशब्दस्यापि कदाचित्पूर्वनिपातः स्यात्। अतंत्रे तरपि दुंदुभिशब्दापेक्षया ल्पाच्त्वसद्भावाच्छंखवीणा

अल्पाच्तरं किमयं तंत्रं तरनिर्देशः आहोस्विदतंत्रं किं चातः यदि तंत्रं द्वयोर्नियमः बहुषु नियमः तत्र को दोषः शंखदुंदुभिवीणानामिति न सिध्यति दुंदुभिशब्दस्यापि पूर्वनिपातः प्राप्नोति। अथातंत्रं मृदंगशंखतूणवाः पृथग्नदंति संसदि प्रासादे धनपतिरामकेशवानामिति तन्न सिध्यति। यथेच्छसि तथास्तु अस्तु तावत्तंत्रं ननु चोक्तं द्वयोर्नियमो बहुषु नियम इति तत्र शंखदुंदुभिवीणानामिति न सिध्यति दुंदुभिशब्दस्यापि पूर्वनिपातः प्राप्नोतीति॥ नैष दोषः यदेतदल्पाच्तरमिति तदल्पाजिति वक्ष्यामीति। अथवा पुनरस्त्वतंत्रं। ननु चोक्तं। मृदंगशंखतूणवाः पृथग्नदंति संसदि प्रासादे धनपतिरामकेशवानामिति तन्न सिध्यतीति अतंत्रेतरनिर्देशे शंखतूणव योर्मृदंगेन समासः अतंत्रेतरनिर्देशे शंखतूणवयोर्मृदंगेन सह समासः करिष्यते। शंखश्च तूणवश्च॥ ॥ ॥

पादयोरन्यतरस्य पूर्वनिपातो भवति नदुंदुभिशब्दस्येति दोषाभावः। मृदंगशंखतूणवा इति। शंखशब्दस्याल्पाच्त्वात्पूर्वनिपातः प्राप्नोति। तंत्रेतु तरपि पूर्वोक्तेन न्यायेन बहुषु नियमादेतद्रूपं सिध्यति। यदेतदिति। तंत्रे दोषप्रसंगात्। प्रयोजनाभावाच्च तरनिर्देशो न कर्त्तव्य इत्यर्थः॥ अतंत्रे तु तस्मिंस्त

ऽस्य स्वार्थिकत्व ज्ञापनमेव तरनिर्देशस्य प्रयोजनं॥ ॥ ॥

भा०कै०२
८५
85

शंखतूणवविति॥ नियतद्रव्यविवक्षायां जातिपरत्वाभावादेकवद्भावाभावः तूर्याणामिस्यपि न भवति। शंखस्यातूर्यांगत्वादिकेके तूर्ये शिल्पोपजीविन एव तू

र्यांगत्वेन गृह्यंते। तेषां हि मुख्यं तूर्यांगत्वमिति परे॥ अथ यत्रेति। यदि जातिपदार्थपक्षस्तदाश्रीयते तदा लक्षणेऽऽवृत्त्यभावादेकस्यैव नियमे सति शेषाणा

मनियमेन भाव्यं। अथ व्यक्तिपक्षस्तदा पुनः पुनर्लक्षणप्रवर्त्तनात्सर्वेषां नियमेन भाव्यमिति मत्वा पृच्छति॥ उत्तरं तु लक्ष्यदर्शनवशाज्जातिपक्षा

मर्दंगाश्च

शंखतूणवौ शंखतूणवौ च मृदंग शंखतूणवाः। रामश्च केशवश्च रामकेशवौ रामकेशवौ च धनपतिश्च धनपतिरामकेशवाः धनपतिरामके

शवानामिति। अथ यत्र बहूनां पूर्वनिपातप्रसंगः किं तत्रैकस्य नियमो भवति आहोस्वित्द्विशेषेण। अनेकप्राप्तावेकस्य नियमोऽनिय

मः शेषेषु अनेकप्राप्तावेकस्य नियमो भवति शेषेष्वनियमः। पटुमृदुशुक्लाः पटुशुक्लमृदव इति। ऋतुनक्षत्राणामानुपूर्व्येण

समानाक्षराणां। ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षराणां पूर्वनिपातो वक्तव्यः शिशिरवसंतावुदगयनस्थौ। कृत्तिकारोहिण्यः। अ

भ्यर्हितं च पूर्वं निपततीति वक्तव्यं। मातापितरौ श्रद्धामेधे। लघ्वक्षरं लघ्वक्षरं पूर्वं निपततीति वक्तव्यं। कुशकाशं। शरचापं। अपर आह।

सर्वत एवाभ्यर्हितं पूर्वं निपततीति वक्तव्यम् लघ्वक्षरादपीति। दीक्षातपसी श्रद्धातपसी। वर्णानामानुपूर्व्येण वर्णानामानुपूर्व्येण पूर्वनि

पातो भवतीति वक्तव्यं। ब्राह्मणक्षत्रियविट्शूद्राः। भ्रातुश्च ज्यायसः युधिष्ठिरार्जुनौ। संख्याया अल्पीयसः संख्याया अल्पीयसः पूर्वनि

पातो भवतीति वक्तव्यं। [redacted] एकादशद्वादशं धर्मादिषूभयं। धर्मादिषूभयं पूर्वं निपततीति वक्तव्यं। धर्मार्थौ अर्थधर्मौ कामार्थौ अर्थकामौ गुण

[illegible]

अयेण। उदगयनस्थाविति। उत्तरायणस्थौ। लौकिकप्रयोगदर्शनपरमिदं। मातापितराविति। गर्भधारणादिना पित्रपेक्षया माताभ्यर्हिता श्रद्धामेधे इति ससांश्रद्धाया

मर्थक्रियाकारिणी मेधेति श्रद्धाया अभ्यर्हितत्वं लघ्वक्षरापीति पूर्वविप्रतिषेधेन दीक्षातपसी इति। दीक्षार्थं तपश्चरणमिति दीक्षाया अभ्यर्हितत्वं स्वरूपेण वा व

र्णानामिति। वेददर्शनाश्रयणोत्पत्तिक्रमेण वर्णानामानुपूर्व्यं। अल्पीयस इति। अर्थस्य वाचिकाया इति शेषः एतच्च द्वंद्वविषयमित्याहुः श्लोकयोरिति तु सौत्रो निर्देशः॥०

एवं०　　　　वाद०

राम०
८५

अप्रस्यवि०

सप्तमी विश्वदेव इति। यद्यपि विशेष्यत्वं तदेव मुदाहरणं। विशेषणत्वेतु सूत्रेणैव सिद्धः पूर्वनिपातः द्विपुत्र इति। दिङ्मात्रप्रदर्शनमेतत् अत्र हि विशेषणत्वादेव सिद्धः

संख्यायाः पूर्वनिपातस्तस्मात् द्विपुत्र इत्याद्युदाहरणं॥ परत्वात्संख्याया इति शब्दपरविप्रतिषेधात्। एवमर्थमेव च संख्या सर्वनाम्नोरिति न कृतं॥ ॥

=सप्तमी ग्रहणं त्रिपात्रः पोष्यपक्षे समानाधिकरणत्वानामितिवार्तिकमते च सप्तम्यंतानां समासस्त्रापनार्थमेकविभक्ती सत्रापूर्वनिपातश्रतिप्रसङ्गप्रतिषेधो वाध्यसामान्यादित्तौ चेतिपक्षे सप्तम्यंतस्यपूर्वनिपातप्रतिषेधे प्राप्ते विधानार्थं

सप्तमी विशेषणे बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानं। बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानं कर्त्तव्यं। विश्वदेवः विश्वयशाः द्विपुत्रः द्विभार्यः अत्र यत्र संख्या सर्वनाम्नोरेव बहुव्रीहिः कृ स्यात्तत्र पूर्वनिपातेन भवितव्यं। परत्वात्संख्यायां अन्याय अन्याय वा प्रियस्य

गुडप्रियः पूर्वनिपातो भवतीति वक्तव्यं। प्रियगुडः सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परवचनं सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परा सप्तमी भवतीति वक्तव्यं। गडुकंठः गडुशिराः सप्तमी। निष्ठा निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परवचनं। निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परा निष्ठा भवतीति वक्तव्यं। शार्ङ्गजग्धी पलांडु भक्षिती। मासजाता [redacted] सुखजाता दुःखजाता नवोत्तरपदस्यांतोदात्तवचनं ज्ञापकं परभावस्य। नवा वक्तव्यं। किं कारणं। उत्तरपदस्यांतोदात्तवचनं ज्ञापकं परभावस्य। यदयं जातिकालसुखादिभ्यः परस्या निष्ठाया उत्तरपदस्यांतोदात्तत्वं शास्ति तज्ज्ञापयत्याचार्यः परा निष्ठा भवतीति॥ प्रतिषेधेतु पूर्वनिपातप्रसंगस्तस्माद्वाजदंतादिषु पाठः प्रतिषेधेतु पूर्वनिपातः प्राप्नोति॥ अकृतमितप्रतिपन्ना इति॥ तस्माद्राजदंतादिषु पाठः कर्त्तव्यः॥ ॥ ॥

निष्ठा॥ प्रतिषेधे लिति॥ अकृतमितप्रतिपन्ना इति कृतादीनामंतोदात्तत्वप्रतिषेधात्स्वरात्त्वविधानाज्ज्ञापितः परनिपातोपि नस्यादित्यर्थः॥ ॥श्री॥ ॥

भा०कै०२ नवेति॥ उत्तरपदान्तोदात्तत्वे प्रसक्ते प्रतिषेधः क्रियते यदि च परनिपातस्तत्र तत्र संगो नान्यथा॥ कडाराः॥ बहुवचननिर्देशादिति कडारशब्दस्यैकत्वा

८६ देकवचने कर्त्तव्ये सा हि चर्योदारोपित कडाररूपगडुलादिशब्दगतबहुत्वापेक्षो बहुवचननिर्देशो यथा त्रिणो यान्तीति॥ ॥ इत्युपाध्यायजय्यटपुत्र

86

नवाकर्त्तव्यः अत्रापि प्रतिषेधवचनं ज्ञापकं परा निष्ठा भवतीति। प्रहरणार्थेभ्यश्च॥ प्रहरणार्थेभ्यश्च परे निष्ठासप्तम्यौ भवत इति वक्त

व्यं। अस्युद्यतः मुसलोद्यतः असिपाणिः दंडपाणिः द्वंद्वे घ्य जाघदंतं द्वंद्वे घीसस्मा जाघदंतमिति एतद्भवति विप्रतिषेधे न द्वंद्वे घी स

स्यावकाशः पटुगुप्तौ अजाघदंतमित्यस्यावकाशः उष्ट्रखरौ॥ इहोभयं प्राप्नोति॥ इंद्राग्नी॥ अजाघदंतमित्येतद्भवति विप्रतिषेधे

न उभाभ्यामल्पान्तरम् उभाभ्यामल्पाच्तरमित्येतद्भवति विप्रतिषेधे न द्वंद्वे घीसस्यावकाशः पटुगुप्तौ अल्पाच्तरमित्यस्यावकाश

ः वाग्दृषदं। इहोभयं प्राप्नोति वागग्नी। अल्पाच्तरमित्येतद्भवति विप्रतिषेधे न अजाघदंतमित्यस्यावकाशः उष्ट्रखरौ अल्पाच्तर

मित्यस्यावकाशः वाग्दृषदौ। इहोभयं प्राप्नोति वागिंद्रौ। अल्पाच्तरमित्येतद्भवति विप्रतिषेधे न कडाराः कर्मधारये। कडारादय इ

ति वक्तव्यं। इहापि यथा स्यात् गडुलशांडिल्यः शांडिल्यगडुलः खंडवात्स्यः। वात्स्यखंडः तत्तर्हि वक्तव्यं न वक्तव्यं। बहुवचननिर्देशा

त्कडारादय इति विज्ञास्यते॥ ॥ इति श्रीमहाभाष्ये भगवत्पतंजलिविरचिते द्वितीयस्याध्यायस्य द्वितीये पादे द्वितीयमान्हिकम्॥ एम०

कैयटकृते महाभाष्यप्रदीपे द्वितीयस्याध्यायस्य द्वितीये पादे द्वितीयमान्हिकम्॥ ॥ द्वितीयः॥ पादः॥ समाप्तः॥ ॥ श्रीसंकटादेव्यायोन्नमः ८६

अनभिहिते॥ प्रत्याख्यानवादी स्ववाचानभिहितशब्दार्थमारंभवादिनं संजल्पयितुं पृच्छति॥ किमिदमिति। अभिपूर्वस्तावद्दधातिर्बंधनोच्चारणप्रति
पादनेषु वर्त्तते॥ अश्वाभिधानीमादत्त इत्यत्र बंधनवृत्तिः अभिहितश्लोक इत्युच्चारणवृत्तिः अभिहितार्थ इति प्रतिपादनवृत्तिः हिनोतेरपि गतिवृ
द्ध्यर्थस्याभिहितमिति भवति तत्र वक्ष्यमाणानां कर्मादीनां बंधनोच्चार्यचतुष्टयासंभवात् प्रतिपादनवचन एवाभिहितशब्द आश्रयणीयस्ततः

अनभिहिते॥ अनभिहित इत्युच्यते॥ किमिदमनभिहितं नाम। उक्तं निर्दिष्टमभिहितमित्यनर्थान्तरं॥ यावद्ब्रूयादनुक्ते अनिर्दिष्ट इ
ति तावदनभिहित इति॥ अनभिहितवचनमनर्थकमन्यत्रापि विहितस्याभावादभिहिते॥ अनभिहितवचनमनर्थकं किंकार
णं अन्यत्रापि विहितस्याभावादभिहिते॥ अन्यत्राप्यभिहिते विहितं न भवति। क्वान्यत्र चित्रगुः शबलगुर्बहुव्रीहिणोक्तत्वान्मत्व
र्थस्य मत्वर्थीयो न भवति। गर्गाः वत्साः विदाः॥ ॥ ॥

प्रयोजनाभावादनर्थकं सूत्रमिति भावः पूर्वोक्तेनाभिप्रायेणाह॥ उक्तमिति प्रतिपादितमित्यर्थः। यथा उक्तार्थानामप्रयोग इति यावद्ब्रूयादिति॥ या
वत्तावच्छब्दौ निपातावभिन्नार्थे त्वं प्रतिपादयतः॥ अनभिहितवचनमिति। अर्थप्रत्यायनाय लोके शब्दः प्रयुज्यते स चार्थो यदा शब्दान्तरेण प्रतिपा
दितो भवति तदा प्रयोजनाभावाच्छब्दान्तरस्याप्रयोगेणानभाव्यं॥ अक्षिनिकोचादिभिरप्यवगते येर्थे शब्दो न प्रयुज्यते किं पुनः शब्दान्तरप्रतिपादितेर्थे॥०॥

यत्रत्र्यप्यामिति॥ यत्रं तेनात्रं ते न चेत्सत्यर्थः। यत्रत्रोस्तु लुप्तत्वादर्थोभिधानं न संभवति। न्यायोसन्निरिति। उत्सर्गः पूर्वाचार्यप्रसिद्धा न्याय उच्यन्ते॥ बहुवचनोदाहरणं गार्ग्योगार्ग्याविति यत्रैव परदेशस्यावष्टब्धत्वादणः उत्सस्याभावात्॥ बहुवचनेतु यत्रत्रोर्लुप्तत्वाद्विरोधकाभावादुक्तार्थत्वाश्रयेणैवाणोनुत्सन्निः प्रतिपाद्या सप्तपर्णा इति॥ वीप्सायांविषये द्विर्वचनमुच्यते। अस्ति चेह वीप्सा सप्तसप्तपर्णान्यस्येति। समासेन तु शब्दश

उक्तोः यत्रत्र्यप्यामुक्तत्वादयत्नार्थस्य न्यायोसन्निर्न भवति। सप्तपर्णो [stain] ष्टायद इति समासेनोक्तत्वाद्वीप्सायाः द्विर्वचनं न भवतीति॥ यत्नावरुच्यते चित्रगुः शबलगुरिति बहुव्रीहिणोक्तत्वान्मत्वर्थस्य मत्वर्थीयो न भवतीति॥ अस्तिसामानाधिकरण्ये मतुब्विधीयते। न चात्रास्तिनासामानाधिकरण्यं। यदप्युच्यते गार्ग्याः वत्साः विदाः उर्वा इतियं त्र्यप्यामुक्तत्वादपत्यार्थस्य न्यायोत्पत्तिर्न भवतीति॥ समर्थानां प्रथमाद्वेति वर्त्तते॥ ॥ ॥

=ननु चित्रगुरस्ति विवर्त्तिपदयोरस्तिसामानाधिकरण्यमस्त्येवेसत आह॥ वर्त्तिपदयोरिति॥ अन्यपदार्थउपसंक्रान्त=
=त्वादिति॥ तथाचान्यपदार्थाभिधायिनोरनयोरस्तिसामानाधिकरण्यमपि स्वार्थत्यागित्वाद्विशिष्टयोरस्तिसामानाधिकरण्याभावइति भावः॥ ननु विद्यमानचित्रगोरसंबंधवतश्चित्रगुरिति तो बोधाद्वाक्यार्थोप्यस्तिसमानाधिकरणेभवत्येवेसतआह नत्रैवांतर्भूतता

क्तिस्वाभाव्याद्वीप्सायागमितत्वाद्द्विर्वचनाभावः॥ आरंभवादी दृष्टांतेष्वन्यथासाध्यसिद्धिं प्रतिपादयितुमाह॥ यत्नावदिति। न चात्रास्तिनेति॥ वर्त्तिपदयोरन्यपदार्थउपसंक्रान्तत्वादस्त्यर्थस्यतत्रैवांतर्भूतत्वात्स्वार्थस्य संसृष्टत्वादस्तिसामानाधिकरण्याभावः॥ यदात्वन्यपदार्थेनतद्वत्ताप्रतिपिपादयिषि तात्तदा चित्रगुमानिति भवत्येव॥ ॥ ॥

[illegible]

नचैतन्नदिति॥ समर्थो नाम प्रथमादिस्वधिकारादयस्सर्वद्वाचिनः षष्ठ्यंतात्प्रत्ययेन भाव्यं नत्वपत्यवाचिनः यत्र ज्ञोस्तु लुकि कृते प्रकृतिरेवापत्यार्थोभिधा
यिनीति त्वणत्र न भवतीत्यर्थः॥ पदस्येति॥ वीप्साभानार्थाभिधायिनः पदस्य द्विर्वचनं विधीयते पर्वार्थस्य वीप्सायोगो न चात्र पर्वशब्दस्य प्रयोगः प्र
मोक्तत्वादिति॥ भावकर्मकर्त्तारो विकरणार्था इति सर्वाचार्यदर्शनमाश्रित्यैवमुक्तं॥ अत्राप्यन्यथासिद्धमाह॥ ॥नन्विति॥ ततश्चोक्तत्वस्य दृष्टांता
भावादहेतुत्वं॥ नानादेशत्वादिति॥ विरोधो बाधकारणं न विशे[illegible]षविधानमेव॥ वार्त्तिककारस्य चेदं दर्शनं॥ भाष्यकारस्तु विरोधाभावेपि विशेषवि

नचैतत्समर्थो नां प्रथमं॥ किं तर्हि॥ द्वितीयमर्थमुपसंक्रांतं॥ पदस्युच्यते सप्तपर्णोऽष्टापद इति॥ समासेनोक्तत्वाद्वीप्सायाः द्विर्वचनं न भवतीति॥ प
दत्वंवीप्सायुक्तेनादः प्रयुज्यते॥ किं पुनस्तत्सर्वेणापर्वणि सप्तपर्णान्यस्य॥ पंक्तौ पंक्तावष्टौ पदान्यस्य अमम्बकुजकस्तु तर्हि अमम्॥ भिनत्तीति
नत्ति॥ अमोक्तत्वात्कृते त्वप्यकृते रिशप्न भवति॥ बकुच्॥ बकुकृते बकुभित्त्रमिति॥ बकुचोक्तत्वादीषदसमाप्तेः कल्पबादयो न भवंति॥ अकच्॥ उच्चकैः नी
चकैरिति॥ अकचोक्तत्वात्कुत्सादीनां कादयो न भवंति॥ ननु च अमम्बकुजकचोपवादाः तेऽपवादत्वाद्बाधका भविष्यंति॥ अमम्बकुजकस्तु नानादे
शत्वात् उत्सर्गाप्रतिषेधः समानदेशेऽपवादैरुत्सर्गाणां बाधनं भवति॥ नानादेशत्वान्न प्राप्नोति॥ किं पुनरिहाकर्त्तव्योऽभिहिताधिकारः क्रियते॥ आहोस्वि

धानमात्रेणैव बाधकत्वमन्यत्राचोचतत्तत्कृतानं चदधिदानस्य विरोधाभावेपि लोके बाधकं दृश्यते॥ तदेवं अमादिदृष्टांताववष्टंभेन हेतुत्वमुक्तत्वं स्थापितं॥ स्यमव॰
इदानीमारंभवादी पक्षांतरमाश्रयिष्यामीति पृच्छति॥ किं पुनरिति॥ आहोस्विदन्यत्रेति॥ अपूपौ द्वाविशभिहितेपि प्रत्ययेन द्वित्वे द्विशब्दस्य प्रयोगदर्शनात् अमा
॥ दिभिरभिहिते शबादिनिवृत्त्यर्थं कर्त्तव्यः सन्क्रियत इत्यर्थः॥ ॥ ॥

=अन्यस्त्विति। पूर्वोक्तार्थस्य कल्पवादे विसर्गः। प्रयोगाभावस्त्विति। लोके दृष्टत्वादिशेषः।१=

भा०कै०२ प्रत्याख्यानवादी आह॥ इहाकृतेयम् इति। अप्रयुक्तौ ह्यविसादीनुगतार्थेऽस्यापि हि शब्दस्य लोके प्रयोगो दृश्यते। अन्यस्त्वनुगतार्थस्य प्रयोगाभावः प्रयोजनाभावा
८८ देव सिद्धः इदानीमेकत्वादीनां विभक्त्यर्थत्वमाश्रित्य सूत्रं समर्थयितुमाह॥ अनभिहिते त्विति॥ कर्मणि द्वितीयेत्यादेर्बहुषु बहुवचनमित्यादिनैकवाक्यता
८३ तत्र पदे एकत्वादीनि विशेषणानि कर्मादीनि विशेष्याणि एकं पक्षं तत्र द्वितीयैकवचनमित्ययं कर्मद्वितीयार्थः संपद्यते। तच्च यदा कटादिभिरभिहितं
भवति तदा गतार्थत्वाद् द्वितीयायाः प्राप्तिरेव नास्तीति नार्थोऽनभिहिताधिकारेण यदा तु कर्मादीनां विशेषणत्वमेकत्वादीनां विशेष्यत्वं कर्मणि पदे एकत्वादि तत्र

इहाकृतेयमः क्रियते। एष एव हि न्यायः यदभिहिते विहितं न स्यात् अनभिहितस्तु विभक्त्यर्थस्तस्मादनभिहितवचनं। कः पुनर्विभक्त्य
र्थः। एकत्वादयो विभक्त्यर्थाः तेष्वनभिहितेषु कर्मादयोऽभिहिता विभक्तीनामुत्पत्तौ निमित्तत्वाय माभूवन्निति तस्मादनभिहितवचनं॥
तस्मादनभिहिताधिकारः क्रियते। अवश्यं चैतदेवं विज्ञेयं एकत्वादयो विभक्त्यर्था इति॥ ॥ ॥

द्वितीयेति तदैकत्वादयो विभक्त्यर्थाः संपद्यन्ते तेन चाभिहितेष्वपि कटादिभिः कर्मादिष्वनभिहिता इति तदभिधानाय द्वितीयादीनां प्रसंगे तन्निवारणा
यकृतेऽनभिहिताधिकारे कर्मणि द्वितीयेत्यादौ कर्मादीनां श्रुतत्वात्तेषामेव विभक्त्यर्थत्वेन भाव्यमिति मत्वा पृच्छति कः पुनरिति। एकत्वादय इ
तिकर्मणि द्वितीयेत्यादिस्सप्तमीनिर्दिष्टा एकत्वाद्यपेक्षः कर्मेति यदेकत्वादि तत्र द्वितीयेति तन्नत्वभिधेयप्रतिपादनायं निमित्तत्वायेति॥ कर्माद्या रा०म०
श्रितानामेकत्वादीनामपि विभक्त्यर्थत्वे पारंपर्येण कर्मादीनां निमित्तभावो स्त्येवेत्यभिप्रायेणोक्तं॥ ॥ ॥ ८८

अभिहित इति॥ यदा वक्ष्यमाणेनाकर्मादीनां विभक्त्यर्थत्वं तदा प्रातिपदिकार्थेनापि प्रथमार्थेन भाव्यं तस्य च प्रातिपदिकेनैवोक्तत्वात् वृक्ष इत्यादौ प्रथमा न प्रा-
प्नोति। एकत्वादीनां तु विभक्त्यर्थत्वे तदभिधानाय प्रथमा प्रवर्तेत एवेति दोषाभावः प्रसाख्यानवाद्याह न कश्चिदिति वचनसामर्थ्यात् प्रातिपदिकेनोक्तेपि तद-
र्थे प्रथमा भविष्यति॥ द्वितीयादयस्त्वनभिहिते कर्मादौ सावकाशत्वादभिहिते न भविष्यन्ति। तिङोक्ता इति। अनभिहिते कत्वाद्यभिधानाय तत्र विभक्ति-

अभिहिते प्रथमाभावः। यो हि मन्यते कर्मादयो विभक्त्यर्थाः तेष्वनभिहितेषु सामर्थ्यान्ने विभक्तीनामुत्पत्तिर्भविष्यतीति प्रथमा तस्य न प्राप्नोति। क्व वृक्षः
प्लक्षः किं कारणं। प्रातिपदिकेनोक्तः प्रातिपदिकार्थ इति। न कश्चित्प्रातिपदिकेनानुक्तः प्रातिपदिकार्थः उच्यते च प्रथमा सा वचनाद्भविष्यति॥ त-
वैव तु खल्वेष दोषः यस्य ते एकत्वादयो विभक्त्यर्थाः अभिहिते प्रथमाऽभाव इति प्रथमा ते न प्राप्नोति। कथं च सोदनं देवदत्त इति। किं कारणं तिङो-
क्ता एकत्वादय इति। अनभिहिताधिकारं चेत्वं करोषि परिगणनं चं न कश्चित्तिङा एकत्वादीनामनभिधानं उच्यते च प्रथमा सा वचनाद्भविष्यति।
ननु चेहानभिधानं वृक्षः प्लक्ष इति। अत्राप्यभिधानमस्ति। कथं वक्ष्यसे तत् अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति वृक्षः
प्लक्षः अस्तीति गम्यते। तवैव तु खल्वेष दोषः यस्य ते कर्मादयो विभक्त्यर्थाः अभिहिते प्रथमाभाव इति प्रथमा ते प्राप्नोति॥ कटं करोति॥ व।
विधानां पचतीति च कर्तुरेकत्वं तिङाभिहितमिति प्रथमा न स्यादित्यर्थः। परिगणनं चेति। कृत्तद्धितसमासैरित्येतत। अत्र च तिङा स्येकत्वस्याभिधानमिति
प्रथमाया अप्रसंगः आरंभवाद्याह। न कश्चिदिति। सर्वत्र च पदमपेक्षित क्रियापदमेव प्रयुज्यते। उच्यते चेति॥ प्रातिपदिकार्थ सूत्रेणेत्यर्थः। भवन्तीपर इति। लु-
ट्पर इत्यर्थः। तत्र वृक्ष इत्यत्रापि तिङैकत्वस्याभिधानादनवकाशत्वात्तिङाभिहितेप्येकत्वादौ प्रथमा भवति। एवमारंभवादी स्वपक्षे दोषं परिहृत्य परपक्षे

भा०कै०२
चर्चू
४७

भीष्ममिति। भीष्मादिविशेषणविशिष्टस्य कटस्य करोतिक्रियेप्सिततमत्वात्कर्म्मत्वं तच्च कटशब्दादुत्पन्नया द्वितीययाभिहितमिति भीष्मादिभ्यो द्वितीया याऽप्रसंगात्प्रथमा प्राप्नोति। आरंभवादिनस्तु परिगणनात्कटशब्दादुत्पन्नया द्वितीययाभिहितेऽपि कर्मणि भीष्मादिभ्यो द्वितीया भविष्यती ति न दोषः कर्म्मविशेषण इति। भीष्मादियुक्तकटसंबंधिकर्म्मत्वं प्रतिपाद्यं। तत्र च यथा कटशब्देन भीष्मत्वादीनामनभिधानात्तदभिधानाय भीष्मा दिशब्दप्रयोगः तथा द्वितीयापि तेभ्यो भविष्यति। नह्यन्यथा तद्विशिष्टत्वं कटस्य प्रत्यापयितुं शक्यते। अथवेति। यद्यपि करोतिक्रियया प्तुमिष्टत

भीष्ममुदारं शोभनं दर्शनीयमिति कटशब्दादुत्पद्यमानया द्वितीययाभिहितं कर्मेति कृत्वा भीष्मादिभ्यो द्वितीया न प्राप्नोति का तर्हि प्राप्नोति प्रथमा तद्यथा कृतः कटो भीष्म उदारः शोभनो दर्शनीय इति। करोतेरुत्पद्यमानेन क्तेनाभिहितं कर्मेति कृत्वा भीष्मादिभ्यो द्वितीया न भवति। का तर्हि प्रथमा नैष दोषः न हि ममानभिहिताधिकारोस्ति नापि परिगणनं सामर्थ्यान्नेविभक्तीनामुत्पत्तिर्भविष्यति। अस्ति च सामर्थ्यं। किं कर्मविशेषणत्वं वक्तव्यः अथवा कटोपि कर्म भीष्मादयोपि तत्र कर्मणीत्येव सिद्धं अथवा कट एव कर्म तत्सामानाधिकरण्याद्भीष्मादिभ्यो द्विती यं तत्संबंधकर्म्म द्रव्यं गुणश्च नह्यसौ कटमात्रेण संतुष्यति तत्र करोतिक्रियायां पृथक् सर्वेषां कर्मत्वे प्रत्येकं द्वितीयोत्पत्तिः पश्चात्त्वेकवाक्यतया विशेषणवि शेष्यभावः यद्यपि गुणद्रव्ययोः करोतिना संबंधस्तथापि तमप्रत्युत्पाप्रकर्षस्याश्रितत्वात् द्रव्यस्यैव क्रियांतरउपयोक्ष्यमाणत्वादीप्सिततमत्वात्तस्यै व कर्म्मसंज्ञा न गुणस्येति मत्वाह। अथवेति। तत्सामानाधिकरण्यादिति। भीष्मादीनां स्वयमकर्मत्वेपि विशेष्यसंबंधिन्यैव विभक्त्या भाव्यं। तदेकयोग क्षेमत्वात्॥ केवलानां च प्रातिपदिकानां प्रयोगः स्येति नियमादप्रयोगार्हत्वात् ततो यथेष्टम्वरस्तु हृदः स्वयं निर्द्धनाऽपि तदीयेन धनेन ततस्कृत्त भाजनः॥ एवं गुणाऽपि॥

=क्रियांतरे आसनशयनादिरूपे क्रियाविशेषे॰२=

टम०
८९

कर्मत्वयेन द्वितीयायां वैधर्म्यं दर्शयति। अस्ति खल्वपीति। अनवयवेनेति। साकल्येन सर्वमिति। भीष्मादिगुणागतमपीसर्थः। कटस्थमिति। प्रातिपदिकार्थेग
तायाएवकर्मशक्तेर्वाचिका द्वितीयेसर्थः। न कर्मविशेष इति। भीष्मादिगुणागतं कर्मत्वमभिधातुं न शक्यमिसर्थः। एवं युक्त्या प्रसाख्यानवादी स्वपक्षे दोषंप
रिहृत्य परपक्षे दूषणमाह। तवैवेति। एष दोष इति वक्ष्यमाणः प्रातिपदिकेनोक्ता इसनभिहिते कत्वाद्यभिधानाय तत्र विभक्तिविधानं नान्ति चैकादि
भिरेवोक्तानीति। प्रथमायाः प्राप्तिः। आरंभवादी परस्य तुल्यदोषतामाह। कर्मादिष्वपीति यस्यापि कर्मादयो विभक्त्यर्थास्तेनाप्येकवाक्यता बहुत्व

अस्ति खल्वपि विशेषः कटं करोति भीष्ममुदारं दर्शनीयं शोभनमिति च कृतः कटः भीष्म उदारः शोभनो दर्शनीय इति च। करोतेरुत्पद्यमानः
कः अनवयवेन सर्वं कर्माभिधत्ते कटशब्दात्पुनरुत्पद्यमानया द्वितीयया यत् कटस्थं कर्म तत् शक्यमभिधातुं न कर्मविशेषः तवैवतु
खल्वेष दोषः यस्य तेएकत्वादयो विभक्त्यर्थाः अभिहिते प्रथमाभाव इति प्रथमा तेन प्राप्नोति। कैएको द्वौ बहव इति किंकारणं। प्रा
तिपदिकेनोक्ता एकत्वादय इति। कर्मादिष्वपि वै विभक्त्यर्थेषु अपवर्गमेकत्वादयोनिमित्तत्वेनोपादेयाः कर्मणएकत्वे कर्मणो द्वित्वे कर्मणो बहु
त्व इति। न चैकत्वादीनामेकत्वा
व्हुत्वचनमिसादेः कर्मणि द्वितीये स्यादीनां चाभ्युपगंतव्यागुणप्रधानभावएवतु तस्य विपरीतः तत्र प्रातिपदिका
र्थगते कत्वादि विशिष्टे कर्मणि द्वितीये सेवमादिर्वा सार्थेस्त स्यसंपद्यते। कर्मण एकत्व इति नन्वेकत्वादीनां विशेषणत्वमभिधानीयं कर्मादीनां च विशेष्य
त्वं तत्र कस्मात्कर्मणो विशेषणत्वं प्रतिपाद्यते। नैष दोषः प्रातिपदिकार्थे स्यैकत्वे सति तद्विशिष्ट कर्मणो वाचिका द्वितीये स्य यमत्रार्थो विवक्षितः त
तः प्रातिपदिकार्थव्यतिरेकेणान्येषामेकत्वादीनां विशेषणीभूतानामभावादेक इत्यादौ भवतोपि प्रथमानस्यादि सर्थः॥ ॥ ॥

॥ ० ॥ [illegible]

=एतावत्तत्र निमित्तं प्रवृत्तिनिमित्तं यदेकत्वं तद्विभक्त्या नाभिधीयत इत्यर्थः।१८=

भा०कै०२ अथ संतीति। व्यतिरिक्तानीत्यर्थः। तदुक्तं हरिणा निमित्तमेकमित्यत्र विभक्त्या नाभिधीयते। तद्गतस्तु परेकत्वं विभक्तिस्तत्र वर्त्तत इति। यथाश नमिसत्र प्रवृत्ति
९० निमित्तं शतसंख्यान्या अन्या च विभक्तिवाच्या प्रातिपदिकार्थगतैकत्वसंख्या तथैकमित्यत्रापि प्रवृत्तिनिमित्तविभक्तिवाच्ये द्वे एकत्वे। एवं शब्दशक्त्या
७० श्रयेणैकत्वादिभेदेन समाधायाभेदपक्षेपि समाधातुमाह॥ अथवेति। गुणोपसर्जनं द्रव्यं प्रातिपदिकेनाभिधीयते। द्रव्योपसर्जनस्तु गुणो विभक्त्य
र्थः। यथा शौक्ल्यमिति गुणोपसर्जनद्रव्याभिधायिनः शुक्लशब्दात् द्रव्योपसर्जने तस्मिन्ने व गुणे भावप्रत्ययः यत्स्योसाविति॥ यस्मिन्द्र

अथ संतिममापि संति। ते ष्वनभिहितेषु प्रथमा भविष्यति॥ अथवा उभयवचना ह्येते द्रव्यं चाह गुणं च यत्स्यो सौ गुणस्तस्यानुक्ता एकत्वा
दय इति कृत्वा प्रथमा भविष्यति। अथवा संख्या नामेयं परप्रधाना संख्येयमनया विशेष्यं यदि चान्तरं प्रथमा न स्यात्। संख्येयमविशे
षितं स्यात्। अथवा वक्ष्यति तत्र वचनग्रहणस्य प्रयोजनं उक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यादिति। अथवा समयाद्भविष्यति॥ य
दि सामपिकीन नियोगतः अन्याः कस्मान्न भवंति कर्मादीनामभावात्॥ षष्ठी तर्हि प्राप्नोति शेषलक्षणा षष्ठी॥ ॥

येस्थित एकत्वादिगुणस्तस्य द्रव्यस्यानुक्ता एकत्वादयः प्राधान्येनेति भावः संख्येयमविशेषितमिति केवलस्य प्रातिपदिकस्य प्रयोगाभावात्प्रथमा
या अभावे एकादिशब्दानुच्चारणात्॥ एवं युक्त्या प्रथमोत्पत्तिं प्रतिपाद्य वचनेन प्रतिपादयितुमाह अथवेति। समयादिति परस्त्रैसस्मात्प्रत्ययपरै
व प्रकृतिः प्रयोक्तव्या न केवलेत्येवं रूपादित्यर्थः कर्मादीनामिति। कर्मत्वे पेव द्वितीयेत्येवं द्वितीयादीनां नियतत्वात्॥ षष्ठी तर्हीति कर्माद्यभावः शे राम०
ष इति भावः॥ ॥ ॥ ९०

अशेषत्वादिति॥ प्रातिपदिकार्थस्य प्रथमाविधावुपयोगात्तस्य चाव्यतिरिक्तस्येह सद्भावः। अर्थाव्यवस्थेति। सामर्थ्यादित्यर्थः। एक इत्यत्रैकमेवैकत्वं तच्च प्राति
पदिकेनाभिहितमित्यप्राप्ता प्रथमा समयवशेन प्राप्यते तत्र यथासमर्थं पालितो भवत्येकत्वानुगुणं चान्यत्र तदभिधाने दृष्टसामर्थ्ये वचने भवतीति त
था कर्तव्यमि[illegible]त्यर्थः। तदेवं संख्याविभक्त्यर्थ इति दर्शनाश्रयेण सूत्रं स्थापितं ॥ औपगव इति। उपगोरपत्यवत् संबंधस्य तद्धितेनोक्तत्वात् षष्ठी न भ

अशेषत्वान्न भविष्यति॥ एवमपि व्यतिकरः प्राप्नोति। एकस्मिन्नपि द्विवचनबहुवचने प्राप्नुतः द्वयोरप्येकवचनबहुवचने प्राप्नुतः बहुष्वप्ये
कवचनद्विवचने प्राप्नुतः अर्थतो व्यवस्था भविष्यति॥ परिगणनं कर्तव्यं॥ तिङ्‌कृत्तद्धितसमासैः परिसंख्यानं। तिङ्‌कृत्तद्धितसमासैः परिसं
ख्यानं कर्तव्यं। तिङ्‌। क्रियते कटः तिङ्‌। कृत् कृतः कटः कृत्‌। तद्धितः॥ औपगवः कापटवः तद्धित। समास। चित्रगुः शबलगुः समास। उत्सर्गे हि प्रा
तिपदिकसामानाधिकरण्ये विभक्तिवचनं। उत्सर्गे हि प्रातिपदिकसामानाधिकरण्ये विभक्तिर्वक्तव्या। कटं करोति भीष्ममुदा[illegible]रं शोभनं द
र्शनीयमिति। कटशब्दादुत्पद्यमानया द्वितीययाभिहितं कर्मेति कृत्वा भीष्मादिभ्यो द्वितीया न प्राप्नोति॥ ॥ ॥

वृत्ति। चित्रगुरिति। समासेनास्य स्वामिसंबंधस्याभिधानात् षष्ठ्यभावः। उत्सर्ग इति। अनभिहित इति सामान्येनोच्यमान इत्यर्थः॥ यत्र बहूनि प्रातिपदिका
नि समानाधिकरणानि विवक्षितानि तत्रैकयोगक्षेमत्वादेकेनोत्पन्नया द्वितीयया सर्वप्रातिपदिकार्थगतं कर्मत्वमभिहितमित्यन्येभ्यो द्वितीया न स्यात्॥ ०॥

परिगणनमंतरेणाप्येतंदोषंपरिहर्तुंशक्ष्यति। कातर्हीति। अनभिहितइति पर्युदासे प्रसज्यप्रतिषेधेचदोषदर्शनात्त्वचिरएककारणायद्दोषोद्भावनेंकर्तुमाह। द्वयोरि
ति। प्रासादआस्तइत्यत्रसदिक्रियायाआसिक्रियायाश्चैकमधिकरणं प्रासादाख्यं। तच्चान्यतरेणसदिप्रत्ययेनद्य अभिहितमित्यभिहितेनेति सप्तमीनप्राप्नोति।
अभिहितादन्यइत्यत्रापिपक्षेभिहितत्वादधिकरणस्याभिहितादन्यत्वंनास्तीति नप्राप्नोतीतिद्वयंच कारकं मन्यतेतद्व्यतिरेकेणशक्तिसद्भावेप्रमाणाभा

कातर्हिस्यात्। षष्ठीशेषलक्षणाषष्ठी अशेषत्वान्नभविष्यति। अन्याअपिनप्राप्नुवंतिकिंकारणं। कर्मादीनामभावात्सप्तम्यप्यकृतः नकेव
लाप्रकृतिः प्रयोक्तव्यानचकेवलः प्रत्ययइतिनचान्याउत्पद्यमानाएतमभिसंबंधमुत्सहंतेवक्तुमितिकृत्वाद्वितीयाभविष्यति। अथवाकटो
पिकर्मभीष्मादयोपितत्रकर्मणीत्येवसिद्धं। अथवाकटएवकर्मतत्सामानाधिकरण्याद्भीष्मादि[redacted]भ्योद्वितीयाभविष्यति। तस्मान्नार्थः परिगणे
नेद्वयोःक्रिययोःकारकेन्यतरेणाभिहितेविभक्त्यभावप्रसंगः द्वयोःक्रिययोःकारकेन्यतरेणाभिहिते विभक्तिर्नप्राप्नोतिंकप्रासादेआस्तेशयने
आस्तइति। किंकारणं। सदिप्रत्ययेनाभिहितमधिकरणमितिकृत्वासप्तमीनप्राप्नोति। नवान्यतरेणानभिधानं। यतोऽनभिधानंतदाश्रयासप्त
मीभविष्यति। कुतोनुखल्वेतत्सत्यभिधानेचानभिधानेचानभिहिताश्रयासप्तमीभविष्यति। नपुनरभिहिताश्रयः प्रतिषेधइति॥ ॥

वात्। नतावत्सत्सत्त्वंद्रव्यव्यतिरिक्तस्वरूपपरिच्छेदिसमुपजायते। द्रव्यस्वरूपातिरेकेणशक्तिरूपानुपलंभात्। प्रत्यक्षाप्रवृत्तौचतत्पूर्वकत्वानुमानस्या
पिशक्तिसद्भावावेदनेनास्तिप्रवृत्तिः कार्यंचद्रव्यस्वरूपायत्तमेवेतिकार्य[redacted]व्यतिरेकादपिनास्तिशक्तिसद्भावावगमः पर्युदासंशक्तिसाधनप
ऽसंवादिसाह। नवेति। प्रसज्यप्रतिषेधवाद्याह कुतोनुखल्विति॥ ॥ ॥

पर्युदासमाश्रित्याह॥ अनभिहिते हीति। पर्युदासेऽपि दूषणमाह। यद्यपि तावदिति। आसनमास्त इत्यत्रैकैवासनक्रिया तस्याश्चाधिकरणं ल्युटाभिहितमिति सप्तम्या अप्राप्तिरित्यर्थः। अत्राप्यन्यत्वमिति भिन्नपदस्याप्यभिन्ने आसनक्रिये इत्यर्थः एकपदोपात्ते क्रियासाधनसंबंधे अनेन विभक्तयो निवार्यन्ते न तु वाक्योपात्ते। आसिः साधनमिति। आसनमित्यत्र या सिक्रिया तस्या आसिक्रिया साधनं। कथमिति चेत्। उच्यते। आस्यतेऽस्मिन्निति आसनमुच्यते। यदि चासनक्रियास्ते सन्निधीयते ततस्तदपेक्षं तदासनमुच्यते॥ एवं सामर्थ्यादासेरासिः कर्त्ता भवति। नन्वेवं सत्यासनमित्यत्र या आसिक्रिया

अनभिहिते इति विधानं अनभिहिते सप्तमी विधीयते। नाभिहिते प्रतिषेधः॥ यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रान्या चान्या च क्रिया॥ यत्र तु खलु सैव क्रिया तत्र कथं। आसने आस्ते शयने शेत इति। अत्राप्यन्यत्वमस्ति कुतः साधनभेदात्कालभेदाच्च एकस्यात्रासेरासिः साधनं सर्वकालश्च प्रत्ययः अपरस्य वास्तेः साधनं वर्त्तमानकालश्च प्रत्ययः॥ ॥

दिया२

साऽन्यस्याऽऽसिक्रियायाः साधनं भवति। न तस्या अन्या। एवं तर्ह्यर्थान्तरेऽस्याग्रन्थस्य तात्पर्यं तदयमत्र परमार्थः आसनशयनकरणयोरादानसंप्रदानादेरासनादिक्रियायोग्यं वस्तुमात्रमनुद्भूतशक्तिकमभिधीयते तत्र शक्त्युद्भवप्रतिपादनाय विभक्तिरवश्यं साध्या ततश्च आसिः साधनमिति साधनान्तरनिरपेक्षः क्रियते शब्दस्तु सत्त्वये केवलमात्रासिक्रियोपादीयत इत्यर्थः। सर्वकालश्च प्रत्यय इति कालविशेषानुपादानेन ल्युटो विधानात् चासमि

ऽति॥ देवदत्तादिकमित्यर्थः॥ ॥ ॥ ॥

भा० कै० २ किं पुनरिति॥ यदि द्रव्यं साधनं तदा तदेकमेव तत्त्वाभिहितमिति पूर्वोक्तपरिहारेण न संगच्छते अथ शक्तिः साधनं तदा तस्या भेदादभिहितत्वानभिहितत्वसं
९२ भवाद्भवति समाधानमिति मन्वानस्य प्रश्नः आश्रितत्वाच्छक्तिरेवात्र गुणशब्देन विवक्षिता। स एव पृच्छति। किं पुनरिति। गुण इत्याहेति। अयं भावः यदि द्र
व्यं साधनं स्यात् तदा तस्यैकरूपत्वात्तन्निबंधना बाधितप्रसक्तिर्ज्ञाविषयत्वान्नानार्थक्रियाकरणनिबंधनो व्यपदेशभेदो न स्यात् दृश्यते चासौ विति
=एवमनुमानं द्रव्याश्रितत्वाच्छक्तिर्द्रव्यप्रतियोगिकभेदवती परस्परप्रतियोगिकभेदवती च सोयमिसबाधितत्वपनिबंधनप्रामभिज्ञानेर्विवयत्वेपि भिन्नविषयकव्यवहारविषयत्वाद्घटपटादिवदिति०९=
किं पुनर्द्रव्यं साधनं आहोस्विद्गुणः किं चातः यदि द्रव्यं साधनं नैतद्दन्यद्भवत्यभिहितात्। अथ हि गुणः साधनं भवत्येतदन्यदभिहितात्। अन्यो
हि सदिगुणः अन्यश्चासिगुणः किं पुनः साधनं न्याय्यं गुण इत्याह कथं ज्ञायते एवं कश्चित्कंचित्पृच्छति कं देवदत्त इति। स तस्मा याचष्टे असौ वृक्ष इ
ति। कतरस्मिन्वस्तिष्ठतीति॥ स वृक्षोधिकरणं भूत्वान्येन शब्देनाभिसंबध्यमानः कर्त्ता संपद्यते। द्रव्ये पुनः साधने सति यत्कर्मैव कर्मैव
स्यात् करणं करणमेव यदधिकरणमधिकरणमेव। अनभिहितवचनमनर्थकं प्रथमाविधानस्यानवकाशत्वात्। अनभिहितवच ॥०॥ कारकाह्निकम्
नमनर्थकं किं कारणं प्रथमाविधानस्यानवकाशत्वात् अनवकाशा प्रथमा वचनाद्भविष्यति॥ सावकाशा प्रथमा कोवकाशः अकार
कं वृक्षः प्लक्ष इति। अवकाशोऽकारकमिति चेन्नास्ति भवंती परः प्रथमपुरुषोऽप्रयुज्यमानोप्यस्ति। अवकाशोऽकारकमिति चे
नानाशक्तिसद्भावावगमः सिद्धः सूत्रं प्रसार्यातुमाह॥ अनभिहितवचनमिति क्रियतेकटः कृतः कट इत्यादिषु द्वितीयादिनिवारणायानभि
हिताधिकारः क्रियते। यदि चात्र द्वितीयादयः स्युस्ततः प्रथमा निरवकाशैव स्यात् तस्मादनवकाशत्वात्प्रथमैव द्वितीयादीनां बाधिका भविष्यती राम० ९२
ति नार्थोऽनभिहिताधिकारेणोत्सर्गः वृक्ष इति क्रियापदं न श्रूयत इति विभक्त्यंतरा प्राप्तिं मन्यते॥ ॥ ॥

अस्तिर्भवंतीपर इति॥ ज्ञातं वस्तु परं प्रति पादयितुं शब्दः प्रयुज्यते ज्ञानं च सत्त इति प्र न्न क्रियापदांतरस्याप्रयोगस्तत्रोत्सर्गतः सन्नाप्रतीतिरित्यस्ती
ति क्रियापदानुषंगात् कर्त्तरि तृतीयाप्रसंगादनवकाशा प्रथमेत्यर्थः प्रतिषेधादिति॥ सावकाशत्वमनुपगम्येदमुच्यते षष्ठीति क्रियाकारकसंबं

अस्तिर्भवंतीपरः प्रथमपुरुषोऽप्रयुज्यमानोप्यस्तीति गम्यते वृक्षः प्लक्षः अस्तीति गम्यते विप्र तिषेधाद्वा प्रथमाभावः अथवा द्वि
तीयादयः क्रियंते प्रथमा चेति। प्रथमा भविष्यति विप्रतिषेधे न द्वितीयादीनामवकाशः कटं करोति भीष्ममुदारं शोभनं दर्शनीयमिति।
प्रथमाया अवकाशः अकारकं वृक्षः प्लक्ष इति। इहोभयं प्राप्नोति कटं कर्त्ता भीष्म उदारं शोभनो दर्शनीय इति प्रथमा भविष्यति
विप्रतिषेधेन न सिध्यति परत्वात् षष्ठी प्राप्नोति। शेषलक्षणा षष्ठी अशेषत्वान्न भविष्यति। कृत्प्रयोगे तु परं विधानं षष्ठ्यास्तत्प्रति
षेधार्थं। कृत्प्रयोगे तु परत्वात् षष्ठी प्राप्नोति। तत्प्रतिषेधार्थमनभिहिताधिकारः कर्त्तव्यः कर्त्तव्यः कट इति। सकर्त्तव्यः पद्धेकृत्वा
दयो विभक्त्यर्थाः अथ हि कर्मादयो विभक्त्यर्थाः नार्थोनभिहिताधिकारेणानभिहि॥ ॥ ॥

र्थसद्भावात्॥ अशेषत्वादिति। प्रातिपदिकार्थस्याव्यतिरेकाभावात्। कर्त्तव्यः कट इति। प्रथमां परत्वाद्बाधित्वा कर्त्तृकर्मणोः कृतीति षष्ठी प्राप्नोति
१ इति तद्धितनार्थोनभिहिताधिकारः॥ ॥ ॥श्री॥ ॥

भा०कौ०२
९३
93

कर्म्मणि॥ समयाग्राममिति। सामीप्यसंबंधे षष्ठ्यां प्राप्तायां द्वितीयाविधिः एवं निकषायोगे हाशब्दः शोकादिवृत्तिरिति तद्योगे षष्ठ्येव प्राप्नोति। अभितो ग्राममिति। पर्य्य
भिभ्यां चेति तसिलन्तावभितः परितः शब्दावुभयतः सर्वत इत्यनयोरर्थयोर्वर्त्तेते तद्योगेऽपि षष्ठ्येव प्राप्नोति। आभिमुख्यवृत्तिरपि विभक्तिप्रतिरूपको निपातोऽभितः श
ब्दोऽस्तीति सोऽपीह गृह्यते तद्योगेऽपि षष्ठी प्राप्नोति। अध्यधिग्राममिति। उपर्यध्यधसः सामीप्य इति द्विर्वचनमधिशब्दोऽत्रोपर्यर्थे वर्त्तते इति षष्ठी प्राप्नोति धि

कर्मणि द्वितीया॥ समयानिकषाहायोगेषूपसंख्यानं॥ समयानिकषाहायोगेषूपसंख्यानं कर्त्तव्यं। समया। समयाग्रामं। समया। निकषा। निकषाग्रामं।
निकषा। हायोगे। हा देवदत्तं हा यज्ञदत्तं। अपर आह। द्वितीयाविधानेऽभितः परितः समयानिकषाऽध्यधिधिग्योगेषूपसंख्यानं द्वितीयावि
धानेऽभितः परितः समयानिकषाऽध्यधिधिग्योगेषूपसंख्यानं कर्त्तव्यं। अभितो ग्रामं। अभितः। परितो ग्रामं। परितः। समयाग्रामं। सम
या। निकषाग्रामं निकषा। अध्यधिग्रामं। अध्यधि। धिग्जाल्मं धिग्वृषलं धिक्। अपर आह उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते। उभसर्व इत्येताभ्यां तसन्ताभ्यां द्वितीया वक्तव्या उभयतो ग्रामं सर्वतो ग्रामं। धिग्योगे। धिग्जाल्मं धिग्
वृषलं। उपर्यादिषु त्रिष्वाम्रेडितान्तेषु द्वितीया वक्तव्या उपर्युपरि ग्रामं अध्यधि ग्रामं अधोऽधो ग्रामं ततोऽन्यत्रापि दृश्यते। न देवदत्तं प्रति
=भा०ः अतिसमभिव्याहारे विषयत्वापत्तिभाजनबोधकत्वादकर्मकत्वमस्मेदं च देवदत्ते षष्ठी प्राप्तिरुपपद्यते॥ २= ९ भाति किंचित् बुभुक्षितं न प्रतिभाति किंचित् कर्मणि द्वि॥ ॥

ग्जाल्ममिति धिक्शब्दस्य निंदार्थत्वात्तद्योगे षष्ठ्याः प्राप्तिः हा ताते सा दौर्लब्धं तरं गत्वा संबोधनविभक्तिरेव भवति। उभसर्वतसोरिति उभसर्वयोस्तसाविति ष
ष्ठीसमासः उभशब्दावयवस्योभशब्दस्यानुकरणमुभशब्द इत्युभयशब्दो गृह्यते द्विवचनताविषयत्वादुभशब्दस्य तसंतस्याभावात्। दृश्यत इति दृष्टिग्रहणं प्रयोगानुसार राम०
णार्थं। न देवदत्तं प्रतीति षष्ठ्यत्र प्राप्नोति प्रतिशब्दस्यात्र क्रियाविशेषक उपसर्गो न तु कर्मप्रवचनीय इत्युदाहृतं केन चित्किंचित्स्व नमितिदर्शनार्थानेकस्य तु पन्यासः॥ ॥ ९३

तृतीया च किमर्थमिति॥ अन्तरेण चैतत्सूत्रं द्वितीयातृतीये सिद्धे इति प्रश्नः तृतीयेति। देवतोद्देशेनाग्नौ हविःप्रक्षेपो जुहोत्यर्थः तत्र यवाग्वा द्वितीयाप्राप्ते तितृतीया
विधीयते॥ अथ द्वितीयेति॥ किमप्राप्ता द्वितीया चकारेण विधीयते। अथ तृतीयया माबाधीति पक्षे चकारेणाभ्यनुज्ञायत इति प्रश्नः॥ असत्येतस्मिन्निति॥ न हि पा

=भा॰। असत्येतस्मिन्निति सुपां सुपो भवन्तीत्येतस्मिन्वार्त्तिके असतीत्यर्थः। तस्मात्तालमेमाह नैवास्ति। १ =मन्वाजिनमिति पाठः। कैयटव्याख्याक्लेशो॰ तत्पदमंजर्यामेतस्यैव पाठस्य दृष्टत्वात्। २ =

तृतीया च होश्छन्दसीति किमर्थमिदमुच्यते। तृतीया यथा स्यात्॥ अथ द्वितीया सिद्धा। सिद्धा कथं कर्मणीत्येव तृतीयापि सिद्धा कथं। सुपां सुपो भवन्तीत्येव॥
असत्येतस्मिन्सुपां सुपो भवन्तीति तृतीयार्थोऽयमारम्भः। यवाग्वाग्निहोत्रं जुहोतीत्येवं तर्हि तृतीयापि सिद्धा कथं। कर्तृकरणयोरित्येव। अयमग्निहोत्रश
ब्दोऽस्त्येव ज्योतिषि वर्त्तते तद्यथा। अग्निहोत्रं प्रज्वलनमिति। अस्ति हविषि वर्त्तते॥ तद्यथा अग्निहोत्रं जुहोतीति जुहोति। अथास्ति वप्रक्षेपणे वर्त्
ते अस्ति प्रीणात्यर्थे वर्त्तते। तद्यदा तावद्यवागूशब्दात्तृतीया तदाग्निहोत्रशब्दो ज्योतिषि वर्त्तते॥ जुहोतिश्च प्रीणात्यर्थे। तद्यथा। यवाग्वा
ग्निहोत्रं जुहोति। अग्निं प्रीणातीति। यदा यवागूशब्दात् द्वितीया तदाग्निहोत्रशब्दो हविषि वर्त्तते जुहोतिश्च प्रक्षेपणे॥ तद्यथा। यवागूमग्नि
(१ होत्रं जुहोति। यवागूं हविरग्नौ प्रक्षिपति॥ तृतीया च॥ ॥ ॥

णिनेः सूत्रकरणात्तेकत्वाय नवचनस्य भावः। अग्निहोत्रमिति अग्निर्ज्वलित इत्यर्थः॥ अग्निं प्रीणातीति। अग्निषु हूयमानेष्विति प्रीण
(१ त्यर्थे जुहोतेः प्रयोगदर्शनात्॥ ॥ ॥

भा०कौ०२
९४
९५

अंतरण। अंतरेणा गतेनेति। अंतरशब्दो ह्यविशेषवाची विशेषेण ज्ञाने न क्रियते प्रयोजनमिति वाक्यार्थः। लक्षणप्रतिपदोक्तयोरिति तृतीयांतोला भणितो विभक्तिप्र
तिरूपकस्तु निपातः प्रतिपदोक्तः। दृष्टापचार इति। दृष्टव्यभिचारः। अनिपातस्यापि विधानात् अंतरणशब्द इति नन्वंतरणशब्दोऽप्यनिपातस्तावंतोऽस्ति अंतरणायां पुरि वृ
सतीति तत्कथमसावदृष्टापचारः एवं तर्हि तावंतस्य लाक्षणिकत्वात् स्त्रीत्वापेक्षया वाश्रयत्वाद्बहिरंगत्वाच्चाग्रहणं मन्यते। अथवा परस्परसाहचर्यान्निपात
योर्ग्रहणमिति वाच्यं। अप्रधान इति। युष्मदस्मदर्थस्य विशेषणत्वाद् प्राधान्यं कमंडलोस्तु विशेष्यत्वात्प्रधानताक्र्ः पुनरिति। अंतरांतरेण शब्दाभ्यामाधेयप्रधा

अंतरांतरेण युक्ते॥ इह कस्मान्न भवति किं तेवा भवशालं कायनानामंतरेण गतेनेति। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति अव्ययवायघ
पितावदयमंतरेण शब्दो दृष्टापचारः निपातश्चानिपातश्च। अयं तु खल्वंतरणशब्दः दृष्टापचारः निपात एव। तस्मादप्यको न्यः सहायो द्वितीयो भवि
तुमर्हति। अन्यदतो निपातात्। तद्यथा। अस्य गोर्द्वितीयेनार्थ इति गौरेवानीयते नाश्वो न गर्दभः अंतरांतरेण युक्तानाम प्रधानवचनं। अंतरांत
रेण युक्तानाम प्रधानग्रहणं कर्तव्यं। अप्रधाने द्वितीया भवतीति वक्तव्यं। अंतरा त्वां मां च कमंडलुरिति कमंडलोर्द्वितीया मा भूदिति क्रः पुनरेता
भ्यां कमंडलोर्योगः। यत्र त्वां च मां चांतरा तत्र कमंडलोः स्थानं तत्तर्हि वक्तव्यं न वक्तव्यं कमंडलोर्द्वितीया कस्मान्न भवति। उपपदविभक्तेः कारकवि
"भक्तिर्बलीयसीति प्रथमा भविष्यति"
नेमध्यवचनाभ्यां युष्मदस्मदर्थस्यैवावधेर्योगो न तु कमंडलोरिति मत्वाप्रश्नः यत्रेति मध्य इत्येतस्मिन्नर्थे तयोर्वे
त्तेनावधेरपितान्यां योगोऽस्ति आधारार्थत्वादाधेयस्य कमंडलोः एवं भाष्यकारेण मध्यमात्रवचनोंतराशब्दः प्रयुक्तो न त्वाधाररूपमध्यवाची अन्यथा तस्या
नमिति सामानाधिकरण्यं न स्यात् कमंडलुयोग प्रतिपादनाय चैवं प्रयोगः लौकिके तु प्रयोगे मध्य इत्युक्ताधारपाक्षिके मध्येंतराशब्दो वर्तते उपपदविभक्तेरिति अ
स्तीति क्रियानुषंगात्कमंडलोः कर्तृत्वं तच्च तिङाभिहितमिति प्रथमा कारकविभक्तिः सा चांतरंगा क्रियाकारकयोः संबंधस्यांतरंगत्वात्। उपपदार्थेन तु क्रिया द्वारकः संबं

=आधारार्थत्वादिति·आधारान्वितादित्यर्थः।९=आधेयप्रधानमध्यवचनाभ्यामिति·कमंडलुरूपाधेयान्वयाधारम् नमध्यार्थकाभ्यां·अंतरांतराभ्यां च कमंडलुदिसम्मतम् स्वधिकमध्यनिष्ठाधारतानिरूपिताधेयत्ववान्कमंडलुरेवमंतरेणयोगेपीतिबोध्यं·७=अत्रेति·यत्रत्वां च मां चांतरा तत्र

॥ अंतरांतरेण युक्ते ॥
अंतरा त्वां मां च कमंडलुः ॥

राम०
२४

कालाध्वनोः पाणिनीयेसूत्रन्यासेसतिमासमास्तेदेवदत्तेनेतिभावएवलादयः स्युर्नतुकर्मणितत स्त्वास्यते [redacted] मासः आसितव्यो मासः स्वासोमास इतिप्रयोगानुप
पत्तिरितिवार्त्तिकारंभः असंतसंयोग इति। अनंसतसंयोगेतुअधिकरणसंज्ञैवभवति। अमावास्यायांयजत इतिलाघवार्थमिति। आदिशब्देन निष्ठादीनां
ग्रहणं। तथाचोदाहृतं। कर्म्मोतिदेशेनैवमासमास्तेदेवदत्त इतिद्वितीयायाः सिद्धत्वान्नार्थः सूत्रेणेतिभावः स्वाश्रयमपीति॥ यथाश्लेषवदस्मिन्सू
त्रियेवर्त्तितव्यमिति श्लेषणकार्याणि स्वत्रियेक्रियंते नतुस्वाश्रयाणिनिवर्त्यंते तेनदृढत्वापिकर्मकार्याणि अतिदिश्यंते नस्वाश्रयाणिनिवर्त्यंते। य

कालाध्वनोरसंतसंयोगे॥ असंतसंयोगेकर्मवल्लाघवार्थं। असंतसंयोगेकालाध्वानौकर्मवद्भवत इतिवक्तव्यं। किंप्रयोजनं लाघवार्थंलादिभि
रभिधानंयथास्यादिति। लादिभिरभिहितेद्वितीयामाभूत् आस्यतेमासः शय्यते क्रोशः अथवल्करणं किमर्थं। स्वाश्रयमपियथास्यात्
आस्यतेमासं शय्यते क्रोशं। अकर्मकाणां भावेलो भवतीति भावेलोयथास्यात्॥ तत्तर्हिवक्तव्यं नवक्तव्यं। प्राकृतमेवैतत् कर्मयथाकटं
टंकरोति शकटंकरोतीति॥ एवंमन्यते। यत्रकश्चित्क्रियाकृतोविशेषउपजायते। तत्राप्यंकर्मेति॥ नचेहकश्चित्क्रियाकृतोविशेषउपजा
यते॥ नैवंशक्यं॥ इहहिदोषःस्यात्॥ ॥ ॥
=तत्रपासंगः।कर्मणोरूपस्य कर्मपादस्याखंगः।संकालमित्यर्थः।१२=
घेवमंतरेणाप्यवतिं स्वाश्रयाणि कार्याणिभविष्यंति॥ नैतदस्तिसाश्रयकार्यनिरूत्तयेतद्रूपासंगत्याशंक्येत। प्राकृतमेवेति॥ सकर्मकव्यापनादिधात्वर्थयोगेआ
सनादावास्यादीनांवर्त्तनात् स्वाभाविकमेतत् कर्मेत्यर्थः ततश्चमासमास्त इत्यत्रमासमासनेनव्याप्नोतीत्यर्थः॥ नियतलाघवप्रयोगस्पष्टकटं आस्त
इत्यादौ आसनमात्रेणांगीकृतक्रियांतरे आसिवेत्तनइतिव्रतिप्रसंगोनोद्भावनीयः किमर्थंतर्हिवार्त्तिककारेणातिदेशआरब्ध इत्याह॥ एवंमन्यत
इति॥ यत्रकश्चिदिति॥ यथाकांडानित्तुनातीत्यादौ॥ ॥

आदित्यमिति। नहि दर्शनक्रियया दित्से प्रत्यक्षानुमानसमधिगम्यः कश्चिद्विशेष उत्पद्यते। केवलं दर्शनक्रियया सुमिष्टतमत्वादादित्यः कर्म्मेति द्रष्टव्यम्। समास
इतिमासोपीत्यर्थः। नच केचिदिति। यद्यपि क्रियामात्रप्रतिपादने कालादीनामभावान्तरभावनिबन्धनमपि संभवत्सकर्मकत्वं तथापि धात्वर्थेनामन्यपदार्थत्वेना
श्रयणान्नेषां प्रयोगान्तरे तदर्थानामेव कालादिसंबन्धदर्शनान्नेरकर्मकत्वासंभवात्सामर्थ्याद्विशेषाङ्गीकरणमिति। अकर्मणा कर्मकत्वं विज्ञापत इ

आदित्यं पश्यति हिमवन्तं शृणोति ग्रामं गच्छतीति। तस्मात्प्राकृतमेवैतत्कर्म यथा कटं करोति शकटं करोतीति। यदि तर्हि प्राकृतमेवै
तत्कर्माकर्मकाणां भावे लो भवतीति भावे लो न प्राप्नोति। आस्यते मासं देवदत्तेनेति। तत्तर्हि वक्तव्यं। न वक्तव्यं। अकर्मकाणामित्युच्य
ते नच केचित्कालभावादिभिरकर्मकास्त एवं विज्ञास्यामः। क्वचिद्ये अकर्मका इति। अथवा येन कर्मणा सकर्मकाः स्युरकर्मकाश्च
भवन्ति तेनाकर्मणा कश्चिदकर्मकः। अथवा यत्कर्म भवति न च भवति तेनाकर्मकाणां नचैतत्कर्म क्वचिदपि न भवति न तर्हीदानी
मिदं सूत्रं वक्तव्यं वक्तव्यं च किं प्रयोजनं यत्रा क्रियया संततसंयोगः तदर्थं क्रोशं कुटिला नदी॥ क्रोशं रमणीया वनराजिः काला
कर्मकाणां। नचैतेन १ध्वनो॥ ॥ ॥

सर्थः क्वचिदिति द्वय इत्यर्थः अथवेति। अन्तरङ्गत्वाद्व्यकर्मणो बहिरङ्गस्य कालादेस्तिरोभावान्तरपेक्षः सकर्मकाकर्मकव्यपदेशो न प्रवर्त्तत इत्यर्थः
यत्रत्वन्तरङ्गस्यासन्निधिस्तत्र कालादिनिमित्तः सकर्मकव्यपदेशो भवत्येवेत्या स्यते मासमिति कर्मणि लकारो भवति। अथवा यत्कर्मेति। संभवव्यभि
चाराभ्यां विशेषणविशेष्यभावात्। वार्त्तिकं दूषयित्वा सूत्रं स्थापयितुं पृच्छति। न तर्हीति। क्रोशं कुटिलेति। गुणेनात्यन्तसंयोगो न तु क्रिययेति कर्म्मत्वाभा
१वुः॥०॥

अपवर्गे॥ अपवर्गो निष्ठा सकृदाचिरफलावाप्तौ सत्यां प्रयोजनाभावात् क्रियाया भवति। कदाचिदश्मक्तयादिना साधनानामुपरमाद्भवतीति वार्त्तिकारंभः क्रिया
पवर्ग इति॥ यद्यपि साधनापवर्गे क्रियापवर्गोस्ति तथापि विशेषोपादानसामर्थ्याद्विशेषस्याश्रीयते क्रियाया एव योपवर्गो न तु साधनानाम शक्त्यादिनि
मित्त सत्त्वेत्यर्थः॥ ॥सप्तमी॥ ॥अद्य देवदत्त इति॥ द्व्यं कारकं तच्चान्तैकमेवेति भेदनिबंधनो मध्यव्यपदेशो नास्तीति भावः॥ पंचेति। लक्ष्यं यत्र स्थे

अपवर्गे तृतीया॥ क्रियापवर्ग इति वक्तव्यं॥ साधनापवर्गे मा भूत्॥ मासमधीतोनुवाको न चानेन गृहीत इति॥ अपवर्गे॥ ॥सप्तमीपं
चम्यौ कारकमध्ये॥ ॥क्रियामध्य इति वक्तव्यं॥ इहापि यथा स्यात्। अद्य देवदत्तो भुक्त्वा द्व्यहाद्भोक्ता द्व्यहे भोक्ता॥ कारकमध्य इतीय
त्युच्यमाने इह हि न स्यात्॥ इहस्थोयमिष्वासः क्रोशाल्लक्ष्यं विध्यति क्रोशे लक्ष्यं विध्यति। पंच विध्यति यत्र च विध्यति तयोस्तन्मध्यं भव
ति। तत्तर्हि वक्तव्यं न वक्तव्यं॥ नांतरेण साधनं क्रियायाः प्रवृत्तिर्भवति क्रियामध्यं चेत्कारकमध्यमपि भवति॥ तत्र कारकमध्य इत्येव
९ सिद्धं॥ ॥सप्तमीपंचम्यौ॥ ॥श्री॥ ॥

तिष्यदेशात्॥ तत्र च लक्ष्यप्रदेशयोः कर्मापादानयोर्भेदान्मध्यव्यपदेशसद्भावः॥ शक्तिः कारकमिति पक्षाश्रयेण वार्त्तिकं प्रत्याचष्टे॥ नांतरेण
साधनमिति॥ शक्तिमित्यर्थः॥ कालभेदभिन्नभुजिक्रियानुमितशक्तिभेदाश्रयो मध्यव्यपदेशः स एवेत्यर्थः॥ ॥ ॥०॥

भा०कै०२ कर्मप्रवचनीय॥ परिसामान्येन कर्मप्रवचनीययुक्ते द्वितीयेति लक्षणं क्रियते तदा वृक्षं परि विद्योतते इत्यत्र विशेषविहितत्वात्पंचम्यपाङ्परिभिरिति पंच
९६ मी प्राप्नोति। साधुर्देवदत्तो मातरं प्रतीत्यत्र च साधुनिपुणाभ्यामिति परत्वात्सप्तमी प्राप्नोतीति न चापते रिति वृत्त्यर्थं भवतीति मत्वाह प्रत्यादिभिस्त्वलक्षणादि
१८ ष्विति॥ ततश्च पुनर्द्वितीयविधानात्पूर्वोक्तदोषानवतारः॥ शिष्टं स्पष्टं॥ यस्माद् इहाधि ब्रह्मदत्ते पंचाला अधि पंचालेषु ब्रह्मदत्त इति स्वस्वामिवाचिनोः

कर्मप्रवचनीययुक्ते द्वितीया॥ कर्मप्रवचनीययुक्ते प्रत्यादिभिस्त्वलक्षणादिषूपसंख्यानं सप्तमीपंचम्योः प्रतिषेधार्थं। कर्मप्रवचनीययुक्ते प्रत्यादिभि
स्त्वलक्षणादिषूपसंख्यानं कर्तव्यं। वृक्षं परि विद्योतते। साधुर्देवदत्तो मातरं प्रति साधुर्देवदत्तो मातरमनु। किं प्रयोजनं। सप्तमीपंचम्योः प्रतिषेधा
र्थं। सप्तमीपंचम्यो मा भूतामिति। सप्तमी साधुनिपुणाभ्यामर्चायां सप्तमीति पंचम्यपाङ्परिभिरिति पंचमी। तत्रायमप्यर्थः अपपरी वर्जने इति नव
क्तव्यं भवति। तत्र हि वक्तव्यं न वक्तव्यं उक्तं वाक्ये मुक्तं॥ एकत्र तावदुक्तं अपपरी इति॥ इतरत्रापि यद्यपि तावदयं परिदृष्टापचारो वर्जने च अवर्जे
ने च। अयं खल्वपशब्दो दृष्टापचारः वर्जनार्थे एव तस्यको न्यो द्वितीयः सहायो भवितुमर्हति। अपपरी वर्जनार्थात्। तद्यथा अस्य गोर्द्वितीये
नार्थ इति गौरेवानीयते नाश्वो न गर्दभः। कर्मप्रवचनीय॥ ॥ यस्मादधिकं॥ कथमिदं विज्ञायते यस्य चेश्वर्यमीश्वरताईश्वरभावः तस्मात्क
र्मप्रवचनीययुक्तादिति आहोस्विद्यः स्वस्येश्वरः तस्मात्कर्मप्रवचनीययुक्तादिति॥ कश्चात्र विशेषः यस्य चेश्वरवचनमिति कर्तरि निर्देशा

९ श्वरवचनात्सिद्धं। यस्य चेश्वरवचनमिति॥०॥ ॥

पर्यायेण सप्तमी स्यते अनन्तरस्ये वतु प्राप्नोतीति विचारः क्रियते। कथमिति। तत्र पदान्तरेणापि भावप्रत्ययमीश्वरशब्दान्नैश्वर्यमुच्यते अथवेश्वर
उच्यते अनेनेतीश्वरवचनमैश्वर्यमुच्यते तत्र स्वामिनः सप्तमी सयमर्थो भवति। यदा यस्येति नेन स्वं निर्दिश्यते यस्य संबंधी ईश्वर उच्यते तत्र सप्तमी लुक्तं राम० ९६

कृते निर्देशः स्यादिति ॥ ईशितात्र कर्तृत्वेनाभिमतस्तेन स्वामिनः सप्तमी सुक्ता भवति ॥ अवचनादिति । एतत्सूत्रारंभेणाविनापीत्यर्थः । आधृता इति ॥ स्वामि
न्याधारे पंचालाः स्थिता इत्यर्थः । तत्र अधिकरणलक्षणा सप्तमी सिद्धेत्यर्थः सप्तमीशौण्डैरिति विकल्पेन समासविधानात् ब्रह्मदत्ताधीना इति च भवति वि
भक्त्यर्थवृत्तित्वेनाध्यधेरधिब्रह्मदत्तमिति च भवति । सत्यमिति । अधिकरणं समन्यते ॥ ॥प्रथमानुपपत्तिस्त्विति । सप्तमीविधानमनर्थकं प्रथमा च स्यान्न
प्राप्नोतीति दोषद्वयोपन्यासः । अधिरीश्वरवाचीति स्वामीश्वरेत्यर्थग्रहणात्पर्यायाणामपि ग्रहणं मन्यते ॥ षष्ठी तर्हीति । स्वस्वामिसंबंधसद्भावात् ॥ अथे

कृते निर्देशः स्यादन्तरेणावचनं सिद्धं ॥ अधि ब्रह्मदत्ते पंचालाः आधृतास्ते तस्मिन् भवंति । सत्यमेवमेतत् निसंपरिग्रहीतव्यं परिग्रहीत्रधीनं भव
ति ॥ ॥प्रथमानुपपत्तिस्तु ॥ प्रथमा नोपपद्यते कुतः पंचालेभ्यः का तर्हि स्यात् । षष्ठीसप्तम्यौ स्वामीश्वराधिपतिदायादेति न तत्राधि शब्दः
पठ्यते । यद्यपि न पठ्यते । अधिरीश्वरवाची न तत्र पर्यायवचनानां ग्रहणं भवति कथं ज्ञायते परयंकस्य चिसपर्यायवचनस्य ग्रहणं करोति ।
अधिपतिदायादेति । षष्ठी तर्हि प्राप्नोति ॥ शेषलक्षणा षष्ठी अपेक्षत्वान्न भविष्यति ॥ द्वितीया तर्हि प्राप्नोति । कर्मप्रवचनीययुक्ते द्वितीये
ति । सप्तम्यो कृत्वा तस्यार्थस्य द्वितीया न भविष्यति ॥ भवेद्यः अधेर्ब्रह्मदत्तस्य चाभिसंबंधः सप्तम्योक्तः स्यात् । यस्तु खल्वधेः पंचालानां चा
भिसंबंधः तत्र द्वितीया प्राप्नोति ॥ ॥ ॥

षत्वादिति ॥ प्रातिपदिकार्थमात्रनिष्ठत्वाद्व्यतिरेकाभावात् द्वितीया न तर्हीति । अधिरीश्वर इत्यधेः कर्मप्रवचनीयत्वात् । सप्तम्येति । ब्रह्मदत्तशब्दादने
न द्वितीयापवादेन विधीयमानया सप्तम्योभयगतस्य संबंधस्याभिधानात् पंचालशब्दात् द्वितीया न भवतीत्यर्थः ॥ भवेदिति । अधिरीश्वर इत्यत्रेश्वरे त्योपि
तयसाप्याक्षेपादीति न यस्याप्यधिनायोगोस्तीति भावः ॥ ॥ ॥

भा०कै०२ इदानीं द्वितीयं वाक्यं दर्शयितुमाह॥ स्ववचनादिति। यस्येश्वरवचनमित्यनेन स्वस्य सप्तमी प्रकृतित्वेन वचनात् प्रतिपादनात्। स्ववचनात् सिद्धमित्येतद् व्याख्या
९७ ख्यातुमाह। एवं तर्हीति। अधिरीश्वरे इत्यत्रेश्वरग्रहणमपनीयाधिः स्वे इति वक्तव्यं। तत्र स्वमेव प्रत्यधिः कर्मप्रवचनीयसंज्ञः तस्मादेतानेन सप्तमी विधीय
७१ ते। तेन स्वामिनं प्रत्यधेः कर्मप्रवचनीयत्वाभावात्ततो द्वितीयाया अभावः तेनाधि पंचालेषु ब्रह्मदत्त इति सिद्धं। अधि ब्रह्मदत्ते पंचाला इत्येतदधिकरण

स्ववचनात्तु सिद्धं। अस्तु यस्य स्वस्येश्वरस्तस्मात्कर्मप्रवचनीययुक्तादिति। एवमप्यंतरेण वचनं सिद्धं अधि ब्रह्मदत्तः पंचालेषु आधेयः सतेषु भवतिसत्समे
वेतत् नित्यं परिग्रहीता परिग्रहीतव्याधीनो भवति। प्रथमानुपपत्तिस्तु। प्रथमा तु नोपपद्यते कुतः ब्रह्मदत्तात् क्रान्तर्हि स्यात्। षष्ठीसप्तम्यौ स्वामी
श्वराधिपतिदायादेति॥ नत्र अधिशब्दः पद्यते। यद्यपि न पद्यते। अधिरीश्वरवाची नतत्र पर्यायवचनानां ग्रहणं भवति कथं ज्ञायते। पदं प
कस्यचित्स्यो वचनस्य ग्रहणं करोति। अधिपतिदायादेति। षष्ठी तर्हि प्राप्नोति शेषलक्षणा षष्ठी अशेषत्वान्न भविष्यति। द्वितीया तर्हि प्राप्नोति
कर्मप्रवचनीययुक्ते द्वितीयेति सप्तम्योक्तत्वात्तस्याभिसंबंधस्य द्वितीया न भविष्यति। भवेद्योधेः पंचालानां चाभिसंबंधः सप्तम्योक्तः स्यात्।
यस्तु खल्वधेर्ब्रह्मदत्तस्य चाभिसंबंधः तत्र द्वितीया प्राप्नोति कर्मप्रवचनीययुक्ते द्वितीयेति। एवं तर्हि स्ववचनात्तु सिद्धमिति अधिः स्वं प्रति क
र्मप्रवचनीयसंज्ञो भवतीति वक्तव्यं एवमपि यदा ब्रह्मदत्तेऽधिकरणे सप्तमी तदा पंचालेभ्यो द्वितीया प्राप्नोति॥ कथं कर्मप्रवचनीययुक्ते द्विती
॥ येति। उपपदविभक्तेः कारकविभक्तिर्बलीयसीति प्रथमा भविष्यति॥ यस्मादधिक॥ ॥
सप्तम्या सिद्धं अत्र दोषमुद्भाव्य परिहरति एवमपीत्यादिना भविष्यतीत्यंतेन नन्विष्टिति संतिष्ठेति स्थानादिक्रियापेक्षया पंचालानां कर्तृत्वात्कारकविभक्तिः प्र राम०
थमेति भावः। कर्मप्रवचनीयसंज्ञात्वधि पंचालेषु ब्रह्मदत्त इत्यत्र चरितार्था। यथाधिकरणत्वं द्वयोरपि स्वस्वामिनोर्दर्शितं तथाधिरीश्वरे इति यस्य चेश्वरवचनमिति॥ ९७
चनकर्तव्यं। ऐश्वर्यविषयस्य चाधेः क्रियायोगाभावात् गत्युपसर्गसंज्ञाबाधनार्थोऽपि संज्ञाविधिर्नोपयुज्यते॥ ॥

गत्यर्थ॥ स्वरूपमितिवचनात् स्वरूपस्यैव ग्रहणं प्राप्नमित्याह। अध्वनर्थग्रहणमिति। तेनाध्वपर्यायेभ्योऽपि चतुर्थीप्रतिषेधो भविष्यति। द्वितीया तु कर्मणि द्वितीयेति भवति
। आस्थितप्रतिषेध इति॥ आस्थित आक्रान्तः सम्प्रदायः पथा गम्यते तदा नाध्वनीति प्रतिषेधः यदा तूत्पथेन पथा आक्रमितुमिष्यते तदा भवति चतुर्थी। किमर्थमिति॥
अन्तरेणाप्येतत्सूत्रं द्वितीयाचतुर्थ्योः सिद्धत्वादिति प्रश्नः क्रियाग्रहणमपीति। यद्यपि तत्र क्रियाग्रहणं प्रत्याख्यातं तथापि तत्रैव न्यायस्योक्तत्वाद्वचनमाश्रित्यास
सूत्रस्य प्रत्याख्यानं कृतं। अथवा तत्र न्यायस्मरणार्थमिदमुक्तं तत्र पदागमनस्य संदर्शनादीनां च भेदो विवक्ष्यते तदा संदर्शनादिभिः क्रियाभिराप्यमानत्वा
त्कर्मणा गमनेनाभिप्रेयमाणस्य संप्रदानत्वाच्चतुर्थी भवति। यदा तु भेदविवक्षा तदा गमनस्य कर्मत्वाभावात् ग्रामः कर्मैव भवतीति द्वितीया भवति॥ भेदाभे

गत्यर्थकर्मणि द्वि। अध्वनर्थग्रहणं। अध्वनर्थग्रहणं कर्तव्यं इह मा भूत् पन्थानं गच्छति। आस्थितप्रतिषेधश्च आस्थितप्रतिषेधश्चायं वक्तव्यः यो ह्युत्प
थेन पथा नं गच्छति यथा गच्छतीसेवतत्र भवितव्यं। किमर्थं पुनरिदमुच्यते। चतुर्थी यथा स्यात्। अथ द्वितीया सिद्धा कर्मणीत्येव। चतुर्थ्यपि सिद्धा कथं सं
प्रदाने इत्येव न सिध्यति कर्मणा यमभिप्रैति स संप्रदानमित्युच्यते क्रियया चासौ याममभिप्रैति कया क्रियया गमिक्रियया क्रियाग्रहणमपि तत्र चो
द्यते। चेष्टायामनध्वनि किं ग्रामं गच्छति स्वजं नयतीति सति प्रसंगः चेष्टायामनध्वनि किं ग्रामं गच्छति स्वजं नयतीति सति प्रसंगो भवति। सिद्धं तु संप्राप्तवचनात्
सिद्धमेतत्कथं। असंप्राप्ते कर्मणि द्वितीयाचतुर्थ्यौ भवत इति वक्तव्यं। अध्वनस्त्वायमनपवादः एवं च कृत्वा अध्वनीत्येतदपि न वक्तव्यं भवति संप्राप्त

दविवक्षा च लौकिकप्रयोगानुसारेण नियतविषये सा अंभ प्रत्याख्यानयोर्नास्ति फलभेदः। अत एवापवादविषयेऽपि द्वितीयाविधानार्थं चतुर्थी चेति वक्तव्ये द्वितीया
ग्रहणं [redacted] प्रत्याख्याने न भिन्नफलत्वाद् व्याख्यानीयमिदानीं सूत्रस्यातिव्याप्त्युद्भावनायाह चेष्टायामिति। सिद्धं त्विति असंप्राप्ते यद्वस्तु गमनेन संप्रेप्स्यते तस्मिन्
कर्मणीत्यर्थः स्त्रीतु संप्राप्तेति चतुर्थ्यभावः अजां नयतीत्यत्र प्रजायाः संप्रायणाच्चतुर्थ्यभावः। अथवा नयतिर्गत्यर्थ एव न भवति प्रतीयते ह्यत्र गतिः न ह्य
सौ नयतेरर्थः। तस्य प्रापणं वाचित्वादित्याशुः। अध्वनस्त्विति। यदा तु संप्राप्तो ऽध्वा भवति तदाभावमेव चतुर्थ्या अध्वने गच्छतीति प्रागेवोक्तं॥

भा०कै०२ चतुर्थीतादर्थ्य इति॥ तच्छब्देन कार्यं निर्दिश्यते तस्मा इदं तदर्थमिति समासेन विशिष्टकार्यप्रयोजनं कारणमभिधीयते तेन तदर्थस्य भावस्तादर्थ्यमिति कार्यकारण
९८ संबंध उच्यते॥ समासकृत्तद्धितेषु भावप्रत्ययेन संबंधाभिधानमिति वचनात्त्विह षष्ठ्यादिष्टेपि संबंधस्य यथा षष्ठी विशेषणादेव भवति न विशेष्यात् राज्ञः पुरुष
७४ इति तथा चतुर्थी यूपाय दार्विति। तृतीया पि द्रष्टव्यस्य भवति। हेतौ हेतुमद्भावस्य चतुर्थ्यैव गमितत्वात्प्रातिपदिकार्थव्यतिरेके च हेतौ तृतीया याविधा

चतुर्थी संप्रदाने॥ चतुर्थीविधाने तादर्थ्य उपसंख्यानं॥ चतुर्थीविधाने तादर्थ्य उपसंख्यानं कर्तव्यं। यूपाय दारु कुण्डलाय हिरण्यमिति॥ कि
मिदं तादर्थ्यमिति॥ तदर्थस्य भावः तादर्थ्यं। तदर्थं पुनः किं। सर्वनाम्नोयं चतुर्थ्यन्तस्यार्थशब्देन सह समासः कथं चायं चतुर्थ्यन्तेनैवा
वाय घेवमितरेतराश्रयं भवति। केतरेतराश्रयता निर्देशोत्तरकालं चतुर्थ्या भवितव्यं। चतुर्थ्या च निर्देशः तदितरेतराश्रयं भवति इत
रेतराश्रयाणि च कार्याणि न प्रकल्पन्ते। तत्र हि वक्तव्यं न वक्तव्यं। आचार्यप्रवृत्तिर्ज्ञापयति भवतीत्यर्थशब्देन योगे चतुर्थीति पद
यं चतुर्थी तदर्थार्थेति चतुर्थ्यन्तस्यार्थशब्देन सह समासं शास्ति। न खल्वप्यवश्यं चतुर्थ्यन्तस्यैवार्थशब्देन सह समासो भवति किं
तर्हि॥ ॥ ॥

=समर्थश्लोकाभ्यां संगच्छति तस्मा इतीत्यादि ९=

नादिहूचमातिपदिकार्थव्यतिरेकाभावात् तस्मा इत्युपकार्यं हि कार्यं प्रत्युपकारकं प्रत्युच्यते। तदर्थशब्दात्संबंधे भावप्रत्यय इष्यते। गम्यमानविभक्तित्वा राम०
च्चतुर्थी कार्यवाचिनिर्गुणोक्ता तास्यदा तस्मात्कारणं नावगाहते॥ किमिदमिति। तस्मा इदमिति सत्यां चतुर्थ्यां समासः सति समासे तदनुवादेन चतु ९८
र्थीविधानमितीतरेतराश्रयत्वं मत्वा प्रश्नः॥ ॥ ॥

षष्ठ्यन्तस्यापीति॥ संबन्धसामान्यविवक्षायां षष्ठ्यस्त्येव। क्लृपीति संपत्तिर्भूतप्रादुर्भावः उत्पत्तिरिह गृह्यत इति विकाराच्चतुर्थी विकारस्य च प्रकृतिरूपारोपात्सामानाधिकरण्यं
यच्च रूपमुपजायते तत इत्यत्र चतुर्थीति प्रकृते न भवति। यदा प्रकृतेरपादानविवक्षा तदा विकारान्न चतुर्थी न भवतीति केचिदाहुः। अन्ये तु विरोधाभावात्तत्रापि चतुर्थीमिच्छन्ति
॥ नमः स्वस्ति। स्वस्तियोग इति। स्वस्ति विप्रतिषेधार्थं वचनं। स्वस्ति जाल्माय इति तत्तु कथनमिदं। जाल्मत्वादाशीरभावः। अलमिति भूषणप्रतिषेधवाचिनो ग्रहणं शब्द
षष्ठ्यन्तस्यापि भवति। तद्यथा गुरोरिदं गुर्वर्थमिति। यदि तादर्थ्ये उपसंख्यानं क्रियते नार्थः संप्रदानग्रहणेन। यो ह्युपाध्यायाय गौरीयते उपाध्यायार्थः संभवति तत्र ता
दर्थ्य इत्येव सिद्धं। अत एव संप्रदानग्रहणं कर्तव्यं। पात्रे न लक्षणेन संप्रदानसंज्ञा तादर्थ्यं छात्राय यस्य चितं छात्राय स्वरितमिति। तत्र ह्युपसंख्यानं कर्तव्यं। न कर्तव्यं
आचार्यप्रवृत्तिर्ज्ञापयति भवति तादर्थ्ये चतुर्थीति परस्यं चतुर्थी तदर्थार्थेति चतुर्थ्यन्तस्य तदर्थेन सह समासं शास्ति। क्लृपि संपद्यमाने। क्लृपि संपद्यमाने च
तुर्थी वक्तव्या मूत्राय कल्पते यवागूः उच्चाराय यवान्नमिति। उत्पातेन ज्ञाप्यमाने उत्पातेन ज्ञाप्यमाने चतुर्थी वक्तव्या वाताय कपिला विद्युदातपायातिलोहि
नी। मांसो दन्ताय च्यवाहरति मृगः। हितयोगे च। हितयोगे चतुर्थी वक्तव्या हितमरोचकिने हितमामयाविने चतु॥ नमः स्वस्तिस्वाहा। स्वस्तियोगे चतुर्थी कुशला
र्थैराशिषि वा विधानात्। स्वस्तियोगे चतुर्थी कुशलार्थैराशिषि वा विधानात् भवति विप्रतिषेधेन। स्वस्तियोगे चतुर्थ्या अवकाशः स्वस्ति जाल्माय स्वस्ति
वृषलाय। कुशलार्थैराशिषि वा विधानस्यावकाशः अन्ये कुशलार्थाः कुशलं देवदत्तस्य कुशलं देवदत्ताय इहोभयं प्राप्नोति स्वस्ति गोभ्यः स्वस्ति ब्राह्मणेभ्य
इति चतुर्थी भवति विप्रतिषेधेन। अलमिति पर्याप्त्यर्थग्रहणं अलमिति पर्याप्त्यर्थग्रहणं कर्तव्यं। इह मा भूत् अलंकुरुते कन्यामिति। अपर आह अलं
मिति पर्याप्त्यर्थग्रहणं कर्तव्यं। इहापि यथा स्यात् अलं मल्लो मल्लाय प्रभुर्मल्लो मल्लाय प्रभवति
स निरासार्थं वचनं। तेनालंकुरुते कन्यामलं रोदनेनेति चतुर्थी न भवति नन्वत्रोपपदविभक्तेः कारकविभक्तिर्बलीयसीति चतुर्थी न भविष्यतीत्याह। अपर आहेति॥ सूत्रे
लं शब्दं मपनी पर्याप्त्यर्थग्रहणं कर्तव्यं। तेन तत्सर्या रामप्रियग्रहणं सिध्यति॥ अन्यथा स्वरूपस्यैव ग्रहणं स्यात॥ अथवालमित्यर्थग्रहणं व्याख्येयमित्यर्थः॥ ॥

भा०कै०२ ९९ ११

मन्य एवं तर्हीति॥ योगविभागेन प्राणिविषया विभाषा क्रियते न त्वा श्वने मन्ये न त्वा श्वानं मन्य इति। अप्राणिष्विसनेन त्वप्राणिविषयानत्वात् तृणाय मन्ये न त्वा
तृणं मन्य इति। इहापीति। आद्येन योगेनेति भावः॥ तदेवं योगविभागेपि दोषदर्शनात् न्यासांतराश्रयणेनेष्टं साधयितुमाह॥ पदेतदिति॥ प्रकृष्यकुत्सितग्रहण-
मिति॥ यद्यपि चिन श्वतुर्थी विधीयते ततः प्रकर्षेण यदि कुत्सा प्रतीयते तदा चतुर्थी भवति न सामान्यविवक्षायां तेन प्रति षेधसूत्रा यां चतुर्थी विधाने संप

\कुत्सायां१

मन्यकर्मण्यनादरे॥ अप्राणिष्विसुच्यते। तत्रेदं न सिध्यति। न त्वा श्वानं मन्ये न त्वा श्वने मन्य इति॥ एवं तर्हि योगविभागः करिष्यते। मन्यकर्मण्य-
नादरे विभाषा ततः अप्राणिषु च विभाषेति इहापि तर्हि प्राप्नोति। न त्वा काकं मन्ये न त्वा शुकं मन्य इति। पदेतदप्राणिष्विति एतदनावादिष्विति व-
क्ष्यामि इमे च नावादयो भविष्यंति। न त्वा नावं मन्ये यावत्तीर्णं न नाव्यं न त्वान्नं मन्ये यावद्भुक्तं न श्राद्धमिति। अन्ये पुनः प्राणिषु नेष्यते तेनावा-
दयो भविष्यंति। मन्यकर्मणि प्रकृष्यकुत्सितग्रहणं मन्यकर्मणि प्रकृष्यकुत्सितग्रहणं कर्तव्यं। इह माभूत् त्वां तृणं मन्य इति मन्यकर्म॥ ॥
॥ इति श्रीभगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य तृतीये पादे प्रथममाह्निकम्॥ ॥ ॥

द्यते क्वचित् प्रतिकृष्येति पाठस्तत्राप्ययमर्थः। तृणादेरपि निकृष्टत्वं यदा प्रतिपिपादयिषितं भवति तदा च तुर्थी न तु सामान्यविवक्षायां प्रतिकृष्येति निकृष्य स्थः।
मन्यकर्मण्यनादर उपमाने विभाषाप्राणिष्विसापिशलिरधीते स्म॥ ॥ इति श्रीउपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे द्वितीयस्याध्यायस्य तृतीये एम० ९९
पादे प्रथममाह्निकम्॥ ॥ ॥

=यद्वीपाद्विका इत्यर्थः॥ इति॰ एतेन विशेषणविशेष्ययोर्भेदबोधे समानविभक्तित्वं विकल्पविभक्ति [redacted] शाहित्यलंबा अंत्राभिभिप्रवादः प्रसुक्तः॥ प्रायेण नयामेयाज्ञिका यस्तु केयचहवो याज्ञिका इत्यर्थप्रतीतेः सर्वसंमतत्वात्॰ १= प्रथमा षष्ठी वेति॰ गोत्राभिजगर्गापसामिति बोधे आद्यात्मा सन्विषये

कर्तृकरणयोः प्रकृत्याभिरूप इति क्रियापदाश्रवणात् कर्तृकरणयोरभावात् षष्ठ्यत्र प्राप्नोति। प्रायेणेति प्रायशब्दो बह्वर्थवाची बहवो याज्ञिका इत्यर्थः। तत्र प्रथमा प्राप्नोति गोत्रेणेति। प्रथमा षष्ठी वात्र प्राप्नोति समेनेति द्वितीया प्राप्नोति। द्विद्रोणेनेति। द्वयोर्द्रोणयोः समाहारो द्विद्रोणं। पात्रादित्वात् स्त्रीत्वाभावः। अत्रापि द्वितीया प्राप्नोति पंचकेनेति। पंच परिमाणमस्य पंचकः संघः तत्र द्वितीया प्राप्ता पशून् क्रीणातीत्यनेनैतत् समानाधिकरणं संबंधसंज्ञिनोरभेदस्य विवक्षणात्। साहस्रेणेति। सहस्रपरिमाणः सं

कर्तृकरणयोस्तृतीया॥ तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानं कर्तव्यं प्रकृत्याभिरूपः प्रकृत्या दर्शनीयः। प्रायेण याज्ञिकाः प्रायेण वैय्याकरणाः माठरो स्मि गोत्रेण गार्ग्योस्मि गोत्रेण समेन धावति विषमेण धावति द्विद्रोणेन धान्यं क्रीणाति पंचकेन पशून् क्रीणाति साहस्रेणाश्वान् क्रीणाति। तत्र हि वक्तव्यं न वक्तव्यं। कर्तृकरणयोस्तृतीयेत्येव सिद्धं इह तावत् प्रकृत्याभिरूपः प्रकृत्या दर्शनीय इति प्रकृतिकृतं तस्याभिरूपत्वं। प्रायेण याज्ञिकाः प्रायेण वैयाकरणा इति एष तत्र प्रायः येन तेधीयते। माठरोस्मि गोत्रेण गार्ग्योस्मि गोत्रेण एतेनाहं संज्ञाये समेन धावति विषमेण धावतीति इदम त्र प्रयोक्तव्यं न प्रयुज्यते समेन पथेति द्विद्रोणेन धान्यं क्रीणातीति तादर्थ्यात्ताच्छब्द्यं द्विद्रोणार्थं हिरण्यं द्विद्रोणेन हिरण्येन धान्यं क्रीणातीति। पंचकेन पशून् क्रीणातीति। अत्रापि तादर्थ्यात्ता च्छब्द्यं पंच पशव्यर्थः पंचकः पंचकेन पशून् क्रीणातीति॥ साहस्रेणाश्वान् क्रीणातीति सहस्रपरिमाणं साहस्रं साहस्रेण हिरण्येनाश्वान् क्रीणातीति॥ कर्तृकरण॥ ॥ ॥

=धावनेर्गत्यर्थत्वात् सम्यगनगंप्रति कर्मत्वमभिप्रेत्य द्वितीया प्राप्तिः पूर्वमुक्ता ध्यानं तु मार्गस्य मार्गमार्गस्यामल= ९
=अनगमनकत्वेन गमने॰ अत्र तन्मार्गस्य करणत्वमिष्यते॰ २=

घः साहस्रः शतमानविंशतिकेत्यण् एवं च द्वितीया प्राप्तिः प्रकृतिकृतमिति गम्यमानापि क्रियाकरणादिव्यपदेशनिमित्तं भवतीति यथाप्रविश पिंडीमित्यत्र [redacted]
[redacted] इह च करणांतरव्युदासाय प्रकृतेरेव करणत्वं विवक्षितं स्वभावेनायं कृतो भिरूपो न तु वस्त्रालंकरणादिनेत्यर्थः। एष तत्र प्राय इति बाहुल्यमित्यर्थः। तच्चाध्ययनस्य करणत्वेन विवक्षितं॥ इदमत्रेति प्रतीयमानत्वात् द्विद्रोणपंचकसाहस्रशब्दास्तत्क्रियार्थे मूल्ये उपचारात् वृत्तेन इति करणत्वात्तृतीयासिद्धिः॥ ॥

भा०कै०२
१००
100

सहं किमुदाहरणमिति। सूत्रांतरेण तृतीयासिद्धिं मत्वा पृच्छति। तिलैः सहेति। अत्र माषा उप्यमानत्वात् प्रधानं कर्म्मेति तिलास्तु तथा भूततया वस्तमूलानी
वोपसर्प्येणः प्रधानकर्मणीति द्वितीयायां प्राप्तायां तृतीयाविधिः। तिलैर्मिश्रीकृतेति॥ अंतरंगत्वात् पूर्वं मिश्रणक्रियायां तिलाः करणत्वं प्रतिपद्यन्ते पश्चाद्व
पनक्रियायां कर्म्मत्वमिति सिद्धान्ततृतीये समर्थः। पुत्रेण सहागत इति पितुरेवागमनक्रियायां शाब्दं कर्तृत्वं न तु पुत्रस्येत्यप्राधान्यात् तृतीयाविधीयते। लादय इति
अपादिशब्देन क्रादीनां ग्रहणं तत्रैकेन शब्देनाभिन्नरूपत्वाद्गुणप्रधानयोः कर्त्रोरभिधानासंभवात् प्रधाने कार्यसंप्रत्ययात् प्रधानस्यैवाभिधानेन्याप्यमि

सहयुक्तेऽप्रधाने॥ किमुदाहरणं तिलैः सह माषान्वपतीति॥ नैतदस्तीति तिलैर्मिश्रीकृत्य माषा उप्यन्ते॥ तत्र करण इत्येव सिद्धं॥ इदं तर्हि पुत्रे
ण सहागतो देवदत्त इति। अप्रधाने कर्तरि तृतीया यथा स्यात्॥ एतदपि नास्ति प्रयोजनं प्रधाने कर्तरि लादयो भवंतीति। प्रधानकर्त्रा
ऽनेनाभिधीयते पश्चादप्रधानं सिद्धान्तत्वात् कर्तरीत्येव तृतीया इदं तर्हि पुत्रेण सहागमनं देवदत्तस्येति। षष्ठ्यत्र बाधिका भविष्यति॥

॥ इदं तर्हि॥ ...सम्भवत्यप्रधाने॥ श्री॥ ...मिति भावः। ...॥ श्री॥ ॥

=प्रतीयमानो ... पुत्रेण सहागत ... पुत्रगमनम् ... गमनवान्यितेसर्य प्रतीतेः ... तथा: सिद्धान्त ... षष्ठ्या इव ततीयाया अपि ...

ति अप्रधानस्य प्रतीयमानगमिक्रियापेक्षकर्तृत्वाश्रयेण तृतीयासिद्धे समर्थः। पुत्रेण सहागमनमिति। सुटा कर्तुरनभिहितत्वात् उभयत्र तृतीयाप्र
संगे नियमार्थमिदं अप्रधान एव तृतीया भवति न तु प्रधान इति। षष्ठ्यत्रेति। कर्तृकर्मणोः कृतीत्यनेन सा च प्रधानयोरेव कर्तृकर्मणोः प्राधान्यादेव स्वप्र
त इति अप्रधाने कर्तरि न भविष्यति॥ यदा तु उदाहरणमप्रधानकर्तृ प्रतिपत्त्यर्थं भेदिकादेवदत्तस्य यज्ञदत्तस्य काष्ठानामिति तदा षष्ठीबाधनाय तृ ॥ एम०
॥ तीयाविधानमत्रापि भवत्येव॥ ॥ ॥ १००

पुत्रेण सह स्थूल इति गुणसंबंधप्रतिपादनपरत्वादत्र क्रियायाश्चाभावात्सुतरांस्यक्रतेस्त्वाभावः। यदि भविष्यतीति। अनेन मिश्रीकरणाभावात् तिलानां कर
णत्वाभावमाह॥ एकक्षेत्रे चवापात् सहयोगः कालभेदेप्यविरुद्धः॥ सहयुक्त इति। अप्रधानवचनं प्रधाननिवृत्त्यर्थं क्रियते प्रधानस्य चांतरंगत्वात्
कारकविभक्तिर्भविष्यतीति नार्थस्तन्निवृत्त्यर्थेनाप्रधानवचनेनेत्यर्थः। पित्रा पुत्रेण सहोपाध्यायस्य गौरित्यत्रापि गवा संबंधोंतरंग इति उपाध्याया

=क्रियायाअभावादिति-अस्ति क्रियासत्वेपि स्थूलादिभवनप्रयोगेस्यौज्ज्वल्यादिसत्वेपि भवतीति भावः॥२॥

पुत्रेण सह स्थूलः पुत्रेण सह पिंगल इति इदं चाप्युदाहरणं तिलैः सह माषान्वपतीति। ननु चोक्तं तिलैर्मिश्रीकृत्य माषा उप्यंते तेनात्र करणत्वमेव सि
द्धमिति॥ भवेत्सिद्धं यदा तिलैर्मिश्रीकृत्योप्येरन्॥ यदा तु खलु कस्यचिन्माषबीजावापउपस्थितः तदर्थं च क्षेत्रमुपार्जितं तत्रान्यदपि किंचिदुप्यते
यदि भविष्यतीति तदा न सिध्यति॥ सहयुक्तेऽप्रधानवचनमनर्थकं उपपदविभक्तेर्बलीयस्त्वादत्रापि सहयुक्ते प्रधानवचनमनर्थकं
किं कारणं॥ उपपदविभक्तेः कारकविभक्तिर्बलीयस्त्वात्॥ अन्यत्रापि उपपदविभक्तेः कारकविभक्तिर्बलीयसीति प्रथमा भवति॥ एवम
त्रापि उपपदविभक्तेः कारकविभक्तिर्बलीयसीति प्रथमा भविष्यति॥ क्वान्यत्र। गाः स्वामी व्रजतीति सहयुक्ते येनांगविकारः॥ ॥

क्तेः कारकविभ

सक्ष्येव भविष्यतीति ननु तृतीयां गाः स्वामी व्रजतीति। अत्रापि व्रजिक्रियायां गवां कर्मत्वात्तन्निबंधना द्वितीया स्वामीश्वरेति प्राप्ते उपपदविभक्ती षष्ठीसप्त
म्यौ बाधित्वा प्रवर्त्तेते॥ येनांगविकारः। अंगशब्दोऽवयववाचित्वेन प्रसिद्धस्ततो येन गुणेनांगस्य विकारो लक्ष्यते ततस्तृतीयेति सूत्रार्थमवगस्याह॥१०॥

भा०कै०२ इह कस्मादिति॥ इहैव कस्मान्नेत्यर्थः॥ अक्षिकाणमिति॥ काणनिमीलनं तस्य चौरादिकस्य रूपं काणगुणयोगादभेदोपचाराद्गुणवचनेभ्यो मतुपो लु-
१०१ ग्विधानाद्वाक्षिकाणशब्देनोच्यते॥ तत्र काणशब्दात्तृतीया प्राप्नोति। काणो न हि गुणो नाक्ष्णो विकारो लक्ष्यते॥ अक्ष्णा काण इत्यत्र त्वक्षिशब्दान्न प्राप्नोति॥ अंगा-
101 द्विकृतादिति॥ अंगवाचिनोऽक्षिपादादेस्तृतीया भवति न काणादेर्गुणवचनादित्यर्थः एतावत्तूच्यमानेऽक्षिकाणमस्येत्यत्राप्यक्षिशब्दात्प्राप्नोतीत्याह॥ त-
द्विकारस्येति॥ यदि देवदत्तादिरवयवी विकृतेनांगेन विकारवान्प्रकाश्यत इत्यर्थः॥ अंगशब्द इति। अंगान्यस्य संतीत्यर्श आदित्वादच्प्रत्ययांतोऽंग-
कृतानादि२
इह कस्मान्न भवति॥ अक्षिकाणमस्येति॥ अंगाद्विकारस्येत्यंगिनो वचनं। अंगाद्विकृतात्तृतीया वक्तव्या तेनैव चेद्विकारेणांगी द्योत्यत इति वक्त-
व्यं॥ तत्तर्हि वक्तव्यं न वक्तव्यं। अंगशब्दोयं समुदायशब्दः येनेति च करणे एषा तृतीया येनावयवेन समुदायोंगी द्योत्यते तस्मिन्भवितव्यं। न चैतेना-
वयवेन समुदायो द्योत्यते। येनांग॥ इत्थंभूतलक्षणे। इत्थंभूतलक्षणेन तस्य प्रतिषेधः इत्थंभूतलक्षणेन तस्य प्रतिषेधो वक्तव्यः अपि भवान्कमं-
डलुपाणिं छात्रमद्राक्षीदिति। न वेत्थंभूतस्य॥ ॥ ॥
शब्दो निर्दिष्टः येनेत्यनेन विकृतमंगं निर्दिश्यते। न ह्यविकृतेनांगिनो विकारो द्योतयितुं शक्यते। न चैतेनेति अक्षिकाणमस्येत्यत्र काणशब्देनाक्षिसमानाधिकरणे-
नावयवी नोच्यते किं तर्ह्यवयव एवेत्यर्थः अवयवषष्ठ्या चावयविना विशेष्यत इति तस्यैव प्राधान्याद्विकारप्रतिपत्तिः॥ ॥इत्थंभूतस्य यल्लक्षणवाची शब्दो ल-
क्ष्यवाचिसमासावयवस्तस्मात्तृतीया माभूदिति वचनं॥ इत्थंभूतलक्षणेन तस्येति लक्ष्यवाचिशब्दस्येत्यर्थः। कमंडलुपाणिमिति बहुव्रीहौ कृते कमंड- राम०
लुशब्दात्तृतीया प्राप्नोति। न च प्रत्ययलक्षणेनाप्रत्यय इति प्रातिपदिकसंज्ञानिषेधो नङिसंबुध्योरिति नलोपप्रतिषेधात्ज्ञापकात्। न च तृतीयालुक् प्रा- १०१
प्नोति समासप्रातिपदिकानवयवत्वात्तस्याः कृते समासउत्पादनात्॥ ॥ ॥

लक्षणैति॥ पृथग्विनेति तृतीयां तथा सप्तमीमिति। षष्ठी न सुरूपस्योत्तरपदार्थे प्रधानत्वात्॥ इत्थंभूतस्य पद्व लक्षणं प्रधानमप्राप्नोपसर्जनभावं न तत्तृती
या यथाक्रमं उल्लुनाख्यान्न मद्राक्षीदिति॥ बहुव्रीहौ तु स्वार्थोपसर्जनोऽन्यपदार्थोऽभिधायित्वा द्वन्द्वे पदानां नास्ति लक्षणस्य प्राधान्यं संज्ञोऽन्यतरस्यां मात्रा

=बहुव्रीहेरिति। कमण्डलुपाणिमित्येतस्मिन् १=

लक्षणेनापृथग्भावात्॥ न वाचक्तव्यं॥ किं कारणं इत्थंभूतस्य लक्षणेनापृथग्भावात्॥ यत्रेत्थंभूतस्य पृथग्भूतं लक्षणं तत्र भवितव्यं। न चात्रेत्थं
भूतस्य पृथग्भूतं लक्षणं॥ किं वक्तव्यमेतत् न हि कथमनुच्यमानं गंस्यते॥ तथा ह्ययं प्राधान्येन लक्षणं प्रतिनिर्दिशति इत्थंभूतस्य लक्षणं इत्थं
भूतलक्षणं तस्मिन्नित्थंभूतलक्षण इति॥ इत्थंभूतासंज्ञोऽन्यतरस्यां कर्मणि। संज्ञः कृत्प्रयोगे षष्ठी विप्रतिषेधेन संज्ञोऽन्यतरस्यां कर्मणीत्येतस्मा
त्कृद्योगे षष्ठी भवति विप्रतिषेधेन॥ संज्ञोऽन्यतरस्यामित्यस्यावकाशः मातरं संजानीते मात्रा संजानीते कृत्प्रयोगे षष्ठ्या अवकाशः इध्मस्य व्र २४
नः पलाशशातनः इहोभयं प्राप्नोति। मातुः संज्ञाता पितुः संज्ञाता षष्ठी भवति विप्रतिषेधेन उपपदविभक्तेः उपपदविभक्तिः उपपदविभ
क्तेश्चोपपदविभक्तिर्भवति विप्रतिषेधेनान्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते इत्यस्यावकाशः अन्यो देवदत्तात् स्वामीश्वराधिपति
दायादसाक्षिप्रतिभूप्रसूतैश्चेत्यस्यावकाशः गोषु स्वामी गवां स्वामी इहोभयं प्राप्नोति। अन्यो गोषु स्वामी अन्यो गवां स्वामी। स्वामीश्वराधिपतिदा
॥ पादसाक्षिप्रतिभूप्रसूतैश्चेत्येतद्भवति विप्रतिषेधेन नैष युक्तो विप्रतिषेधः। न ह्यत्र गावोऽन्ययुक्ताः॥ ॥

संजानीत इति संप्रतिभ्यामनाध्याने इत्यात्मनेपदं अन्यो गवां स्वामीति॥ एकस्मिन्वाक्ये सहप्रयोगाद्द्वयोरप्ययोगवामिति मन्यते। न ह्यत्र गाव इति। युक्तं ग्रह
णाद्यदपेक्षमन्यत्वं तद्वाचिनः पंचमी न चात्र गवापेक्षमन्यत्वं स्वामिनः प्रतिपाद्यं व्यभिचाराभावात्। किं तर्हि स्वस्वामापेक्षं॥ ॥ ॥

भाव्कौ० २
१०२
102

कस्तर्हि स्वामीति भूतपूर्वोपः (स्वा)मीसोन्यपुरुष इत्यर्थः तुल्यो गोभिः स्वामीति गवां यः स्वामी स गोभिर्ज्ञायते न्यादिना धर्मेण सदृश इत्यर्थे विवक्षायामस्ति गवां पदद्वयार्थे
योगः॥ ॥हेतौ। योग्यतामात्रयुक्तो नाश्रितव्यापारो यो द्रव्यगुणक्रियाविषयो हेतुः॥ निमित्तेति॥ अपसर्वनाम्नोपि विधानार्थमत्र सूत्रइदं पठितं ननु सर्वना
म्नस्तृतीया चेसत्र। तत्र प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न भवतोन्यास्तु यथादर्शनं भवंति। पर्यायोपादानं केचिदस्यायां तरन्निरसार्थमिच्छंति ऽ

कस्तर्हि स्वामी एवं तर्हि तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यामिति सस्यावकाशः तुल्यो देवदत्तस्य तुल्यो देवदत्तेन स्वामीश्वराधिपतिदायाद
साक्षिप्रतिभूप्रसूतैश्चेत्यस्यावकाशः स एव इहोभयं प्राप्नोति तुल्यो गोभिः स्वामी तुल्यो गवां स्वामी। तुल्यार्थैरतुलोपमाभ्यां तृतीया
न्यतरस्यामित्येतद्भवति विप्रतिषेधेन॥ संज्ञोन्यहेतौ निमित्तकारणहेतुषु सर्वासां प्रायदर्शनं निमित्तकारणहेतुषु सर्वाः प्रायेणदृश्यंत इ
ति वक्तव्यं। किं निमित्तं वसति केन निमित्तेन वसति कस्मै निमित्ताय वसति कस्मान्निमित्ताद्वसति कस्य निमित्तस्य वसति। कस्मिन्निमि
त्ते वसति किं कारणं वसति केन कारणेन वसति कस्मै कारणाय वसति कस्मात्कारणाद्वसति कस्य कारणस्य वसति कस्मिन्कारणे वसति को हे
तुर्वसति। कं हेतुं वसति केन हेतुना वसति कस्मै हेतवे वसति कस्माद्धेतोर्वसति कस्य हेतोर्वसति। कस्मिन्हेतौ वसति। हेतौ। अपादाने पंचमी॰पंच
मीविधाने ल्यब्लोपे कर्मण्युपसंख्यानं पंचमीविधाने ल्यब्लोपे कर्मणि पंचम्या उपसंख्यानं कर्तव्यं॥ प्रासादमारुह्य प्रेक्षते प्रासादात्प्रेक्ष
ते॥ अधिकरणे चोपसंख्यानं कर्तव्यं। आसनात्प्रेक्षते शयनात्प्रेक्षते॥ ॥ ॥

न्येतत्पलक्षणार्थमिच्छंतः प्रयोजनादिप्रयोगेप्येतद्विभक्तिविधानं मन्यते॥ ॥अपादाने॥ ल्यब्लोप इति यत्र ल्यबंतस्याप्रयोगे पर्यायो गम्यते तत्र द्वितीयायां प्राप्तायां
पंचमीविधीयते॥ अधिकरणे चेति॥ ल्यब्लोप इत्यपेक्ष्यते सप्तम्यपवादोत्र पंचमी॥ ॥ ॥ ॥

राम० १०२

प्रख्यानयोगाच्चेति विशिष्टे प्रख्यानेन गृह्यते यत्र लोके पंचमी प्रयुज्यते तेन न कृसायमग्न्यो देवदत्तस्यायमग्न्यः इत्यादौ पंचमी न भवति । कुतो भवानिति
क्रियाया अभावादन्यपादानत्वं मन्यते । यतश्चेति यदाश्रित्याध्वकालौ परिच्छिद्येते तत्र पंचमीत्यर्थः । गवीधुमत इति । गवीधुमन्नाम नगरं तद्युक्तात्कालात् इति ।
कालेविषये तेन पंचम्यन्तार्थेन योगे मासादिस्तद्वाचिनः सप्तमीत्यर्थः । अथवा पंचमीयुक्तात्कालादेः काल इत्यर्थः । अध्वन इत्युक्तादिलपेक्षते

प्रख्यानयोग्या । प्रख्यानयोगाच्च पंचमी वक्तव्या । कुतो भवान्पाटलिपुत्रात् । यतश्चाध्वकालनिर्माणं । यतश्चाध्वकालनिर्माणं ततः पं
चमी वक्तव्या । गवीधुमतः सांकाश्यं चत्वारि योजनानि कार्त्तिक्या आग्रहायणी मासे । तद्युक्तात्काले सप्तमी । तद्युक्तात्काले सप्तमी वक्तव्या
कार्त्तिक्या आग्रहायणी मासे । अध्वनः प्रथमा च । अध्वनः प्रथमा च सप्तमी वक्तव्या । गवीधुमतः सांकाश्यं चत्वारि योजनानि गवीधुम
तः सांकाश्यं चतुर्षु योजनेषु तत्र हीदं बहु वक्तव्यं । न वक्तव्यं । अपादान इत्येव सिद्धं । इह तावत्प्रासादात्प्रेक्षते शयनात्प्रेक्षते अपक्राम
ति तत्तस्माद्दर्शनं । यद्यपक्रामति किं नासंतत्या अपक्रामति । संततत्वात् । अथवा म्लान्यप्रादुर्भावात् अस्माच्चान्यप्रादुर्भाव इति प्रख्यानयो
गाच्च पंचमी वक्तव्या । इदमत्र प्रयोक्तव्यं सत्प्रयुज्यते कुतो भवानागच्छतीति पाटलिपुत्रादागच्छामीति यतश्चाध्वकालनिर्माणं तत्र पंचमी
वक्तव्येति इदमत्र प्रयोक्तव्यं सत्प्रयुज्यते गवीधुमतो निःसृत्य सांकाश्यं चत्वारि योजनानि ॥०॥

अपक्रामति तत्तस्मादिति । दर्शनं चक्षुरिन्द्रियं तेजोरूपं प्राप्य विषयमाहित्य प्रासाददेशादपक्रम्य विषयं गच्छतीत्यर्थः । क्षणिकत्वपक्षावष्टंभेनेदमाश्रित्याह अथवा यथा
दुर्भावादिति ॥ अन्यस्यान्यस्य तेजोरूपस्येंद्रियस्योत्पादादित्यर्थः ॥ भाष्यकार वचनप्रामाण्यादस्मान्प्रत्ययस्य साधुत्वं द्रष्टव्यं । इदमत्रेति । प्रतीयमानत्वादर्थस्य शब्दाप्रयोगः ॥

भा०कै०२
१०३
103

कार्त्तिक्याः प्रभृतीति॥ ततश्चारभ्येत्यर्थः भाष्यकारवचनात्प्रभृति योगे पंचमी। गते मास इति। ततश्चायमस्यचभावेनेतिसिद्धा सप्तमी। चत्वारीति। ततश्चापादानत्वप्र
दिकार्थस्याव्यतिरेकात्सिद्धा प्रथमा॥ ॥अन्यारात्। तस्यायमिति अथ सप्तम्यर्थ इत्यादि वदन्तेनेत्यद्दिक्शब्दार्थमंचूत्तरपदग्रहणं कस्मान्न विज्ञाय
ते। उच्यते। दिक्शब्दसाहचर्यादंचूत्तरपदस्यापि दिक्शब्दस्यैव ग्रहणं नान्यस्य॥ ॥षष्ठ्यत॥ अर्थग्रहणमिति। अतसुच्शब्दः प्रत्ययत्वेन

कार्त्तिक्याः प्रभृत्यायहायणीमास इति॥ तदुक्तं कालात्सप्तमी वक्तव्येति। इदमत्र प्रयोक्तव्यं स्यान्न प्रयुज्यते कार्त्तिक्या आयहायणी गते मास
इति अध्वनः प्रथमासप्तमी चेति॥ इदमत्र प्रयोक्तव्यं स्यान्न प्रयुज्यते गवीधुमतो निःसृत्य पदा चत्वारि योजनानि गतानि भवंतीति ततः सांका
श्यं चतुर्षु योजनेषु ... सांकाश्यमिति॥ अपादाने। अन्यारादितरर्त्ते दिक्॥ अंचूत्तरपदस्य ग्रहणं किमर्थं न दिक्शब्दैर्योग इत्येव सि
द्धं। षष्ठ्यतसर्थप्रत्ययेनेति वक्ष्यति। तस्यायं पुरस्तादयकर्षः अन्यारा॥ षष्ठ्यतसर्थप्रत्ययेन। अर्थग्रहणं किमर्थं षष्ठ्यतसुप्रत्ययेनेत्युच्यमा
ने इहैव स्यात्। दक्षिणतो ग्रामस्य उत्तरतो ग्रामस्येति॥ इह न स्यात्। उपरि ग्रामस्य उपरिष्टाद्ग्रामस्येति। अर्थग्रहणे पुनः क्रियमाणे अतसु
प्रत्ययेन च तिद्धं भवति पश्चाच्चान्यस्तेन समानार्थः अथ प्रत्ययग्रहणं किमर्थं इह मा भूत् परस्माद्ग्रामात्। परस्माद्ग्रामात् अंचूत्तरपदस्यापेत
=अधिकं क्रियमाणमिति ... ॥२॥= ''प्रयोजनमुक्तं। तत्रान्यतरस्यां अपमवक्तुं षष्ठ्यतसः॥ ॥ ॥
व्यभिचरतीति प्रत्ययग्रहणादतसुशब्दस्तदर्थोपलक्षणं विज्ञास्यत इति प्रश्नः षष्ठ्यतसप्रत्ययेनेति॥ अतसुशब्दस्याश्रयितुमशक्यत्वात्तस्यतेनैवं पूर्वे सन्निप्पतति
तिरूपसंभवाच्च॥ प्रागग्रामादिति प्रत्ययग्रहणामर्थिकं क्रियमाणे श्रूयमाण प्रत्ययग्रहणार्थं विज्ञास्यत इति तु प्रत्यात्तौ षष्ठ्यभावः तत्रान्यतरदिति॥ एकप्रयोज

न्यासः॥०॥

राम०
१०३

पृथग्विना॰ अन्यतरस्यांग्रहणेन पक्षे यथाप्राप्तस्यानुज्ञानं क्रियते न चात्र पंचमी प्राप्तेति मत्वाह। पृथगादिष्विति। पक्ष इति वाक्यशेषः। न प्रकृतमिति। नन्वध्वः
काक्वा त्वयुक्तः प्रकृतमेवेत्यर्थः। अनधिकारादिति। अन्यारादितियोगात्परेषु नाधिक्रियत इत्यर्थः। एवं तर्हीति। अन्यतरस्यांग्रहणं पक्षे विभक्त्यन्तरप्रापणा

पृथग्विनानानाभिस्तृ॰। पृथगादिषु पंचमीविधानं पृथगादिषु पंचमी विधेया पृथग्देवदत्तात् किमर्थं न प्रकृतं पंचमीग्रहणमनुवर्त्तते। प्रकृतं अपादाने पंचमीति। अनधिकाराच्च। अनधिकारः सः अधिकारे हि द्वितीया षष्ठी विषये प्रतिषेधः अधिकारे हि द्वितीया षष्ठी विषये प्रतिषेधो वक्तव्यः स्यात्। दक्षिणेन ग्रामं दक्षिणतो ग्रामस्येति। एवं तर्हि अन्यतरस्यांग्रहणसामर्थ्यात् पंचमी भविष्यति। अन्यतरस्यांग्रहणस्य प्रयोजनं किं यस्यां नाम्नायां तृतीयारम्भे तस्या यथा स्यात्। कस्यां नाम्नायां। अंततः षष्ठ्यां। तत्र हि वक्ष्यमाणं प्रकृतमनुवर्त्तते। प्रकृतमपादाने पंचमी। ननु चोक्तमनधिकारः सः अधिकारे हि द्वितीया षष्ठी विषये प्रतिषेध इति। एवं तर्हि संबंधमनुवर्त्तिष्यते। अपादाने पंचमी अन्यारादितरर्ते दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते पंचमी षष्ठ्यतसर्थप्रत्ययेन। अन्यारादिभिर्योगे पंचमी। एनपा द्वितीया। अन्यारादिभिर्योगे पंचमी। पृथग्विनानानाभिस्तृतीयान्यतरस्यां पंचमीग्रहणमनुवर्त्तते अन्यारादिभिर्योग इति निवृत्तं। अथवा मंडूकप्लुतयोधिकाराः। तद्यथा। मंडूका उत्प्लुत्योत्प्लुत्य गच्छंति तद्वदधिकारः। अथवा अन्यवचनाच्चकाराकरणात् प्रकृतस्यापवादो विज्ञायते॥

र्थे सद्भावविहितामपि पंचमीं प्रापयिष्यतीत्यर्थः। अस्त्वन्यदिति। यथा प्राप्तानुज्ञानं हि विकल्पे न कार्यं न तु यस्य कस्य चिदिति भावः। अंततः इति। अवसानत इत्यर्थः। यत्र
त्वन्या विभक्तिर्न विहिता सा शेषत्वात्षष्ठ्या विषयः संबंध इति। अन्यादिग्रहणं संबंधमित्यर्थः॥

=दूरांतिकार्थेभ्यः पंचमी विधानेन दूरांतिकार्थकशब्दोत्तरं पंचमी विधानपक्षे तद्युक्तात्संचम्यंत दूरांतिकार्थकशब्दयुक्तादिति वान्तिकार्थः दूरांतिकार्थैर्युक्तमिति प्रदीपेपि [redacted] पंचम्यंत दूरांतिकार्थैर्युक्तमिति सेवार्थः सामान्यतो दूरांतिकार्थयुक्तात्प्रतिषेधे पूर्वसूत्रस्थान्यतरस्यांग्रहण...

भा०कै०२ यथोत्सर्गेणेति॥ पंचमीकिमुत्तरार्थेति हा था पीति संदिग्धा षष्ठी द्वितीया भ्यामसंदिग्धाभ्यां बाध्यत इत्यर्थः॥ ॥दूरांति। तद्युक्तादिति। दूरांतिकार्थैर्युक्तं पदपेक्ष्य

१०४ या दूरांतिकत्वं तद्वाचिन इत्यर्थः॥ दूराद्ग्रामस्येति। पूर्वसूत्रेण पक्षे वृत्या माङ्वुति। दूरादावसथादिति आवसथस्य दूरादित्यर्थः पूर्वसूत्रेण वसथादेः पंचम्य

१०४ पि भवति॥ सप्तम्यधिकरणे च॥ इत्यादि तत्स्येत्यर्थः अधीति अधीतमनेनेतीष्टादिभ्य इनी निः अपत्र व्याकरणस्य कर्मत्वाद्द्वितीयाप्राप्तौ तिय

थाक्त तश्चीकटमिति। ततस्तदपवादः सप्तमीविधीयते अधिकरणविवक्षया सिद्धमिति चेत्कर्मविवक्षया द्वितीया यथा स्यादिति तन्निरासार्थं कर्त्तव्यमे

यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति अथवाक्ष्य सेतत् अनुवर्त्तते नाम विषयः न चानुवर्त्तनादेवं भवति किं तर्हि यत्नाभवंतीति शिष्य गिवि

ना॥ दूरांतिकार्थेभ्यः॥ दूरांतिकार्थेभ्यः पंचमी विधानेन तद्युक्तात्संचमी प्रतिषेधः दूरांतिकार्थेभ्यः पंचमी विधानेन तद्युक्तात्संचम्याः प्रतिषेधो व

क्तव्यः दूराद्ग्रामस्य न वा तत्रापि दर्शनादनर्थकः प्रतिषेधः न वा तत्रापिदर्शनात्संचम्याः प्रतिषेधो नर्थकः तत्रापि हि पंचमी दृश्यते दूरादावस

थान्मूत्रं दूरात्पादावसेच नं। दूराच्चमावसंदस्युभ्यो दूराच्चकुपिताद्गुरोः दूरांति। सप्तम्यधिकरणे च॥ सप्तमी विधाने क्तस्येन्विषयस्य कर्मण्युपसं

ख्यानं। सप्तमी विधाने क्तस्येन्विषयस्य कर्मण्युपसंख्यानं कर्त्तव्यं। आसावधीती व्याकरणे। परिगणिती याज्ञिक्ये आम्नाती छंदसि। साधुसा

धुप्रयोगे च साधु साधुप्रयोगे च सप्तमी वक्तव्या साधुर्देवदत्तो मातरि। असाधुः पितरि कारकार्हाणां च कारकत्वे सप्तमी वक्तव्या॥ ॥

ववचनं मासमधीती व्याकरणे इति क्तान्तकर्मणो बहिरंगत्वादिहाग्रहणात्सप्तम्यभावः॥ साधुसाधुप्रयोगे चेति साधुनिपुणाभ्यां सप्तम्यां सिद्धायामनर्चार्थमत्र सा १०४

धुग्रहणं। तेन तत्त्वकथने पि साधुयोगे सप्तमी भवति। अर्चाग्रहणं तु तत्त्वनिपुणाविशेषणार्थमेव साधुर्भृत्यो राज्ञ इति तु भृत्यापेक्षा षष्ठी न तु साध्वपेक्षेति १०४

वा भार्थस्तात्रा आदुः कारकार्हाणां चेति॥ कारकशब्दो भावप्रधानः तेन कारकत्वमर्हतीत्यर्थः॥ ॥ ॥ ॥

ऋद्धेष्विति॥ ऋद्धा भोजनक्रियामर्हन्तीति कारकार्हाः। लक्ष्यलक्षणभावाविवक्षायामपि यथा स्यादिति वचनं तद्विवक्षायामुत्तरसूत्रेण सिद्धत्वात्। मूर्खेष्विति। मूर्खा भो-
जनानर्हत्वादकारकार्हाः। तद्विपर्यास इति। यदा कारकार्हाणां नास्ति कारकत्वं अकारकार्हाणां चास्ति कारकत्वं तदेत्यर्थः। निमित्तादिति। क्रियाफलमिह निमित्तत्वे-
न विवक्षितं॥ यत्क्रियायाः प्रयोजकं पदार्थः क्रियारंभस्तत्तो हेताविति तृतीयायां प्राप्तायां सप्तमी विधीयते॥ तस्य निमित्तस्य यदि कर्मणा संयोगः संबंधः ततोवेतन्ने

=मूर्खे॰ भा॰२ ऋद्धेषु भुंजानेषु दरिद्रा आसते ब्राह्मणेषु तरत्सु वृषला आसते। अकारकार्हाणां चाकारकत्वे अकारकार्हाणां चाकारकत्वे सप्तमी वक्तव्या। मूर्खेषु
आसीनेषु ऋद्धा भुंजते वृषलेष्वासीनेषु ब्राह्मणास्तरंति। तद्विपर्यासे च तद्विपर्यासे च सप्तमी वक्तव्या। ऋद्धेष्वासीनेषु मूर्खा भुंजते ब्राह्मणेष्वासीने-
षु वृषलास्तरंति॥ निमित्तात्कर्मसंयोगे सप्तमी वक्तव्या चर्मणि द्वीपिनं हंति दंतयोर्हंति कुंजरं केशेषु चमरीं हंति सीम्नि पुष्कलको हतः। सप्तम्य-
धिप्रकरणे च भावेन भावलक्षणे सप्तमीविधाने अभावलक्षणे उपसंख्यानं भावलक्षणे सप्तमीविधाने अभावलक्षण उपसंख्यानं कर्तव्यं। अग्नि-
षु हूयमानेषु गतः हुतेष्वागतः गोषु दुह्यमानासु गतः दुग्धास्वागतः। किं पुनः कारणं न सिध्यति लक्षणं नाम तद्भवति। येन पुनः[पुन]र्लक्ष्यते सकृ-
च्चासौ कथंचिदग्निषु हूयमानेषु प्रस्थितः हुतेष्वागतः गोषु दुह्यमानासु प्रस्थितः दुग्धास्वागतः। सिद्धं तु भावप्रवृत्तौ यस्य भावारंभवचनात्। सिद्धमेतत्। ल-
क्ष्यं यस्य भावप्रवृत्तौ द्वितीयो भावश्चारभ्यते तत्र सप्तमी वक्तव्या। सिध्यति सूत्रं तर्हि भिद्यते यथान्यासमेवास्तु ननु चोक्तं भावलक्षणे सप्तमीविधाने-
॰भावलक्षण उपसंख्यानमिति नैष दोषः न खल्ववश्यं तदेव लक्षणं भवति येन पुनः पुनर्लक्ष्यते॥ ॥

न धान्यं खलु नाति इति सप्तमी भवति वेतनस्य धान्येन संयोगाभावात्॥ ॥ यस्य च भावेन भावलक्षणमिति भूयो दर्शनात्। अयो हि लक्ष्यलक्षणभावो यथाग्निधूमयोः
इह त्वग्निषु हूयमानेषु प्रस्थित इत्यग्निवहनं प्रस्थानेन सह यदा पुनः पुनर्न दृष्टं तदा न तत्र लक्ष्यलक्षणमिति वचनारंभः॥ ॥ ॥

सकृदपीति॥ लक्षणशब्दः क्रियानिमित्तकः लक्ष्यतेऽनेनेति लक्षणं। यच्चानिर्ज्ञातकालं हवनादिकमनिर्ज्ञातकालस्य सकृदपि कालपरिच्छेदनिमित्तं भवतीति तत्
स्य लक्षणमित्यर्थः॥ ॥पंचमी॥ कस्मान्न गवामिति। गोमंडलात्कस्मात् गोः पृथक् क्रियत इत्यस्ति विभक्तित्वं न चैतदिति कस्माया गोर्गोत्वे नगणे षष्ठं तम्भोवात्। वि
भक्तग्रहणमिति। सर्वत्रैव निर्धारणे विभागसद्भावात्सर्वत्रैव पंचमीग्रहणं कुर्यात् तस्माद्विभक्तग्रहणसामर्थ्याद ॥ अव धारणमाश्रीयत इत्यर्थः॥ साधु
नि॥ अप्रत्यादिभिरिति। प्रतिपर्यनवः प्रत्यादयः॥ ॥प्रसिते॥ कः प्रसित इति किं प्रश्नः। प्रसक्तः प्रसितः उत्सुकस्तु सितेर्वा कारकमिति प्रश्नः

सकृदपि यन्निमित्तत्वाय कल्पते तदपि लक्षणं भवतीति यथा अपि भवान्कमंडलुपाणिं छात्रमद्राक्षीदिति सकृदसौ कमंडलुपाणिर्दृष्टः तस्य तदे
वलक्षणं भवति यस्य च पंचमी विभक्ते। इह कस्मान्न भवति कस्मात् गवां संपन्नक्षीरतमेति। विभक्त इत्युच्यते न चैतद्विभक्तं विभक्तमेतत् गो
भ्यः कस्माद्विभज्यते विभक्तमेव यन्निःसतत्त्वं भवितव्यं। न चैतन्निःसंविभक्तं किं वक्तव्यमेतत् नहि कृष्यमनुच्यमानं गंस्यते विभक्तग्रहण
सामर्थ्यात्। यदि यद्विभक्तं चाविभक्तं च तत्रस्याद्विभक्तग्रहणमनर्थकं स्यात्। पंचमी॥ साधुनिपुणाभ्यां॥ अप्रत्यादिभिरिति वक्तव्यं इहापि यथा
स्यात्। साधुर्देवदत्तो मातरं प्रति मातरमनु साधु॥ प्रसितोत्सुकाभ्यां तृतीया च॥ प्रसित इत्युच्यते कः प्रसितो नाम यस्तत्र नित्यं प्रबद्धः कुत एत ति
त्सिनोतिरयं बध्नासर्थेव र्त्तते दृढ इवासौ तत्र भवति प्रसितो॥ नक्षत्रे च लुपि॥ इह कस्मान्न भवति। अद्य पुष्यः अद्य मघा अधिकरण
इति वर्त्तते॥ नक्षत्रे॥ ॥इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य तृतीये पादे द्वितीयमान्हिकम्॥

यत्तत्रेति उत्सुकशब्दसाहचर्यात्तदर्थसदृशोऽर्थो गम्यते॥ बद्ध इवेति मुख्यस्य व्यतिषंगरूपस्य बंधनस्याभावात् सादृश्यात् गौण्यर्थे परिग्रहः॥ नक्षत्रे च॥ अद्य पुष्य एम०
इति पुष्येण युक्तः कालः इत्यणो लुब्विशेष इति लुपं न नुपरत्वात् प्रथमा भविष्यति। नैतदस्ति सर्वे विभक्त्यपवादोऽयं विज्ञायते अंतरंगत्वात्प्रातिपदिकार्थमात्र एवेदं १०५
विधानं स्यात्॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे द्वितीयस्याध्यायस्य तृतीयपादे द्वितीयमान्हिकम्॥ ॥ ॥ ॥

नर्थसहानुहि साधुपंचम्यजिनाधलेना

प्रातिपदिकार्थे॰ प्रातिपदिकग्रहणमिति। ङ्याप्प्रातिपदिकाद्विहितानां स्वादीनां प्रकरणमिदं नियमार्थमि[illegible]त्यन्तरेणापि प्रातिपदिकग्रहणं प्रातिपदिकार्थे एव प्रथमा भविष्यतीति प्रश्नः। उच्चैरिति। असति प्रातिपदिकग्रहणे अव्ययात्प्रथमा न स्यात् बहुषु बहुवचनमित्यादिनां स्यैकवाक्यतायां संख्यायामुक्ते एव प्रातिपदिकार्थे स्यात्। प्रातिपदिकग्रहणात्तु तस्य तात्संख्यारहितेऽप्यव्ययार्थे प्रथमा सिध्यतीति। अथवा लिङ्गग्रहणात्तु सर्वत्र प्रथमा सिध्यतीति प्रश्नः। अत एव प्रातिपदिकार्थग्रहणं किमर्थमिति क्वचित्पाठः। अलिङ्गेष्वव्ययार्थे यथा स्यादित्युत्तरं प्रातिपदिकार्थश्चेह भाष्यकारेण न विचारितः। अन्वयव्यतिरेकाभ्यां यस्य योऽर्थो जासादि

=क्वचित्पाठ इति॰ प्रातिपदिकार्थम् लिङ्गात्मभिधायितालिङ्गग्रहणेनैव सिद्धे प्रातिपदिकग्रहणस्यवार्थग्रहणस्यापि प्रयोजनाभावादिति भावः॰१=

प्रातिपदिकार्थे प्रातिपदिकग्रहणं किमर्थं उच्चैः नीचैरित्यत्रापि यथा स्यात्॥ किं पुनरत्र प्रथमया प्राप्यते॥ पदत्वं नैतदस्ति। षष्ठ्यात्र पदत्वं भविष्यति। इदं तर्हि प्रयोजनं ग्राम उच्चैस्ते स्वं ग्राम उच्चैस्ते स्वं सपूर्वायाः प्रथमाया विभाषेत्येष विधिर्यथा स्यात्। अथ लिङ्गग्रहणं कि

=प्रथमाः संख्यायामनियमादिति॰ एवं तु प्रथमा [illegible] २=

वक्ष्यमाणप्रयोजनाभ्यगति

१ मर्थं॥ ॥ श्री

रर्थः प्रतीतस्तस्य सर्वस्य हारिमत्वाद्विचारे प्रयोजनाभावात् किं पुनरिति अव्ययादाप्सुप इति लुग्विधानात्प्रथमायाः श्रवणाभावादिति भावः। पदत्वमिति प्रत्ययलोपे प्रत्ययलक्षणमिति प्रथमो सति निबन्धनं पदत्वं प्राप्यते तन्निबन्धनं रुत्वादिकमित्यर्थः। षष्ठ्यात्रेति॥ यस्मिन्नर्थे द्वितीयादयो न विहिताः स शेष इति मन्यते न च संख्यत्वाद्यर्थस्य कथं षष्ठी स्यात्। नैष दोषः एकत्वाद्यर्थे नियमे षष्ठ्याः संख्यायामनियमात्॥ प्रत्यय नियमेऽपि वा तुल्यजातीयापेक्षत्वान्नियमस्यैकत्वादिभिः परस्परव्यावर्तनात्। अथ लिङ्गग्रहणमिति॥ सत्त्वभूतार्थाभिधायीनि यानि प्रातिपदिकानि तेभ्यो लिङ्गमप्यर्थ इति प्रश्नः॥ ०॥

भा०कै०२ १०६ 106

मात्रग्रहणं संबोधने चेति सूत्रारंभाच्चाधिकविशेषसद्भावे प्रथमा न स्यात् इति मत्वाह स्त्री पुमानिति द्रव्यमत्र स्त्रीत्वाद्याधिक्यमभिधीयते ॥ एष एवेति । यमर्थं प्राति
पदिकं नव्यभिचरति स प्रातिपदिकार्थः स्त्रीत्वादिना च विना स्त्र्यादिशब्दानां प्रयोगाभावः कुमारीति विना पि स्त्रीत्वेन कुमारो देवदत्त इति कुमारशब्दस्य प्रयोगद
र्शनात् स्त्रीत्वं न प्रातिपदिकार्थः वृक्षः कुंडमिति पुंनपुंसकोपलक्षणमेतत् तटस्तटमिति तत्रोदाहरणं वृक्षकुंडशब्दयोस्तु पुंनपुंसकत्वेन विना
प्रयोगाभावात् लिंगस्य प्रातिपदिकार्थता कुंडशब्दस्तु जीवनिभक्तेरिपरेण जाते वर्तमानः पुंल्लिंग इति नपुंसकत्वेन विना पि तस्य प्रयोगात् कुं

=स्त्रीत्वाद्याधिक्यं [illegible] :१४=

स्त्री पुमान् नपुंसकमित्यत्रापि यथा स्यात् ॥ नैतदस्ति प्रयोजनं । एष एव चात्रास्ति प्रातिपदिकार्थः । इदं तर्हि कुमारी ॥ वृक्षः कुंडमिति । अथ परिमाण
ग्रहणं किमर्थं द्रोणः खारी आढकमित्यत्रापि यथा स्यात् अथ वचनग्रहणं किमर्थं इह समुदाये वाक्यपरिसमाप्तिर्दृश्यते गर्गाः शतं दंड्यतामिति अर्थि
नश्च राजानो हिरण्येन भवंति न च प्रत्येकं दंडयंति सत्येतस्मिन् दृष्टांते यत्रैतानि सर्वाणि समुदितानि भवंति तत्रैव स्यात् द्रोणः खारी आढकमिति

=[illegible] प्रातिपदिकार्थः [illegible] =
=[illegible] प्रातिपदिकार्थ [illegible] =

॥ इह न स्यात् कुमारी वृक्षः कुंडमिति । नैतदस्ति प्रयोजनं ॥ ॥ ॥

[redacted]

ईति च स्त्रियामपि वर्तमानात् कुंडमित्येतदुदाहरणं इतः परं जातिरेवाच प्रातिपदिकार्थो न तु लिंगमित्यस्मिन् ब्रुवतेऽप्यर्थे ति । द्रोणादयः परिमाण एव वर्तंत इति
प्रातिपदिकार्थे ग्रहणे नैव प्रथमा सिद्धेति प्रश्नः द्रोण इति । यदा मानमेयसंबंधात् व्रीह्यादौ द्रोणादयो वर्तंते तदा व्यभिचारान्नास्ति मेयस्य प्रातिपदिकार्थत्वं ।
अथ वचनग्रहणमिति ॥ अर्थैकार्यासंभवात् प्रातिपदिकार्थाद्विवचनात् प्रथमा भविष्यतीति प्रश्नः इहेति प्रथमा विधीयमानत्वात् प्रधानेन न च गुणभेदे
प्रधानस्य भेदो भवतीति यत्रैतत्त्रयं समुदितं तत्रैव प्रथमा स्यात् वचनग्रहणे तु प्रत्येकं संबध्यमाने वाक्यत्रयं संपद्यत इति न दोषो भवति ॥ ॥ एम० १०६

=[illegible] प्रातिपदिकार्थ [illegible] =
=[illegible] प्रातिपदिकार्थ [illegible] =
=[illegible] =

प्रत्येकमिति॥ प्रथमासिद्धेः केवलं नियमापत्तदनुवादेन प्रातिपदिकार्थो द्विभिस्तस्याः संबंधो विधीयते स च संबंधविभेदाद्भिन्नः अथवान्यायद्वयसंभवे लक्ष्यदर्श-
नवशात्प्रत्येकं वाक्यपरिसमाप्तिरिति पक्ष इहाश्रयिष्यते इति भावः उक्तेष्वपीति अनभिहिताधिकारात् बहुषु वचनमित्यादिनास्य प्रकरणस्यैकवाक्यत्वात्सरि-
गणनस्य च प्रत्याख्यानत्वादेकादिभिः शब्दैरेकत्वादीनामभिहितत्वादनभिहिताधिकारस्य प्रत्याख्याने उक्तार्थत्वात् प्रथमा न स्यात् वचनग्रहणानु-
भवति वचनग्रहणस्य पूर्वाचार्यप्रसिद्ध्याश्रयेण संख्यावाचित्वात्तेनाभिहिते वचने प्रथमा भवतीत्यर्थः संपद्यते कर्मादिविशिष्ट इति कर्मण्येव द्वितीये-

प्रत्येकमपि वाक्यपरिसमाप्तिर्दृश्यते तद्यथा गुणवृद्धिसंज्ञे प्रत्येकं भवतः इदं तर्हि प्रयोजनं उक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यात् एको द्वौ ब-
हवः अप्रथमात्रग्रहणं किमर्थं एतन्मात्र एव प्रथमा यथा स्यात् कर्मादिविशिष्टे मा भूत् कटं करोति। नैतदस्ति प्रयोजनं कर्मादिषु द्वितीयाद्या विभ-
क्तयः ताः कर्मादिविशिष्टे वाधिका भविष्यन्ति। अथवाचार्यप्रवृत्तिर्ज्ञापयति न कर्मादिविशिष्टे प्रथमा भवतीति यदयं संबोधने प्रथमां शास्ति
नैतदस्ति ज्ञापकं अस्त्यन्यदेतस्य वचने प्रयोजनं किं सामन्त्रितमिति वक्ष्यामीति यत्तर्हि योगविभागं करोति इतरथा हि संबोधने आमन्त्रि-
९ तमित्येव ब्रूयात् इदं तर्हि॥०॥

ति प्रसयनियमे कर्मादीनामनियमात्तेषु प्रथमा स्यात् मात्रग्रहणं त्ववधारणार्थो न भवति तेन प्रातिपदिकार्थमात्र एव प्रथमा भवति न त्वधिके कर्मादिसद्भा-
वे द्वितीयादय इति कर्मणि द्वितीयैवेत्यर्थे नियम आश्रयिष्यत इति भावः अथवेति प्रसय नियमपक्षेपि दोषाभाव इत्यर्थः॥ पदयमिति यदि प्रातिपदिकार्थ-
सद्भावमात्राश्रयेणाधिकार्थसद्भावेपि प्रथमा स्यात् तदा संबोधनाधिक्ये प्रथमायाः सिद्धत्वात्तु न विधानमनर्थकं स्यात्॥ ॥ ॥

भा०कौ०२ उक्तेषु [redacted] पीति मात्रशब्दः सामान्यवचनस्तथा श्रीयते यथा ब्राह्मणमात्रं प्रजापतीति एवं प्रातिपदि
१०७ कार्थमात्रेऽभिहितेऽपि एकत्वादौ प्रथमा भवति अन्ये त्वाहुः मीयतेऽनयेति मात्रा संख्योच्यते समाहारद्वंद्वे नपुंसकत्वाद्ध्रस्वत्वं कृतं तेनाभिहितायामपि
107 संख्यायां प्रथमा भवति॥ प्रातिपदिकार्थे ति अवधारणार्थान्मात्रग्रहणात् संबोधने चेतिज्ञापकाद्धिकार्थप्रतीतौ प्रथमया न भाव्यं अस्ति च वीरः
पुरुष इत्यादौ सामानाधिकरण्याद्विशेषणविशेष्यभावस्याधिकस्य प्रतीतिः न च समासविधानं प्रथमोक्तत्रिलिंगं द्वितीयाद्यंतानामपि वीरं पुरु

उक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यात् एको द्वौ बहव इति॥ वचनग्रहणं साप्येतस्य योजनमुक्तं अन्यतरच्छक्यमवक्तुं ण प्रातिपदिकार्थे
लिंगपरिमाणवचनमात्रे प्रथमालक्षणे पदसमानाधिकरणे उपसंख्यानमधिकत्वात् प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे
प्रथमालक्षणे पदसमानाधिकरणे उपसंख्यानं कर्तव्यं वीरः पुरुष इति किं पुनः कारणं न सिध्यति अधिकत्वात् व्यतिरिक्तः प्रातिपदि
कार्थ इति कृत्वा प्रथमा न प्राप्नोति कथं व्यतिरिक्तः पुरुषे वीरत्वं न वा वाक्यार्थत्वात्। न वा वक्तव्यं किं कारणं वाक्यार्थत्वात् पदत्राधिके
॥ वाक्यार्थः सः अथवाभिहिते प्रथमेति तल्लक्षणं करिष्यते॥ ०॥ ॥

षमानये त्यादौ समाससंज्ञा वा तत्र न वेति वीरु प्रातिपदिकादनपेक्षितशब्दांतरार्थसंसर्गोपहितविशेषणाभावात् स्वार्थमात्रनिष्ठात् प्रथमा विधीयते ए
वं पुरुषशब्दादपि पश्चात्त्वाकांक्षारिवशाद्विशेषणविशेष्यभावावगतिरूपजायमाना बहिरंगत्वादंतरंगसंस्कारं पूर्वप्रवृत्तं वाधितुं नोत्सहते अभिहित राम०
इति तिङ्कृत्तद्धितसमासैरभिहिते कर्त्रादौ प्रथमेत्यर्थः। तत्र वीरः पुरुष इत्यत्रार्थाधिक्येप्यभिहितत्वमात्राश्रया प्रथमा भविष्यति॥०॥ ॥ १०७

अतिव्याप्तिमुद्भावयितुमाह ॥ अभिहितानभिहितइति ॥ मासादृश्यास्त्वइतिसदितिक्रियासिक्रियाद्वयसाधनाधिकरणशक्तिद्वयसद्भावादेकस्याः शक्तेरभि
हितत्वात्तदाश्रयात्प्रथमाप्राप्नोतीत्यर्थः एवंतर्हीतियथादेवदत्तः पचतीति मासादृश्यास्त्वइत्यादौतुवैयधिकरण्यात्प्रथमायाअभावः तिङोऽप्रयोगइति
नहितिङ्‌न्तपदप्रयोगमन्तरेणतत्सामानाधिकरण्यसद्भावः ॥ ॥उक्तंपूर्वेणेति ॥ आक्षिप्तक्रियायत्रापेक्ष्यंसामानाधिकरण्यमस्ति। शतृशानचोश्चेतिदेवदत्त
पचेल्लइतिस्थितेयावत्तिङ् उत्पत्तिर्नोस्तितावत्तिङ्. समानाधिकरण्याभावात्प्रथमैवेतिनियमाभावादेवदत्तशब्दाद्विशेषविहिताः सर्वेस्यादयः

पुरुषोत्तर

अभिहितलक्षणायामनभिहितेप्रथमाविधिः ॥ अभिहितलक्षणायामनभिहितेप्रथमाविधेया ॥ वृक्षः प्लक्षइति उक्तंवाकिमुक्तं अ
स्तिर्भवतीपरः प्रथमेप्रयुज्यमानोप्यस्तीति वृक्षः प्लक्षोस्तीतिगम्यतइति अभिहितानभिहितेप्रथमाभावः। अभिहितानभिहितेप्रथमाप्रा
प्नोतिकिंपसादृश्यास्तेशायनश्यास्तइतिसदिप्रत्ययेनाभिहितमधिकरणमितिकृत्वाप्रथमाप्राप्नोति एवंतर्हि तिङ्. समानाधिकरणेप्रथ
१मः मेसेतल्लक्षणंकरिष्यते तिङ्. समानाधिकरणइतिचेत्तिङोयोगेप्रथमाविधिः तिङ्. समानाधिकरणइतिचेत्तिङोऽप्रयोगेप्रथमाविधेया
वृक्षः प्लक्षः ॥ ॥उक्तंपूर्वेणकिमुक्तं अस्तिर्भवतीपरः प्रथमपुरुषोऽप्रयुज्यमानोप्यस्तीतिगम्यतेवृक्षः प्लक्षः अस्तीतिगम्यतइति ॥ शतृशानचोश्च
निमित्तभावात्तिङोभावस्तयोरपवादत्वात् शतृशानचोश्चनिमित्तभावात्तिङोभावः कृपचत्सोदनंदेवदत्तइति। किंकारणंतयोरपवादत्वात्। शतृशान
स्थिताइतिलटः स्थानेद्वितीयाद्यन्तपदसामानाधिकरण्येविधीयमानौशतृ ॰चौतिङ्. पवादौतावत्तवाधकौनचापवादविषये उत्सर्गोभिनिविशते। पूर्वेह्यपवादा
शानचौ [redacted] माप्रसृतोनतुतिङ्‌। एतेषांतुलटादिरवकाशस्तद्विषयएवचप्रथमायाअपि। कर्मणिद्वितीयैवेत्यर्थेनियमेद्वितीयादीनामत्रसद्भावइतिमन्यतेनिमित्त
मत्रशातृशानचोःप्रथमासामानाधिकरण्यं ॥ पूर्वेह्यपवादइति। इहदर्शनद्वयंसर्वविशेषस्वीकारेणवोत्सर्गस्यप्रवृत्तिः कृतिपयविशेषावगाहनेनवातत्रसर्वस्मिन्
दर्शनेउत्सर्गस्यविषयविभागायपूर्वमपवादः प्रवर्त्ततेपश्चाद्विमुक्तेविषयउत्सर्गः द्वितीयेतुदर्शनेअपवादविषयंप्रकल्प्योत्सर्गः प्रवर्त्तते ॥ ०॥ ॥

मा॰कै॰२ एवं पर्युदासार्थे नियमपक्षाश्रयेणाचोदितं प्रसज्यप्रतिषेधाश्रयेण त्वर्थे नियमेपक्षद्वयेऽपि प्रसज्यनियमपक्षाश्रयेण परिहर्त्तुमाह पाक्षिक इति॥ ॥

१०८ अप्रथमावाविधिनेति। पर्युदासे द्वितीयादीनां यदायत्र हणमिति तदर्थः। अप्रथमावेति। प्रसज्यप्रतिषेध आश्रीयते तदर्थः। न यदेति कर्मणि द्वितीयैवेत्यस्मिन्नि

108 यमे द्वितीयादीनां अनियमात्प्रातिपदिकार्थमात्रेऽपि भावात्तदाश्रयो शतृशानचौ प्राप्नुत इति दोषः प्रसज्यप्रतिषेधे तु प्रथमाया अपि तत्र भावात्तदाश्रयः

प्रतिषेधः प्रवर्त्तत इत्यर्थे नियमपक्षे न दोषः शतृशानचोरभावान्निङः स्तु सत्स्तु तत्सामानाधिकरण्यात्प्रथमैवेति नियमेन द्वितीयादीनां व्यावर्त्तनात् यदाही

ति। कर्मण्येव द्वितीयेत्येवं द्वितीयादीनां कर्मादिषु नियतत्वात्तदभावेऽतो सामर्थ्याभावादनियतत्वाया प्रथमायाः सन्निधानात्पर्युदासे प्रसज्यप्रतिषेधे वाना

न तावदत्र कदाचिन्निङादेशो भवति अपवादो नावद्धृत शानचो प्रतीक्षते। पाक्षिक एष दोषः कतरस्मिन्पक्षे शतृशानचौ दुष्टं भवति॥ ॥

अप्रथमावाविधिनाश्रीयते प्रथमाया प्रतिषेधेनेति॥ विभक्तिनियमे वापि दुष्टं भवति। विभक्तिनियमो वा स्यादर्थनियमो वेति तद्यदाता

वदर्थे नियमः अप्रथमा च विधिनाश्रीयते तदा एष दोषो भवति। यदा हि विभक्तिनियमः तदा पर्युदासेऽप्रथमाविधिनाऽश्रीयते अपि प्र

थमाप्रतिषेधेन तदा न दोषो भवति॥ प्रातिपदिका॥ षष्ठी शेषे॥ शेष इत्युच्यते कः शेषः कर्मादिभ्योऽन्योऽर्थः स शेषः॥ ॥

स्ति शतृशानचोरत्र प्रसंगः॥ ॥षष्ठी शेषे॥ कः शेष इति॥ किमप्रधानं शेषः उतोपयुक्तादन्यः एवं अस्मिन्पक्षे सर्वेषां कारकाणां क्रियार्थत्वाच्छेषत्वमिति तत्र

त्रापि षष्ठीप्रसंगः सर्वत्र कर्मादीनां सद्भावादुत्तरोऽपि शेषार्थो न प्रकल्प्यत इति प्रश्नः कर्मादिभ्य इति कर्मादीनामनन्तरं शेषशब्द उच्चार्यमाणस्तेभ्योऽन्यमर्थं प्रतिपा

दयति। येभ्योऽन्यो इति। स्वस्वामिभावादयः संबंधा इत्यर्थः। तदुक्तं संबंधः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः॥ श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयत इ राम॰

ति तत्राश्रुतायां क्रियायां राज्ञः पुरुष इत्यादौ क्रियाकारकसंबंधपूर्वकोऽन्य एव स्वस्वामिभावादिकः संबंधः प्रतीयते मातुः स्मरतीत्यादौ तु श्रूयमाणे क्रियाशब्देऽसत्यपि १०८

॥ कर्मत्वमविवक्षि[illegible]त्वा विशेषगुणाभाव एव स्मरणं प्रति मातुः प्रतिपाद्यते मातृसंबंधिस्मरणमिति॥ ॥ ॥

=धनरागादिक्रियानुत्कारककर्मसंबंधमात्रत्वपर्कत्वसर्वार्थः।४=

अविदिताभिप्रायः परस्माहरणायैवमिति। क्रियामंतरेण संबंधाभावात्सर्वत्र तस्यावश्यंभावात्तन्निमित्तस्य च कर्म्मादेरिति भावः। राजा कर्त्रेति राजा पुरुषाय ददातीत्य
र्थे संप्रसयात्। वृक्षइति। लोकप्रसिद्ध्येतदुक्तं वैशेषिकप्रक्रियया त्ववयवोऽवयविनोधिकरणं। विनिमयादिति। परिवर्त्तनादित्यर्थः। एवं तर्हीति। क्रियाकारकसंबंधो
पि सर्वत्र वस्तुस्थित्यास्तीति तन्निमित्तश्च स्वस्वामिभावादिरपि॥ तत्र स्वस्वामिभावा [redacted] दिविवक्षायां सत्यपि क्रियाकारकसंबंधो न
[redacted]

यद्येवं शेषो न प्रकल्पेत न हि कर्मादिभ्योऽन्ये ह्यर्थाः संति इह तावद्राज्ञः पुरुषः राजा कर्त्ता पुरुषः संप्रदानं॥ वृक्षस्य शाखेति वृक्षः शाखाया अधिकर
णं तथा पदेनत्स्व नाम चतुर्भिरेतत्प्रकारैर्भवति क्रयणादपहरणाद्याच्ञया विनिमयादिति॥ अत्र च सर्वत्र कर्मादयः संति एवं तर्हि कर्मादीनामवि
वक्षा शेषः कथं पुनः सतो नाम विवक्षा स्यात्। सतोप्यविवक्षा भवति॥ तद्यथा अलोमिका एडका अनुदरा कन्येति असतश्च विवक्षा भवति तद्य
था समुद्रः कुंडिका विंध्यो वर्द्धितकमिति किमर्थं पुनः शेषग्रहणं प्रत्ययावधारणाच्छेषवचनं प्रत्ययावधारणाच्छेषग्रहणं कर्त्तव्यं प्रत्यया नियता
अर्था अनियताः तत्र षष्ठी प्राप्नोति॥ तत्र शेषग्रहणं कर्त्तव्यं। षष्ठी नियमार्थं शेष एव षष्ठी भवति नान्यत्रेति॥ अर्थावधारणाद्वा अथवा अत्र
र्था नियताः प्रत्यया अनियताः शेषेपि प्राप्नुवंति। तत्र शेषग्रहणं कर्त्तव्यं शेषनियमार्थं शेषे षष्ठ्येव भवति नान्येति अर्थनियमे शेषग्रह
णं शक्यमकर्त्तुं कथं अर्था नियताः प्रत्यया अनियताः ततो वक्ष्यामि षष्ठी भवतीति॥ ॥ श्री॥

विवक्ष्यते॥ अलोमिकेति॥ लोमकार्याकरणात्सतामपि लोम्नामविवक्षा अनुदरेति सदप्युदरं महत्त्वाभावप्रतिपादनाय न विवक्ष्यते॥ असतश्चेति। दृष्टांतरूपेणेदमु
पात्तं असतो यथा विवक्षा तथा सतोप्यविवक्षेत्यर्थः समुद्रः कुंडिकेति॥ कुंडिकायां बहुपानीयसंभवप्रतिपादनाय समुद्रत्वमारोप्यते विंध्यो वर्द्धितकमिति
वर्द्धितकशब्देन मूले स्थूलमग्रे सूक्ष्मं विशिष्टसंस्थानयुक्तं भक्तमुच्यते॥ तस्य महत्त्वप्रतिपादनाय विंध्यत्वमसदारोप्यते॥ अर्थनियमपक्षे शेषग्रहणस्य प्र
त्याख्यानाय विचारः क्रियते। किमर्थमिति॥

भा०कै०२ १०९ 109

तन्नियमार्थमिति॥ यथा समे देशे यजेतेति समविषमयोः पर्यायेण प्रसंगे विषमस्थाने समविधिर्विषमनिवारणफलत्वान्नियमः संपद्यते तथा षष्ठीविधिर्द्विती
यादिनिवारणफलः षष्ठी शेष इति चेदिति। अस्मिन् सूत्रन्यासे दोषः संबंधस्याद्दिष्टत्वात्प्रधानादपि षष्ठीप्रसंगोऽव्याकरणांतरे तु गुणे षष्ठीतिवचनान्नास्ति
दोषः प्रतिषिद्धायामपि षष्ठ्यां प्रातिपदिकार्थमात्रे विधीयमानायाः प्रथमायाः संबंधस्याधिकस्य भावादप्रसंग इति मत्वाह॥ तत्र प्रथमेति पदत्रेति॥ राज्ञ

तन्नियमार्थं भविष्यति॥ यत्र षष्ठी चान्यच्च प्राप्नोति तत्र षष्ठ्येव भवतीति। षष्ठी शेष इति चेद्विशेष्यस्य प्रतिषेधः षष्ठी शेष इति चेद्विशेष्यस्य प्रतिषेधो व
क्तव्यः राज्ञः पुरुष इत्यत्र राजा विशेषणं पुरुषो विशेष्यः तत्र प्रातिपदिकार्थोऽव्यतिरिक्त इति कृत्वा प्रथमा न प्राप्नोतीति तत्र षष्ठी स्यात्तस्याः प्रति
षेधो वक्तव्यः। तत्र प्रथमाविधिः तत्र षष्ठ्याः प्रतिषिध्य प्रथमा विधेया। राज्ञः पुरुषः उक्तं पूर्वेण किमुक्तं। न वा वाक्यार्थत्वादिति पदत्राधिक्यं
वाक्यार्थः सः कुतो नु खल्वेतत्पुरुषे यदाधिक्यं स वाक्यार्थ इति न पुना राजनि पदाधिक्यं स वाक्यार्थः स्यात् अन्तरेणापि पुरुषशब्दस्य प्रयोगं रा
जनि सोऽर्थो गम्यते न पुनरंतरेण राजशब्दस्य प्रयोगं पुरुषे सोऽर्थो गम्यते॥ अस्ति कारणं येनैतदेवं भवति किं कारणं राजशब्दाद्धि भवान् षष्ठीमु
च्चारयति॥ अंग हि भवान् पुरुषशब्दादप्युच्चारयतु गंस्यते सोऽर्थः॥ ॥ ॥

इत्येतस्य दसंनिधाने पुरुषस्य संबंधित्वं प्रतीयते नान्यथा॥ पुरुषप्रातिपदिकं तु स्वार्थमात्रे वर्त्तत इति प्रथमा सिध्यतीत्यर्थः कुतो न्विति॥ पुरुषपदसंनि
धान एव राज्ञः संबंधित्वावगमो नान्यथेति ततोऽपि प्रथमाप्रसंगः। अंतरेणापि राज्ञ इति केवलेऽपि पदे उच्चार्यमाणे संबंधित्वमनियतप्रतियोगि राज्ञो गम्य राम० १०९
ते। यस्माद्राजा परोपकारित्वेन विवक्षितो न स्वनिष्ठत्वेन॥ ॥ ॥ श्री॥ ॥

=मर्द्दनीयत्वेनप्रतीयते इत्यर्थः॥ १४ स्नैनेति॥ गुणपदेनव्यिभक्त्यभिधेयप्राधान्य इत्यर्थः॥ १२

ननुचनैतेनेति॥ नहिशब्दस्यभावाभावाभ्यांअर्थस्यभावाभावौक्रियेतेकिंतर्ह्यर्थस्य प्रतिपिपादयिषाविषयीकरणाकरणाभ्यांशब्दस्योच्चारणात्तत्क्षणेभावाभावाविसर्थः॥ तत्रप्रशेषकारित्वेनराज्ञोविवक्षितत्वात्षष्ठीभवतिपुरुषस्यतूपकार्यतयात्वनिष्टत्वेनविवक्षितत्वात्प्रथमातउक्तंहरिणा॥ द्विष्ठोप्यसोपरार्थत्वाद्गुणेषुव्यतिरिच्यते॥ तंत्राभिधीयमानश्चप्रधानेप्युपयुज्यते इति॥ ॥ स्वामित्वमिति॥ स्वस्वामिसंबंध इत्यर्थः समासकृत्तद्धितेषुसंबंधाभिधानमितिवचनात्॥ स्वकृतमिति॥ ततश्चानियतंतस्यमपेक्ष्यप्रथममेवसंबंधाश्रयाषष्ठीउत्पाद्यते॥ पुरुषशब्दसंनिधौतुस्वविशेषप्रतिपत्तिरित्यर्थः तद्यथेति॥ प्राति

ननुचनैतेनैवंभवितव्यं॥ नहिशब्दकृतेनार्थेनभवितव्यंअर्थकृतेननामशब्देनभवितव्यं। तदेतदेवंदृश्यतामर्थरूपमेवैतदेवंजातीयकंपेनांतरेणापिपुरुषशब्दस्यप्रयोगंराजनिसोर्थोगम्यते॥ किंपुनस्तत्॥ ॥ स्वामित्वं॥ किंकृतंपुनस्तत्स्वकृतंतत्तद्यथाप्रातिपदिकार्थोनांक्रियाकृताविशेषाउपजायंतेतत्कृताश्चाख्याःप्रादुर्भवंतिकर्मकरणमपादानंसंप्रदानमधिकरणमिति॥ ताश्चपुनर्विभक्तीनामुत्पत्तौकदाचिन्निमित्तत्वेनोपादीयंतेकदाचिन्नकदाविभक्तीनामुत्पत्तौनिमित्तत्वेननोपादीयंते॥ यदाव्यभिचरंतिप्रातिपदिकार्थं॥ ॥

=क्रियाकृतविवक्षाभावादित्यर्थः॥ १२

पदिकार्थोनामित्यर्थः॥ क्वचित्तुप्रातिपदिकार्थोनामित्येवपाठः॥ क्रियाकृताइति॥ क्रियाफलापेक्षयाशक्तयआश्रीयंतइत्यर्थः॥ तत्कृताश्चेतिशक्तिनिमित्ताःसंज्ञाइत्यर्थः॥ कदाचिदिति यदाक्रियांप्रतिव्यापारावेशविवक्षाभवतिदात्रेणलुनातीति॥ कदाचिन्नेति॥ यदायोग्यतामात्रविवक्षाभवतितदात्रंलवनेकरणमिति॥ व्यभिचरंतीतियदाप्रातिपदिकार्थस्यक्रियावेशविवक्षायांशक्तिलक्षणार्थातिरेकोभवतितदाप्रातिपदिकार्थंतांशक्तयोनप्रतिपद्यंतइत्यर्थः॥ ॥ ॥

=क्रियाफलापेक्षयेति॥ अयंभावः॥ भाष्येक्रियाकृताइत्यस्यक्रियानिमित्ता [redacted] क्रियाजनकत्वसमानाधिकरणाःक्रियारूपाविशेषाअपादानादिशक्तिरूपाउपजायंतेमतीतिविषयानवंतीत्यर्थः॥ तत्रक्रियाजनकत्वंनक्रियाकर्तृत्वमात्रमपादानादि

=संगाविकित्व [redacted] फलस्वरूपक्रियाजनकत्वंतत्त्वतत्रापादानस्यतथात्वंगमादिसमभिव्याहारेदरासादिसमभिव्याहारेसंप्रदानस्यकर्तृकरणाधिकरणानांसर्वत्र॥ कर्मणःसकर्मकधातुयोगइत्यादियथायथंद्रष्टव्यं॥ स्वसंबंधंइत्यादकत्रीति

माञ्कै०२
११०
यदाहीति॥ अपरोपकारित्वेन स्वनिष्ठतया प्रातिपदिकार्थो विवक्षित इत्यर्थः॥ तदेवं दाश्वेऽगेति यथा क्रियापेक्षया भवति तथा राज्ञ इति सापेक्षयाग-
याच स्वनिष्ठत्वाश्रयेण दातृत्वं करणमिति भवति तथा राजा स्वामी त्युक्तं भवति॥ ॥आख्याभूता इति॥ ताः शक्तयः संज्ञा मेव प्राप्ताः न तु विभक्त्युत्पत्तिं प्रयोजयं-
तीत्यर्थः॥ तदुक्तं॥ स्वशब्दैरभिधाने तु स धर्मो नाभिधीयते विभक्त्यादिभिरेवासावुपकारः प्रतीयत इति॥ पुरुषे पीति॥ संबंधस्य द्विष्ठत्वात् द्वाभ्यां षष्ठी प्राप्नो-
तीत्यर्थः॥ शक्तिस्तु प्रातिपदिकार्थस्यैव न क्रियास्येति विशेषः राजशब्दादिति॥ गुणप्रधानभावेनार्थद्वयमवस्थितमित्युक्तमेतत्॥ तत्र संबंधो गुणे पदं न्य-
यदाहि न व्यभिचरंति॥ ॥आख्याभूता एव तदा भवंति कर्म करणमपादानं संप्रदानमधिकरणमिति॥ यथैव तर्हि राजनि स्वत्वकृतं स्वामित्वं त-
त्र षष्ठी भवति एवं पुरुषेपि स्वामिकृतं स्वत्वं तत्र षष्ठी प्राप्नोति राजशब्दादुत्पद्यमानया षष्ठ्याभिहितः सोर्थ इति कृत्वा पुरुषशब्दा-
त्षष्ठी न भविष्यति॥ न तर्हीदानीमिदं भवति पुरुषस्य राजेति भवति राजशब्दात्तु तदा प्रथमा न तर्हीदानीमिदं भवति राज्ञः पुरुषस्येति
॥भवति बाह्यमर्थमभिसमीक्ष्य षष्ठी शेषे॥ ॥ ॥श्री॥ ॥७॥
स्वद्विष्ठत्वात्प्रधानमपि संस्पृशति गुणस्तु प्रधानोपकाराय प्रवृत्तो रूपांतरमाश्रयति प्रधानं तु स्वनिष्ठमेव न तु रूपांतरं भजते॥ पुरुषस्येति षष्ठ्यानै-
व भाव्यमिति प्रांसाचोदयति न तर्हीति भवतीति॥ यदा पुरुषस्य गुणभावो राज्ञस्तु विशेष्यत्वं तदा पुरुषस्य राजेति भवत्येवेत्यर्थः॥ भवति बाह्यमिति॥ एकस्यापि रा०
वस्तुनो भिन्नविषयो गुणप्रधानभावो न विरुध्यते॥ ॥श्री॥ ॥७॥ ॥श्री॥ ११०

[redacted] अवस्थानं वा सत्ताश्रयत्वं आदिपदात्स्मरणाद्यवस्थायां बुद्धिसत्ताश्रयत्वं वाहिंनवर्ग्मातास्मरणे विषयत्वेन भवतीति संप्रसयात्र सत्तायां मातास्मरणमधिकरणं तन्निमित्तको मातास्मरणेन साकं विषयविषयिभावा

अधीगर्थे॥ मातुः स्मरतीति मातृस्मरणयोरवस्थानादिक्रियानिमित्तः संबंध इति केचिदाहुः अन्ये तु स्मरणस्य क्रियारूपत्वात्क्रियांतरमंतरेणैव द्रव्येण संबंधोपपत्तिमाहुः यथा द्वयोः काष्ठयोर्जतुकृतः श्लेषो जतुनस्तु काष्ठेन स्वतः एव न जत्वंतरकृतः कर्मादिषु इति॥ आदिशब्दः आश्रयवाची। यथा विष्णुरादिः एषां सूनोर्भीष्मादिष्वस्तु योधनः तेजयंति रणे शत्रून्ये यो विष्णुः समाश्रय इति तेन कर्माश्रयाः द्वितीयाविधिनिमित्तभावेनोपात्ताः सकर्मका अधीगर्थादयः प्रेष्यब्रूपर्यंताः कर्मादिशब्देनोच्यंते। अकर्मकाणामिति। तेन मातुः स्मर्यत इति भावे लकारस्य खलर्थो भवति कर्मणि तु ल्त्वादिषु विधीयमानेषु तैरभिहितत्वात्कर्मणः षष्ठ्या न भाव्यमिति प्रथमैव भवति माता स्मर्यत इति॥ वल्करणं किमर्थमिति विनापि वतिना तिदेशः सिध्यति परार्थे शब्दप्रयोगात् स्वा

अधीगर्थदयेशां कर्मणि कर्मादिषु कर्मकवद्वचनं। कर्मादिषु कर्मकवद्भावो वक्तव्यः। किं प्रयोजनं। अकर्मकाणां भावे लो भवतीति भावे लो यथा स्यात्। मातुः स्मर्यते पितुः स्मर्यते॥ अथ वत्करणं किमर्थं स्वाश्रयमपि यथा स्यात्॥ माता स्मर्यते पिता स्मर्यत इति॥ कर्माभिधाने हि लिंगवचनानुपपत्तिः कर्माभिधाने लिंगवचनयोरनुपपत्तिः स्यात् मातुः स्मृतं मात्रोः स्मृतं मातॄणां स्मृतमिति मातुर्यल्लिंगवचनं तत्स्मृतशब्दस्यापि प्राप्नोति॥ षष्ठीप्रसंगश्च॥ षष्ठी च प्राप्नोति॥ कुतः स्मृतशब्दान्मातुः सामानाधिकरण्यात्षष्ठी प्राप्नोति अपर आह षष्ठीप्रसंगश्च॥ ० ॥

स्वाश्रयमपीति। नाप्राप्ते स्वाश्रये आरभ्यमाणो ऽतिदेशस्तं द्वाधेत कर्माभिधाने हीति। यद्यकर्मकवद्भावो न विधीयते तदा त्वादिभिः कर्मण्येवाभिधानं स्यात् तत्र माता वः। ततस्तत्सामानाधिकरण्यात् क्तांतादीनां तदीयलिंगसंख्याप्रसंगो माता स्मृतेति भावे तु सतो क्तादीनां नपुंसकत्वमेकवचनं च भवति॥ षष्ठीप्रसंगश्चेति॥ यदा स्मृतशब्देन कर्मणि क्तो विधीयते तदा मातृशब्दसामानाधिकरण्यात्वा स्ववाक्यापेक्षया यथा मातृशब्दात्षष्ठी भवति तथा स्मृतशब्दादपि स्यादि त्येके आचक्षते अन्ये त्वाहुः अनभिहिताधिकारानपेक्षणे न यथा मातृशब्दात्कर्मणि षष्ठी भवत्येवं स्मृतशब्दादपि स्यादिति। ननु विद्यमाने ऽनभिहिताधिकारः कथं नापेक्ष्यत इत्याशंक्याह॥ अपर

=अतिदिश्यमानधर्मविरुद्धत्वाश्रयकार्यस्मृतोके दर्शनादितिभावः॥४॥

भा०कै०२ मसंज्ञत्वेति॥ प्रापणीयेत्यर्थः। शेष इति प्रकरणं चेदं समासप्रतिषेधार्थमिति समासप्रकरणे व्याख्यातं तेन न मातुः स्मृतमिति षष्ठीसमासो न भवति॥ उक्तं च

१११ हरिणा साधनैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः। प्रोक्ताप्रतिपदं षष्ठी समासस्य निवृत्तय इति ॥ रुजार्थानां॥ यावत्तेति धातूनां भाववाचित्वाद् अभिचा

॥। राद्भावकर्तृका दिति ल्यब्लोपे कर्मणि पंचमी भावकर्तृकमाश्रित्येत्यर्थः। अथवा भावकर्तृकधात्वर्थे कर्मचौरादिकं भावकर्तृशब्देनोक्तं। कथं पुनर्भा

ववचनानामित्यस्य भावकर्तृकाणामित्यर्थो भवति। उच्यते भावशब्देन घञादिवाच्यस्ति द्रूपोऽर्थोऽभिधीयते न तु सा धातुरूपस्तस्य कर्तृत्वासंभवा

षष्ठी च प्रसंज्ञत्वात्कुतः मातृशब्दात् स्मृतशब्देनाभिहितं कर्मेति कृत्वा षष्ठी न प्राप्नोति तत्र हि वक्तव्यं। न वक्तव्यं। अविवक्षिते कर्मणि ष

ष्ठी भवतीति किं वक्तव्यमेतत। न हि कथमनुच्यमानं गंस्यते॥ शेष इति वर्तते शेषश्च कः कर्मादीनामविवक्षा शेषः यदा च कर्म विवक्षितं भवति

तदा षष्ठी न भवति। तद्यथा स्मराम्यहं मातरं स्मराम्यहं पितरमिति अधीगर्थ ॥ ॥ रुजार्थानां भाववचनानामज्वरेः॥ अज्वरिसंताप्योरिति

वक्तव्यं॥ इहापि यथा स्यात्॥ चौरं संतापयति वृषलं संतापयति। अथ किमर्थं भाववचनानामित्युच्यते॥ यावता रुजार्था भाववचना एव भवंति

=धातुमात्रनिर्देशाश्रयमिति। ततश्च रुजो धातोरर्थार्थस्य वाचकेन संबंधिनो येधातवस्तज= ॥ भावकर्तृकाद्यथा स्यात्॥ इह मा भूत् नदीकूला निरुजतीति॥ ॥ ॥

=पीडाद्यर्थानामित्यर्थः। रुजार्थानां निर्देशोऽस्तीति। रुजा रोगो। धर्ममात्रमिति वृत्तौ हि समासोऽत्र पक्षे ३=

तावचनशब्देऽपि प्रसत्ययार्थः [redacted] कर्त्ता विवक्षितः कर्त्तरि ल्युटो विधानात् प्रकृत्यर्थस्तु वचनक्रिया न विवक्षिता तेन भावो वचनः कर्त्ता येषां

ते भाववचनाः भावकर्तृका इत्यर्थः संपद्यते अन्ये त्वाहुः। भावे वचनं येषां ते भाववचनाः सति भावे कर्त्तरि येषां वचनमुच्चारणं भावकर्तृकधात्वर्थप्रतिपादनाय

येषामभिधानमित्यर्थः। नदीकूलानीति रुजाशब्दो व्याधौ रूढ इत्यत्र प्रसंग एव नास्तीति तस्मात् रुजार्थानामिति धातुमात्रनिर्देशाश्रयमिदं प्रत्युदाहरणं रुजा एम०

शब्दनिर्देशे तु श्लेषात्पुरुषं रुजतीति प्रत्युदाहार्यमित्याहुः॥ ॥ ॥ ॥ १११

द्वितीया॥ किमुदाहरणमिति पूर्वसूत्रे व्यवस्थितविभाषा विज्ञानात्सोपसर्गस्यदीव्यतेः कर्मणि छंदसि द्वितीयैव भविष्यतिगांप्रदीव्यंतीत्यादाविति प्रश्नः॥ गामस्ये
ति ह्यत्र दिवस्तदर्थस्येति नित्यं षष्ठी प्राप्नोति यत्र च शेष इति नानुवर्तेत इति एतत्सूत्रारंभात्पूर्वसूत्रारंभाच्च ज्ञायते॥ ॥ प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने॥ प्रस्थितस्येति य

द्वितीया ब्राह्मणे किमुदाहरणं गां निघ्नंति गांप्रदीव्यंति गां सभासद्भ्य उपहरंति॥ नेतदस्ति पूर्वेणाप्येतत्सिद्धं॥ इदं तर्हि गामस्य तदहः सभायां दीव्येयुः॥
॥ प्रेष्यब्रुवो॥ हविषोः प्रस्थितस्य हविषः अप्रस्थितस्येति वक्तव्यं। इंद्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य प्रेष्य॥ चतुर्थ्यर्थे बहुलं छंदसि॥ षष्ठ्यर्थे
चतुर्थी वक्तव्या। या खर्वेण पिबति तस्यै खर्वो जायते यां मलवद्वाससं संभवंति तिस्रो रात्रीरिति। तस्या इति प्राप्ते। यस्ततो जायते सोभिशस्तो यामरण्ये
तस्यै स्तेनो यां पराचीं तस्यै [redacted] ह्रीतमुख्यप्रगल्भः या स्नाति तस्या अप्सु मारुको या अभ्यंक्ते तस्यै दुश्चर्मा या प्रलिखते तस्यै खलतिर
पमारी या अंक्ते तस्यै काणो या दतो धावते तस्यै श्यावदन् या नखानि निकृंतते तस्यै कुनखी या कृणत्ति तस्यै क्लीबो या रज्जुं सृजति तस्या उद्बंधुको
या पर्णेन पिबति तस्या उन्मादुको जायते अहल्यायै जार मनाय्यै तंतुः तत्र हि वक्तव्यं न वक्तव्यं॥ योगविभागात्सिद्धं चतुर्थी ततः अर्थे बहुलं छंद
सि॥ कर्तृकर्मणोः कृति॥ कृद्ग्रहणं किमर्थं इहमाभूत्। पक्ता ओदनं देवदत्त इति कर्तृकर्मणोः षष्ठीविधाने कृद्ग्रहणानर्थक्यं लप्रतिषेधात्। कर्तृकर्मणोः
षष्ठीविधाने कृद्ग्रहणमनर्थकं [redacted] किं कारणं लप्रतिषेधात्॥ प्रतिषिध्यते तत्र षष्ठी लप्रयोगे नेति॥ तस्य कर्मकर्त्रर्थं तर्हि कृद्ग्रहणं कर्तव्यं

दा प्रस्थितत्वेन हविर्विशेष्यते तस्मात् षष्ठी न भवतीत्यर्थः॥ ॥ चतुर्थ्यर्थे या खर्वेणेति। रजस्वलायाः खर्वेण पानादि निषेधार्थोयमर्थवादः चतुर्थीति षष्ठीप्रकरणा
त्षष्ठ्यर्थे चतुर्थी भवतीत्येको वाक्यार्थः। चतुर्थ्यर्थे इति षष्ठीति द्वितीयः॥ कर्तृकर्मणोः तस्य कर्मकर्त्रर्थमिति कर्तृकर्मविशेषणार्थं कृद्ग्रहणमित्यर्थः॥ ॥ श्री॥

म

नैतदिति॥ यद्योक्तप्रयोजनं लकृद्ग्रहणमिह तावन्नोपपुज्यत इति दर्शयति पश्चादुत्तरत्रानुपयोगं दर्शयिष्यति॥ इह कर्तृकर्मसंनिधानात् क्रियासंनिधीयते क्रियायाहि कारकं भ-
वति सा च वाचकं धातुं प्रत्ययसहितमाक्षिपतीति मत्वाह धातोर्हीति। तदेवं व्यावर्त्याऽसंभवादिहार्थे लकृद्ग्रहणं कर्तृकर्मविशेषणार्थं नोपपुज्यत इति दर्शितं इदानीमुत्त-
रार्थत्वमाशंक्य निराकरोति। न ब्रूम इति॥ न लोकाव्यये सत्रामयं लकृद्ग्रहणे न विशेष्यते लादव्ययस्य ये कर्तृकर्मणी तत्र षष्ठीप्रतिषेधो यथा स्यात् कटं कृत्वेत्यादौ ऽ-
कृतस्त्वव्ययस्य कर्तृकर्मणोः षष्ठीनिषेधो मा भूत् उच्चैः कटानां स्रष्टेति प्रतिषेध इति न लोकाव्ययेति सूत्रे व्ययग्रहणे न कर्तृकर्मणी विशेष्येते ऽव्ययस्य

नैतदस्ति प्रयोजनं॥ धातोर्हि द्वये प्रत्यया विधीयन्ते तिङः कृतश्च तत्र कृत्प्रयोग इष्यते तिङ्प्रयोगे प्रतिषिध्यते॥ न ब्रूमः इहार्थे तस्य कर्मकर्त्रर्थं
लकृद्ग्रहणं कर्तव्यमिति॥ किं तर्हि उत्तरार्थं॥ अव्ययप्रयोगे नेति षष्ठ्याः प्रतिषेधं वक्ष्यति लकृतोऽव्ययस्य ये कर्तृकर्मणी तत्र यथा स्यात् अलकृतोऽव्ययस्य
ये कर्तृकर्मणी तत्र मा भूदिति॥ उच्चैः कटानां स्रष्टेति। तस्य कर्मकर्त्रर्थमिति चेत्प्रतिषेधेऽपि तल्लकृदं तत्कर्मकर्तृत्वात्सिद्धं कृत एते कर्तृकर्मणी ना-
व्ययस्य ऽधिकरणमत्राव्ययं॥ इदं तर्हि प्रयोजनं॥ उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधं वक्ष्यति॥ लकृतो ये कर्तृकर्मणी तत्र यथा स्यात् अलकृतो ये कर्तृ-
कर्मणी तत्र मा भूदिति आश्चर्यमिदं हत्र मोदनस्य च नाम पाको ब्राह्मणानां च प्रादुर्भाव इति॥ ॥ ॥

ये कर्तृकर्मणी तयोः षष्ठी न भवतीति। न च कृदंतादव्ययादन्यस्याव्ययस्य कर्तृकर्मणी संभवत इति सामर्थ्याल्लभ्यं तत्रापि लकृद्ग्रहणमित्यर्थः कृत इति स्रष्टेत्यस्य
नाव्ययस्येति॥ नोच्चैः शब्दस्येत्यर्थः। तस्याऽक्रियावाचकत्वात् तदेवाह ऽधिकरणमिति॥ उच्चैः स्थाने स्थितानां कटानां स्रष्टेत्यर्थः लतोप इति॥ एकस्यैव लकृतो एम०
न तु भिन्नयोः लकृतोरित्यर्थः॥ लकृद्ग्रहणे क्रियमाणे शब्दप्रतिपादितत्वात् अन्यपदार्थस्योभयप्राप्ताविति बहुव्रीहिर्लभ्यते। अन्यथान्तरंगत्वात्तत्पुरुषः स्यात्॥०॥ ११२

अथेति॥ कृतीत्येकत्वस्याविवक्षां जातिविवक्षां वा तत्सुरूपं च मत्वा चोदयति। कृतसपदार्थे बहुव्रीहिराश्रीयत इति परिहारः। तेनाप्यद्वयोगवांदो होगोपालकेनेसा
दावेव नियमः प्रवर्त्तते॥ यद्येवमुत्तरत्रैव कृद्ग्रहणं कर्त्तव्यं॥ अथवा व्याख्यानात् बहुव्रीहिराश्रयिष्यत इत्याशंक्याह। अथवेति। कृतपूर्वीति॥ कृतं पूर्वमनेनेति सुप्
सुपेति समासः पूर्वादिनिः सपूर्वाच्चेती निप्रत्ययः कर्त्तोक्तत्वात् तद्धितेनोक्त इति ततः षष्ठी प्रसंगाभावः कटान्तु कर्म्मणः षष्ठी भूदित्येवमर्थं कृद्ग्रहणं ननु

अर्थमात्र इति यद्यपि कृतपूर्वी कटमित्यत्र निष्ठायोगे षष्ठीनिषेधात् द्वितीयायामन्यथापि सिद्धं तथापि कर्त्तव्यपूर्वी कटमित्यत्र न्यथासिद्धोदाहरणोपलक्षणत्वाददोषः। अत एव महाभाष्ये न्मतर्थीयेऽणि भावो व्याकरणमित्यत्र षष्ठ्यभावः कृद्ग्रहणं फलमेवेनो

अथ क्रियमाणेपि कृद्ग्रहणे कस्मादेवात्र न भवति॥ उभयप्राप्ताविति नैवं विज्ञायत उभयोः प्राप्तिरुभयप्राप्तिः उभयप्राप्ताविति कथं तर्हि उ
भयोः प्राप्तिर्यस्मिन्कृतीति सोयमुभयप्राप्तिः कृत् उभयप्राप्ताविति। अथवा कृतोपेक्षतं कर्मणीत त्रयथा स्यात्॥ तद्धितप्रत्यये कर्त्तृकर्मणी
तत्र माभूदिति॥ कृतपूर्वी कटमुक्तपूर्वी ओदनमिति॥ ननु च वाक्येनैवानेन भवितव्यं॥ द्वितीययापातावन्न भवितव्यं॥ किंकारणं केनाभि
हितं कर्मेति कृत्वा॥ इनिप्रत्ययेन चापि नोक्तं तत्वं किंकारणं असामर्थ्यात् यमसामर्थ्यं सापेक्षमसमर्थं भवतीत्युक्तादुच्यते द्वितीययाता
वन्न भवितव्यं किंकारणं केनाभिहितं कर्मेति कृत्वेति॥ ॥ ॥

चेति। कृतपूर्वी कटमित्यनेनेत्यर्थः॥ द्वितीययेति तत्स्याच्चाप्राप्नोति तदपवादः षष्ठ्यपि न प्राप्नोति इहाप्यनभिहिताधिकारात्॥ सापेक्षमिति॥ कृतः पूर्वं कटो
ऽनेनेति विवक्षायां कटापेक्षत्वात् तद्धितेन नभाव्यमित्यर्थः॥ ॥श्री॥ ॥श्री॥ ॥

भा०कै०२
११२
113

योसाविति कृतः कटोऽनेनेति वा केवलकृतकटयोः सामानाधिकरण्यं अस्मिंश्चार्थे विशेषेण नाभ्यंतरत्वात्। तस्याः सामान्यविषयत्वात्। तस्मात्कर्मसामान्यमेवाप्युच्यते॥
तत्र कृतपूर्वमनेनेत्यस्मिन्नर्थे कृतवानित्यर्थः संपद्यते तत्र कटेति वा च क्रिया पेक्षं अस्ति कटस्य कर्मत्वं तथाह हरिः विशेषकर्मसंबंधे निर्मुक्तेपि कृतादिभिः विशेषनिर
पेक्षो न्यः कृतशब्दः प्रवर्त्तते अकर्मक इत्येतत्त्वे वाक्यांते भावाभिधायिनि। ततः क्रियावता कर्त्रा योगो भवति कर्म्मणां अविग्रहागतादिस्थायथाग्रामादिक
र्मभिः क्रियासंबध्यते तद्वत् कृतपूर्व्यादिषु स्थितेति कर्तृभूतपूर्वमात्रादिति करोतीति कृदिति कर्त्राभिधीयते तत्र कर्त्तरि पुनः षष्ठीविधानात् गुणभूतेपि
भवति। एवं तु तद्धितनिवृत्तिर्नेष्टा स्यात् भेदिकेति भिदेर्तपितासर्यायादिषु रावुचं अत्र प्रयोजकः कर्त्रा एवार्थस्य प्राधान्यात्प्रधानं प्रयोज्यकर्त्ता तु प्रकृ

योसौ कृतकटयोरभिसंबंधः स उत्पन्ने प्रत्यये निर्वर्त्तते॥ अस्ति च करोतेः कटेन सामर्थ्यमिति कृत्वा द्वितीया भविष्यति। यदप्युच्यते प्रत्यये
नापि नो सन्नत्वं किं कारणमसामर्थ्यात् कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति। नेदमुभयं युगपद्भवति वाक्यं च प्रत्ययश्च। यदा वाक्यं न
तदा प्रत्ययः यदा प्रत्ययः सामान्येन तदा वृत्तिः तत्राव श्यं विशेषार्थिना विशेषोनुप्रयोक्तव्यः कृतपूर्वी किं कटं भुक्तपूर्वी किं ओदनमिति।
अथवेदं प्रयोजनं। कर्तृभूतपूर्वमात्रादपि षष्ठी यथा स्यात् भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानामिति कर्तृकर्म॥ ॥ ॥

सर्थस्याप्राधान्याद प्रधानं तत्र प्राधानाप्रधानसन्निधौ प्रधानादेव षष्ठी स्यात् नाप्रधानात् कृद्ग्रहणात्तु भवति अपकर्तृभूतपूर्वो दितिकथमुच्यते। नहि प्रयोज
कसन्निधौ प्रयोज्यस्य कर्तृत्वमेवेति गत्यादिसूत्रे नियमात् कर्मत्वाभावात् कर्तृत्वस्यैवावस्थानात्। एवं तर्हि प्राधान्यस्यात्र भूतपूर्वत्वं विवक्षितं प्रधानचरात् कर्त्तुरित्य
र्थः एतच्च विशेषापेक्षायां प्रयोजनमुक्तं। यदा तु तीयावत्कृतमात्रे षष्ठी साध्यते तदा भिन्नशब्दवाच्ययोः प्रधानाप्रधानयोः कर्त्रोरेकशब्दवाच्यतायामभा
वाद्विरोधाभावात्षष्ठी सिध्यतीति नेदं कृद्ग्रहणस्य प्रयोजनं तद्धितनिवृत्तिस्तु प्रयोजनमेव॥ ॥ ॥ ॥

एम०
११२

उभयाः षष्ठ्याः प्रतिषेध इति॥ नियमेनानेन कर्तुः षष्ठी प्रतिषिध्यत इत्यभिप्रेत्यैतदुक्तं भेदिके ति। पपायों दो एवं चेच्छेषे विभाषेति। अकाकारव्यतिरिक्ते स्त्रीप्रत्य
एवं नान्यस्मिन्निति केचिदाहुः। अपरे तु प्रत्ययमात्रे ऽकाकारवर्जिते विकल्पमिच्छन्ति। शब्दानुशासनमाचार्येणाचार्येणेति वा॥ ॥क्तस्य च॥ छात्रस्य हसि
तमिति। हासो हसितं नपुंसके भावे क्तः। तत्र छात्रे कर्तृत्वात् तृतीयाप्रसंगे षष्ठीविधानार्थं वचनं शेषग्रहणं च इति॥ कर्तृत्वस्याविवक्षितत्वाच्छेषत्वमिति मयूरः
कर्मादीनामिति। सदपि छात्रस्य कर्तृत्वं विवक्षया ऽपाक्रियते। संबन्धित्वमात्रं त्वत्र विवक्षितं। छात्रस्य संबन्धि हसितमित्यर्थः। उत्तरत्रेति अधिकरण

उभयप्राप्तौ कर्मणि॥ उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधे ऽकादिप्रयोगे प्रतिषेधः उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधे ऽकाकादिप्रयोगे प्रतिषे
धो न भवतीति वक्तव्यं॥ भेदिका देवदत्तस्य काष्ठानां चिकीर्षा विष्णुमित्रस्य कटस्य अपर आह। अकाकारयोः प्रतिषेधो नेति वक्तव्यं। शेषे विभाषा शोभ
ना खलु पाणिनेः सूत्रस्य कृतिः शोभना खलु पाणिना सूत्रस्य कृतिः शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः शोभना खलु दाक्षायणेन संग्र
हस्य कृतिः उभ क्तस्य च वर्तमाने क्तस्य च वर्तमाने नपुंसके भाव उपसंख्यानं क्तस्य च वर्तमाने नपुंसके भाव उपसंख्यानं कर्तव्यं। छात्रस्य हसि
तं। नटस्य भुक्तं मयूरस्य नृत्तं कोकिलस्य व्याहृतमिति। विज्ञानास्ति इदं शेषलक्षणात्र षष्ठी भविष्यति शेष इत्युच्यते। शेषः कर्मादीनामविवक्षा शेषः
य एवं छात्रो हसति नटो भुङ्क्ते मयूरो नृत्यति कोकिलो व्याहरति। सतो ऽप्यविवक्षा भवति तद्यथा अलोमिका एडका अनुदरा कन्येति असतश्च विवक्षा। समु
द्रः कुण्डिका विन्ध्यो वर्धितकमिति यद्येवं उत्तरत्र चातुः शब्दः प्राप्नोति। इदमहेः सृप्तं इहाहिना सृप्तं इहाहिः सृप्तः इहाहेः सृप्तं ग्रामस्य पार्श्वे ग्रामस्य मध्ये इति।
वाचिनश्चेत्यत्र इदमिति॥ अत्राधिकरणोक्तः तेनाभिहितमधिकरणमिति इदं शब्दादाश्रयमात्रकृतात् हि शब्दात्त्वधिकरणवाचिनश्चेति षष्ठी॥ इहाहिना सृप्तमिति॥
अत्र भावे क्तः इहाहिः सृप्त इति अत्र कर्तरि क्तः इहाहेः सृप्तमिति॥ भाव एव क्तः तत्र शेषविवक्षायां षष्ठी स्यादिति चोद्यं॥ इष्यत एवेति परिहारः। ग्रामस्य पार्श्वे इति।
सप्तमी प्रयोगेणानायमधिकरणोक्तः क्तः किन्तु हि भाव इति दर्शयति॥ ॥ ॥श्री॥ ॥ ॥

नलोकेलादेश इति॥ लग्रहणमपनीय सल्लिङ्ग्रहणं कर्त्तव्यं। तत्र सङ्ग्रहणे न शानच्शानचोः स्यैते। लिङ्ग्रहणे न चकानचूक्कसूल्लिट्संज्ञाविधानात् किकिनौ चेत्लग्र
हणे तु किकिनोरलादेशत्वाद्ग्रहणप्रसंगः। अथ तान्विति॥ लिट्कार्यातिदेशाल्लादेशतुल्याविरूपयो विवक्षितः परस्तु यथोक्तमभिप्रायम प्रतिपद्य त्लादेशत्वमेवानयोर्वि
प्रतिपन्नमिति मत्वाह बाढं स्यादिति॥ वक्ष्यामीति व्याख्यास्यामीत्यर्थः परस्त्वपूर्वो वतिनिर्देशः कर्त्तव्यत्वेनानेन चोदित इति मत्वाह सन्तर्हीति॥ विशेषातिदेशे च सामा

न लोकाव्ययनिष्ठाखलर्थतृनाम् लादेशे सल्लिङ्ग्रहणं किकिनोः प्रतिषेधार्थं लादेशे सल्लिङ्ग्रहणं कर्त्तव्यं सल्लिटोः प्रयोगे नेति वक्तव्यं। किं प्रयोज
नं किकिनोः प्रतिषेधार्थं। किकिनोरपि प्रयोगे प्रतिषेधो यथा स्यात् पपिः सोमं ददिर्गाः। किं पुनः कारणं न सिध्यति। तयोरलादेशत्वात्। न हि तौ लादेशौ
अथ तौ लादेशौ स्यातां स्यात्प्रतिषेधः बाढं स्यात्। लादेशौ तर्हि भविष्यतः कथं। आदृगमहनजनः किकिनौ लिट् चेति लिड्वदिति वक्ष्यामि। स तर्हि वति
तिर निर्देशः कर्त्तव्यः न ह्यन्तरेण वतिमतिदेशो गम्यते॥ अन्तरेणापि वतिमतिदेशो गम्यते तद्यथा। एष ब्रह्मदत्तः अब्रह्मदत्तं ब्रह्मदत्त इत्याह ते मन्यामहे ब्रह्मदत्तव
दयं भवतीति॥ एवमिहाप्यलिटं लिडित्याह लिड्वदिति ज्ञायते। उकारप्रयोगे नेति वक्तव्यं कटं चिकीर्षुः ओदनं बुभुक्षुः तत्र हि वक्तव्यं न वक्तव्यं॥०॥

न्यातिदेशः प्रवर्त्तते एव विशेषस्य सामान्याव्यभिचारात् तेन लमात्रनिबन्धनः षष्ठीप्रतिषेधः किकिनोः प्रवर्त्तते तद्वत्तिसंज्ञा किकिनोर्विधीयत इति मत्वावा
र्त्तिकारंभः कार्यातिदेशाश्रयेण तत्प्रत्याख्यानं उकारप्रयोग इति उकारान्तप्रयोग इत्यर्थः॥ उप्रत्ययोपि चान्तवद्भावाद्गृह्यते॥ ॥श्री॥ ॥

उकारोऽपीति॥ उग्वोः कद्रृत्येतिद्वयोर्द्वन्द्वः सूर्व्वे क्रियते। ततोऽन्येषां अन्यथा लघुके निःस्पात् ल प्रयोगे नेति। एतेषां च अलादेशत्वात्॥ ॥अकेनोर्यथासंख्यापवादार्थं वचनं अक
स्येति स्वरितत्वप्रतिज्ञानाद्यथासंख्याभावव्याख्यानं चेदमिसाकुः। अकस्यत्वाधमर्ण्ये नास्ति विधानमिति भविष्यदधिकारविहितस्यैव तस्य ग्रहणं शातं द्रापीति। आवश्य

उकारोऽप्यत्र निर्दिश्यते कथं प्रश्लिष्टनिर्देशोऽयं उ उक ऊक इत्युकलोकेति उक प्रतिषेधे कमेर्भाषायामप्रतिषेधः उकप्रतिषेधे कमेर्भाषायां प्रतिषे
धो न भवतीति वक्तव्यं दास्याः कामुकः वृषल्याः कामुकः अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः अव्ययप्रतिषेधे तोसुन्कसुनोः प्रतिषेधो न भवती
ति वक्तव्यं पुरा सूर्यस्योदेतोराधेयः पुरा वत्सानामपाकर्तोः पुरा क्रूरस्य विसृपो विरप्शिन् शानंश्चानश्शतॄणामुपसंख्यानं शानंश्चानश्शतॄणा
मुपसंख्यानं कर्तव्यं सोमं पवमानः नटमाघ्नानः अधीयन् पारायणं लप्रयोगे नेति निषेधो न प्राप्नोति माभूदेवं तस्मिन्नेव भविष्यतीति कथं तस्मिन्निति
नेदं प्रत्ययग्रहणं किं तर्हि प्रत्याहारग्रहणं कसन्निविष्टानां प्रत्याहारः लटः शतृ इत्यतः प्रभृत्यानोनकारात् यदि प्रत्याहारग्रहणं चोरस्य द्विषन् अत्रा
पि प्राप्नोति द्विषः शतुर्वावचनं द्विषः शतुर्वेति वक्तव्यं तच्चावश्यं वक्तव्यं प्रत्ययग्रहणे सति प्रतिषेधार्थं तदेव प्रत्याहारे सति विध्यर्थं भविष्यति॥ न
लोकाव्य॥ अकेनोर्भविष्यदाधमर्ण्ययोः। अकस्य भविष्यति। अकस्य भविष्यतीति वक्तव्यं प्रवान्‌ल्लावको व्रजति ओदनं भोजको व्रजति इनश्चा [redacted] धमर्ण्ये च। तत इन्नन्तस्याधमर्ण्ये भविष्यति वक्तव्यं शतं दायी सहस्रं दायी ग्रामं गमी अके॥ ॥

कामधमर्ण्ययोर्णिनिरितीनिः ग्रामं गमीति भविष्यति गम्यादय इति वचनाद्भविष्यति गमेरिनिः गसर्थे कर्मणि सत्र चतुर्थी वैसेव पक्षे द्वितीयायां सिद्धायां द्वितीया
ग्रहणमपवादविषयेऽपि विधानार्थं ग्रामं गन्तेति यस्यैव द्विरुक्तं तज्ज्ञाप्यकारस्य नाभिमतमिति ग्रामं गमीत्युदाहरणोपपत्तिः॥ ॥श्री॥ ॥

भा०कै०२
११५
115

कृत्यानां नेहापीति काकानन्त्रप्रयोगादिहाप्यनभिधानमित्यर्थः। प्राक् षष्ट्येति। कृषेर्द्विकर्म्मकत्वात्प्रधानकर्म्मणः कृत्सेनाभिधानं न त्वप्रधानकर्म्मण इति तन्त्रि
दृत्सर्थमपि कर्तृग्रहणं कस्मान्न भवतीति भावः। एवं तर्हीति। कृत्सानामिति तावत्सूत्रं क्रियते। तत्र चोभयप्राप्ताविति नेति वर्त्तते तेन कर्तृकर्मणोर्द्वयोरप्युभयप्रा
[redacted]

कृत्सानां कर्त्तरि वा॥ कर्तृग्रहणं किमर्थं। कर्म्मणि मा भूदिति। नैतदस्ति प्रयोजनं भावकर्मणोः कृत्सा विधीयन्ते तत्र कृत्सैरभिहितत्वात्कर्मणि षष्ठी
न भविष्यति॥ अत उत्तरं पठति। भव्यादीनां कर्मणो नभिधानात्कृत्सानां कर्तृहणं॥ भव्यादीनां कर्मकृत्सैरभिहितं गेयो माणवकः साम्नां भव्या
दीनां कर्मणो नभिधानात्कृत्सानां कर्तृग्रहणं क्रियते॥ किमुच्यते भव्यादीनां कर्मकृत्सैरनभिहितमिति नेहाप्यनभिहितं भवति॥ आकर्ष व्या
ग्रामं शाखेति। एवं तर्हि योगविभागः करिष्यते॥ कृत्सानां प्रयोगे षष्ठी न भवतीति किमुदाहरणं। ग्रामम् आकर्षव्या शाखा। ततः कर्तरि वेति॥ इ
हापि तर्हि निषेधः प्राप्नोति। गेयो माणवकः साम्नामिति उभयप्राप्ताविति वर्त्तते। ननु चोभयप्राप्तिरेवैषा गेयो माणवकः साम्नामिति च गेया नि
माणवकेन सामानीति च भवति उभयप्राप्तिर्नाम सा भवति यत्रोभयस्यापि युगपत्प्रसंगः। अत्र च यदा कर्मणि न तदा कर्त्तरि यदा कर्त्तरि न तदा क
र्म्मणीति॥ ॥ इति श्रीभगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य तृतीये पादे तृतीयमाह्निकम्॥ ॥ ॥

नौ कृत्से षष्ठी प्रतिषिध्यते उभयप्राप्तिरेवेति। पर्यायेणेति मन्यते॥ उभयप्राप्तिर्नामेति बहुव्रीहिसमासाश्रयणाद्यत्र कृत्से युगपदुभयोः प्राप्तिस्तत्रैव षष्ठी निषि
ध्यत इत्यर्थः॥ ॥ इत्युपाध्यायजैय्यटपुत्रकैय्यटकृते भाष्यप्रदीपे द्वितीयाध्याये द्वितीये पादे तृतीयमाह्निकं॥ समाप्तश्चायं तृतीयः पादः॥ ॥ एम० ११५

द्विगुरेकवचनं॥ किमर्थमिति। इह समाहारद्विगोरेव ग्रहणमिष्यते। समाहरणं समाहारः स चैक एवेति सिद्धमेकवचनमिति प्रश्नः॥ प्रत्यधिकरणमिति। समाह्रियत इति समाहा
र इति यदा कर्मणि घञ् तदानेकस्यार्थस्य समाह्रियमाणस्य वाचको द्विगुरिति एकत्वाभावादप्राप्तमेकवचनं विधीयत इत्यर्थः। अधिकरणशब्देन द्रव्यमुच्यते यत् संख्याद्रव्याभि
धानं तत् संख्याश्रयं वचनमुत्पद्यत इत्यर्थः॥ पंचपूलीशब्देनात्र पंच पूलाः समाह्रियमाणा उच्यंते। ततो बहुवचनप्रसंगे एकवचनविधानं। संख्यासामानाधिकरण्याच्चे

द्विगुरेकवचनं॥ किमर्थमिदमुच्यते। प्रत्यधिकरणं वचनोत्पत्तेः संख्यासामानाधिकरण्याच्च द्विगोरेकवचनविधानं। प्रत्यधिकरणं वचनोत्पत्तिर्भवति। किमिदं
प्रत्यधिकरणमिति। अधिकरणं प्रति प्रत्यधिकरणं। संख्यासामानाधिकरण्याच्च॥ संख्यया बह्वर्थया चास्य सामानाधिकरण्यं। प्रत्यधिकरणं वचनोत्प
त्तेः संख्यासामानाधिकरण्याच्च बहुषु बहुवचनमिति बहुवचनं प्राप्नोति। इष्यते चैकवचनं स्यादिति तच्चांतरेण यत्नं न सिध्यतीति द्विगोरेकव
चनविधानं एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति। तत्रानुप्रयोगस्यैकवचनाभावो द्विगुत्वात्। तत्रानुप्रयोगस्यैकवचनं
न प्राप्नोति पंचपूलीयमिति। किं कारणं। अद्विगुत्वात्। द्विगोरेकवचनमित्युच्यते। न चात्रानुप्रयोगो द्विगुसंज्ञः। सिद्धं तु द्विग्वर्थस्यैकवद्वचना
त्। सिद्धमेतत्। कथं। द्विग्वर्थ एकवद्भवतीति वक्तव्यं। तत्र हि वक्तव्यं। न वक्तव्यं। नेदं पारिभाषिकस्य वचनस्य ग्रहणं। किं तर्ह्यन्वर्थग्रहणं। उच्यते
१ वचनं॥ ।श्री॥ ॥

ति। एतेन कर्मसाधनत्वं समाहारशब्दस्य दर्शयति॥ भावसाधने हि वैयधिकरण्यं पंचानां पूलानां समाहार इति। संख्याशब्देन संख्यावाची शब्द उच्यते। संख्यया बह्वर्थ
येति। एकत्वनिरासपरमेतत्। तेन द्व्यर्था पि रस्यते संख्या द्विग्रामीति। तत्रानुप्रयोगस्येति। द्विगुः समास एकवचनं प्रतिपद्यत इति पारिभाषिकैकवचनाश्रयेणादोषोप
१ न्यासः। उच्यते वचनमिति। क्त स्युटो बहुलमिति कर्मणि ल्युट्॥ ॥ ॥

उच्यते०९=

भा०कै०२ ११६ 116 एकस्यार्थस्येति। वाच्यवाचकसंबंधे षष्ठी। एकस्यार्थस्य वाचको द्विगुः समासः उच्यते इत्यर्थः। तत्र सामर्थ्योदयमतिदेश उपपद्यते। यो ह्यनेकस्यार्थस्य वाचकः स कथमेकस्य
वाचकः तस्मादेकत्वाश्रयकार्यप्राप्तये द्विग्वर्थस्यैकवद्भावो विधीयते। तत्र चास्मिन्नर्थे द्विगुसमानस्य द्विगोरर्थे एकवचनं सिध्यति। एकशेषप्रतिषेधश्चेति। एकशेषविषय
एकवद्भाव उपचारादेकशेषशब्देनोक्तः। पंचपूल्य इति। अत्रैकशेषे कृतेपि द्विगुत्वात्तदर्थस्यैकवद्भावः प्राप्तः प्रतिषिध्यते॥ नवेति॥ प्रथमस्य द्विग्वर्थस्यानेकसंख्यायु
क्तस्यानेनैकवद्भावः कृतः। तत एकशेषे कृते द्विग्वर्थसमुदायस्य द्विग्वर्थत्वाद् द्विहिंगत्वाच्च प्राथमकल्पिकेतरंगे द्विग्वर्थे चारितार्थत्वाच्चैकवद्भावो न प्रवर्तत इत्य

वचनमेक०
एकस्यार्थस्य वचनमिति॥ एकशेषप्रतिषेधश्च। एकशेषे च प्रतिषेधो वक्तव्यः॥ पंचपूली च पंचपूली च पंचपूली च पंचपूल्यः॥ नवान्यस्यानेकत्वात्।
नवा वक्तव्यः॥ किं कारणं॥ अन्यस्यानेकत्वात्। नैतद्द्विगोरनेकत्वं। कस्य तर्हि द्विग्वर्थसमुदायस्य। समाहारग्रहणं च तद्धितार्थप्रतिषेधार्थं। समाहारग्रहणं
च कर्तव्यं। किं प्रयोजनं। तद्धितार्थप्रतिषेधार्थं। तद्धितार्थे यो द्विगुस्तस्य मा भूदिति। पंचकपालौ पंचकपाला इति॥ किं पुनरयं पंचकपालशब्दः प्रत्येकं
परिसमाप्यते आहोस्वित्समुदाये वर्तते। किं चातः। यदि तावत्प्रत्येकं परिसमाप्यते पुरस्तादेव चोदितं परिहृतं च॥ अथ समुदाये पि वर्तते। नवा स
माहारैकत्वादसिध्यति। एवं तर्हि प्रत्येकं परिसमाप्यते। पुरस्तादेव चोदितं परिहृतं च॥ ॥ ॥श्री॥ ॥

र्थेः। पंचकपालाविति। संस्कृतार्थे विहितस्याणो द्विगोर्लुगनपत्ये इति लुक्। किं पुनरिति। यदि तावदेकस्मिन्संस्कृते प्रत्ययमुत्पाद्य लुकि कृते एकशेषः क्रियते तदा पंचपूल्य
इत्यनेन पंचकपाला इति समानं। अथ प्रथममेव पंचकपालेषु संस्कृता इति बहुत्वसंख्यायुक्तात् अर्थाद्विवक्ष्यंते तदा तेषां समाह्रियमाणत्वात्समाहाररूपतास्तीति राम० ११६
क्रियमाणेपि समाहारग्रहणे निवृत्तिर्न सिध्यतीत्यर्थः। एवं तर्हीति। न हि द्वयोर्बहूनां वा पुरोडाशानां पंचसु कपालेषु संस्कारः क्रियते अपि तु प्रत्येकमिति भावः॥
॥ ॥०॥ ॥श्री॥ ॥ ॥

अपरआहेति॥ न वा समाहारैकत्वादित्येतद्वार्त्तिकं सूत्रप्रत्याख्यानार्थमित्येतद्व्याचष्टे। अयंभावः। तिरोहितावयवभेदः समूहरूपः समाहारो द्विग्वर्थस्तत्रैकत्वाद्वचनपृथगादिवत्सिद्धमेकवचनमिति नार्थः सूत्रेणातस्मिंश्चासति समाहारग्रहणं न कर्त्तव्यं। क्रियमाणेनु सूत्रे समाहारग्रहणं तद्धितार्थद्विगुव्यावृत्त्यर्थं कर्त्तव्यमेव। तेन समाहारेणाप्युदितस्य द्विगोर्ग्रहणं भवति। यस्तु तद्धितार्थे न तस्य भवति। तेन पंचभिर्गोभिः क्रीताः पंचगवः पटाइत्यादौ द्विग्वर्थस्यैकवद्भावाभावः। यदा बहूनां पटानां पंचगुत्वं न तु प्रत्येकं तदैकशेषस्यायमविषयः। एतदेवमन्यमानेन भाष्यकारेण पूर्वं व्याख्याने समाम्नुतता प्रत्याख्यानलेन वार्त्तिकं व्याख्यो

अपरआह॥ न वा समाहारैकत्वात्। नवा योगारंभे गौरवार्थः। किंकारणं। समाहारैकत्वात् एकवचनं भविष्यति। द्विगुरेक॥ ॥ द्वंद्वश्च प्राणितूर्यसेनांगानां॥ ॥ प्राणितूर्यसेनांगानां तत्पूर्वपदोत्तर[redacted]पदग्रहणं। प्राणितूर्यसेनांगानां तत्पूर्वपदोत्तरपदग्रहणं कर्त्तव्यं। प्राणंपणगानां प्राणपणेगैरितिवक्तव्यं। तूर्यांगानां तूर्यांगैरितिवक्तव्यं। सेनांगानां सेनांगैरितिवक्तव्यं। किं प्रयोजनं। व्यतिकरो माभूदिति। तत्तर्हि वक्तव्यं। नवक्तव्यं। योगविभागात्सिद्धं। योगविभागः करिष्यते। प्राणंपणगानां। ततस्तूर्यांगानां। ततः सेनांगानामिति। स तर्हि योगविभागः कर्त्तव्यः। नकर्त्तव्यः॥ प्रत्येकमंगशब्दः परिसमाप्यते॥ ॥ ॥

तं। उत्तरपदे तु योद्विगुस्तदर्थस्यार्थान्तरे गुणभावाद्रस्वात्तंत्र्यात्सत्यपि मातिपदिकत्वे ततः प्रत्ययानुत्पादादेकवद्भावातिदेशः प्रयोजनाभावान्न प्रवर्त्तते॥ ॥ द्वंद्वश्च॥ ॥ तत्पूर्वपदोत्तरपदग्रहणमिति। यदंगवाचि पूर्वपदं तदंगवाच्येव यद्युत्तरपदं भवति तथाभूतस्यैकवद्भावो नान्यथेत्यर्थः। व्यतिकरो माभूदिति। पाणिमार्दंगिकाश्वारोहाइत्यादावेकवद्भावो माभूदित्यर्थः॥ प्रत्येकमिति॥ बहुवचनांतोंगशब्दः प्रत्येकमभिसंबध्यतइति भावः। पूर्वपक्षेपि प्रत्येकमेवांगशब्दस्य संबंधः। सलक्ष्यथा। प्राणंपणगतूर्यांगसेनांगवाचिनां द्वंद्वएकवदिति। नहि प्राणितूर्यसेनानामेकमंगंभवतीति सामर्थ्यादेव प्रत्येकपरिसमाप्तिरंगशब्दस्य सिद्धा। तस्मादन्यथा प्रत्येकपरिसमाप्तिर्बहुवचनां
॥ तस्य सतः प्रतिपाद्यते। तेनास्माद्ग्रहणवाक्याल्लक्ष्यसंस्कारकं वाक्यत्रयमुपप्लवतइति संक्षेपेण भवति॥ ॥ ॥

=वाचकत्वं नान्यत्र तदर्थः तथा च वक्तृणां प्राणंपणगानां सेनांगस्य सेनांगस्यकवत् प्राणिनोऽन्यार्थिप्रमाणदेकप्राणंपणगादिवाच्नित्यसमासे पाणिमार्दंगिकाश्वारोहाइत्यादावेकवद्भावाभावः। नचैवमपि छयोः प्राणंपणयोर्द्वंद्वे पाणिपादमित्यादावव्याप्तिरेवं तर्हि गसेनांगयोनवी तिवाच्यः आणंप

भा॰कै॰२ अनुवादे॥ यदाप्रतिपत्ताप्रमाणांतरावगतमप्यर्थंकार्यांतरार्थंप्रयोक्ताप्रतिपाद्यतेतदानुवादोभवति॥ ॥विशिष्ट॥ ॥जनपदविशेषोग्रामः॥ ग्रामेनाध्येयममस्थो
११८ ग्राम्यकुक्कुटइत्यादौग्रामग्रहणेनगरस्यापिग्रहणादर्शनाद्वचनं। अग्रामाइत्यत्रेति। उभयत्र इति। ग्रामनगरोभयावयवेग्रामसंबंधेवप्रतिषेधोवक्तव्यः। शौर्यंनगरं।
117 केतवताग्रामः। जांबवंनगरंशालूकिनीग्रामः॥ [redacted] ॥क्षुद्रजंतवः॥ ॥स्मृतीनांविरूद्धानांदर्शनात्प्रश्नः॥ केक्षुद्रजंतवइति। क्षोजव्या इति। अहो

अनुवादेचरणानां॥ ॥इहकस्मान्नभवति। नंदंतुकठकालापाः।वर्द्धंतांकठकौथुमाः। स्थेणोरितिवक्तव्यं। एवमपितिष्ठंतुकठकालापाइत्यत्रापिप्राप्नोति।
अद्यतन्यांचेतिवक्तव्यं। उदगात्कठकालापं।प्रत्यष्ठात्कठकौथुमं। उदगात्कौमोदपैप्पलादं॥ ॥विशिष्टलिंगोनदीदेशोऽग्रामाः॥ ॥ग्रामप्रतिषेधेनग
रप्रतिषेधः। अग्रामाइत्यत्रानगराणामितिवक्तव्यं। इहमाभूत्। मथुरापाटलिपुत्रमिति। उभयतश्चग्रामाणांप्रतिषेधोवक्तव्यः। शौर्यंचकेतव
ताचशौर्यकेतवते। जांबवंचशालूकिनीचजांबवशालूकिन्यौ॥ ॥क्षुद्रजंतवः॥ ॥क्षुद्रजंतवइत्युच्यते। केक्षुद्रजंतवः। क्षोजव्याजंतवःक्षुद्रजं
तवः॥ यद्येवंयूकालिक्षंकीटपिपीलिकमितिनसिध्यति। एवंतर्ह्यनस्थिकाःक्षुद्रजंतवः। अथवायेषांस्वंशोणितंनास्तितेक्षुद्रजंतवः॥ अथवाये
षामासहस्रादंजलिनेपूर्यंतेतेक्षुद्रजंतवः। अथवायेषांगोचर्ममात्रंराशिंहत्वानपततितेक्षुद्रजंतवः। अथवानकुलपर्यंताःक्षुद्रजंतवः॥ ॥
येषांचविरोधःशाश्वतिकः॥ ॥किमर्थश्चकारः। एवकारार्थश्चकारः। येषांविरोधःशाश्वतिकस्तेषांद्वंद्वएकवचनमेवयथास्यात्। यदन्यत्प्राप्नोतित
न्माभूदिति। किंचान्यत्प्राप्नोति। पशुशकुनिद्वंद्वेविरोधिनांपूर्वविप्रतिषिद्धमित्युक्तंतन्नवक्तव्यंभवति॥ ॥ ॥ ॥

र्थेकस्य। येक्षुद्यमानाअपिनम्रियंतेजलौकःप्रभृतयः। येतुम्रियंतेतेपापनिमित्तलारक्षोदनाहोः। नकुलपर्यंताइति। एतदेवदर्शनमत्रव्यापित्वादुत्पतोत्रतए एम॰
वैतत्पक्षाउपन्यस्तं॥ ॥येषांच॥ ॥यदन्यदिति। चकारेणायत्नेनपरोविकल्पोबाध्यते। तेनाश्वमहिषंकाकोलूकमितिनित्यएकवद्भावोभवति॥ ॥ ॥ ११८

शूद्राणां॥ ॥निरवसिता बहिष्कृता उच्यन्ते। तत्रावधिप्रश्नः॥ कुत इति। प्रागादर्शादिति। आदर्शोऽयं पर्वतविशेषः। दक्षिणेनेति। एनबन्तः। एनपा द्वितीया। प्रागादिभ्यः प्रथमान्तेभ्यो देशवृत्तिभ्यः मसयो विहितः। एतत्सर्वेत चतुष्टयमध्य आर्यावर्तो देश इत्यर्थः। यद्येवमिति। एतेषामार्यावर्ताद्वाह्यत्वादिति भावः॥ ग्राम इति॥ एतेष्वार्या निवसन्तीति भावः। तत्र ग्रामः प्रसिद्धः। घोषो गोमहिष्यादिनिवासः॥ संवाहो वणिक्प्रधानः। संस्त्याया इति। निवासविशेषा इत्यर्थः। मृतपाः डोम्बा इत्याहुः। याज्ञादिति। शूद्राणां पञ्चयज्ञानुष्ठानेऽधिका

शूद्राणामनिरवसितानां॥ ॥अनिरवसितानामित्युच्यते। कुतोऽनिरवसितानां। आर्यावर्तादनिरवसितानां। कः पुनरार्यावर्तः। प्रागादर्शात्प्रत्यक्कालकवनाद्दक्षिणेन हिमवन्तमुत्तरेण पारियात्रं। यद्येवं किष्किन्धगन्धिकं शकयवनं शौर्यक्रौञ्चमिति न सिध्यति॥ एवं तर्ह्यार्यनिवासादनिरवसितानां। कः पुनरार्यनिवासः। ग्रामो घोषो नगरं संवाह इति। एवमपि य एते महान्तः संस्त्यायास्तेष्वभ्यन्तराश्चण्डाला मृतपाश्च वसन्ति। तत्र चण्डालमृतपा इति न सिध्यति। एवं तर्हि याज्ञात्कर्मणोऽनिरवसितानां। एवमपि तक्षायस्कारं रजकतन्तुवायमिति न सिध्यति। एवं तर्हि पात्रादनिरवसितानां। यैर्भुक्ते पात्रं संस्कारेण शुध्यति तेऽनिरवसिताः। यैर्भुक्ते पात्रं संस्कारेणापि न शुध्यति ते निरवसिता इति॥ ॥गवाश्वप्रभृतीनि च॥ ॥गवाश्वप्रभृतिषु यथोच्चारितं द्वंद्ववृत्तं। गवाश्वप्रभृतिषु यथोच्चारितं द्वंद्ववृत्तं द्रष्टव्यं। गवाश्वं। गवाविकं। गवैडकं॥ ॥ ॥ ॥

रोऽस्तीति भावः। तक्षायस्कारमिति। तक्षादीनां यज्ञेऽधिकाराभावादिति भावः। संस्कारेणेति। यः संस्कारः स्मृतिकारैर्द्रव्यशुद्धौ पठितः तेनैव न तदधिकेनेत्यर्थः॥ ॥
गवाश्वम्॥ ॥यथोच्चारितमिति॥ गणे यादृशाः कृतावडः पठिता द्वंद्वास्तादृशानामेवेदं कार्यं एकवद्भावलक्षणं भवतीत्यर्थः। यदा त्वबहुत्वास्ति विकल्पितत्वात्तदा प्राप्तु द्वं
(१ द्वविभाषा भवति गोश्वं गोश्वा इति॥ एते नगणपाठरूपं विवक्षितमित्युक्तं भवति॥ ॥ ॥

मा०कै० २
११८

विभाषा वृक्ष॥ बहुप्रकृतिरिति॥ बहवो बहुत्वसंख्यायुक्ता वर्त्तिपदार्थाः प्रकृतयः कारणानि यस्य स बहुप्रकृतिः। बदरामलकमिति। जातिप्राणिनामिति सेकवद्भावः। क्वचित्तु बदरामलकानीत्यपि पठ्यते। तत्रैवं व्याचक्षते। नित्य एकवद्भावे प्राप्ते विकल्पो नेन क्रियते। अन्ये तु बदरामलकानीत्येवं प्राप्ते जातिलक्षणो नित्य एकवद्भावो बहुप्रकृतेर्भवतीति प्रदर्श्यते

विभाषा वृक्षमृगतृणधान्यव्यंजन॥ ॥ बहुप्रकृतिः फलसेनावनस्पतिमृगशकुनिक्षुद्रजंतुधान्यतृणानां। फलसेनावनस्पतिमृगशकुनिक्षुद्रजंतुधान्यतृणानां द्वंद्वः विभाषा एकवद्भवति बहुप्रकृतिरिति वक्तव्यं। फल। बदरामलकं। सेना। हस्त्यश्वं। हस्त्यश्वाः। वनस्पति। प्लक्षन्यग्रोधं प्लक्षन्यग्रोधाः। मृग। रुरुपृषतं रुरुपृषताः। शकुनि। हंसचक्रवाकं। हंसचक्रवाकाः। क्षुद्रजंतु। यूकालिक्षं। यूकालिक्षाः। धान्य। व्रीहियवं व्रीहियवाः। माषतिलं माषतिलाः। तृण। कुशकाशं कुशकाशाः। शरशीर्यं शरशीर्याः। किं प्रयोजनं। बहुप्रकृतिरेव यथा स्यात्। कुमाभूत्। बदरामलके इति। ततः। किं पुनरनेन या प्राप्तिः सा नियम्यते आहोस्विदविशेषेण। किं चातः। यद्यनेन या प्राप्तिः सा नियम्यते प्लक्षन्यग्रोधौ जातिप्राणिनामिति नित्यो द्वंद्वैकवद्भावः प्राप्नोति। अथाविशेषेण न दोषो भवति॥ यथा न दोषस्तथास्तु॥ पशुशकुनिद्वंद्वे विरोधिनां पूर्वविप्रतिषिद्धं। पशुशकुनिद्वंद्वे विरोधिनां येषां च विरोधः शाश्वतिक इत्येतद्भवति पूर्वविप्रतिषेधेन। पशुशकुनिद्वंद्वस्यावकाशः। महाजोरभ्रं महाजोरभ्राः। हंसचक्रवाकं हंसचक्रवाकाः। येषां च विरोधः शाश्वतिक इत्यस्यावकाशः। श्रमणब्राह्मणं। इहोभयं प्राप्नोति काकोलूकं श्वसृगालमिति। येषां च विरोधः शाश्वतिक इत्येतद्भवति पूर्वविप्रतिषेधेन। स तर्हि पूर्वविप्रतिषेधो वक्तव्यः। न वक्तव्यः। उक्तं च कारकरणस्य प्रयोजनं येषां च विरोधः शाश्वतिकस्तेषां द्वंद्व एकवचनमेव यथा स्यात् यदन्यत्प्राप्नोति तन्माभूदिति॥०॥

इत्यादिः। हस्त्यश्वमिति। सेनांगत्वेऽपि परत्वात् बहुलक्षणो विकल्पो भवति। किं पुनरिति। अस्मिन्प्रदेशे पठितत्वात्किमनन्तरसूत्रविहित एकवद्भावो नियतविषयो व्यवस्थाप्यते अथ प्रकरणविहित इति प्रश्नः। येषां सूत्रान्तरेणानेन च प्राप्तिर्वनस्पत्यादीनां तद्विषय एव संशयो न त्वन्यतरविषयः॥ यथा न दोष इति॥ व्यापित्वात्प्रकरणापेक्षोऽयं विषयनियम इत्यर्थः॥ ॥ ॥

एम०
११८

अश्ववडवयोरिति॥ पशुत्वाद्विभाषैकवद्भावः। तत्रैकवद्भावपक्षे नपुंसकत्वमपि प्राप्नोति पूर्ववदश्ववडवाविति सतिदेशात्पुंस्त्वमपि। तत्र परत्वात्पुंस्त्वे प्राप्ते पूर्वविप्रतिषेध उच्यते। प्रतिपदविधाना इति। नात्र पशुग्रहणेनैकवद्भावो विधीयते किं तर्ह्यश्ववडवग्रहणेन तत्र प्रतिपदविधानात्तस्य नपुंसकमित्येतद्भवति। तच्छब्देन ह्येकवद्भावभाजं परामृश्य नपुंसकत्वं विधीयते। तेन यथैकवद्भावो ऽत्र प्रतिपदं विधीयते तथा नपुंसकत्वमिति भावः। समाहारैकत्वादिति। तिरोहितावयवभेदो हि समाहारः स च वनस्पत्यादि वदेक इत्यर्थः॥ इहनिस इति॥ द्वंद्व

अश्ववडवयोः पूर्ववल्लिंगत्वात्पशुद्वंद्वनपुंसकं॥ अश्ववडवयोः पूर्ववल्लिंगत्वात्पशुद्वंद्वनपुंसकं भवति पूर्वविप्रतिषेधेन। अश्ववडवयोः पूर्ववल्लिंगत्वस्यावकाशः। विभाषा पशुद्वंद्वनपुंसकप्रसंग उभयं प्राप्नोति पशुद्वंद्वनपुंसकं भवति पूर्वविप्रतिषेधेन। सतर्हि पूर्वविप्रतिषेधो वक्तव्यः। न वक्तव्यः। प्रतिपदविधाना हि द्वंद्वे प्रतिपदमत्र नपुंसकं विधीयते। अश्ववडवपूर्वापरेति। एकवचनमनर्थकं समाहारैकत्वात्। एकवद्भावो ऽनर्थकः। किं कारणं। समाहारैकत्वात्। एको ऽयमर्थः समाहारो नाम तस्यैकत्वादेकवचनं भविष्यति। इदं तर्हि प्रयोजनं। एवं विज्ञास्यामि। इहनिसो विधिरिह विभाषेति। नैतदस्ति प्रयोजनं। आचार्यप्रवृत्तिर्ज्ञापयति सर्वो द्वंद्वो विभाषैकवद्भवतीति। यदयं तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य द्विवचनं नित्यमित्याह। इदं तर्हि प्रयोजनं। सनपुंसकमिति वक्ष्यामीति। एतदपि नास्ति प्रयोजनं। लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्य। न तर्हीदानीमिदं वक्तव्यं। वक्तव्यं च। किं प्रयोजनं। एवं त्रिनिसार्थं। उक्त

×पशुद्वंद्वनपुंसकं प्रदानपशुद्वंद्वनपुंसकं सोवकाशः। अश्ववडवौ। पशुद्वंद्वनपुंसकस्यावकाशः। अन्यपशुद्वंद्वः। महाजोरभ्रं महाजोरभ्राः×५×अश्ववडवं×५

१२ त्वव्यभिचारार्थं विभाषावृक्षमृगादि इति॥ ॥ ॥

श्चेत्सारम्भात्स्याद्योगात्प्राकृनिसो विधिः। अनेन तु योगद्वयेन विभाषेत्यर्थः। यदयमिति। यद्येतत्प्रकरणे पाञ्चानामेवैकवद्भावः स्यात्तदा तिष्यपुनर्वस्वोर्शब्दयोरत्रापठितत्वादेकवद्भावस्याभावात्तन्निवृत्तये बहुवचनग्रहणमनर्थकं स्यादित्यर्थः॥ पूर्वत्रेति। प्राण्यंगादीनां समाहार एवैकत्वमपर्थमित्यर्थः। उत्तरत्रेति। क्वचिज्ज्ञातिरप्राणिनामित्यत्र प्रवृत्ति

=आव्यभिचारार्थमिति। नियतैकवद्भावस्याव्यभिचारार्थमित्यर्थः। १३ भाषा। मृगादीनां तु व्यतिकर निरासार्थम्॥ ॥ ॥

अनुप्रयोग इति समाहारद्वन्द्वः उपदंशं पाणिपादमिति सेवेयं लेखे तत्र प्रयोगे तूपदंशः पाणिपादाविति यदि पदीत प्रसंगादोष इत्याशयः। भाष्ये नैतदस्तीति। तत्रेणयमेव स्मैकवचनविधानेन चाधिकार्थमनुप्रयोगे दोषकथनात्तत्प्रयोजकमुदाहरणमित्यर्थः। २ अव्ययीभाव एवेति।

मा॰कौ॰२
११९
117

विभाषासः॥ ॥ अनुप्रयोगे दोषदर्शनात्प्रश्नः। किमुदाहरणमिति। कः प्रसंग इति। नन्वर्थे स्यैकवद्भावादनुप्रयोगस्यापि से स्यादिति। नैतदस्ति। यदितावदव्ययीभाव एवानुप्रयु
ज्यते तदा तस्याव्ययत्वादसंख्यत्वाद्बहुवचनं न स्यात्। सत्यपि वा तस्मिन्नभावे कृते उपदशा इति न स्यात्। अथ बहुव्रीहिरेवानुप्रयुज्यते तदोपदशस्य पाणिपादस्येति
षष्ठी स्यात्। उपदशामिति चेष्यते। एतदेव मनसि कृत्वाह। एवं तर्हीति। अव्ययीभावोऽव्ययं विभक्तीति विहितः। बहुव्रीहिस्तु संख्ययाव्ययेति। तदा देति। अव्ययीभावस्या

विभाषासमीपे॥ ॥ किमुदाहरणं। उपदशं पाणिपादं उपदशाः पाणिपादाः। नैतदस्ति प्रयोजनं। अयं द्वैकवद्भावः प्रारभ्यते तत्र कः प्रसंगो यदनुप्रयो
गस्य स्यात्। एवं तर्ह्यव्ययस्य संख्ययाऽव्ययीभावोप्यारभ्यते। बहुव्रीहिरपि। तद्यदा तावदेकवचनं तदाऽव्ययीभावोनुप्रयुज्यते एकार्थे स्यैकार्थ इति॥
यदा बहुवचनं तदा बहुव्रीहिरनुप्रयुज्यते बह्वर्थे स्य बह्वर्थ इति॥ ॥ तत्पुरुषोऽनञ्कर्मधारयः॥ ॥ किमर्थमिदमुच्यते। संज्ञायां कन्थोशी
नरेष्विति वक्ष्यति तदतत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति। नैतदस्ति प्रयोजनं। न हि संज्ञायां कन्थान उशीनरेषु तत्पुरुषो नञ्समा
सः कर्मधारयो वास्ति। उत्तरार्थं तर्हि उपज्ञोपक्रमं तदाद्याचिख्यासायामिति वक्ष्यति तदतत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति। नै
तदस्ति प्रयोजनं। न हि तदाद्याचिख्यासायामुपज्ञोपक्रमान्तो तत्पुरुषो नञ्समासः कर्मधारयो वास्ति। उत्तरार्थमेव तर्हि छायाबाहुल्य इति वक्ष्य
ति तदतत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति। नैतदस्ति प्रयोजनं॥ ॥ "श्री॥ ॥

व्ययत्वादसंख्यत्वादेकवचनस्य उत्सर्गत्वादिति भावः। एकार्थे इति। अपि भेदैकत्वाश्रयादित्याहुः॥ यदेति। बहुव्रीहेः समीपप्रधानत्वाद्बह्वर्थत्वमिति भावः॥ ॥ तत्पुरुषो एम॰
॥ ॥ उत्तरेषु केषुचिद्योगेष्वन्यथासिद्धिं दृष्ट्वा पृच्छति। किमर्थमिति। शिष्यबुद्धिपरीक्षार्थमन्यथासिद्धमपि तावत्प्रयोजनमाह। पश्चात्तेनन्यथासिद्धं दर्शयिष्यति। न ११९
हीति। अनादिस्तत्र संज्ञा गत्यतेन त्विदानीं तत्रेति भावः। न हीति। षष्ठी तत्पुरुषादिना तदादित्वासंप्रत्ययः॥ ॥ "

= भागार्थः संघवचनः पञ्चावयवश्चेत्समिप्रेसाम् अपाकलेति वचनादिति ॥ १ =

नहि छायांतत्र इति ॥ पूर्वपदार्थे धर्मो बाहुल्यं न च षष्ठी तत्पुरुषादिना बाहुल्यं गम्यते। नहि सभांतर इति। अपुशालेति वचनात्संघातवचनः सभाशब्दोऽयात्यो न च समूहिभिर्विना समूहोपपत्तिरिति षष्ठीतत्पुरुषस्यैवग्रहणमिति भावः ॥ इदं तर्हीति। अत्र तु प्रदेशे मंदबुद्ध्यनुग्रहाय अधिकारः कृतः ॥ परवत् ॥ ॥ द्वंद्वापेक्षया किमिदं विध्यर्थमाहोस्विन्नियमार्थे। तथाकिं षष्ठी निर्देशे न समासार्थस्य लिंगातिदेशः अथ सप्तम्याश्रयेण पूर्वपदस्य संशयानः पृच्छति। किमर्थमिति। षष्ठी निर्देशो नियमश्चेति भावः। तत्रावयवा
द्वंद्वोपमिति

नहि छायांतो बाहुल्ये तत्पुरुषो नञ्समासः कर्मधारयो वास्ति। उत्तरार्थमेव तर्हि सभाराजामनुष्यपूर्वो अशालाचेति वक्ष्यति ॥ तदंतत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति। एतदपि नास्ति प्रयोजनं। नहि सभांतोऽशालायामतत्पुरुषो नञ्समासः कर्मधारयो वास्ति। इदं तर्हि विभाषा सेनासुरेति वक्ष्यति तदंतत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति। तत्पुरुष इति किमर्थं। दृढसेनो राजा। अनञिति किमर्थं। असेना। अकर्मधारय इति किमर्थं। परमसेना। उत्तमसेना ॥ परवल्लिंगं द्वंद्वतत्पुरुषयोः ॥ ॥ किमर्थमिदमुच्यते ॥ द्वंद्वोयमुभयपदार्थप्रधानः। तत्र कदाचित्पूर्वपदस्य यल्लिंगं तत्समासस्यापि स्यात्कदाचिदुत्तरपदस्य। इष्यते च परस्य यल्लिंगं तत्समासस्यापि स्यादिति तच्चांतरेणायत्नं न सिध्यतीति परवल्लिंगं द्वंद्वतत्पुरुषयोरित्येवमर्थमिदमुच्यते। तत्पुरुषश्चापि कः प्रयोजयति यः पूर्वपदार्थप्रधान एकदेशिसमासोर्द्धपिप्पलीति ॥ योह्युत्तरपदार्थप्रधानः ॥ ० ॥ ॥

र्थव्यतिरिक्तः समुदायार्थो नास्तीत्युभयपदार्थप्रधान इत्यनेन दर्शितं भवति ॥ तत्र पदान्तरापेक्षितत्वे परस्परविरुद्धलिंगावयवार्थाविव समुदायार्थस्तदा पर्यायेण लिंगद्वयप्रसंगे नियमार्थमिदं संपद्यते। यद्येवं परस्यैव संबंधि लिंगं क्रियते इति सादृश्याभावादिति निर्देशो नोपपद्यते। नैष दोषः। केवलावस्थाभेदाश्रयेण भेदमाश्रित्य वतिनिर्देशः
(कृतः ॥ तत्पुरुषापेक्षया विध्यर्थत्वं दर्शयति। तत्पुरुषस्यापीति ॥ ॥ ॥

= समुदायार्थो नास्तीति मद्भिन्नविशादिनावश्यगणपक्षस्तु अवयवार्थव्यतिरिक्तः समुदायार्थः अवयवलिंगवास्तितोस्त्यभेदः ॥ २ =

भा० कै० २
१२०
120

दैवकृतमिति॥ अयत्न सिद्धमिसर्थः॥ पूर्वपदस्य चेति। सप्तमी निर्देशाश्रयेण शेषो द्रावुनं। तत्र स्वयमर्थो भवति। द्वंद्वतत्पुरुषे चयसरंत द्विलिंगं भवतितत्र कार्यिणोनुपादाना सरशब्दसप्तंबंधि शब्द स्त्वात तदाक्षिप्तं पूर्वपदमेव कार्यभाक् भाप्नोति। तत्र मयूरी कुक्कुटाविति पूर्वपदस्य पुंस्त्वातिदेशे स्त्रीप्रत्ययनिवृत्तिप्रसंगः कुक्कुटमयूर्यौ इसत्र स्त्रीप्रत्ययप्रसंगः तथार्द्धपिप्पली सादावपीति प्रतिषेध उच्यते। पूर्वपद प्रतिषेधे चकृते सामर्थ्यात् द्वंद्वतत्पुरुषयोरेव कार्यित्वं संपद्यते। यदि पुनरिति। षष्ठी निर्देशो व्यतिरिक्तसमुदायदर्शनेचाश्रीयते। व्यतिरिक्त समुदाय पक्षे हि मुख्यसादृश्यो प पत्तिरिति भावः। समासादन्यदिति। समासार्थलिंगमुपचारात्समासशब्देनोच्यते। तेनोत्तरपदार्थलिंगसदृशं

दैवकृतं तत्सपरवल्लिंगं॥ परवल्लिंगं द्वंद्वतत्पुरुषयोरितिचेत्प्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः [redacted] प्राप्तो जीविकांप्राप्तजीविकः। आपन्नोजीविकामापन्नजीविकः। अलंपूर्वा। अलंजीविकायै अलंजीविकः। गतिसमास। निष्कौशांबिः निर्वाराणासिः। पूर्वपदस्य च। पूर्वपदस्य च प्रतिषेधो वक्तव्यः। मयूरीकुक्कुटौ। यदिपुनर्यथाजातीयकं परस्यलिंगं तथाजातीयकं समासादन्यदतिदिश्यते। समासादन्यल्लिंगमितिचेदश्ववडवयोष्टापोलुग्वचनं। समासादन्यल्लिंगमितिचेदश्ववडवयोष्टापोलुग्वक्तव्यः। अश्ववडवौ। निपातनात्सिद्धं। निपातनात्सिद्धमेतत्। किंनिपातनं॥ ॥ ॥

समासार्थस्यस्वंलिंगबाधनायलिंगांतरमतिदिश्यते इत्युक्तं भवति। अश्ववडवाविति। परवल्लिंगे प्राप्ते पूर्ववदश्ववडवाविति पूर्वपदार्थलिंगसदृशं पुल्लिंगं समासार्थस्य विधीयते न तूत्तरपदार्थस्येति स्त्रीत्वस्यानिवृत्तेर्नाट्टापः श्रवणोप्राप्ते लुग्वक्तव्यः। निपातनादिति। टाब्निवृत्त्यारूपमेतदित्यर्थः। पूर्ववदश्ववडवाविति निपातनसामर्थ्यात्तु न युज्यते वचनांतरे पूर्वपदलिंगातिदेशाप्रसंगादश्ववडवानश्ववडवैरिति मत्वा पृच्छति। किन्निपातनमिति॥ ॥ ॥श्री॥ ॥

रा०म०
१२०

अम्ववद्दवृस्वोपरेति॥ अम्ववद्दवाधृस्वोपरेति वक्तव्येटा पोनुच्चारणमि सम्ववद्दवयोर्द्वंद्वे टाप्त्रिवस्येने। उपसर्जनेन हृस्वत्वमिति। अनेकमिति प्रथमानिर्दिष्टत्वात् समुदायार्थे ऽवयवार्थे स्यगुणभावा उपसर्जनत्वमिति भावः। इहापीति। ततश्च कुक्कुटमयूरी इति प्राप्नोति॥ यावच्छब्दार्थो विति॥ लिंगशब्देन लिंगाभिधायी प्रत्ययो र्थस्तेनेगोकशेषेणवो ध्यत इत्यर्थः॥ आति देशिकस्य श्रवणमिति॥ तस्यानुपसर्जनत्वात्तदंतस्य चा गौ तिपरिकल्पात् हृस्वाभावात्। द्वौ ष्यङाविति। नत्रयस्येति चेसाकारलोपेकृते द्वौ यकारौ श्रूयेपाताम्। हलोयमामिति विक

= अप्रातिपदिकत्वादिति। नचालिंगविशिष्टपरिभाषयानत्वं गोस्त्रियोरित्यत्र प्रातिपदिकग्रहणानुवृत्तेस्तेन स्त्रीप्रत्ययांतस्य विशेषणत्वामर्थ्यादिति दिष्टप्रातिपदिकत्वस्य नत्वाग्रहणात् अत एव गौ किकार्येवो पसर्जनं तत्रत्य सूत्रे इति मनेगौ गला कौशिका स्त्री प्रत्ययांतेषु स्वाभाव ॥१॥

अम्ववद्दवृस्वोपरेति॥ उपसर्जनहृस्वत्वं वा। अथवा उपसर्जनस्येति हृस्वत्वं भविष्यति। इहापि तर्हि प्राप्नोति। कुक्कुटमयूर्यौ इति॥ अस्तु परवल्लिंगमिति शब्दशब्दार्थौ। परवल्लिंगमिति शब्दशब्दार्थावतिदिश्येते। तत्रौ परे ष्टिकस्य हृस्वत्वमातिदेशिकस्य श्रवणं भविष्यति। इदं तर्हि दत्ता च कारीषगंध्या च दत्ता कारीषगंध्ये। दत्ता च गार्ग्यायणी च दत्तागार्ग्यायण्यौ। द्वौ ष्यङौ क्रोष्ट्वौ च प्राप्नुतः। स्त्रीपुंवद्भावेनैकस्य निवृत्तिर्भविष्यति। इदं तर्हि दत्ता च युवतिश्च दत्ता युवती द्वौ तिशब्दौ प्राप्नुतः। तस्मान्नैतच्छक्यं वक्तुं शब्दशब्दार्थावतिदिश्येते इति। ननु चोक्तं समासादन्यल्लिंगमिति चेदम्ववद्दवयोष्टाब्वचनमिति। परिहृतमेतत्। निपातनात्सिद्धमिति। अथवा नैवं विज्ञायते॥ ॥ ॥ ॥

= ननु षष्ठीनिर्देशेन निगमगोत्रवात्समीपविधिर्थतेनाथर्वं नचगत्रापि सूर्ये पदमतिशेषकारणे गौ यदं नियमपक्षेः चपदवयोष्टाकुङ्नागनगौ रवेण तस्यानिमानात् समर्थपक्षोहि सर्वदम्ववस्था विसनेन नसूर्यपदार्थ लिंगस्यो न पदार्थे ति देशातस्त्री लाभावेटाक्ति

ल्पितो लोपः। यद्यपि यणो मय इति द्विर्वचने नात्रभाव्यंतथापि पक्षे यकारत्रयं प्रसंगः। पुंवद्भावेनेति। भस्याढे तद्धित इत्यनेनेति भावः। द्वौ तिशब्दाविति। अत्र त्यभत्वान्न्या स्तिपुंवद्भावः। तस्मान्नैतदिति। उपसर्जनहृस्वत्वं तु न भवत्यन्वर्थसंज्ञाविज्ञानादप्रधानस्योपसर्जनसंज्ञाविधानात् सकलपदार्थप्रधानत्वाच्च द्वंद्वस्य। व्यतिरिक्तसमुदा ॥ याथ्यभ्युपगमे पि अवयवानां कार्यसंबंधात्फलतः प्राधान्यमेव। अथवेति। नायं नियमः किंतु विधिरित्यर्थः॥ ॥

श्रवण ॥

= अवयवानां कार्यसंबंधादिति। यत्सारसोदिवसमुदायवसमुदायिनोरभेदेनेति भावः॥१॥

भा॰कै॰२
१२१
१२१

परस्यैवेति॥ एवशब्दप्रयोगेण नियमं निषेधाय दर्शयति। नत्वेवार्थेव तिर्विहितः। यथा च नियमपक्षे वतिरुपपद्यते तथा पूर्वमेव प्रतिपादितं। इह त्रीणि दर्शनानि। अवयवाव पेक्षितपरस्परो द्वन्द्वार्थः न तु व्यतिरिक्तः समुदायोस्ति। अत्र तु दर्शने नियमार्थमिदं। अवयवार्थव्यतिरिक्तः समुदायो द्वन्द्वार्थः स चावयवलिङ्गेन लिङ्गवानिति सत्रापि दर्शने पर्याये ण लिङ्गप्राप्तौ वचनं नियमार्थं। यदा तु समुदायो द्वन्द्वार्थः स चालिङ्ग इति दर्शनं तदा विध्यर्थमिदं। अथ पूर्वपदस्येति। अतः पूर्वपदस्येत्यर्थः। एतेन मयूरीकुक्कुटाविति परिहृ तं षष्ठ्याश्रयेण दर्शनत्रयेपि। मध्यमे तु दर्शनेऽपाश्रयभेदाल्लिङ्गभेदाश्रयेण परवदिति सादृश्याश्रयो वतिः। एकदेशिसमासोनारभ्यत इति। पूर्वापराधरोत्तरेत्ययोगत्र यनार

परस्यैव परवदिति कथं तर्हि परस्येव परवदिति॥ यथा जातीयकं परस्य लिङ्गं तथा जातीयकं समासस्यातिदिश्यते [redacted] अथ पूर्वपदस्य न प्रतिषिध्यते [redacted]। प्राप्तादिषु कथं। प्राप्तादिषु चैकदेशिग्रहणात्सिद्धं। द्वन्द्वैकदेशिनोरिति वक्ष्यामि। तदेकदेशिनोग्रहणं कर्तव्यं। न कर्तव्यं। एकदेशिसमासोना रभ्यते। कथमर्द्धपिप्पलीति समानाधिकरणो भविष्यति। अर्द्धं च सा पिप्पली च अर्द्धपिप्पलीति। न सिध्यति। परत्वात्षष्ठीसमासः प्राप्नोति। अयं पुनर यमेकदेशिसमास आरभ्यमाणः षष्ठीसमासं बाधते। इष्यते च षष्ठीसमासोपि। तद्यथा। अपूपार्द्धं मया भक्षितं ग्रामार्द्धं मया लब्धमिति। एवं पिप्प
ल्यर्द्धमिति सपि भवितव्यं। कथमर्द्धपिप्पलीति। समानाधिकरणो भविष्यति॥ ॥ ॥

भ्यते। परवल्लिङ्गं द्वन्द्वसमासे सेनावृत्त्याक्रियते सूत्रमित्यर्थः। अर्द्धं च सा पिप्पली चेति। अवयवे समुदायोपचारात्सामानाधिकरण्यं। तत्रोत्तरपदार्थस्य प्राधान्यात्तदीयमेव लिङ्गं तस्य रूपस्यापि भवतीति नार्थस्तत्पुरुषग्रहणेनेत्यर्थः॥ परत्वादिति। अयमर्थः। नत्रैव प्रयोजनादिष्टं मुख्यशब्दार्थत्वं पुनमिति भेदाश्रयणमेव परं मुख्यं प्रधानं तत्र षष्ठीसमास एव प्राप्नोति भिन्नविषयत्वात्तु शास्त्रापेक्षं परत्वमत्र न विवक्षितं। समानाधिकरणो भविष्यतीति। एवमादिप्रयोगसिद्धिरेवोपचाराश्रयणस्य प्रयोजनं। मुनित्रयाच्च राम॰
१२१
आ भाष्यकारः प्रमाणतरमधिकलक्ष्यदर्शित्वात्॥ ॥ ॥ ॥

रात्रा॥ ॥अनुवाक इति॥ अनूच्यत इत्यनुवाकः स च विशिष्टं वाक्यसमभिधेयमिति नपुंसकत्वे प्राप्ते वचनं॥ अपथं॥ ॥पुण्याहमिति॥ रात्राह्नाहाः पुंसीति प्राप्ते वचनं॥ सुदिनाहमिति॥ सुदिनशब्दोत्र प्रशंसामात्रवाचीति न सुदिनाहशब्दयोर्युगपद्विरुद्धः प्रयोगः॥ दृश्यते च प्रशंसार्थस्य प्रयोगः॥ सुदिनासु सुसमासु कार्यमेतत्र विचिन्वीत विशेषतः सुयंचेति॥ चतुष्पथमिति॥ षष्ठीतत्पुरुषः॥ समाहारद्विगौ तु सिद्धमेव नपुंसकत्वं॥ उत्पथमिति॥ कुगतिप्रादय इति तत्पुरुषः॥ अव्ययादित्वात् पथशब्दस्य नपुंसकत्वे सिद्धे किं सूत्रेणेति चेत् सूत्रे कालत्वात्तत्रस्य नायं दोषः॥ द्विगुश्च समास इति॥ स नपुंसकमित्यस्यानन्तरमेकोक्तौ द्वंद्व एव स इत्यनेन परामृश्यते इति द्विगोरप्राप्ते नपुंसकत्वमिति वचनं

≈नतु द्विगुरेकवचनमिति द्विगुः॥७≈

रात्राह्नाहाः पुंसि॥ ॥अनुवाकादयः पुंसि॥ अनुवाकादयः पुंसि भाष्यन्त इति वक्तव्यं॥ अनुवाकः॥ शंयुवाकः॥ रात्रा॥ अपथं नपुंसकं॥ ॥पुण्यसुदिनाभ्यामह्नो नपुंसकत्वं वक्तव्यं॥ पुण्याहं सुदिनाहं॥ पथः संख्याव्ययादेरिति वक्तव्यं॥ द्विपथं त्रिपथं चतुष्पथं॥ उत्पथं विपथं॥ द्विगुश्च॥ द्विगुश्च समासो नपुंसकं भवतीति वक्तव्यं॥ पंचगवं दशगवं॥ अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यत इति वक्तव्यं॥ पंचपूली दशपूली॥ वाबन्तः॥ वा आबन्तः स्त्रियां भाष्यत इति वक्तव्यं॥ पंचखट्वी पंचखट्वं॥ दशखट्वी दशखट्वं॥ ॥ ॥श्री॥ ॥

≈ [illegible] ≈

नायं यथासमं त्रितमित्यत्र संबोधनप्रथमैव परामृश्यते॥ समाहारद्विगोश्चेत्यग्रहणं न तु तद्धितार्थद्विगोः॥ पंचगवमिति॥ यदा पंच गावः समाहृता इत्यर्थे द्विगुस्तदोत्तरपदार्थस्य प्राधान्यात्तदीयं लिंगं प्राप्नोति॥ यदा तु समूहोभिधेयस्तदा तस्य वचनं सेनासंघ इत्यादिवदनियतलिंगत्वप्राप्तमिति वचनं॥ पंचखट्वीति॥ टाप उपसर्जनत्वे ह्रस्वत्वे कृते द्विगोरिति ङीप्॥ यदा तु समूहोभिधेयस्तदोपसर्जनह्रस्वत्वं सिध्यति न तु समाह्रियमाणोभिधेय इति तत्रैव सूत्रे उक्तं॥ पंचखट्वमिति तत्र तस्य सुपसर्जनत्वेन पुंसके ह्रस्वत्वं सिध्यति॥ उपसर्जनत्वे तु परत्वात्तदाश्रयं ह्रस्वत्वं॥ ॥ ॥

भा०कै०२ अनो नलोपश्चेति॥ चशब्देन वा स्त्रियां भाष्यत इति समुच्चीयते नलोपस्तु नित्यमेव क्रियते। उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणनिषेधात् सहत्वाभावाल्लोपेन प्राप्नो
१२२ नीति वचनं। पात्रादिभ्य इति। तादर्थ्ये चतुर्थीयं। आकृतिगणश्च पात्रादिः॥ ॥अर्द्धर्चाः॥ ॥कार्षापणादिसंग्रहायाह। अर्द्धर्चादय इति वक्तव्यमिति। बहुवचननिर्द्दे
122

अनो नलोपश्च॥ वा च स्त्रियां भाष्यत इति वक्तव्यं। पंचतक्षी पंचतक्षं। पात्रादिभ्यः प्रतिषेधो वक्तव्यः। पंचपात्रं द्विपात्रं॥ ॥अर्द्धर्चाः
पुंसि च॥ ॥अर्द्धर्चादय इति वक्तव्यं। अर्द्धर्चं अर्द्धर्चः। कार्षापणं कार्षापणः। गोमयं गोमयः। सारकं सारकः। तत्र हि वक्तव्यं न वक्तव्यं। बहुवच
न निर्द्देशादाद्यर्थो गम्यते॥ ॥इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ॥ ॥अन्वादेशे समानाधिकरणग्रहणं। अन्वादेशे समाना
धिकरणग्रहणं कर्त्तव्यं। किं प्रयोजनं। देवदत्तं भोजय इमं चेत्प्रसंगार्थं। इह माभूत्। देवदत्तं भोजय इमं च यज्ञदत्तं भोजयेति। अ
न्वादेशश्च कथितानुकथितमात्रं। अन्वादेशश्च कथितानुकथितमात्रं द्रष्टव्यं। तद्धेयं विजानीयादिदमा कथितमिदमेवानु
कथ्यत इति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे अन्वादेशश्च कथितानुकथितमात्रमिति॥ अथ किमर्थमशादेशः क्रियते। न त्रतीया
दिषु सेवोच्येत॥ तत्र टायामोसि च एनेन भवितव्यमस्याः सर्वो हलादयो विभक्तयः। तत्र इद्रूपलोपे कृते केवलमिदमोनुदात्त
९ त्वं वक्तव्यं। अत उत्तरं पठति॥ ॥ ॥

-नैषमानिदृष्यमेवेसर्थः॥२-

शात्सिद्धमिति। साहचर्यादर्द्धर्चे शब्देनान्येषामभिधानात्॥ ॥इदमो॥ ॥पश्चात्कथनमन्वादेश इत्यधिकरणप्रसंगनिवारणायाह। अन्वादेशे इति। इमं चेति। एनादेशः प्र०
प्राप्तो निवार्यते। अन्वादेशश्चेति। प्रसा सत्ये दमेव कथितं नैव तदान्वादेशो भवतीति भ्रांतिवारणाय वा त्रिकं। तत्र समानाधिकरणग्रहणाच्छब्दांतरेणेदमा वा कथितं यदानुक १२२
×यदानुकथ्यते तेन×९९ [redacted] प्यते तदान्वादेशो भवति॥ द्रष्टव्यमिति। विपरीतत्वादनभिमतमेवेत्यर्थः॥ ॥ ॥

साकच्कार्थमिति॥ साकच्कस्ये ड्रूपल्लोपो नास्य क इत्यधिकारात्। नापि चेड्रूपल्लोपेनाप्यामिता दिसिध्यति। अंसस्येति। सदादित्वादकारस्येत्यर्थः। अअइति। समुदायाद्विभक्ति-
रर्थवत्त्वाद्भवति। ततोऽकारस्यापदान्तत्वाद् तोगुण इति पररूपं क्रियते। तत्रादेशप्रवृत्तिकाले समुदायं अअ इति प्रवर्तते। तत्रानेकाल्त्वात्सर्वादेशे प्रवृत्ते पररूपं प्रवर्तते॥

अशादेशवचनं साकच्कार्थम्। अशादेशवचनं साकच्कार्थं क्रियते साकच्कस्यायमादेशो यथा स्यात्। इमकाभ्यां छात्राभ्यां रात्रिरधीता। अथो आभ्यामहरप्यधी-
तमिति। अथ किमर्थं शित्करणम्। शित्करणं सर्वादेशार्थम्। शित्करणं क्रियते शित्सर्वस्येति सर्वादेशो यथा स्यात्। इमकाभ्यां छात्राभ्यां रात्रिरधीता। अथो आभ्या-
महरप्यधीतमिति। अक्रियमाणे हि शित्करणेऽलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य प्रसज्येत। न वान्त्यस्य विकारवचनानर्थक्यात्। न वा वक्तव्यम्। किं कारणम्। अन्त्य-
स्य विकारवचनानर्थक्यात्। अकारस्याकारवचने प्रयोजनं नास्तीति कृत्वाऽन्तरेणापि शकारं सर्वादेशो भविष्यति। अर्थवत्त्वादेशप्रतिषेधार्थम्। अर्थव-
त्त्वकारस्याकारवचनम्। कोऽर्थः। आदेशप्रतिषेधार्थम्। येऽन्येऽकारस्यादेशाः प्राप्नुवन्ति तद्बाधनार्थम्। तद्यथा। मोराजिसमः क्वौ इति मकारस्य मकार-
वचने प्रयोजनं नास्तीति कृत्वा अनुस्वारादयो बाध्यन्ते। तस्माच्छित्करणम्। तस्माच्छकारः कर्तव्यः। न कर्तव्यः। प्रश्लिष्टनिर्देशोऽयम्। अ अ। अनेका-
ल्शित्सर्वस्येति सर्वादेशो भविष्यति। अथवा विचित्रास्तद्धितवृत्तयः। नान्त्यादेशेऽनुसध्यते॥ ॥ ॥

येन्येप्रति॰पनकूपदीर्घत्वानांबाधनायाकारस्याकारविधानंस्यादितिसिद्धेतादृशेसर्वादेशोनप्राप्नोतीतिभावः॥

अथवेति। आदेशस्यैव प्रत्याख्यानं क्रियते अनुदात्तत्वमात्रमेव विधेयमित्यर्थः। नान्त्यादेश इति॥ महाविभाषाधिकाराद्व्यवस्थितविभाषाविज्ञानात्। किंचानुवृत्तिकृतेनेनचाशा-
देशः स्तात्। अद्यर्थगतिः प्रकरणाद्यधीना तद्वरमनुसन्धिरे वाकचोस्तु। एवं त्यादेशो न विधातव्यो भवति॥ ॥ ॥ ॥

एतदः॥ ॥प्रत्याततइत्यत्र त्वल्तसिलोः कृतयोः प्रकृते लित्स्वरे कृते शेषनिघाते प्रसयानुदात्तत्वे सत्यशनुदात्तः कृ िष्यते तत्रैतदस्त्रतसोरित्येतावत्सूत्रं कर्त्तव्यमितिप्रश्नः किमर्थमिति। उदात्ताविति। प्रत्ययस्वरेण। नित्यमिति। लित्स्वरस्त्वनुदात्तत्वे कृते न प्रवर्त्तते। अनुदात्तविधानसामर्थ्यात्। एतच्चोत्सर्गापवादभावमनपेक्ष्योक्तं। लितिपूर्वं इति॥ औपश्लेषिकाधिकरणविवक्षायां सप्तमी। उपपदविभक्तेः कारकविभक्तिर्बलीयसीतिदिग्योगलक्षणा पंचम्यभावः। प्रत्ययस्वरः प्रसज्येतेति। अपवादाप्रवृत्ता बुत्स

एतदस्त्रतसोस्त्रतसौ चानुदात्तौ॥ ॥किमर्थंत्रतसोरनुदात्तत्वमुच्यते। उदात्तौमाभूतामिति। नैतदस्तिप्रयोजनं। लित्स्वरे निघाते एतदनुदात्तत्वेन सिद्धं। इदमिहसंप्रधार्यमनुदात्तत्वं क्रियतां लित्स्वर इति। किमत्रकर्त्तव्यं। परत्वाल्लित्स्वरः। नित्यमनुदात्तत्वं। कृतेपि लित्स्वरे प्राप्नोत्यकृतेपि। तत्रनित्यत्वादनुदात्तत्वे कृते लितिपूर्वं उदात्तभावीनास्तीतिकृत्वा यथाप्राप्तः प्रत्ययस्वरः प्रसज्येत। तद्यथा। गोष्पदप्रं वृष्टो देवः। ऊल्लोपे कृते पूर्वं उदात्तभावीनास्तीतिकृत्वा यथाप्राप्तः प्रत्ययस्वरो भवति। तस्माच्चत्रतसोरनुदात्तत्वं वक्तव्यं॥ द्वितीया टौस्स्वेनः॥ ॥कस्मायमेनो विधीयते॥ एतदः प्राप्नोति॥ इदमोपि लिष्यते। तदिमोग्रहणं कर्त्तव्यं। न कर्त्तव्यं॥ प्रकृतमनुवर्त्तते। क्वप्रकृतं। इदमोऽन्वादेशेशनुदात्तस्तृतीयादाविति॥ पदितदनुवर्त्तते एतदस्त्रतसोस्त्रतसौ चानुदात्तावित्यस्मिन्नेति

=सन्तानुमापकंस्यात्=२

गस्यावधेप्रवर्त्तनात्। गोष्पदप्रमिति। वर्षप्रमाण ऊलोपश्चास्यान्यतरस्यामितिसूत्रेलोपणमुत्वोसह विधीयते तत्तोलित्स्वरामावात्प्रत्ययाद्युदात्तत्वे सति कृदुत्तरपदप्रकृतिस्वरेणांतो दात्तं पदं भवति॥ द्वितीया॥ ॥उभयोरादेशयोरेकत्वादेतदएवानंतर्यान्नत्यसंगास्तछति॥ कस्येति। नकर्त्तव्यमिस्युत्तरं। इदमोपीति। इदंशब्दाच्च त्वलोह प्रत्ययेन बाधि

१तस्मादेशविधानमेव [redacted] सन्तानुमानंस्यात्॥ ॥ ॥ ॥

भाव:।१

मंडूकगतय इति। इह केवलस्यादेशस्योपादानादवश्यापेक्षः स्थानी नतुपूर्वे त्रसापेक्षात्स्थानिनोनिर्देशादिति॥ अथ वैकयोग इति। एकं ग्रहणं कृत्वा क्रमिसम्बन्धेः तदपेक्षिष्या
महे इति॥ लौकिकोऽधिकारोऽपेक्षालक्षण आश्रीयते नतु शास्त्रीयः। अपेक्षा च लक्ष्यवशात्समुदायविषयैवेति भावः। एनदिति। यद्येनादेशः क्रियते तदा तोमि सम्भावेस
सेनमिति प्राप्नोति। एनदिति चेष्यते इति वार्त्तिकारंभः। एनच्छ्रितक इति प्राप्नोतीति। अंतरंगानपि विधीन्बहिरंगो लुग्बाधत इति सदाद्यत्वमकृत्वा लुक्क्रियते। लुकि च कृते प्रत्यय

[redacted]। नैष दोषः। संबंधमनुवर्त्तिष्यते। इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ एतदस्त्र
तसोस्त्रतसौ चानुदात्तौ इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादावश् भवति। ततः द्वितीयाटौस्स्वेनः इदमः एतदस्त्र। तृतीयादाविति निवृत्तं। अथवा मंडूकग
तयोऽधिकाराः। यथा मंडूका उत्प्लुत्योत्प्लुत्य गच्छंति तद्वदधिकाराः। अथवा एकयोगः करिष्यते। इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादावेतदस्त्रतसोस्त्रतसौ चा
नुदात्तौ। ततः द्वितीयाटौस्स्वेनः इदमेतदसु। अथवोभयं निवृत्तं तदपेक्षिष्यामहे। एनदिति नपुंसकैकवचने वक्तव्यं। कुंडमानय प्रक्षालयैनत् प
रिवर्त्तयैनत्। यद्येनत् क्रियते एनो न वक्तव्यः। कारूपसिद्धिः। अथो एनं अथो एने अथो एनानीति। सदाद्यत्वेन सिद्धं। यद्येवमेनच्छ्रितकोन
सिध्यति। एनच्छ्रितक इति प्राप्नोति। यथालक्षणमप्रयुक्ते॥ ॥ ॥

लक्षणनिषेधात्सदाद्यत्वाभाव इति भावः। यथालक्षणमिति। यस्य प्रयोगो नोपलभ्यते तत्र लक्षणानुसारेण कर्त्तव्यं तत्र यदा नलुमतांगस्येत्यत्रां गाधिकारे निर्दिश्यते तदा
प्रत्ययलक्षणेनैनच्छ्रितक इति भाष्यं। अथानंगाधिकारविहितमपि ङ्यंगकार्यं निषिध्यते तदादेशाभावादेनच्छ्रितक इति भाष्यमित्यादुः॥ ॥ ॥

॥श्री॥ ॥श्री॥ ॥७॥

भा० कै० २
१२४
124

आर्द्धे॥ ॥जग्ध्यादिष्विति॥ अकृतो पदार्थे परसप्तम्यां सत्यां परस्मिन्नवस्थिते आर्द्धधातुके आदेशेन भाव्यं। तत्र विशिष्टार्द्धधातुकाश्रयेषु जग्ध्यादिषु यद्यपि दोषाभावस्तथापि
भूवीख्यान्नसुदोषः। तन्नेति। उत्सर्गे शब्दे न स्थानी विवक्षित आदेशे नापवादे नबाध्यमानत्वात्। सामान्याश्रयत्वादिति। आकृतिपदार्थाश्रयेणोत्तरं॥ जातिपक्षस्य दोषवत्त्वात्तिपा

आर्द्धधातुके॥ ॥जग्ध्यादिष्वार्द्धधातुकाश्रयत्वात्सति तस्मिन्विधानं। जग्ध्यादिष्वार्द्धधातुकाश्रयत्वात्सति तस्मिन्नार्द्धधातुके जग्ध्यादिभिर्भवितव्यं। किमतो य
त्सति भवितव्यं। तत्रोत्सर्गलक्षणप्रतिषेधः। तत्रोत्सर्गलक्षणं कार्यं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः। भव्यं प्रवेयं आख्येयं। एवमवस्थिते निष्ठे प्रत्ययस्या
देशः स्यात् एततः श्रवणं प्रसज्येत। नैष दोषः। सामान्याश्रयत्वाद्विशेषस्यानाश्रयः। सामान्ये ह्याश्रीयमाणे विशेषो नाश्रितो भवति। तत्रार्द्धधातु
कसामान्ये जग्ध्यादिषु कृतेषु यो यतः प्रत्ययः प्राप्नोति स ततो भविष्यति॥ सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति चेदुवर्णाकारान्तेभ्यो एप् द्विधिप्रसं
गः। सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति चेदुवर्णाकारान्तेभ्यो एप् प्राप्नोति। लव्यं पव्यमिति। आर्द्धधातुकसामान्ये गुणे कृते यि प्रत्यये सा[redacted]मान्ये च वान्तादेशे कृते हलन्तादिति एप् प्राप्नोति। इह च दित्सं धित्सं आर्द्धधातुकसामान्ये अकारलोपे कृते हलन्तादिति एप् प्रा
प्नोति। पौर्वापर्याभावाच्च सामान्येनानुपपत्तिः। पौर्वापर्याभावाच्च सामान्ये न जग्ध्यादीनामनुपपत्तिः। न हि सामान्ये न पौर्वापर्यमस्ति॥ ॥ ॥

=गविषादेष्वपि तु नितिः सर्वेषां निमित्तवाक्यपद्धानां आनिपत्त्वं स्यादिति सार्वधातुकार्धधातुकयोः वान्तोपि मसमयरसाद्वः प्रत्ययोस्तन्ने: अर्द्धं मद्यन्नौ लोषः स्यादिति भावः।१२=

दयि तु माह। उवर्णाकारान्तेभ्य इति। इदानीमाकृतिपक्षाश्रयस्यासंभवमाह। पौर्वापर्याभावाच्चेति। सामान्यस्य व्यापकत्वान्नित्यत्वाच्च देशकालकृतं पौर्वापर्यं नास्ति। सत्र एम०
म्याचेह परत्वं प्रतिपादितं। तस्माद्व्यक्तिपक्षः परत्वोपपत्त्यर्थमाश्रयणीयः। तत्र च भव्यादि सिद्धिः॥ ॥ ॥ ॥ १२४

इति२

वक्ष्यतितत्रेति॥ हलंतात्सपनो विधानादज्ग्रहणमंतरेणापि जंतादेव यतिसिद्धे ज्ग्रहणं भूतपूर्वे स्याप्यजंतत्वपरिग्रहार्थमित्यर्थः॥ अर्थसिद्धिरिति। एषैव प्रयोजनसंपत्तिरित्यर्थः
।विषये। बुद्धिस्थ इत्यर्थः॥ अभिधंक्ष्यते तत्रार्द्धधातुकत्वमित्येवं बुध्वा निरूपित इति भावः॥ अथवेति। व्यक्तिपक्षाश्रयणेऽपि न दोष इत्युक्तं भवति। नित्यानां भव्यादीनां शब्दानामनेन न
साधुत्वमात्रं प्रतिपाद्यते। तत्रार्द्धधातुके विद्यते या स्तुताभव्यादय आर्द्धधातुकावयवाः शब्दसंहतयः आर्द्धधातुकशब्देनार्द्ध आदित्वादद्भ्यसयोऽते नोच्यन्ते। उक्ति

सिद्धं तु सार्वधातुके प्रतिप्रतिषेधात्॥ सिद्धमेतत्। कथं। अविशेषेण जग्ध्यादीनुक्त्वा सार्वधातुके नेति वक्ष्यामि सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवा
स्तु। ननु चोक्तं जग्ध्यादिष्वार्द्धधातुकाश्रयत्वात्सति तस्मिन्विधानमिति। परिहृतमेतत्। सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति। ननु चोक्तं सामान्याश्र
यत्वाद्विशेषस्यानाश्रय इति चेदुवर्णाकारान्तेभ्यो एप द्विधिप्रसंग इति। नैष दोषः। वक्ष्यति तत्राज्ग्रहणस्य प्रयोजनमजंतभूतपूर्वमात्रादपि यथा स्या
दिति। यदप्युच्यते। पौर्वापर्याभावाच्च सामान्येनानुपपत्तिरिति। अर्थसिद्धेरेवैषा यत्सामान्येन पौर्वापर्यं नास्तीति असति पौर्वापर्ये विषयसप्तमी वि
ज्ञास्यते। आर्द्धधातुके विषये जग्ध्यादिषु योयतः प्राप्नोति स ततो भविष्यति। अथवार्द्धधातुकास्विति वक्ष्यामि। कास्तु। उक्तिषु युक्तिषु रूढिषु प्र
१ तीतिषु श्रुतिषु संज्ञास्तु॥ ॥ ॥ ॥

उक्तिने१

ष्विति। उच्चार्यंत इत्युक्तयस्ता एव शब्दसंहतयः। अन्ये तु उच समवाय इत्यस्य क्तिन्युक्तिशब्दः संहतिपर्याय इत्याहुः॥ समवायो हि संहतिः। युक्तिष्विति। अर्थेन संबद्धास्वित्यर्थः॥ रू
ढिष्विति। परमार्थतो नित्यास्वित्यर्थः। प्रतीतिष्विति। अनेन नित्यत्वेऽपि व्यवहारे नित्यत्वं प्रतिपाद्यते। तदेव दर्शयति। श्रुतिष्विति। एवंभूतानामेव व्यवहारे श्रूयमाणत्वादित्यर्थः॥ सं
ज्ञास्विति। बालव्युत्पत्तये प्रकृत्यादिविभागेन संज्ञायमानास्वित्यर्थः॥ ततश्चायमस्य च भावे नेति सप्तमी। आर्द्धधातुकास्तु संहतिषु व्युत्पाद्यमानासु अप्रत्यादीनां भावादय आ
१ देशा इत्युक्तं भवति॥ ० ॥

तकारादि

भा॰कै॰२ अदोजग्धि॥ ॥अंतरंगत्वादेश इति। प्रत्ययमात्रापेक्षत्वात्। ल्यबादेशस्तु पूर्वपदापेक्षसमासाश्रयत्वाद्बहिरंगः॥ अनादिष्टार्थमिति॥ प्रध्यायप्रस्थापेत्यादौ हित्वादिष्वकृते
१२५ घेवल्यबभ्यासादिसर्थः। कथंन प्राप्नोतीत्याह। बहिरंगलक्षणत्वादिति। अयमेवार्थो व्याप्रभृतिना स्फुटकृदित्याह। जग्धिविधिरिति। अकस्मादिति। निःप्रयोजनमित्यर्थः। सि
१२५ द्धमदइति। जग्धिविधानं सिद्धमित्यर्थः। ज्ञापनार्थं ल्यपि जग्धिविधानमित्याह। हिप्रभृतीनिति। ल्यबादेशो हरत्यपनयतिबाधत इत्यर्थः। तदुइति। उशब्दो निपातोऽवधा

ल्यभरतीति

=एवादिविधिनिःप्रयोजनसत्प्रधा नेहिं हितिहितं आदिनाप्रस्थानेमेत्रमधानिमानि मान्स्यामिनिकितीनीतं॰७= निःप्रयोजनमितिएतदर्थकं विनाकि प्रतिरूपकमकस्मादित्यव्ययमितिभावः।२=

अदोजग्धिर्ल्यप्तिकिति॥ ॥ल्यब्ग्रहणं किमर्थं॥ नतिकिति सेव सिद्धं। ल्यपि कृते न प्राप्नोति। इदमिह संप्रधार्यं ल्यप् क्रियतां आदेश इति। किमत्र कर्त्तव्यं।
परत्वाल्ल्यप्। अंतरंगत्वादादेशः॥ एवं तर्हि सिद्धे सति यत् ल्यब्ग्रहणं करोति तज्ज्ञापयत्याचार्यः। अंतरंगानपि विधीन्बहिरंगो ल्यब्बाधत इति। किमेतस्य ज्ञापने
प्रयोजनं। ल्यबादेश उपदेशिवद्वचनमनादिष्टार्थं बहिरंगलक्षणत्वादिति वक्ष्यति तन्न वक्तव्यं भवति। जग्धिविधिर्ल्यपि यत्तदकस्मात्सिद्धमदस्तिकि
तीति विधानात्। हिप्रभृतींस्तु सदा बहिरंगो ल्यब्भरतीति। तत्तर्हि वक्तव्यं। नवक्तव्यं। एषएवार्थः। जग्धौ सिद्धे ऽतरंगत्वात्तिकितीति ल्यबुच्यते॥ ज्ञापयत्यंतरंगाणां
ल्यपा भवति बाधनमिति॥ ॥लुङ्सनोर्घस्लृ॥ ॥घस्लृभावेऽच्युपसंख्यानं॥ घस्लृभावेऽच्युपसंख्यानं कर्त्तव्यं। प्रात्तीति प्रघसः॥ ॥हनो वध
लिङि॥ लुङि च॥ ॥किमयमदंत आहोस्विद्व्यंजनांतः। किं चातः। यदि व्यंजनांतः। वधो व्यंजनांत उक्तं किमुक्तं॥ ॥ ॥

=एतत्वतीकधातोरामुतस्यत्रस्थानाव्यस्यः॰९=

रार्थः। तद्विधेयेत्यर्थः॥ हनोवध[redacted]॥ ॥किमयमिति। किं कार्यार्थो ऽकारोऽग्योच्चारणार्थ इति प्रश्नः। वृद्धितत्त्वप्रतिषेधइति। अवधीदित्यत्रातोहलादेर्लघोरिति हल भा॰
तलक्षणा वृद्धिः प्राप्नोति वधक इति एवुलि वधादेशे औपसंख्यानिके कृते अत उपधाया इति वृद्धिः प्राप्नोति सा ज निवध्योश्चेति प्रतिषिध्यते। स्यानि वद्भावात्तु नतत्त्वं प्राप्तं॥ ०॥ १२५

इड्विधिश्चेति॥ अवधीदित्यादावेकाच्त्वादिट्प्रतिषेधः प्राप्नोतीतीड्विधेयः। अदंतत्वे त्व हलोपस्य स्थानिवत्त्वाद्वृद्धिनत्वादेरभावः। नत्वं लत्वं लोपस्य क्रियते। तत्राकारे लुप्ते ला
स्थानी न भवतीत्यधिकारो ऽपि स्थानिवत्त्वादंतो न भवतीति तत्त्वाभावः॥ उपदेशे ऽनेकाच्त्वाच्च प्रतिषेधाभावादिट् सिद्धिः॥ ॥ णाङ् लिटि॥ ॥ स्थानिवद्भावात्सिद्धमात्मनेपदं म
त्वा ह। ङित्करणमिति। इणादेशस्यापीति। ततश्चागासातां गामैदेवदत्ते ने त्यादौ ङित्वादीत्वप्रसंगः। णाङ् कुटादिभ्य इतिनू च्यमाने सेयं ग्रहणं भवतीति न तु णाङ् गताविति सस्याए

=अभावश्चेति॥ एवं च अनिवध्यो ऽश्चैस्त्रवधिग्रहणं तत्कार्यमिति भाष्यः॥२=

वध्यादेशो वृद्धिनत्वप्रतिषेध इड्विधिश्चेति। अयादंतः। न दोषो भवति। यथा न दोषस्तथास्तु॥ ॥ इणो गा लुङि॥ इणवदिक इति वक्तव्यं। इहापि य
थास्यात्। अध्यगात्। अध्यगातां। अध्यगुः॥ ॥ णौ गमिरबोधने॥ ॥ इणवदिक इत्येव। अधिगमयति॥ ॥ सनि च॥ ॥ इणवदिक इत्येव। अधि
जिगमिषति। अधिजिगमिषतः। अधिजिगमिषंति॥ ॥ गाङ् लिटि॥ ॥ ङित्करणं किमर्थं। गाङ् अनुबंधकरणं विशेषणार्थं। गा अनुबंधक
रणं क्रियते। विशेषणार्थं। क्व विशेषणेनार्थः। गाङ् कुटादिभ्यो ऽञ्णिन्ङिदिति। गा कुटादिभ्य इति ह्युच्यमाने इणादेशस्यापि प्रसज्येत। ज्ञापकं वा
सानुबंधकस्यादेशवचन इत्कार्याभावस्य। अथ वै तज्ज्ञापयत्याचार्यः सानुबंधकस्यादेश इत्कार्यं न भवतीति। किमेतस्य ज्ञापने प्रयोजनं। प्रयोजनं
चक्षिङः ख्याञ्। ङित इत्यात्मनेपदं न भवति। लटः शतृशानचावप्रयोजनं। पचमानो यजमान इति टित इत्येत्वं न भवति॥ ॥ ॥

तन्न ङकारस्यात्मनेपदविधौ चरितार्थत्वादादेशेनानन्यार्थे ङकारेणानुत्पन्नताभावात्। ज्ञापकं वेति। सानुबंधा यत्र षष्ठ्युच्चार्यते तत्राकृतायामेवेत्संज्ञायां तन्निबंधना
नि कार्याणि न प्रवर्तंत इति ज्ञापनार्थं ङकारोच्चारणमित्यर्थः॥ शतृशानचाविति। सूत्रे सह निर्दिष्टत्वादत्रापि सहोपादानं। शानजेवत्वात्मनेपदत्वात्प्रयोजनं॥ ×ज्ञायामादेशः

=तत्राकृतायामिति। एवं संज्ञात आदेशप्रसंगो ऽनुबंधविनिर्मुक्तपरार्थोपस्थितेः स्थानिवत्त्वेनोपपादितत्वादादेशप्रवृत्तिकाले स्थानिन्यसंनिहितत्वे स्वस्थानप्रयत्नाभावादनन्विधाविति निषेधाप्रवृत्तौ स्थानिवद्भावात्तत्प्रयुक्तकार्याणि प्राप्नुवंति=

सानुबंध

भा० कै० २
१२६
126

का०१

युवोरनाकाविति॥ भुज्युमंयूर्णां युप्रभृतिष्वादेशा निवारणाय नुनासिको काराानुबंधो युवुस्तत्रे निर्दिष्टो। तत्रादेशप्रवृत्त्या वेतस्माज्ज्ञापं उगित्कार्यो प्रवृत्तिरिति॥ नुमो रभावः॥ ज्ञा

पकस्यानित्याग्निं दृष्ट्वाह। मे श्चेति। तस्यस्यमिपामि सत्रमि प्रग्रहणमपनीय मिग्रहणं कर्त्तव्यमित्यर्थः। तेनसानुबंधः स्यानीनभवतीतिपित्कार्यं प्रवर्त्तते। अचिनवमिति। पित्वान्ङि

त्वाभावाद्गुणो भवति। माहिस्मचिनवमिति चानुदात्तत्वं। वार्त्तिककारस्याव्याप्तिमुद्भावयन्नाह। असत्यमिति। णल्वादिविधौ तुम्प्रिप्रसिपोः सानुबंधकयोरनुपादानात्स्ति

ति१

युवोरनाकौ॥ युवोरनाकौ च प्रयोजनं॥ नेदनः कारकः नेदनाकारिकेति। उगित्त्वक्षरोगौ॥ नुमौ न भवतः॥ मेश्वानानुबंधकस्याच्चनं। मेश्वानानुबं

धकस्याच्चकृत्यः। अचिनवं असुनवं अकरवं। असत्यमिदमुच्यते मेरिति। तिप्सिप्मिपामिति वक्तव्यं। इहापि यथा स्यात्। वेदवेत्य। ज्ञाप

ज्ञापकस्य संतिदोषाः संतिप्रयोजनानि। दोषाः समाः भूयांसो वा तस्मान्नार्थो ज्ञापकेन। कथं यानि प्रयोजनानि। नैतानि संति। इहतावच्चुक्षि

दुःखान्निति त्रिलक्षणसामर्थ्याद्धि भाषात्मनेपदं भविष्यति। लटः शतृशानचाविति। वक्ष्यसेतत्। प्रकृतानामात्मनेपदानां टेरेत्वं भवतीति।

१ युवोरनाकाविति। वक्ष्यसेतत्। सिद्धं तु युवोरनुनासिकत्वादिति॥ ॥

=दिंसमेतादिनिः चिंतावीजंतु स्वोल्पनेङरामादिविधौ सानुबंधकादेशत्वादिकार्यप्रवृत्तेनोनिर्भिप्रमन्तुर्ये विटिसुवचद्याघानिलाशेउणनिमेधमपाटावेन्प्रसंगस्तस्मात्तदुपलक्षणं तिक्षिपोर्ग्रहणमिति भाष्याशयः। अतएवोतरभाष्ये ज्ञापकस्य संति दोषाद्गुरुकं

दोष इति चिंत्यमेतत्। भूयांसो वेति। दोषबहुत्वादेपेरणानिंदामाह। तस्मादिति। विशेषणार्थं त्वगुङ्कत्करणं स्थितं। विभाषात्मनेपदमिति। कर्त्रभिप्राये क्रियाफले ह्यात्मनेपदं

नान्यत्रेत्यर्थः। प्रकृतानामिति। तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङिति सत्रयान्यात्मनेपदान्युपात्तानि तेषामित्यर्थः। सिद्धं त्विति। अनुनासिकत्वोरेवादेशो नान्ययोरित्यर्थः। ततश्च स्थानिनोरेवो

२ गित्वं नास्तीति कुतस्तदादेशयोरुगित्कार्यप्रसंगः॥ ॥ ॥ श्री॥ ॥

=अनुनासिकपरो नेदेवेतिः कृष्णश्रीहिः। अनुनासिकोपधपरकारो वकारान्ययोर्लक्षणयोर्धोदित्यर्थः। नान्ययोरितिः निरनुनासिकपरोर्यु वो विसर्गः। नात्वौ च भुज्युमंयुप्रभृतिष्वेव प्रतिभावः। उगित्वं नास्तीति युवोर्यणोरनुनासिकत्वेयुकारयोस्तलाभावादिसंज्ञाप्रवृत्त्याभा

राम०
१२६

चक्षिङः॥ ॥ लक्ष्ये रूपद्वयदर्शनादेकतराश्रयणे इतरासिद्धिप्रसंगात् पृच्छति। किमयमिति। असिद्ध इति। पूर्वत्रासिद्धमित्यधिकारे णत्वविधानानन्तरं शस्य यत्वं विभाषा वक्तव्यं।
न त्वयत्वस्य पूर्वत्रासिद्धत्वात् तन्निमित्तं कार्यं न प्रवर्तते णकारनिमित्तं च प्रवर्तते। चर्त्वे तु कर्तव्ये यत्वं सिद्धमिति ख्यस्य च लोपाभावादाख्यातेत्यादि सिध्यति। सौप्रख्ये वुञ्विधिरिति।
अकारप्रश्लेषात् सौप्रख्यशब्दे वुञ्विधिर्न भवतीत्यर्थः। सुप्रचष्ट इति सुप्रख्यः। आतश्चोपसर्ग इति कः। यत्वस्यासिद्धत्वात् सुप्रख्यस्य भाव इति योपधलक्षणो वुञ्भावात् स्य भ-
वतीति। तथा सुप्रख्येन निर्वृत्तो देशः सौप्रख्यः तत्र भवः सौप्रख्यीय इति धन्वयोपधाद्वुञिति वुञ्भावे वृद्धाच्छो भवति। निष्ठानत्वमिति। नध्याख्येति तु प्रतिषेधः ख्यापक

चक्षिङः ख्याञ्॥ ॥ किमयं क्शादिराहोस्वित् ख्यादिः। चक्षिङः क्शाञ् ख्याञौ। चक्षिङः ख्याञ् क्शादिः ख्यादिर्वा। अथ यदा क्शादिर्भवि-
ष्यति। केनेदानीं क्शादिर्भवति। चर्त्वेन। अथ ख्यादिः कथं। असिद्धे शस्य यवचनं विभाषा। असिद्धे शस्य विभाषा यत्वं वक्तव्यं। किं प्रयोजनं। प्रयोज-
नं सौप्रख्ये वुञ्विधिः। सौप्रख्य इति योपधलक्षणो वुञ्विधिर्न भवति। सौप्रख्यीय इति वृद्धा[redacted]छो भवति। निष्ठानत्वमाख्याने। आख्यात इति निष्ठान-
त्वं न भवति। कृद्विधिः पुंख्याने। पुंख्यानमिति विधिः कृन्न भवति। णत्वं पर्याख्याने। पर्याख्यानमिति णत्वं न भवति। सस्थानत्वं नमःख्याने। नमःख्या-
ने इति सस्थानत्वं न भवति। वर्जने प्रतिषेधः। वर्जने प्रतिषेधो वक्तव्यः। अवसंचक्ष्याः। असनयोश्च। असनयोश्च प्रतिषेधो वक्तव्यः। नृच-
क्षा रक्षः विचक्षण इति॥ ॥

=भाष्ये कशादिरथ यादिः यशादिरित्यादेर्हेतुं ख्यादिश्च गर्भीकुर्वीत। कशोनवयोः ख्ययोर्वा आदिर्भवेत्यर्थः।५८ संचक्ष्या इति दुर्जनादिः विषये सं वर्जनीया इत्यर्थः।५८

यनङ् सस्यैव प्रतिपदोक्तत्वात्। अस्य तु शस्य यत्वेन लाक्षणिकत्वादिति मन्यते। पुंख्यानमिति। पुमः खय्यम्पर इति रुत्वं न भवति यत्वस्यासिद्धत्वादम्परत्वाभावात्। ण-
त्वमिति। ख्या प्रकथन इत्यस्मादपि परस्य ल्युटो योगात् प्रख्यानादिति निपातनात् णत्वाभावः। सस्थानत्वमिति। जिह्वामूलीयस्येयं पूर्वाचार्यसंज्ञा। खर्परे विसर्जनीय इत्येवा-
त्र भवति। नृचक्षा रक्ष इति प्रयोगश्छान्दसः॥ भाषायां तु नृचक्षो रक्ष इति भवति। विचक्षण इति। अनुदात्तेतश्च हलादेरिति युच्॥ ॥ ॥

भा०कै०२ १२७ 127

बहुलमिति॥ सर्वत्र करणापेक्षमेतदुच्यते। अन्नप्राशे जग्ध्यभावः। वधकमिति॥ ण्वुलि वधादेशः। गात्रमिति॥ इणश्चोणादिके ष्ट्रनि गादेशः। विचक्षणोऽख्याञभावः।
अजिरे वीभावाभावः। अजिरशिशिरेति निपातनमनपेक्ष्यैतदुक्तं॥ ॥अजेर्वी॥ ॥इदमपीति॥ बलादौ वार्द्धधातुके विकल्पः सिध्यतीति भावः। सूत आहेति। प्रयोगदर्श

नयतीत्यर्थः

बहुलं तणि॥ बहुलं तणीति वक्तव्यं। किमिदं तणीति। संज्ञाछन्दसोर्ग्रहणं। किं प्रयोजनं। अन्नवधकगात्रविचक्षणाजिराद्यर्थं। अन्नाः। अन्नं वध
कं वधकं। गात्रं गात्रं पश्य। विचक्षणा। विचक्षणाः। अजिरा। अजिरे तिष्ठति॥ ॥अजेर्व्यघञपोः॥ ॥घञपोः प्रतिषेधे क्यप उपसंख्यानं।
घञपोः प्रतिषेधे क्यप उपसंख्यानं कर्तव्यं। इहापि यथा स्यात् समजनं समज्येति। तत्तर्हि वक्तव्यं। अपीस एव भविष्यति। कथं। अपीति ने
दं प्रत्ययग्रहणं। किं तर्हि प्रत्याहारग्रहणं। क्व सन्निविष्टानां प्रत्याहारः। अपोऽकारात्प्रभृत्याक्यपः पकारात्। यदि प्रत्याहारग्रहणं संवी
तिर्न सिध्यति। एवं तर्हि नार्थ उपसंख्यानेन नापि घञपोः प्रतिषेधेन। इदमस्ति चक्षिङः ख्याञ्वा लिटीति ततो वक्ष्यामि अजेर्वी भावो
भवति वा व्यवस्थितविभाषेति। तेनेह च भविष्यति प्रवेता प्रवेतुं प्रवीतो रथः संवीतिः। इह च न भविष्यति। समाज[redacted]ः समजः उदाजः
समजनं समज्येति। तत्रायमप्यर्थः। इदमपि सिद्धं भवति प्राजितेति। किं च भोः इष्यत एतद्रूपं। बाढमिष्यते। एवं हि कश्चिद्वैयाकरण आ
ह। कोऽस्य रथस्य प्रवेतेति। सूत आह। अहमायुष्मन् प्राजितेति। वैयाकरण आह। अपशब्द इति। सूत आह। प्राप्तिज्ञो देवानां प्रियः न त्वि

ष्टिज्ञः इष्यत एतद्रूपमिति॥ ॥ ॥

लस्य रथस्य

नेन विकल्पं द्रक्ष्यति। प्राप्तिज्ञ इति। सौत्रीमेव प्राप्तिं भवान् जानाति न त्वाचार्याणामिष्टिमित्यर्थः। देवानां प्रिय इति। देवशब्दो मूर्खवाची। मूर्खाणां च प्रियो मूर्ख एव भवति
। अथवा सुखासक्ततया शास्त्रेऽनभियोगेनेत्यभिप्रायेण नेनप्रतिपाद्यते। पराजितत्वादमर्षेणाह। अहो नु खल्विति॥ ॥ ॥ ॥ एम० १२७

वेन्उत इति। यदूपं स्यस्य संज्ञा। प्रजायां च सुशब्द इति मत्वा कुत्साप्रतिपादनाय आह। दुरूतेनेति। सूत्रकार आह इति। पूर्वे रणा इत्यस्माद् बहुलवचनात् कर्त्तरि गत्यादिसूत्रे च कारस्य
उक्तसमुच्चयार्थत्वाद् कर्त्तमानेक्तः। रथवाहस्य रथपूर्वे रणा तत्र त इति संज्ञा। वायुरिति। यजिमनीतिवा बहुलकाद्युचि रूपं॥ ॥राष्ट्रक्षत्रिया॥ तद्राजादिति। तेतद्राज इति तद्रा
जसंज्ञकप्रत्ययान्तात् स्वरस्येत्यर्थः। बौधिरिति। बुधौदुम्बशब्दात् प्राग्दीव्यतो साल्वावयवलक्षण इञ् ततस्तदंताद्यूनि यञिञोश्चेति फक्। तस्य लुक्। जाबालिरिति। जबालस्यापत्यम्

वैयाकरणास्त्वाह। तेन बाध्यामह इति। सूत्रकार आह। न खलु वेत्रः स्रुतः स्रुवतेरेव सूतः। यदि स्रुवतेः कुत्साप्रयोक्तया दुःसूतेनेति वक्तव्यं। न तर्हीदानीमिदं वक्तव्यं वा याविति वक्तव्यं च। किं प्रयोजनं। नेयं विभाषा किंतर्ह्यादेशो विधीयते। वा इत्ययमादेशो भवत्यजे यौ परतः वायुरिति॥ ॥
राष्ट्रक्षत्रिया॥ ॥अणिञोर्लुकि तद्राजाद्युवप्रत्ययस्योपसंख्यानं कर्त्तव्यं। बौधिः पिता। बौधिः पुत्रः। औदुम्बरिः पिता औदुम्बरिः पुत्रः। अपर आह। अणिञोर्लुकि क्षत्रियगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानं कर्त्तव्यमिति। जाबालिः पिता जाबालिः पुत्रः। अपर आह। ब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानं कर्त्तव्यमिति। किं प्रयोजनं। इदमपि सिद्धं भवति। भांडिजंघिः पिता भांडिजंघिः पुत्रः। कार्णखरकिः
×अहो खल्वनेन दुरु×५ (पिता कार्णखरकिः पुत्रः॥ ॥इति द्वितीयाध्यायस्य चतुर्थे पादे प्रथममाह्निकम्॥ ०॥ ॥

तद्राजस्य च तद्राजो न भवतीति द्वितीयं वचनमारब्धं। तेनेन्नं तात्कौलुकः। ब्राह्मणगोत्रमात्रादिति। तेन वैशपगोत्रादपि सिध्यति। व्यापकत्वाच्चेदमेव वचनं प्रमाणं।
भंडिजंघ कर्णखरकौ वैशेषो॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते द्वितीयाध्यायस्य चतुर्थपादे प्रथममाह्निकम्॥ ॥ ॥श्री॥ ॥

भा०कै०२
१२८
128

तद्राज ॥ इह तेनैव यग्रहणाद्बहुशब्देन बहुवचनमुच्यत इति लक्ष्यते संज्ञानां चैकदेशपदप्रयोगो दृश्यते यथा भीमसेनो भीम इति । अर्थग्रहणे तु तेनैवेति न वक्तव्यं प्रि
यवाङ्गा इत्यत्र बहुत्वे तद्राजस्य वृत्तस्य भावात् लुकः प्रसंगाभावात् बहुवचनं तु परमिति लुक्प्रसंगे तन्निवृत्तये तेनैव यग्रहणं कर्त्तव्यं । अप्रियामिति तु प्रतिषेधो बहुवचन
यग्रहणे नुपपन्नः ॥ आंग्यः स्त्रिय इत्यादौ स्त्रीप्रत्ययेन बहुवचनस्य व्यवधानात् लुकः प्रसंगाभावात् अर्थग्रहणे तु लुक्प्रसक्तौ स्त्रियामिति निषिध्यते तदेवं पक्षद्वयस्या
पि लिंगदर्शनाद्गुणदोषनिरूपणाय विचारः क्रियते तत्र पूर्वे प्रत्ययपक्षो विचार्यते ॥ तद्राजादीनामिति आदिशब्देन वक्ष्यमाणलुग्भाजो गृह्यंते । समासबहुत्व इति समासा

तद्राजस्य बहुषु तेनैवास्त्रियां ॥ ॥ तद्राजादीनां लुकि समासबहुत्वे प्रतिषेधः ॥ तद्राजादीनां लुकि समासबहुत्वे प्रतिषेधो वक्तव्यः । प्रियः आंग एषां त
इमे प्रियांगाः प्रियः वांग एषां त इमे प्रियवांगा इति किमुच्यते समासबहुत्वे प्रतिषेध इति यदा तेनैव चेत्कृतं बहुत्वमित्युच्यते न चात्र तेनैव कृतं बहुत्वं
भवति वै किंचिदाचार्याः क्रियमाणमपि चोदयंति तद्धा कर्त्तव्यं तेनैव चेद्बहुत्वमिति समासबहुत्वे वा प्रतिषेध इति ॥ अबहुत्वे लुग्वचनं । अबहुत्वे
च लुग्वक्तव्यः ॥ अतिक्रांतः आंगान् संग इति बहुवचने परतो यस्तद्राज इत्येवं कृत्वा चोद्यते ॥ अथ किमर्थं पुनरिदं न बहुवचन इत्येव सिद्धं न
सिध्यति ॥ बहुवचन इत्युच्यते । न चात्र बहुवचनं पश्यामः ॥ प्रत्ययलक्षणेन न लुमतातस्मिन्निति प्रत्ययलक्षणस्य प्रतिषेधः । [redacted]

र्थे बहुत्व इत्यर्थः ॥ न चात्रेति अन्यपदार्थे कृतत्वादत्र बहुत्वस्य भवति वै किंचिदिति एतावदेकं वाक्यं ॥ एवंविधं किंचिद्भवतीत्यर्थः ॥ किं तदित्याह । आचार्या इति सूत्रं क्रियमा
णमपि कुर्वतीत्यर्थः बहुवचनपक्षे सर्वथा वचने नैव दोषो निराकार्य इति प्रतिपादनमस्यो पन्यासस्य फलं । प्रत्ययपक्षे दोषोद्भावनेनार्थग्रहणं स्थापयति । अबहुत्व इति स राम०
मासार्थस्याबहुत्वात् बहुवचनपरत्वाभावे पि लुग्वक्तव्यः । प्रत्ययश्चेद्बहुत्व उत्पन्न इत्यर्थः । न बहुवचन इत्येवेति । शासमेवाश्रित्यांतरंगत्वात्पूर्वं तद्राजस्य लुक्करिष्यत इति १२८
भावः ॥ न चात्रेति अंतरंगानपि विधीन्सुपो धातुप्रातिपदिकयोरित्ययं लुक् प्रत्ययोत्तरपदयोश्चेति ज्ञापकादस्यैवात्र संभवाद्बाधत इति भावः ॥ ॥

=कुवक्तव्यमिति-व्याख्येयमस्यार्थः। व्याख्यानमाह-प्रत्ययश्चेदित्यादिः-२=

=ऊर्मीणां तन्त्रादिभिः तथाचाक्रियमाणमिति पर्युदासोनमसत्यमतिषेधप्रसज्यनतत्र लुक्तं भवति ॥४=

नलुमताङ्गस्येति वक्ष्यामीति॥ यथास्थितमेवन्यासमेवं व्याख्यास्यामि॥ लुमता लुप्तो यः प्रत्ययस्तस्मिन्यदङ्गं तस्य यत्कार्यमङ्गाधिकारविहितमन्यद्वा तन्नभवति लुक्प्रत्ययस्य कार्येन समस्तस्याङ्गस्येति प्रत्ययलक्षणेन भविष्यति॥ पंचभिरिति॥ क्रीतार्थस्याहीयस्य ठको ध्यर्द्धपूर्वेति लुक्। लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य लुक् तत्र प्रत्ययलक्षणेन भिस्समाश्रितास्त्र पक्षे यञञोश्चेति लुक् प्राप्नोति। नहियञ्लुगङ्गस्य कार्यमिति पंचगर्गा इति स्यात् पंचगार्ग्य इति चेष्यत इत्यर्थः। अस्त्रियामिति चात्र प्रतिषेधो न भवत्यर्थो तरेपुंसि संकान्तत्वात् द्विपदार्थस्येत्याह द्वंद्वे बहुष्विति यत्र कार पश्लेषः गार्ग्यश्च वात्स्यश्च वाज्यश्चेति द्वंद्वः। अत्रैकैकस्य बहुवचनपरत्वं नास्ति पञ्चसमास

नलुमताङ्गस्येति वक्ष्यामि॥ नैवं शक्यं इह हि दोषः स्यात् पंचभिर्गार्गीभिः क्रीतः पटः पंचगार्ग्यो दशगार्ग्यः द्वंद्वे बहुषु लुग्वचनं द्वंद्वे अबहुषु लुग्वक्तव्यः गर्गवत्सवाजा इति इह च लुग्वक्तव्यः गर्गेभ्य आगतं गर्गरूप्यं गर्गमयमिति इह चानय इति उदात्तनिवृत्तिस्वरः प्राप्नोति सिद्धं तु प्रत्ययार्थबहुत्वे लुग्वचनात्। सिद्धमेतत्कथं प्रत्ययार्थबहुत्वे लुग्वक्तव्यः यदि प्रत्ययार्थबहुत्वे लुगुच्यते अस्त्रियामिति वक्तव्यं। इह माभूत् आग्न्यः स्त्रियः वांग्यः स्त्रिय इति यस्य पुनर्बहुवचने परतो लुगुच्यते तस्यई कारेणाव्यवहितत्वान्न भविष्यति। यस्यापि बहुवचने परतो लुगुच्यते तेनाप्यस्त्रियामिति वक्तव्यं॥ ॥ ॥

पत्याभिः

द्व[illegible]हुवचनमुत्पद्यते तेन दंसा देवपरं न सर्वेभ्यः प्रत्ययनिर्देशपक्षे तस्मिन्निति निर्दिष्ट इति परिभाषोपस्थानाद्व्यवहितस्य लुको प्रसंगः। गर्गरूप्यमिति सुबंते न केवलं वाक्यं क्रियते प्रत्ययस्तु प्रातिपदिकाधिकारात्प्रातिपदिकादेवोत्पद्यत इति बहुवचनपरत्वाभावात् लुङ्‌न प्राप्नोति। अत्र य इति अत्रे रेइतश्चानिभ इति ढकि कित इत्यंतोदात्तत्वेन त्रयदि जसि परतो लुक्रियते तदा अनुदात्तस्य चयत्रोदात्तलोप इति जस उदात्तत्वं अर्थनिर्देशा श्रयेणापरिहारमाहसिद्धं त्विति॥ लुग्वचनात्। लुग्व्याख्यानादित्यर्थः॥ ०॥

=प्रकालनते पुकालनाम्नहतिज्ञापकात्लुग्यंगान्न च्छिनत्ति मते लन यद्दतिवक्ष्यमाणं द्रष्टव्यं ॥२७

(९॥ प्रसंगः१ ॥श्री॥ ॥२॥ ॥श्री॥

भा० कौ० २ आंबष्ठ्याइति॥ आंबष्ठस्यापत्यानि व ह्वंस्त्रियइतिवृद्धेत्कोसल्लाजादाञ्ज्यङिति ञ्यङः स्त्रीविति चापएकादेशः सचांत वद्भावान्न व्यवधायकइति लुक् प्रसंगे प्रत्ययपक्ष
१२८ गादिनाप्यस्त्रियामितिप्रतिषेधो वक्तव्य इत्यर्थः। एकादेशइति। अचः परस्मिन्निति स्थानिवद्भावः। तदेवमर्थे निर्दिश्य पक्षमेवास्त्रियामिति वक्तव्यं। द्वंद्वइति एकस्मिन्नेवार्थे प्रसक्तौ तयोरं
१२२ ससांबहुत्वाभावात् प्रत्ययपक्षेलं सत्यतावत्सिध्यतीति मन्यते॥ अर्थपक्षएवदोषमाह॥ गोत्रस्येति अपत्यप्रत्ययो लोपभाग्यदा बहुषु चेद्वर्तते युवापत्यविवक्षायामर्था
न्तरेद्वित्वविशिष्ट एकत्व विशिष्टे वा संक्रामतितदा बहुषुतस्योत्पन्नत्वात् लुक् प्राप्नोति लुग्वक्तव्यः। प्रत्ययपक्षेतु बहुवचन परत्वाभावाल्लुङ् भवति। द्व्येकयोरि

आंबष्ठ्यौ स्त्रियः॥ सौवीर्यौ स्त्रियइ त्येवमर्थे अप्राप्तिः पाव्यवधानं एकादेशेकृतेनास्ति व्यवधानं। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावा
द्व्यवधानमेव। द्वंद्वे बहुषु लुग्वचनं। द्वंद्वे अबहुषु लुग्वक्तव्यः। गर्गवत्सवाजाइति॥ गोत्रस्य बहुषु लोपिनो बहुवचनांतस्य प्रवृत्तौ द्व्येकयोरलुक्॥ गोत्र
स्य बहुषु लोपिनो बहुवचनांतस्य प्रवृत्तौ द्व्येकयोरलुग्वक्तव्यः। विदानामपत्यं माणवकः वैदः। वैदौ किमर्थमिदं ना चीसे वा लुक् सिद्धः। अचीलुच्य
तेनचात्राजादि पश्यामः प्रत्ययलक्षणेन। वर्णाश्रयेनास्ति प्रत्ययलक्षणं एकवचनद्विवचनांतस्य प्रवृत्तौ बहुषु लोपोप्राप्नोति। एकवचनद्विवचनां
तस्य प्रवृत्तौ बहुषु लोपो न निवक्तव्यः॥ वैदस्यापत्यं बहवो माणवका विदाः वैदयोर्वा विदाः अन्यो बहुषु यत्नो बहुष्विति लुच्यमानो लुङ् प्राप्नोति॥ मा
भूदेवं अजंतयद्बहुषु यत्नं तं यद्बहुष्विति सेवं भविष्यति नैवं शक्यं इहहि दोषः स्यात् काश्यपप्रतिकृतयः॥ ॥ ॥ ॥

तिं द्व्येकशब्दो द्वित्वैकत्ववृत्ती उपात्तौ अन्यथा बहुवचनं स्यात्॥ वैदइति विदस्यापत्यानि बहूनि इत्यत्र प्रत्ययः। तदं तादपून्यत इञि तीञ् तस्य एपक्षस्त्रियामिति जितइति लुक्॥
नाचीसे वेति। गोत्रेलुगची त्यनेन। अजन्तइति प्रत्ययग्रहणपरिभाषया तदं तत्वेस्थिते बहुष्विति विशेषणांतदंतस्यैवेतिमन्यते॥ ॥ ॥ राम०

=एवौ तिः एवकान अथेणापत्य अर्थेति तत्र एवतदंत विशेषणं वैदस्यापत्यं बहवो माणवका विदा इति भाष्यान्न प्रयोजनानुरोधात् (९॥ श्रीराम॥ ॥श्रीराम॥ ॥ ॥ १२८
तेषाजस्तत्रनुप्रत्ययादर्शनस्यैवलुगादिसंज्ञाविधानात् एवकार्यभात्का बहुष्विसनेन विशेष्यते न चैवमंगस्य [redacted] पत्यानि बहवो माणवकाअं॥

=एकैकस्य संज्ञानमिति॰ इदं यञञो अध्येनिवृत्तार्थानुवादे धेनोक्तं॰ तत्र हि वेदस्यापसंवरत्वे भाणव्यकाइस [redacted] न्नञो बहुगर्ग्यं बहुवित्तस्य यञञन्ताभ्यां संबंध आवश्यको न तु प्रत्ययमात्रेणानामसंबंधे [redacted] द्वंद्वे दोषः प्राप्नोति॰ प्रत्ययानामनेकार्थाभिधायित्वे तद्विषयेष्वप्यनेकार्थ [redacted] =
=नेकार्थाभिधायित्वसंभवात् एवं च गर्गादिस्त्रैणमनन्तरं कार्ष्णिसोमप्रत्ययनाञेण बहुवित्तस्य संबंधायोगेकादेशिद्वे आभ्यां यञञ्भ्यां काजगाड्यौ विग्रहे गर्गकौणिगाः इस न्न तु भवत्येवं॰ एवं तां गस्य प्रतिशन प्रभाणा इसा दौ न स्राजस्य बहुवृत्तस्य भावाद्गुणागमातावदिवपिकाद्ययमसिद्ध्यत्यय=

६।२

काश्यपाइति॥ काश्यपयस्यापसंगो त्रमिमिति विग्रहादिला द्वन्द्वततः काश्यपइवतत्र प्रति छतयइत्यत्रार्थे इवेशति कृतावितिकन्यस्य यस्य जीविकार्थे चापएप इति वा देवयथादि षर्चोस्तुप्रजनार्थो स्तुचित्रकर्मध्वजेष्विति पाठाल्लुप्॥ एतद्द्वन्द्वे त बहुषु वर्ततेइति लुक् प्रसंगः। अन्यत्र सयत्वेक स्मिन्नेवो सन्ने इत्यत्र बहुष्विति विज्ञायमाने नास्ति लुक् प्राप्तिस्तस्मात्तद्रंतविधिर्नाभ्युपगंतव्यः। प्रत्ययादर्शने स्यैव लुगादिसंज्ञाविधानात्प्रत्ययाएव कार्यभाक्त्वात्तु बहुष्वितस्य नेन विशेष्यंते॥ इदानीं पक्षद्वयेपि क्रमेणापरिहारउच्यते तत्रोयमिति॥ न वेति एकैकं प्रत्ययांतमनेकार्थाभिधायीति लुक्ति ध्वनीत्यर्थः। पश्चात्तद्द्वन्द्वपक्षे दोषः काश्यपाइति स उत्तरत्र परिहरिष्यते॥ अचोद्यं चोद्य

=भ्यपगमदधिकरणतामभ्युपगम्य दोषपरिहारउक्तः अर्थे द्वंद्ववृत्तिरिति तो ॒ क्रतदनभ्युपगमपक्षेऽसमर्थासामर्थ्याद्दंतवाच्यावाजातेकृतसंबंधेनुगितिमाव्यासमितानोदोषः आतिश्रवि ॒ शेष्यकृतापयतकृपा नगर्गपस्तलादिकृपेतिगार्गाइत्यत्रेत्यर्थ

काश्यपाइति॥ ततो यमाह यस्य प्रत्ययार्थबहुत्वे लुक् द्वंद्वे बहुषु लुग्वचनमित्यस्य परिहारः॥ न वा सर्वेषां द्वंद्वे बह्वर्थत्वात्। न वाएषदोषः किं कारणं सर्वेषां द्वंद्वे बह्वर्थत्वात्। सर्वाणि द्वंद्वे बह्वर्थानि कथं युगपदधिकरणविवक्षायां द्वंद्वो भवति। ततो यमाह यस्य बहुवचनेपरतो लुक् यदि सर्वाणि द्वंद्वे बह्वर्थानि अहमपीदमचोद्यं चोद्ये द्वंद्वे बहुषु लुग्वचनमिति ममापि सर्वत्र बहुवचनं परं भवति॥ ॥ लुक्कि कृतेन प्राप्नोति॥ प्रत्ययलक्षणेन नलुमतातस्मिन्निति प्रत्ययलक्षणस्य प्रतिषेधः। नलुमताङ्गस्येति वक्ष्यामि ननु चोक्तं नैवं शक्यं इह हि दोषः स्यात् पंच भिर्गार्गीभिः क्रीतः पटः पंच गार्ग्यो दशगार्ग्यः इति इष्टमेवैतत्संगृहीतं पंचगर्गो दशगर्गइत्येव भवितव्यं। तथेदमपरमचोद्यं चोद्येगर्गरूप्यं गार्गमयं अत्रापि बहुवचनइत्येव सिद्धं कथं समर्थात्तद्धित उत्पद्यते सामर्थ्यं च सुबंतेन। ततोयमाह यस्य प्रत्य[redacted]यार्थबहुत्वे लुक्॥ यदि समर्थात्तद्धित उत्पद्यते॥ ॥ ॥

इति॥ अचोद्यमर्हं वस्तुत्वया चोद्यं इत्यर्थः॥ चोदितं इच्छसयेत्याह दुहियाचीत्यत्रार्थग्रहणात् द्विकर्मकः॥ ॥ लुकि कृतइति॥ अंतरंगानपि विधीनबहिरंगो लुग्बाधतइति भावः॥ पंचगार्गा इति प्रत्ययलक्षणेन बहुवचनपरत्वाश्रयो लुक् प्रवर्ततइत्यर्थः। समर्थादिति समर्थानां प्रथमाद्वेत्यधिकारादिति भावः। सामर्थ्यं च सुबंतेनेति सुबंतेन द्वितीयस्य पदस्य संबंधवत्त्वे पदस्यैव प्रयोगार्हत्वात्। प्रातिपदिकाधिकारस्तु वृद्ध्यादिविशेषणार्थः॥ ॥

=भवति प्रत्ययलक्षणेन प्रवर्तनं भवति। एवं चाङ्गानां प्रसङ्गः ... प्रत्ययलक्षणं ... अचीत्यस्य विषयमनुमनीतिग्रीकाणेऽपि ...

भा०कै०२
१३०
130

अहमिति। यो ह्युभयो [redacted] र्दोषो न तमेकश्चोद्यः। तस्यापि ह्युत्रेति। प्रत्ययलक्षणेन। अची सेवेति। अयं च द्वयोरपि साधारणः परिहारः। परिवेति। पथ्यैवेत्यर्थः। यथाऽत्र गोदि
ती मागमः। अयं भावः। यत्कार्यं वर्णाश्रयं नप्रत्ययलाश्रयं तत्प्रत्ययलक्षणेन न भवति यथा गोहितमित्यादावग्वादयः। इमागमस्तु हलादि पित्सार्व धातुकाश्रयत्वात्
प्रत्ययाश्रय इति प्रवर्तते। एवं गोत्रे लुगचीत्यजादिप्रत्ययाश्रयत्वादलुक् प्रत्ययलक्षणेन प्रवर्तते। हलि नेति यथा गर्गेभ्य इति। पुनरत्रेति। अत्र प्रत्याधिकारादत्र लौकि
कस्यापत्यमात्रस्य गोत्रस्य ग्रहणमिति युवबहुत्वे यत्र नोक्ते तिलुग्भविष्यतीत्यर्थः॥ पुनरिति लुक्। शास्त्रवदलुक् शास्त्रस्यापि प्रवृत्तेरव्याघातादिति भावः। स
मर्थानामिति प्रतियोगं समर्थानां प्रथमादिरस्यानुवृत्तिरत्रायमर्थः। समर्थानां प्रथमस्य गोत्रप्रत्ययस्य लुग्भवतीति प्राथमकल्पिके च प्रत्ययार्थे वर्तमान

सूत्र॰
अहमचोद्यं चोद्ये। गोत्रस्य बहुषु लोपि नो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुगिति कथं यस्यापि बहुवचने परतो लुक् तेनाप्यलुग्वक्तव्यः तस्यापि ह्य
त्र बहुवचनं परं भवति न वक्तव्यः। अची सेवालुक्सिद्धः। अची तु च्यते न चात्राजादिं पश्यामः। प्रत्ययलक्षणेन ननु चोक्तं वर्णाश्रये नास्ति प्रत्य
यलक्षणमिति यदि वा कानि चिद्वर्णाश्रयाण्यपि प्रत्ययलक्षणेन भवन्ति। तथेदमपि भविष्यति। अथवाविशेषेणालुकमुक्त्वा हलि नेति वक्ष्या
मि यद्येवमविशेषणालुकमुक्त्वा हलि ने सुच्यते विदानामपत्यं बहवो माणवकाः॥ विदाः अत्रापि प्राप्नोति। अत्र तु पुनरस्य युववहुत्वे वर्तमान
स्य लुग्भविष्यति पुनरलुक् कस्मान्न भवति समर्थानां प्रथमस्य गोत्रप्रत्ययान्तस्यालुगुच्यते न चैतत्समर्थानां प्रथमं गोत्रप्रत्ययान्तं किं तर्हि द्वितीयमर्थ
१ मुपसंक्रान्तं॥ ॥अववस्पचैतदेव विज्ञेयं। अत्रिभरद्वाजिकावसिष्ठकश्यपिकाभृग्वंगिरसिका॥ ॥ ॥

सप्राथम्यं यथा गार्गीयाइति। अत्र युवप्रत्ययस्य लुकि कृते युवलक्षणं द्वितीयमर्थमुपसंक्रान्तो गर्गः शब्द इति प्राथम्याभावः॥ ॥अत्रिभरद्वाजिकेति। अत्रेरपत्यानीति तस्यान्नित्र इति
ढक्॥ भरद्वाजस्यापत्यानीति विदा घन्तततउभाभ्यां युववहुत्वे तत्र इन्नतस्यापत्यं स्त्रियामिति लुक्॥ ढको त्रिभृग्विति अत्रयोयन्नोस्यति ॥ततो त्रिभरद्वाजानां मैथुनिकेति द्वन्द्वाद्बु न्निति
वुन् तस्याकादेशः यदि द्वितीयमर्थमुपसंक्रान्तस्याप्यलुक् स्यात्तदा गोत्रे लुग चीति यथा न्यासेऽपि अलुगजः प्रसज्येतेत्यर्थः। वसिष्ठकश्यपिकेति वसिष्ठ शब्दादृष्यण्। कश्यपादन्याप्यर्वद्यून्यतइ
त्र तस्य लुक्कृते तो ऽपाणो लुक् वुन्॥ भृग्वंगिरसिकेति ऋष्यण्यन्त इत्रन्तस्य लुक्वुन्॥ ॥ ॥

राम०
१३०

=अपत्यस्यसर्पइति॰अकंभावः॰यस्कादिभ्योगोत्रइत्यतोगोत्रग्रहणमनुवर्तते॰आत्रुदन्तेनसमानसचनदर्थस्याधिसम्मनमिमोमणतात्नोवदनिंकृतेवर्तमानस्यपमंतस्याङ्गनस्तचलुगितिसूत्रार्थतोमयपमानिद्यतयःकामसपाकृत्सन्नकुक्र॰यैदस्मापत्यानिविदाइतिमु

कुत्सकुशिकिकेति॥ कुत्सादृष्यणकुशिकादृञं अपत्यसूत्रेवत्। गर्गेभार्गेविकेतिं गर्गशब्दाद्यञन्तस्य लुक् भृगुशब्दादृष्यण। तदन्ताद्यून्यत इञ्। तस्य लुक्॥ गर्गेभग्रहणं मेद्युनिकेति वुन्। अत्रात्रिभृग्वितिलुक्शास्त्रोगोपवनादिपाठेनप्रतिषिध्यते। यद्यपि द्वितीयमर्थमुपसंक्रान्तस्यापत्यलुक्स्यात्गोपवनादिषु न पठ्येत परिहितस्तु पथोक्ता र्थज्ञापनायेस्यर्थः। अर्थनिर्देशवादी परिहारमाह यदपीति लौकिकस्येति अपत्यसमासस्यर्थः। प्रतिषिद्धिं बहुत्वे यमयन्तो वर्तते न त्वपत्यबहुत्वइत्यर्थः। नचैगादितियद्यपि शास्त्रीयमपि न भवति तथापिस्थितपक्षाश्रयः परिहारो वक्तव्य इत्येवमुक्तं॥ इदानीं पक्षद्वयेहोषपरिगणनमाह यस्येति॥ तस्मादितिं अर्थपक्षेलुकोपर

कुत्सकुशिकिका इत्येवमर्थं॥ गर्गभार्गेविकाग्रहणं वा नियमार्थं गर्गभार्गेविकाग्रहणं वा क्रियते तन्नियमार्थं भविष्यति एतस्यैव द्वितीयमर्थमुपसंक्रान्तस्या लुग्भवति नान्यस्येति। यदप्युच्यते एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषुलोपो प्रति वक्तव्य इति माभूदेवं अङ्ग्यो बुरुषुयज्यो बहुष्विति अपत्यं तयद्वरुषुयज्ञं तयत्
वंशकं २ बहुषुस्येवं भविष्यति ननुचोक्तं नैरइह द्वितीयसंख्याकापपप्रतिकृतयः काश्यपा इति नैषदोषः लौकिकस्य तद्गोत्रस्य ग्रहणं नचैतल्लौकिकं गोत्रं यस्यबहु वचनेपरतो लुक्समासबहुत्वे तेन नेति प्रतिषेधोवक्तः तेनैवचेत्कृतं बहुत्वमिति वा वक्तव्यं पस्यप्रत्ययार्थबहुत्वे लुक्तेनास्त्रियामिति वक्तव्यं। यस्यबहुवच नेपरतोलुक्तस्यापमधिकोदोषः अत्र [redacted] य इति उदात्तनिवृत्तिस्वरः प्राप्नोति तस्मात्प्रत्ययार्थे बहुत्वे लुगित्येषपक्षो ज्यायान्॥ ॥ अर्थेहकृथं भवितव्यं गार्गीचवात्स्यश्चवाज्यश्चेतियदितावदस्त्रीविधिनाश्रीयते अपत्यत्वाद्द्वीतिकृत्वा भवितव्यं लुका अथ स्त्रीप्रतिषेधे नाश्रीयते अपत्यत्वस्त्रीतिकृत्वा भवितव्यं प्रतिषेधे
=स्त्रीपुंसात्मकसमुदायाभिधायीतियुगपदधिकरणवचनतानभ्युपगम्यदं॰२= ॥ नकिंपुनरत्रार्थस्यतत्वादेवासातुमर्हति॥ ॥ ॥

निमित्तकत्वादत्रयइसुदात्तनिवृत्ति [redacted] स्वराप्रसंगः॥ अस्त्रियामित्येतत्तुकृतमेव॥ ॥गार्गीचेति॥ एकैकंशब्दरूपं स्त्रीपुंसात्मकसमुदायाभिधायितत्रपर्युदासे सर्वेषां लुक्मा वां। प्रसज्यप्रतिषेधेतु न भाव्यमिति संदेहात्प्रश्नः। देवा इतिं दिव्यदृशः देवा इति पण्डिता इत्यर्थः॥ तत्रपर्युदासस्येकवाक्यतयालाघवात्प्राप्यत्वमितिकेचिदाहुः। अन्येतु नञ्बलेनगा गीशब्देनस्त्रीलयुक्तानामर्थानाम [stain] भिधानात् यत्रोलुक्तानभाव्यं अन्येषांतुभाव्यमिति॥ ॥ ॥ श्री॥ ॥ ॥

=रत्नपर्युदासइति॰युगपदधिकरणवचनतानभ्युपगमेपिस्त्रीत्वभिन्नसमानाधिकरणपसजातिबोधकयत्रतंतार्थयकुत्तेलुकःपर्युदासेनविधानात्तवैयांतत्समंगोकोमः। एवंप्रसज्यप्रतिषेधपक्षेस्त्रीत्वसमानाधिकरणापसजातिबोधकयत्रतंतार्थवकुत्ते=
=अर्थोतिधाकरनेदेनानिषेधविधानाल्लुगप्रसंगोवाच्यः॥३=यत्रोलुक्तानभाव्यमिति॰गार्गीत्याद्यस्येत्यर्थः॥युगपदधिकरणवचनतायाःस्त्रीत्वस्यातद्भिन्नस्यवापसजातिसामानाधिकरण्यानभ्युपगमेनतदसामानाधिकरण्यस्यचाभ्युपगमेनोक्तमित्याशयः॥१=
अनभ्युपगमेन

अर्थे नैवमिति वचनादिति। प्रसज्यग्रहणपक्षे तेनैवमिति वचनान्न भवति लुक् अर्थग्रहणपक्षे तत्प्रभावाभावोऽपि इति तथा च द्वितीयपक्षे एतदर्थमेवं तेनैवमिति किं कर्तव्यमिति प्रश्नाप्यय इति भावः। ज्ञापकद्वयमिति। एवं च तेनैवमिति न कार्यमिति भावः। तेनैवमिति कुर्वतापि युवप्रत्ययाभावोऽपि [illegible]

वैद

भा०कै०२ अथेति लोपभाजामन्येषां चयः समास इत्यर्थः। यदा लोपभागगर्गपदयोर्नामभिधानाद्द्वन्द्वार्थस्तदाश्रयेण किं न खलु क्रियतामित्यर्थे नैवमिति वचनादलोपि सन्निधिं कृतं बहु

१३१ त्वमिति माकारि लुगिति प्रश्नः। उभयं हीति। लोपकद्वयसञ्ज्ञावाचुभयं भवतीति भावः। भृगुवत्साग्रायणेष्विति अत्र द्वौ लोपिनौ तृतीयस्तु न इत्यादिक् गतो न लोपी द्वयोस्तु लुक्

१३। युगपदर्थानामभिधानादिति। बहुत्वसामानाधिकरण्यस्य चैकदेशबोध्यजातीयस्यादित्यपि द्रष्टव्यम्॥

कुलं वैद

अथ योर्लोप्यलोपिनोः समासस्तत्र कथं भवितव्यं उभयं हि दृश्यते शरद्वच्छुनकदर्भाः भृगुवत्साग्रायणेषु। नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवाना
मिति॥ तद्राजस्य बहुषु॥ यञञोश्च। यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसंख्यानं यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्याः उपसंख्यानं कर्त्तव्यं॥ गा
र्ग्यस्य कुलं गार्ग्यकुलं गर्गकुलं वा गार्ग्ययोः कुलं गार्ग्यकुलं गर्गकुलं वा वैदस्य कुलं विदकुलं वा वैदयोः कुलं वैदकुलं विदकुलं वा यञादीनामि
ति किमर्थं आङ्गस्य कुलं आङ्गयोः कुलं आङ्गकुलं। एकद्वयोरिति किमर्थं गर्गाणां कुलं गर्गकुलं। तत्पुरुष इति किमर्थं गार्ग्यस्य समीपं उपगा
र्ग्यं षष्ठ्या इति किमर्थं शोभनगार्ग्यः परमगार्ग्यः। यञञोः। बह्वच इञः प्राच्यभरतेषु। किमयं समुच्चयः प्राक्षु भरतेषु चेति अहोस्विद्भरतविशेषणं प्रा
ग्ग्रहणं प्राच्यो ये भरता इति किं चातः यदि समुच्चयः भरतग्रहणमनर्थकं न ह्यन्यत्र भरताः सन्ति अथ प्राग्ग्रहणं भरतविशेषणं प्राग्ग्रहणम
नर्थकं न ह्यप्राच्यो भरताः सन्ति एवं तर्हि समुच्चयः ननु चोक्तं भरतग्रहणमनर्थकं न ह्यन्यत्र भरताः सन्तीति नानर्थकं ज्ञापकार्थं किं ज्ञाप्यते एतज्
ज्ञापयत्याचार्यः अन्यत्र प्राग्ग्रहणे न भवतीति किमेतस्य ज्ञापने प्रयोजनं इञः प्राचां भरतग्रहणं न भवति औद्दालकिः पिता औद्दालकायनः

हणे भरत

कृतः। अ गार्ग्यकाश्यपगालवानामिति द्वौ लोपिनौ गालवस्तु कश्यपानां तो न लोपि नो लुक् कृतस्तदेवं ज्ञापकद्वयोपपत्तिः॥ यञः॥ यञादीनामिति इतः प्रभृति ये प्रत्यया एम०
बहुषु लुग्भाजस्ते यञादयः आदिशब्दस्य व्यवस्थावाचित्वात्। बहुद्वन्द्वतत्पुरुषयोर्द्वयोरपि सम्भवाद्दोषदर्शनाच्च प्रश्नः। किमयमिति। गोबलीवर्दवत्सामान्यविशेषवाचिनो १३१
रपि द्वन्द्वे सम्भवः॥ औद्दालकीति उद्दालको नाम भरतकुलोत्पन्नः॥

लोपीनवव

[illegible]

नगोप॥ विदाद्यंतर्गणो गोपवनादिः॥ न च तत्समासप्रयोगेणोदाहरणं पठितमिति आगरागनाद्युदाहरणं प्राप्नोतीत्याह गोपवनादिप्रतिषेध इति॥ ॥ उपका॥ द्वंद्वेपि लुग्विकल्पस्येष्टत्वात्प्रश्नः। किमर्थमिति। भ्राष्ट्रकिकापिष्टलय इति। अस्मादेवोदाहरणात्रिकक्कितवादिष्वस्य पाठो नार्षे इति लक्ष्यते। द्वंद्वाधिकारनिवृत्त्यर्थमिति॥ अधिकारशब्देनात्र शास्त्रीयोधिकारः स्वरितलिंगनिमित्तो न गृह्यते नहि पूर्वसूत्रोपात्तो द्वंद्वशब्द आसनस्वरितः। किं तर्हि लौकिकोधिकारो येऽपेक्षालक्षणो निविवर्त्तयिषितः द्वंद्वशब्देन तद्विषयोधिकारो

नगोपवनादिभ्यः॥ गोपवनादिप्रतिषेधः प्राग्घरितादिभ्यः। गोपवनादिप्रतिषेधः प्राग्घरितादिभ्यो द्रष्टव्यः। हारितः हारितौ बहुषु हरिताः। नगोपव। उपकादिभ्यो न्यतरस्यामद्वंद्वे॥ ॥ किमर्थमद्वंद्व इत्युच्यते। द्वंद्वे मा भूदिति नैतदस्ति प्रयोजनं इष्यते द्वंद्वे भ्राष्ट्रककपिष्ठलाः भ्राष्ट्रकिकापिष्ठलय इति। अत उत्तरं पठति अद्वंद्व [redacted] इति द्वंद्वाधिकारनिवृत्त्यर्थं। अद्वंद्व इत्युच्यते द्वंद्वाधिकारो निवर्त्तते तस्मिन्निवृत्ते अविशेषेण द्वंद्वे चाभविष्यति॥ उपकादिभ्यो॥ [redacted] ॥ आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्। आगस्त्यकौण्डिन्ययोः प्रकृतिनिपातनं। अगस्तिकुण्डिनजिसेतौ प्रकृत्यादेशौ भवत इति वक्तव्यं किं प्रयोजनं। लुक्प्रतिषेधे वृद्ध्यर्थं। लुक्प्रतिषेधे वृद्धिर्यथा स्यात्॥ ॥ चाद्देर ॥ श्री॥ ॥

मिधीयते तस्य नञा निषेधो द्योत्यते तेनायमर्थो द्वंद्वग्रहणापेक्ष्यते तदनपेक्षायां सामान्येन द्वंद्वे चाद्वंद्वे च लुग्विकल्पसिद्धिः॥ ॥ आगस्त्य॥ प्रकृतिप्रत्ययसमुदायस्य षष्ठीनिर्दिष्टत्वादादेशप्रसंगात्तन्माभूदागस्तीनां छात्रा इत्यत्रादेशे कृते वृद्ध्यलात्त्वेन स्यादित्याह प्रकृतिनिपातनमिति प्रकृतेरेवादेशो निपातनीयाः इत्यर्थः॥ लुक्प्रतिषेध इति गोत्रे लुगर्वीति लुक्प्रतिषिद्धे तत्सन्नियोगशिष्टस्यादेशस्याप्यभाव इत्यागस्त्यशब्दो धः सिध्यति॥ ॥ श्री॥ ॥ ७॥ ॥

भा०कौ०२ प्रत्ययांतनिपातनेहीतियदि प्रत्ययांतस्यादेशः क्रियेतेत्यर्थः॥ कौंडिना इति कुण्डिनादिभ्योगोत्र इत्यणस्यविशेषाभावदर्शनायोपन्यासः। अधिकारादितिलुग्ग्रहणमि
१३२ हानुवर्त्ततेतत्र प्रकृतेरादेशः प्रत्ययस्यलुगित्यर्थः संपद्यते। बहुषुलुग्भवतीति। बहुषुवर्त्तमानयोर्यः प्रत्ययस्तस्येत्यर्थः। प्रकृत्यादेशाविति सामर्थ्याल्लभ्योयमर्थः।

प्रत्ययांतनिपातनेहि वृद्ध्यभावः। प्रत्ययांतनिपातनेहिसति वृद्ध्यभावः स्यात् आगस्तीयाः कौंडिना इति। प्रकृतिनिपातनं क्रियते। केनेदानीं प्रत्यय
स्यलोपोभविष्यति। अधिकारात्प्रत्ययलोपः। अधिकारात्प्रत्ययलोपो भविष्यतीति तर्हि प्रकृतिनिपातनं कर्त्तव्यं योगविभागः करिष्यते। आगस्त्यकौंडि
न्ययोर्बहुषुलुग्भवति। ततः आगस्तिकुंडिनजित्येतौ च प्रकृत्यादेशौ भविष्यतः आगस्त्यकौंडिन्ययोरिति एवमपिप्रत्यययोरेव प्राप्नोति प्रत्ययांताद्धिभवा
न् षष्ठीमुच्चारयति आगस्त्यकौंडिन्ययोरिति नैषदोषः। यथापरिभाषितं प्रत्ययस्यलुक् श्लुलुपो भवंतीति प्रत्ययस्यैवभविष्यति अवशिष्टस्या
देशौ भविष्यतः॥ आगस्त्य॥ ॥यङोचि च॥ ऊतोचि॥ ऊतः अचीतिवक्तव्यं। इहमाभूत् सनीस्रंसो दनीध्वंस इति अथ ऊत इत्युच्यते॥ इहकस्मा
न्नभवति। योयूयः। विरोरूयः। विहितविशेषणमूकारग्रहणं ऊकारांताद्योविहित इति॥ तत्र्हि वक्तव्यं न वक्तव्यं॥ इष्टमेवैतत्संगृहीतं सनीस्रंसो
दनीध्वंस इत्येवंभवितव्यं। यङो॥ ॥ श्री॥ ॥

प्रत्ययेहि लुप्ते प्रकृतिरेवावशिष्यते। एवमपीति षष्ठी निर्दिष्टस्यादेशविधानादितिभावः। ततश्च लुक आदेशयोश्च पर्यायप्रसंगः यथापरिभाषितमितितत्रस्था
निभेदात्पर्यायाभावः॥ ॥यङोचि॥ सनीस्रंस इतियद्यत्र लुक् स्यात्तदानलुमतांगस्येति प्रत्ययलक्षणप्रतिषेधान्नलोपो न स्यात्। अतो लोपः। यस्य हल इति लोपे लुप्त एम०
प्रत्ययलक्षणं भवत्येव॥ ॥ ॥ १३२

गाति॥ पिबतेरिति॥ पिबतेर्यः स्थानी दृष्टः पाशब्दइत्यर्थः॥ ग्निति च पिबादेशो विहित इति पा पान इत्यस्यैव भौवादिकस्य ग्रहणं। अगासीदिति गै शब्दे पा रक्षणे अनयोर्यमरमन

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु॥ गापोर्ग्रहणे इण् पिबत्योर्ग्रहणं। गापोर्ग्रहणे इण् पिबत्योर्ग्रहणं कर्त्तव्यं। इणो योगा पावः पिबतेर्यः
पाशब्द इति वक्तव्यं इह मा भूत्। अगासीन्नटः अपासीद्धनमिति॥ तन्नर्हि वक्तव्यं। न वक्तव्यं। इणादग्रहणेनाव द्वार्त्तं निर्दिश्यते वय्यकं तु ग्विकरणस्य ग्र
हणमिति। पाग्रहेणेचापि वार्त्ते उक्तमेतत्सर्वं नैव पाग्रहणे अलुग्विकरणस्य ग्रहणमिति। गातिस्था॥ तनादिभ्यस्तथासोः। तथासो रात्मनेप
दवचनं। तथासोरात्मनेपदस्य ग्रहणं कर्त्तव्यं॥ आत्मनेपदं यो तथासाविति वक्तव्यं। एकवचनग्रहणं वा अथवा एकवचने ये तथासी इति वक्तव्यं।
तच्चावश्यमन्यतरत्कर्त्तव्यं। अवचने ह्यनिष्टप्रसंगः। अनुच्यमाने ह्येतस्मिन्ननिष्टं प्रसज्येत। अतनिष्टयं असनिष्टयमिति। तन्नर्हि
वक्तव्यं न वक्तव्यं। यद्यपि तावदयं तशब्दो दृष्टापचारः अस्त्यात्मनेपदं अस्ति च परस्मैपदं अस्त्येकवचनं अस्ति बहुवचनं। अयं तु खलु थास्
शब्दः अदृष्टापचारः आत्मनेपदमेकवचनं च। तस्यास्य कोन्यः सहायो भवितुमर्हति। अन्यदन आत्मनेपदादेकवचनाच्च। तद्यथा असगो र्हि
=गामापग्रहणेऽविशेषइति तु यत्र निपानि दें लेना स्मित नत्र च दिता र्थं ।= कर्मणि यक्रः॥ ११तीयेनार्थतिगोरे वा नीयते। नाश्चोन गर्द्दभ इति। तनादि॥ =क्तिपिनिर्दिष्टइति॥ ॥गाजेग्रहणं कर्मा॥
मातांसस्क इति सगागमः सिच श्चेद॥ निर्दिशादिति गां नीत्सादादिकादेशानुकरणत्वाद्वदादि लुकागाति शब्दं स्मिन्निपि निर्दिष्टः सर्वत्रे निद्युमास्थागापेत्सादाव पी
(?)त्यर्थः॥ तेन पायते इति पाते रीत्वाभावः। शोषणार्थस्य तु पापते त्वोक्षक्ति कृत्वात्सारूपस्य ग्रहणाभावः॥ ॥ ॥

भा०कै०२ आमः॥ लिय्यहणामिति याततनादप्यत्र लुक्स्यतीति तन्न नपेक्ष्यायं परिहार उक्तः। प्रत्ययमात्रस्येति तरवादेरपीत्यर्थः॥ एवं ह्याहेति यद्वृत्तिविपर्यये प्रयोगनिरस्तयेमेवत

१३३ द्वचनमित्यर्थः॥ आमंतस्यानभिव्यक्तपदार्थत्वाच्च स्वाभाविके वानुसन्निस्तरवादेत्तु गृह्णरेणव्याख्यायत इतिभावः। अर्थवत इति आम्प्रत्यययोर्निर्दिष्टार्थयोः प्रत्ययाः स्वा

133 र्थमभवंतीत्यर्थवान्। आम इति आमगत्वादिष्विव तस्य णालिवृत्तौ द्विर्वचनम एकादेशेच यद्रूपमामिति तस्यार्थवत्वात्तल्लोलुक्प्रसंगः॥ किं पुनरिति यदा विशेषविधिः

आमः॥ आमोलेर्लोपे लुङ्लोटोरुपसंख्यानं॥ आमः लेर्लोपे लुङ्लोटोरुपसंख्यानं कर्तव्यं॥ तौ वैजवापयो विदामक्रन्। अत्रसम्भवंतो विदां कुर्वंतु तत्र र्हिव क्रयं लियहणां निवृत्तिष्यते परिनिवर्त्तते॥ प्रत्ययमात्रस्य लुक्प्राप्नोतीष्यते एवं प्रत्ययमात्रस्य आतश्चेष्यते एवं ह्याह हकृन्वानुप्रज्यते लिरीति॥ यदि च प्रत्ययमात्रस्य लुग्भवतीति तत एतदुपपन्नं भवति॥ आमं तेभ्योणालः प्रतिषेधः॥ आमं तेभ्यो णालः प्रतिषेधो वक्तव्यः॥ शशामततामा॥ वृक्षौकृतायामाम इति लुक्प्राप्नोति। आमंतेभ्यो र्थवद्ग्रहणात्सलोः प्रतिषेधः॥ आमंतेभ्यो र्थवद्ग्रहणात्सलः। अप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः॥ लुक्सामान्यभवति। शशामततामेति अर्थवद्ग्रहणात्सलो प्रतिषेध इति चेदमः प्रतिषेधो वक्तव्यः [redacted] आम उक्ते वा किमुक्तं सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति किं पुनर्लुगादेशापवादः। आहोस्वित्कृते षादेशे लुग्भवति। लुगादेशापवादः इति ब्रूताभा

भवत्र्यलणादृभर्थवत आम्माद्यस्यय्रहणंनचैषो (व स्तु तिङ्कृ तस्पतुरभावः कस्यपदत्वस्य॥ एवं तत्वात्सिद्धा एवं तं पदमिति पदसंज्ञा भविष्यति॥ ॥ ॥

यवाम्नआमन्तेभ्याऽ२ [redacted]

सामान्यविधिर्बाधक इति न्याय आश्रीयते तदाल्लकारांतरेषु सावकाशात्तिवादयो विशेषविहितेन लुका बाध्यंत इत्यादेशापवादो लुक्संपद्यते। अयत्नविरोधादस्ति च संभवो यदुभयं स्यादिस्याश्रीयते तदाकृते षादेशेषु लुका भाव्यमिति संदेहात्प्रश्नः॥ लुगिति सत्यपि संभवे [redacted] बाधनं तत्कृदानेने वेदधिदानस्येति भावः [redacted] क राम० १३३

(स्येति निघातो दस्ति ङ्कार्यस्यानिष्टत्वात्प्रश्नः॥ ॥श्री॥ ॥ ॥

कथमिति ॥ आमः प्रत्ययत्वादप्रत्यय इति प्रातिपदिकसंज्ञानिषेधात्स्यमः लकारस्येति ॥ अतिदिः. तिङन्तसंज्ञाप्रतिषेधस्तिङ्भाविनो लकारस्याऽप्ययं तु तिङ्गावी न भवतीति
भावः। सुपः श्रवणमिति यद्यप्येकवचनस्य हल्ङ्याब्भ्यो दिल्लोपोऽस्ति तथापि द्विवचनबहुवचनश्रवणप्रसंगः। कृदंतमिति कृन्मेजंत इत्यत्र कृदंतस्य विशेषणं मेजं
तग्रहणं न तु कृतः। स्वरादिषु पठामिति पठ्यते ते न तद्धितप्रकरणान्तद्धितसाहचर्याद्वा न तद्धित एव गृह्यते यत्प्रकारयांचकारेति अत्र प्रशब्दस्यानुदात्तत्वमिष्यते तेन त
च्चतिवादिलुकि सति गतिर्गतौ इति ॥ दि. चोदात्तवतीति सिध्यति नान्यथेति भावः॥ कृदंतप्रकृतिस्वरत्वादिति प्रशब्दस्य कारयामित्यनेन समासे कृते समासस्वराव्यय॥

निघात ४ घातानि ४ यांचकारः स्वरः २

कथं स्वाद्युत्पत्तिः॥ लकारस्य कृत्वात् प्रातिपदिकत्वेन तदाश्रयं प्रत्ययविधानं। लकारः कृत्कृत्प्रातिपदिकमिति प्रातिपदिकसंज्ञा तदाश्रयं च प्रत्ययविधा
नं प्रातिपदिकाश्रयत्वात्स्वाद्युत्पत्तिर्भवति। सुपः श्रवणं प्राप्नोति। अव्ययादिति लुग्भविष्यति। कथमव्ययत्वं। अव्ययत्वं मकारान्तत्वात्। कृदंतं मांतम
व्ययसंज्ञं भवतीति अव्ययसंज्ञा भविष्यति स्वरः कथं। यत्प्रकारां कृदंतप्रकृतिस्वरत्वात्॥ कृदंतमुत्तरपदं प्रकृतिस्वरं भवतीत्येष स्वरो भविष्यति। त
थाच निघातौ सिद्धिः। तथा च निघातसिद्धिर्भवति च स्तुध्यामं याजयांचकार तिङः तिङ इति तस्य चानिघातः तस्माच्च निघातः सिद्धो भवति। नञा
तु समासप्रसंगः। नञा तु समासः प्राप्नोति नकारयां नहारयां नञस्तु वृत्ते न सह समस्यत इति समासः प्राप्नोति। उक्तं वा। किं तूक्तं असामर्थ्या
दिति। नात्र नञ आमंतेन सामर्थ्यं किं तर्हि लिङंतेन॥ न च कार। कारयां। नज हार। हारयामिति आमः॥ ॥ ॥

वे पदप्रकृतिस्वरयोः प्राप्तयोः कृत्स्वरस्ततः शेषनिघातेन गते उदात्तत्वं सिध्यतीत्यर्थः॥ तस्य चेति आमंतस्य तिङ. तत्वान्निघातो न प्रवर्तते॥ तस्मात्परं तिङंतं तु चकारा
दि निहन्यते। नकारयामिति तत्र अनत्नोपादि प्रसंगः। नच कारेति नञो लिङंतेन सामर्थ्यं प्रदर्शयति न त्वयं लौकिकः प्रयोगो व्यवहितविपर्यस्तप्रयोगानिवृत्त्य
र्थत्वादस्य प्रयोगारंभस्य। अतिव्यक्तपदार्थेन नञः सामर्थ्यं न क्षिप्यमाणार्थेनेत्यर्थः॥ ॥श्री॥ ॥७१८ ॥

नत्व १

अव्ययाग॥लिंगाभावादितिं॥नच स्त्रीसमानाधिकरणपक्षः स्त्रियामिसद्वाश्रितः भूतमियं ब्राह्मणीइसादौमूर्तादिभ्यः प्रत्ययप्रसंगादितिमावः॥किमिदमितिसं
ख्यायाअप्यभावात्सुपापिनोसत्वव्यमितिभावः॥प्रत्ययलक्षणमितिस्वाभाविकेवसुपोनुपलब्धिर्लुग्द्वारेणपदत्वनिबंधनकृत्वादिकार्यसिद्धयेनाख्यायत

अव्ययादाप्सुपः॥अव्ययाद्दापोलुग्वचनानर्थकंलिंगाभावात्॥अव्ययादापः लुग्वचनमनर्थकंकिंकारणं॥लिंगाभावात्॥अलिंगमव्ययं॥किमिदंमवा
न्सुपोलुकंमन्यते॥आपोलुकंनमन्यते॥यथैवत्वलिंगमव्ययंएवमसंख्यमपिसमेवतत् प्रत्ययलक्षणंआचार्यःप्रार्थयमानःसुपोलुकंमृष्यति
आपः पुनरस्यलुकिसतिनकिंचिदपिप्रयोजनमस्ति॥उच्यमानेप्येतस्मिन् स्वाद्युत्पत्तिर्नप्राप्नोति॥किंकारणं॥एकत्वादीनामभावात्॥एकत्वादिष्व
र्थेषु स्वादयोविधीयंते॥नचैषामेकत्वादयःसंति॥अविशेषेणोत्पद्यंते॥उत्पन्नानांनियमः क्रियते॥अपवादप्रकृतानर्थानयेक्ष्यनियमः॥केचप्र
कृताः॥एकत्वादयः॥एकस्मिन्नेकवचनंनद्वयोर्नबहुषु॥द्वयोरेवद्विवचनंनैकस्मिन्नबहुषु॥बहुष्वेवबहुवचनंनैकस्मिन्नद्वयोरिति॥अथवाआ
चार्यप्रवृत्तिर्ज्ञापयति॥उत्पद्यंतेऽव्ययेभ्यःस्वादयइतिपदयमव्ययादाप्सुपइतिलुकंशास्ति॥अव्ययादा॥ ॥ ॥

बृकृकु॰२

इत्सर्थः॥उच्यमानेपीतिप्रसक्त्यादर्शनस्यलोपादिसंज्ञाविधानाद नुत्पन्नस्यसुपोलुगसंभवादितिभावः॥एकत्वादिष्वितिवाक्येकवाक्यतयाविशिष्टएवा
र्थेस्वादिविधानादितिभावः॥अविशेषेणोतिवाक्यांतरनिरपेक्षत्वात्स्वादिविधिवाक्यस्येतिभावः॥पदयमितिएकवाक्यतापक्षेपिज्ञापकात्तुत्पत्तिरित्यर्थः॥०॥

नाव्ययी॥ योगव्यवसानमिति। योगविभाग इत्यर्थः। तुर्नियामक इति। अवधारणे तुर्वर्त्तते तेनामेवापंचम्या अलुक् पंचम्या अपीत्यर्थः संपद्यते। आपाटलिपुत्रमिति। आङ्यो
गे च पंचमी न त्वपादान इत्यसम्भावो भवतीत्यर्थः। न वेति। अव्ययीभावाद्विहितायाः पंचम्या अमादेशप्रतिषेधोऽत्र तूत्तरपदाद्विहिता पंचमी तस्याश्च समासप्रातिपदिकत्वात् लुकि
कृते समासात्तु शब्द उत्पद्यते तेन साम्भावः। भवतीति देति श्रूयत एवेत्यर्थः॥ आ उपकुम्भादिति। कुम्भस्य समीपमित्यव्ययीभावः॥ तत आङ्योगे पंचमी॥ तृतीया॥ सुमद्रमिति

नाव्ययीभावादतोऽम्त्वपंचम्याः। नाव्ययीभावादत इति योगव्यवसानं॥ नाव्ययीभावादत इति योगो वसेयः नाव्ययीभावादकारांतात्सुपो लुग्भवति॥ त
तोऽम् तु पंचम्या इति किमर्थो योगविभागः पंचम्या अम्प्रतिषेधार्थः। पंचम्या अमः प्रतिषेधो यथा स्यात्॥ एकयोगे ह्युभयोः प्रतिषेधः स्यात् अमः अ
लुकश्च। अस्तु तर्हि योगविभागः। कर्त्तव्यः न कर्त्तव्यः। तुर्नियामकः। तुः क्रियते। स नियामको भविष्यति। अमेवापंचम्या इति। अमि पंचमीप्रतिषे
धेऽपादानग्रहणं। अमि पंचमीप्रतिषेधेऽपादानग्रहणं कर्त्तव्यं। अपादाने पंचम्या इति वक्तव्यं किं प्रयोजनं कर्मप्रवचनीययुक्ते। प्रतिषेधा
र्थं कर्मप्रवचनीययुक्ते मा भूत् आपाटलिपुत्रं वृष्टो देवः। न वोत्तरपदस्य कर्मप्रवचनीययोगात् समासात् पंचम्यभावः। न वा वक्तव्यं किं कारणं। उत्तरपदमत्र
कर्मप्रवचनीययुक्तं उत्तरपदस्य कर्मप्रवचनीययोगात्समासात्पंचमी न भविष्यति यदा च समासः कर्मप्रवचनीययुक्तः भवति तदा प्रतिषेधः त
द्यथा आ उपकुम्भात्। आ उपमणिकात् इति। नाव्ययीभावात् तृतीयासप्तम्योर्बहुलं सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यं। सप्तम्या ऋद्धिन
दीसमाससंख्यावयवेभ्यो नित्यमिति वक्तव्यं। सुमद्रं सुमगधं ऋद्धिनदीसमासः उन्मत्तगंगं लोहितगंगं संख्या एकविंशतिभारद्वाजं त्रिपंचाशद्गौतमं त

२०॥ सि॰ टि॰

मद्राणां समृद्धिरित्यव्ययीभावः। एकविंशतिभारद्वाजमिति एकविंशतिर्भारद्वाजा वंश्याः त्रिपंचाशद्गौतमा वंश्या इति संख्या वंश्येनेति समासः। तत्र वर्त्तिपदानां सा
र्थोपसर्जनार्थोत्तराभिधायित्वात् गौतमभारद्वाजशब्दयोरेकत्वविशिष्टार्थान्तरे संक्रमात् लुगभावः। ततः सप्तमी॥ नित्योऽम्भावः। बहुलग्रहणलभ्योऽयमर्थो दर्शितः॥

=पंचम्याः सप्तम्याश्च बहुवचनांतत्वे समाससंज्ञायां तत्स्यैकवचनांतत्वं शब्दशक्तिस्वाभाव्यादिति भावः॥ १२

लुटः॥ श्वः कर्तेति प्रसज्ञी नाम चड्डारौरसः कृताः आत्मनेपदानामिति लुटः आत्मनेपदानां च प्रथमसंज्ञकानां डारौरसो भवन्तीति वक्तव्यं तत्र श्च विशेषविहितत्वाद डा

तास्थ्यःकार ताश्वःअध्येर टे

टे लुटः प्रथमस्य डारौरसः टितां टेरे विधे लुटो डारौरसः पूर्वविप्रतिषिद्धं॥ टितां टेरे विधे लुटो डारौरसो भवन्ति पूर्वविप्रतिषेधेन। एत्वस्यावकाशः पचते पचेते
पचन्ते डारौरसामवकाशः श्वः कर्ता श्वः कर्तारः इहोभयं प्राप्नोति श्वः अध्येता श्वः अध्येतार इति डारौरसो भवन्ति पूर्वविप्रतिषेधेन। स तर्हि पूर्व
विप्रतिषेधो वक्तव्यः। न वक्तव्यः॥ आत्मनेपदानां चेति वचनात्सिद्धं। आत्मनेपदानां च डारौरसो भवन्तीति वक्तव्यं। तच्च समसंख्यार्थं॥ तत्रावश्य
मात्मनेपदग्रहणं कर्तव्यं। समसंख्यार्थं संख्यातानुदेशो यथा स्यात्। अक्रियमाणे ह्यात्मनेपदग्रहणे षट् स्थानिनस्त्रय आदेशाः वैषम्या
त्संख्यातानुदेशो न प्राप्नोति। पूर्वप्रतिषेधार्थेन तावच्चार्थे आत्मनेपदग्रहणेन। इदमिह संप्रधार्यं डारौरसः क्रियन्तामेत्वमिति किमत्र कर्तव्यं पर
त्वादेत्वं नित्या डारौरसः कृतेप्येत्वे प्राप्नुवन्त्यकृतेपि प्राप्नुवन्ति॥ टेरेत्वमपि नित्यं कृतेष्वपि डारौरसः सु प्राप्नोत्यकृतेष्वपि प्राप्नोति। अनित्यमेत्वम
न्यस्य कृतेषु डारौरसः सु प्राप्नोत्यन्यस्याकृतेषु शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति॥ डारौरसोप्यनित्याः अन्यस्य कृते एत्वे प्राप्नुवन्त्यन्य
स्याकृते शब्दान्तरस्य च प्राप्नुवन्तो नित्या भवन्ति उभयोरनित्ययोः परत्वादेत्वं एत्वे कृते पुनः प्रसङ्गविज्ञानात् डारौरसो भविष्यन्ति। समसंख्या
र्थेन चापि नार्थ आत्मनेपदग्रहणेन। स्थानेन्तरतमेन व्यवस्था भविष्यति कुतश्चान्तर्यं अर्थतः एकार्थस्यैकार्थो द्व्यर्थस्य द्व्यर्थो बह्वर्थस्य बह्वर्थः। अथवाऽऽदे
शा अपि षडेव निर्दिश्यन्ते कथं एकशेषनिर्देशोयं अपथ्येतस्मिन्नेकशेषे सति किमयं कृतैकशेषाणां द्वन्द्वः डा च डा च डा डौ चौ रौ रश्च रश्च रः॥ डा च रौ च रश्च डारौरस इति॥

जश्च सश्च

आहोस्वित्कृतद्वन्द्वानामेकशेषः। डा च रौ च रश्च डारौरसः डारौरसश्च डारौरसश्च डारौरस इति॥ ॥ श्री॥ चरौ ॥७॥ रौच ॥७॥

देशैष्टेरेत्वं बाध्यते॥ पूर्वविप्रतिषेधार्थेनेति पूर्वविप्रतिषेधस्य यस्य योजनं तत्प्रयोजनेनेत्यर्थः॥ ॥श्री॥ ॥श्री॥ ॥

किंपुनरिति किमस्य पक्षस्यान्याय्यतरत्वात् अशक्यतरत्वमिति सामान्येन प्रश्नः॥ इह तु कृते एकशेषाणां द्वंद्वो ऽवकाशलाभे दप्रशास्यत इति न तदपेक्षः प्रश्नः॥ डारौरसः कृते टेर इति परत्वाट्टेरेत्वे कृते पुनः प्रसंगविज्ञानाड्डारौरसो भवंति यथे जक्षुरीजुरिति कृते संप्रसारणे द्विर्वचनं एष एवार्थ आर्येया दर्शितः॥ आंतर्यत इति य एवामी त्रयः स्य्यंते तेत एव सर्वेषां सन्तु डाविकार इति डादेश इत्यर्थः नानुबंधकृतमनेकाल्त्वमित्यलं सस्य स्यादिति डाश्च कर्तव्यः। स्वः कर्तेति॥ तिपोडादेशस्तस्यतास्यनुदात्तेत्व्

किं चातः॥ यदि कृते एकशेषाणां द्वंद्वः अनिष्टः समसंख्यः प्राप्नोति एकवचनद्विवचनयोर्डो प्राप्नोति बहुवचनैकवचनयोरौ प्राप्नोति द्विवचनबहुवचनयोर स्प्राप्नोति। अथ कृतद्वंद्वानामेकशेषः। न दोषो भवति। यथा न दोषस्तथास्तु॥ ॥किंपुनरत्र ज्यायः उभयं हि दृश्यते बहुशक्किकिटिकं बहूनि शक्किकिटि कानि बहुस्थाली पिठरं बहूनि स्थालीपिठराणि। डारौरसः कृते टेरे यथा द्वित्वं प्रसारणे समसंख्येन नार्थोस्ति सिद्धं स्थाने र्थतो ऽंतरतः आंतर्यतो व्यवस्था त्रय एव भवंति सर्वेषां टेरेत्वं च परत्वात् कृते पितस्मिन्निमे सन्तु डाविकारस्य शित्करणं सर्वादेशार्थं डाविकारः शित्कर्तव्यः किंप्रयोजनं सर्वादेशार्थं शित्सर्वस्येति सर्वादेशो यथा स्यात्। अक्रियमाणे हि शकारे अल्लोंत्यस्य विधयो भवंतीत्यंत्यस्य प्रसज्येत निघातप्रसंगास्तु॥ निघातस्तु प्राप्नोति श्वः कर्तेति तासेः परत्वसार्वधातुकमनुदात्तं भवतीत्येष स्वरः प्राप्नोति यत्ताव ऽच्यते। डाविकारस्य शित्करणं सर्वादेशार्थमिति। सिद्धमल्लोंत्यविकाराणां सिद्धमेतत्कथं अल्लोंत्यविकारात्। आस्त्वयम[redacted]लोंत्यस्य। का रूपसिद्धिः कर्तेति टेर्लोपात्लोपः इति टेर्लोपे न लोपो भविष्यति। अभत्वान्न प्राप्नोति टि

॥ टिकरणसामर्थ्याद्भविष्यति॥ ॥ ॥ ०॥

टिः टिरनुदात्तत्वं प्राप्नोति॥ यस्तु तिडुतिड इति निघातः स न लुट इति प्रतिषिद्धः टिरिति। आकारे टिरिति परतः सनकारस्य टिसंज्ञकस्य लोपः टित्करणसामर्थ्या दिति। नत एवानंगस्यापीति बोद्धव्यं नह्यंत्यस्य डादेशे कृते सतकारमंगं प्रत्यये परतो ऽंगसंज्ञाविधानात्॥ ॥ श्री॥ ॥ ०॥

भा०कै०२
१३६
136

अनित्वादिति॥ अनित्संज्ञकत्वादित्यर्थः। अंत्यस्येति प्रत्ययस्यावयवः स्यात्तु प्रत्ययस्तकारादेः समुदायस्य प्रत्ययत्वात्॥ ॥ प्रश्लिष्टनिर्देशादिति तत्रानेन कृते कादेशे न समुदायः प्रसाप्यते सोनेकाल्त्वात् सर्वादेशः प्रवर्त्तते। सर्वादेशे च तस्मिन्कृते एकादेशः क्रियते। सिद्धमलोंत्यविकारादिति पठुक्तं त

अनित्वाद्वा॥ अथवा अनित्वादेतत्सिद्धं किमिदमनित्वादिति अलोंत्यस्यायं [redacted]
भवन्नप्रत्ययः स्यात्। असत्यां प्रत्ययसंज्ञायामित्संज्ञानं असत्यामित्संज्ञायां लोपो न असति लोपे नेकाल्त्व यदानेकाल् तदा सर्वादेशः यदा सर्वादेशः त
दा प्रत्ययः। यदा प्रत्ययस्तदेत्संज्ञा। यदेत्संज्ञा तदा लोपः॥ ॥ प्रश्लिष्टनिर्देशाद्वा॥ अथवा प्रश्लिष्टनिर्देशोयं डा आ डा सोनेकाल्शित्सर्वस्येति सर्वादे
शो भविष्यति॥ यदा तर्ह्ययमंत्यस्य स्थाने भवति तदा तिङ्ग्रहणेन ग्रहणं न प्राप्नोति। तिङ्ग्रहणमेकदेशविकृतस्यानन्यत्वात्॥ एकदेशविकृतम
नन्यवत्तीति तिङ्ग्रहणेन ग्रहणं भविष्यति॥ स्वरः कथं। स्वरे विप्रतिषेधात्सिद्धं॥ डारौरसः क्रियंतामनुदात्तत्वमिति किमत्र कर्त्तव्यं। परत्वादनुदात्त
त्वं नित्या डारौरसः कृतेप्यनुदात्तत्वे प्राप्नुवंत्यकृतेपि प्राप्नुवंति अनुदात्तत्वमपि नित्यं कृतेष्वपि डारौरःसु प्राप्नोत्यकृतेष्वपि प्राप्नोति। अनित्यमनुदा
त्तत्वे प्राप्नुवंति॥ अन्यथा स्वरस्य कृते स्वरभिन्नस्य च प्राप्नुवंतो नित्या भवंति उभयोरनित्ययोः परत्वादनुदात्तत्वं अनुदात्तत्वे कृते पुनः प्र
संगविज्ञानात् डारौरसः टिलोपे उदात्तनिवृत्तिस्वरेण सिद्धं। न सिध्यति किं कारणं। अंतरंगत्वात् डारौरसः तत्रांतरंगत्वात् डारौरःसु कृतेषु अनुदात्तत्वं
क्रियतां टिलोप इति किमत्र कर्त्तव्यं॥ परत्वादिटिलोपेन भवितव्यं॥

त्रदोषमुद्भावयति यदा तर्हीति अप्रकृतपरिमाणस्य तिङ्संज्ञासंबंधान्निश्चयस्य सादेशे कृते रूपांतरयोगात्तिङ्ग्रहणे [redacted] नायहणात्सदलं नस्यादित्यर्थः॥
एकदेशविकृतमिति। पचतु पचंतित्यादौ यथा॥ ॥ ॥श्री॥ ॥श्री॥ ॥

एम०
१३६

न्याय्य एवायमिति॥ पूर्वप्रदर्शितो हि द्विरारोरसामंतरंगत्वादन्याय्यो यं तु न्याय्यः अथवा परविप्रतिषेध एवायं न पूर्वविप्रतिषेध इति न्याय्यत्वमुच्यते॥ इदमिहेति। द्वाशेरसः सुकृते
पुटिलोपे कृते संप्रधारणेयं नन्वकृते नुदात्तत्वे उदात्तनिवृत्तिस्वरेणैव प्राप्नोतीति तत्कथमनयोर्विप्रतिषेध इत्याह। नदेतदिति। योनुदात्तस्य स्थाने द्रादेशः स्यात्तन्निवृत्ताव
दनुदात्तस्तत्रोदात्तनिवृत्तिस्वरः सिध्यति यस्तु तशब्दस्य स्थाने क्रियते तत्र परत्वादिट्लोपे कृते नुदात्ते उदात्तलोपो न कृत इत्युदात्तनिवृत्तिस्वरो न सिध्यति पुनः प्रसं

एवं तर्हि स्वरे विप्रतिषेधात् सिद्धं न्याय्य एवायं स्वरे विप्रतिषेधः। इदमिह संप्रधार्यं अनुदात्तत्वं क्रियतामुदात्तनिवृत्तिस्वर इति किमत्र कर्तव्यं परत्वादनुदात्तत्वे
अनुदात्तत्वे कृते पुनः प्रसङ्गविज्ञानादुदात्तनिवृत्तिस्वरो भविष्यति। तदेतत् सिद्धं भवति यत्पिच्च नं यदपिच्च नं तत्र न सिध्यति तच्चापि सिद्धं कथं। इदमद्य
लसार्वधातुकानुदात्तत्वं प्रत्ययस्वरस्यापवादः। न चापवादविषये उत्सर्गोभिनिविशते पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः प्रकल्प्य वापवादवि
षयं तत उत्सर्गो [redacted] भिनिविशते तन्न तावदत्र कदाचित्प्रत्ययस्वरो भवति अपवादं लसार्वधातुकानुदात्तत्वं प्रतीक्षते तत्रानु
दात्तत्वे क्रियतां लोप इति यद्यपि परत्वाल्लोपः सोसावविद्यमानोदात्ते अनुदात्ते उदात्तो लुप्यते। प्रत्ययस्वरापवादो लसार्वधातुकानुदात्तत्वं ने
न तत्र न प्रसक्तः प्रत्ययस्वरः कदाचित्प्रत्ययस्वरप्रसक्तः सत्येवं निवृत्तिस्वरे नियोगशिष्टः। तेन चाप्यसावुदात्तो लोप इष्यते तथा न दोषः॥ ॥ इति श्रीभगवत्पतं
जलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य चतुर्थे पादे द्वितीयमाह्निकं॥ समाप्तश्चायं पादोध्यायश्च॥ ॥ ॥श्री॥

गविज्ञानान्त्वनुदात्तत्वमेव स्यादित्यर्थः॥ सोसावितिशास्त्रीयस्तत्रानुदात्तो न गृह्यते किं तर्हि उदात्तत्वाभावयुक्त इत्यर्थः। निवृत्तिस्वरे नियोगशिष्ट इति। निवृत्तिः प्रवृत्तिर्ये देवता
सिः प्रवर्तन्ते तेन देवापवादाभावादुदात्तत्वयुक्त इत्यर्थः। सर्वोक्त एवार्थः श्लोकेन संगृहीतः॥ ॥ इत्युपाध्यायजय्यटपुत्रकय्यटकृते भाष्यप्रदीपे द्वितीयस्याध्याय एम०
स्य चतुर्थे पादे द्वितीयमाह्निकं॥ समाप्तः प्रथमाध्यायः॥ लीखवानी हालचंद नामे काएथ संवत् १८२९ फाल्गुनकृष्णपक्षे द्वितीया॥ ॥ ॥ १३७